जतरूपार्थाकारेणरजतज्ञानाभासाकारेणपरिणमते।परिणामोनाम
उपादानसमसत्ताककार्यापत्तिः।विवर्तोनामउपादानविषमसत्ताककार्या श्री
पत्तिः।प्रातिभासिरजतंचाविद्यापेक्षयापरिणामंचैतन्यापेक्षयाविवर्तइति १०

चोच्यते। अविद्यापरिणामरूपं च तद्रजतम् अविद्याधिष्ठानोऽपि तत्र नियमात्। न-
नु चैतन्यनिष्ठरजतस्य कथमिदं रजतमिति पुरोवर्त्तिना तादात्म्यमुच्यते ✗ इदम
वच्छिन्न चैतन्ये वर्त्तते। अस्मन्मते सर्वस्यापि कार्यस्य स्वोपादानाविद्याधि
ष्ठाना ✗ यथा न्यायमते आत्मनिष्ठस्य सुखादेः शरीरनिष्ठत्वोपलंभः शरीरस्य
सुखाद्यधिकरणत्वावच्छेदकत्वात्। तथा चैतन्यमात्रस्य रजतं प्रत्यधिष्ठानत
याइदमवच्छिन्नं चैतन्यस्य तदधिष्ठानत्वेन इदमोवच्छेदक तया रजतस्य पु
रोवर्तिसंसर्गप्रत्ययउपपद्यते। तस्य च विषयचैतन्यस्य तदंतःकरणोपहितचै
तन्याभिन्नतया विषयचैतन्ये अध्यस्तमपि रजतं साक्षिण्यध्यस्तत्वे अहं रज
तमिति प्रत्ययः स्यात्। अहं सुखीतिवत् इति चेदुच्यते। नहि सुखादीनां अंतः
करणावच्छिन्नचैतन्यनिष्ठाविद्याकार्यत्वप्रयुक्तं। अहं सुखीति विज्ञानं। सु

भवाविषयं ... ।चाभ्यावधानुभवः

इदंशरीरमित्यादिः॥प्रकृतेच प्रातिभासिकत्वस्यप्रमातृचैतन्याभिन्नत्वमेवाधिन्नचतन्याविष्ठाविद्याकार्यत्वा...सस्वछत्रीयेदमाकारानुभवाहित

संस्कारजन्यत्वादिदमाकारानुभवविषयत्वं।नत्वहमाकारानुभवविषयत्वमितिध्येयं॥नन्वेवमपिमिथ्यारजतेतस्यसाक्षात्साक्षिभास्यत्वं...तयाज्ञानसंभवेवतत

...गोचरज्ञानाभासरूपायाअविद्यायास्तत्राभ्युपगमः किमर्थमितिचेदुच्यते॥स्वगोचरवृत्त्युपहितचैतन्याभिन्नसत्ताकत्वाभावस्याविषयापरोक्षत्वरूपतयार

रूप्यादीनां घटादिवत् शुक्त्यवच्छिन्नचैतन्य एवाध्यासात्। किंतु यदाकारानुभवसंस्का

रसहकृताविद्याकार्यत्वं यस्य तस्य तदाकारानुभवविषयत्वमित्येवानुगतंनि

यामकं। तथाचेदमाकारानुभवसंस्कारसहकृताविद्याकार्यत्वात् घटादे

रिदमाकारानुभवविषयत्वं। अहमाकारानुभवाहितसंस्कारसहकृताविद्या

कार्यत्वादंतःकरणादेरहमनुशांतरीयन्तुज्ञातमप्यविद्याकार्यमध्यस्तंचेति

कथं शुक्तिरूप्यवैलक्षण्यमिति चेन्न। तन्मतेपि सत्यत्वाविशेषादिकं ममापि

यद्वा घटाद्यध्यासे अविद्यैव दोषत्वेनापि हेतुः। शुक्तिरूप्यादौ काचादयो दो घ

षाः। तथाचागंतुकदोषजन्यत्वं प्रातिभासिकत्वप्रयोजकं। अत एव स्वप्नोपलब्ध श्री

दो रथादीनां आगंतुकनिद्रादोषजन्यत्वात् प्रातिभासिकत्वं ननु स्वप्नोपलब्धे एव तु ११

।ज्ञानस्यापरोक्षत्वमिष्यते तदभ्युपगमात्।ननु

भूतरथादेः स्मरणमात्रेणैव व्यवहारोपपत्तौ न रथादिसृष्टिकल्पनं गौरवादि
ति चेन्न। रथादेः स्मृतिमात्राभ्युपगमे रथं पश्यामि स्वप्ने रथमद्राक्षमित्यादिरथा
नुभवाविरोधापत्तेः। अथ रथान् रथयोगान् पथः सृजत इति रथादिसृष्टिप्रति
पादकश्रुतिविरोधापत्तेश्च। तस्माच्छुक्तिरूप्यवत् स्वप्ने ऽपि रथादयो ऽपि प्राति
भासिका यावत्प्रतिभासमवतिष्ठंते। ननु स्वप्ने ऽपि रथाद्यधिष्ठानतया ऽपलभ्य
मानदेशविषयस्यापि तदा ऽसन्निकृष्टतया अनिर्वचनीयप्रातिभासिकदेशो
ऽभ्युपगंतव्यः। तथा चाध्यासः कुत्रेति चेन्न। चैतन्यस्य स्वयंप्रकाशस्य रथाधिष्ठा
नत्वात्। प्रतीयमानरथादिरस्तीत्येव प्रतीयत इति सद्रूपेण प्रकाशमानं चैतन्यमे
वाधिष्ठानं। देशविशेषो ऽपि चिदध्यस्तः प्रातिभासिकः। रथादाविंद्रियग्राह्यत्वमपि
प्रातिभासिकं। तदेंद्रियाणामुपरमात्। अहंपदजडत्वापादनं तु पूर्ववन्निरसनीयं।

स्वप्नगजादयः। साक्षान्मायापरिणामइतिकेचित्। अंतःकरणद्वारापरिणा
मइत्यपरे। ननुगजादेःशुद्धचैतन्याध्यस्तत्वेइदानींतत्साक्षात्काराभावेनजाग स्त्रा
रणेस्वप्नानुवृत्तौ नगजादयोनुवर्त्तेरन्। उच्यते। कार्यविनाशोद्विविधः।
कश्चिदुपादानकश्चिद्विद्यमानेएवोपादाने। आद्योबाधः। द्वितीयस्तुनिवृत्तिः।
आद्येकारणमधिष्ठानतत्वसाक्षात्कारश्च तेन विनोपादानभूताविद्याया अनि
वृत्तेः। तदिहब्रह्मसाक्षात्काराभावात्। स्वप्नप्रपंचोसावाधिताधिष्ठानस्त्वं
निवृत्याबाध्यते। किंतुमुसलप्रहारेणघटादेरिवविद्यमानेचोपादाने। तथाच
प्रकृतेपिविरोधिप्रत्ययांतरोदयेनस्वजनकीभूतनिद्रादोषनाशेनगजादिनि श्री
वृत्तौकोविरोधः। एवंचशुक्तिरजतस्यशुक्त्यवच्छिन्नचैतन्यनिष्ठतूलाविद्याका १२

यत्वपक्षे [illegible] शुक्तिरितिज्ञानेनतदज्ञानेनसहरजतस्यबाधः।मू
लाविद्याकार्यत्वपक्षेमूलाविद्याया ब्रह्मसाक्षात्कारनिवर्त्यतयाशुक्तितत्व
ज्ञाननिवर्त्यतयारजतत्वस्यतच्चशुक्तिज्ञानानिवृत्तिमात्रंमुसलप्रहारेण
घटस्येवानतुशुक्तौरजतस्यप्रातिभाससमयेसत्वाभ्युपगमेनेदंरजतमिति
त्रैकालिकनिषेधज्ञानंनस्यात्।किंत्विदानीमिदंरजतमितिवदिदानींश्यामोघटो
नेतिचेन्न।नहित [illegible] त्ररजतत्वावच्छिन्नप्रतियोगिकाभावोनिषेधधीविषयः
किंतुलौकिकत्वपारमार्थिकत्वावच्छिन्नप्रातिभासिकरजतप्रतियोगिकःव्यधि
करणधर्मावच्छिन्नप्रतियोगिकाभावाभ्युपगमात्।ननुप्रातिभासिकेरजतेपा
रमार्थिकत्वमवगतंनवा॥अनवगतेप्रतियोगितावच्छेदकावच्छिन्नाज्ञानात्।
अभावप्रत्यक्षानुपपत्तिः।अवगमेअपरोक्षाभावस्यतत्कालीनविषयसत्ता

वस्ति

नियमात्। रजते पारमार्थिकत्वमिति अनिर्वचनीयरजतवद्देवोत्पन्नमिति तत्
दवच्छिन्नरजतसत्वे तदवच्छिन्नाभावस्तत्र कथं वर्तेत इति चेन्न। पारमार्थिकत्व
मस्याधिष्ठानस्य रजते प्रतिभाससंभवेन भास्यत्वेन रजते तिष्ठ पारमार्थिकत्वो
त्पत्त्यभ्युपगमात्। यत्रारोप्यसंनिकर्षं तत्रैव प्रातिभासिकवस्तूत्पत्त्यनंगीका
रात्। अत एवेंद्रियसन्निकृष्टजपाकुसुमगतलौहित्यस्य स्फटिके भानसंभवा
त् न स्फटिके निर्वचनीयलौहित्योत्पत्तिः। न चैवं यत्र जपाकुसुमं द्रव्यांतरव्य
वधानात् असंनिकृष्टं तत्र लौहित्यप्रतीत्या प्रातिभासिकं लौहित्यं स्वीक्रियत इति
चेन्न। इष्टत्वात्। एवं प्रत्यक्षभ्रमांतरेष्वपि प्रत्यक्षसामान्यलक्षणानुगमो य
थार्थप्रत्यक्षलक्षणासंभवश्च प्रदर्शनीयः। उक्तं प्रत्यक्षं प्रकारांतरेण द्विविधं
इंद्रियजन्यं तदजन्यं चेति। तत्रेंद्रियाजन्यं सुखादिप्रत्यक्षं। मनस इंद्रिय

श्री
१३

त्वनिराकरणात॥ इंद्रियाणिपंच। घ्राणरसनचक्षुःश्रोत्रत्वगात्मकानि॥ सर्वा
णि चेंद्रियाणि स्वस्वविषयसंयुक्तान्येव प्रत्यक्षज्ञानं जनयंति। तत्र घ्राणरस
नत्वगिंद्रियाणि स्वस्थावस्थितान्येव गंधरसस्पर्शान् गृह्णंति। चक्षुःश्रोत्रे तु स
त एव विषयदेशं गत्वा स्वस्वविषयान् गृह्णीतः। श्रोत्रस्यापि चक्षुरादिवत्परिच्छि
न्नतया भेर्यादिदेशगमनासंभवात्। अत एवानुभावो भेरीशब्दो मया श्रुत इति॥
ब्रे ८ वीचितरंगन्यायेन कर्णशष्कुलीप्रदेशे अनंतशब्दकल्पनाया गौरवं तस्यात्॥ तदेवं
व्याख्यातं प्रत्यक्षं॥ ॥अथानुमानं निरूप्यते॥ ॥अनुमितिकरणमनुमानं
अनुमितिश्च व्याप्तिज्ञानत्वेन व्याप्तिज्ञानजन्या। व्याप्तिज्ञानानुव्यवसायादेस्त
त्वेन तज्जन्यत्वाभावान्नानुमितित्वं। अनुमितिकरणं च व्याप्तिज्ञानं। तत्संस्का
रो वा अवांतरव्यापारः। न तु तृतीयलिंगपरामर्शो अनुमितौ करणं। तस्यानुमि

तिहेतुत्वासिध्या तत्करणस्य दूरंनिरस्तत्वात्। नचसंस्कारजन्यत्वेनानुमि
तेः। स्मृतित्वापत्तिः। स्मृतिप्रागभावजन्यत्वस्यस्वविषयसंस्कारध्वंससाधारण
संस्कारजन्यत्वस्य तदप्रयोजकत्वात्। नचयत्र व्याप्तिस्मरणादनुमितिस्त
त्रकथंसंस्कारो हेतुरितिवाच्यं। व्याप्तिस्मृतिस्थलेपितत्संस्कारस्यैवानुमिति
हेतुत्वात्। नहिस्मृतेः संस्कारनाशकत्वनियमः। स्मृतिधारादर्शनात्। नचानु
द्बुद्धसंस्कारादप्यनुमित्यापत्तिः। तदुद्बोधस्यापिसहकारित्वात्। एवंचायंधू
मवानितिपक्षधर्मताज्ञाने धूमोवह्निव्याप्यइत्यनुभवाहितसंस्कारोद्बोधेचस
तिवह्निमानित्यनुमितिर्भवति। नतुमध्येव्याप्तिस्मरणंतज्जन्यंवह्निव्याप्य
धूमवानयमित्यादिविषयविशिष्टज्ञानंवाहेतुत्वेनकल्पनीयं। गौरवान्माना श्री०
ए भावाच्चातत्र व्याप्तिज्ञानंवह्निविषयज्ञानोत्पत्तौ कारणं। ननुएवंतविषयता ९४

शेइति पर्वतो वह्निमानिति ज्ञानस्य वह्न्यंश एवानुमितित्वं पर्वताद्यंशे तद्
शे प्रत्यक्षत्वस्योपपादितत्वात्। व्याप्तिश्चाशेषसाधनाश्रयाश्रितसाध्यसा
मानाधिकरण्यरूपा। सा च व्यभिचारादर्शने सति सहचारदर्शनेन गृह्यते।
तच्च सहचारदर्शनं भूयोदर्शनं भूयोदर्शनं चेति विशेषो नादरणीयः। सह
चारदर्शनस्यैव प्रयोजकत्वात्। तच्चानुमानमन्वयीरूपमेकमेव। न तु केव
लान्वयी। सर्वस्यापि धर्मस्यास्मन्मते ब्रह्मनिष्ठात्यंताभावप्रतियोगित्वेना
त्यंताभावासाध्यकत्वरूपकेवलान्वयित्वासिद्धेः। नाप्यनुमानस्य व्य
तिरेकरूपत्वं साध्याभावे साधनाभावनिरूपितव्याप्तिज्ञानस्यासाध्यानु
मितावनुपयोगात्। कथं तर्हि धूमाद्यन्वयव्याप्तिमविदुषोपि व्यतिरेकव्या
प्तिज्ञानादनुमितिः। अर्थापत्तिप्रमाणादिति वक्ष्यामः। अत एवानुमा

श्रा

नैनान्वयव्यतिरेकित्रूपत्वं। व्यतिरेकव्याप्तिज्ञानस्यानुमित्यहेतुत्वात्। तच्चा
नुमानं स्वार्थपरार्थभेदेन द्विविधं। स्वार्थं तूक्तमेव। परार्थं न्यायसाध्यं। न्यायो
ऽवयवसमुदायः। अवयवाश्च त्रय एव। प्रतिज्ञाहेतूदाहरणरूपाः। उदाहरणो
पनय निगमनरूपा वा। न तु पंचावयवरूपाः। अवयवत्रयेणैव व्याप्ति
पक्षधर्मतयोरुपदर्शनसंभवेनाधिकावयवद्वयस्य व्यर्थत्वात्। एवमनु
मानेन निरूपितेतस्माद् ब्रह्मातिरिक्तनिखिलमिथ्यात्वसिद्धिः। तथा हि। ब्रह्म
भिन्नं सर्वं मिथ्या ब्रह्मभिन्नत्वस्यैव लाघवेन प्रयोजकत्वात्। मिथ्यात्वं च स्वा
श्रयत्वेनाभिमतयावन्निष्ठात्यंताभावप्रतियोगित्वं। अभिमतपदमसंभव
वारणायेत्युक्तं। सर्वेषामपि भावानां स्वाश्रयत्वेन संमते। प्रतियोगित्व श्री
मत्यंताभावं प्रति मृषायते॥ १॥ यद्वा अयं पटः एतत्तंतुनिष्ठात्यंताभावप्रति १५

या व प द म र्थ्यां त न वा र णा य

योगीपटत्वादंशि।त्वात्पटांतरवदित्याद्यनुमानं मिथ्यात्वेप्रमाणं। तदु
क्तं। अंशिनः श। स्वांशगात्यंताभावस्यप्रतियोगिनः। अंशित्वादितरांशीवदि
तेकेवलगुणादिषु। इति। नचघटादेः मिथ्यात्वेसन्। घट इतिप्रत्यक्षेणबाधेः।
अधिष्ठानब्रह्मसत्तायाः तत्रविषयतयाघटादेः सत्यत्वासिद्धेः। नचनीरू
पस्यब्रह्मणः कथंचाक्षुषज्ञानविषयतेतिवाच्यं। नीरूपस्यापिरूपस्यापि
रूपादेः प्रत्यक्षविषयत्वात्। नचनीरूपस्यद्रव्यस्यचक्षुराद्ययोगित्वमिति
नियमः। अस्मते। ब्रह्मणः द्रव्यत्वासिद्धेः। गुणाश्रयत्वंसमवायिकारणत्वं
वाद्रव्यमितितेभिमतं। नहिनिर्गुणस्यब्रह्मणोवागुणाश्रयता। नापिसम
वायिकारणता। समवायासिद्धेः। अस्तुवाद्रव्यत्वंब्रह्मणः। तथापिनीरू
पस्यकालस्येवचाक्षुषादिज्ञानविषयत्वेनविरोधः। यद्वात्रिविधंसत्वं

पारमार्थिकत्वंब्रह्मणः।व्यावहारिकंसत्वमाकाशादेः।प्रतिभासिकंस
त्वंशुक्तिरूप्यादेःतथाचघटःसन्निति प्रत्यक्षस्यव्यावहारिकसत्वविष
यत्वेप्येवातिनविरोधः।अस्मिन्पक्षेच मिथ्यात्वलक्षणेपारमार्थिकत्वा
वच्छिन्नप्रतियोगिकत्वमत्यंताभावविशेषणंद्रष्टव्यं।तस्मादुपपन्नं
मिथ्यात्वमिति॥ ॥अथोपमानंनिरूप्यते॥ ॥सादृश्यप्रमाकरणमुपमा
नं।तथाहि।नगरेषुदृष्टगोपिंडस्यपुरुषस्यवनंगतस्यगवयेंद्रियसन्निक पै
र्षेसतिभवती।तिरयंगोपिंडोगोसदृशइतितदनंतरंचभवतिनिश्चयोऽ
नेनसदृशीमदीयागौरितितत्रान्वयव्यतिरेकाभ्यांगवयनिष्ठगोसादृश्य श्री
ज्ञानंकरणं।गोनिष्ठगवयसादृश्यज्ञानंफलं।नचेदंप्रत्यक्षेणसंभवति।गो १६
पिंडस्यतदेंद्रियासंन्निकर्षात्।नाप्यनुमानेन।गवयनिष्ठगोसादृश्य च

गौर्गवयसदृशी

पारमार्थिकत्वं ब्रह्मणः। व्यावहारिकं सत्त्वमाकाशादेः। प्रातिभासिकंस
त्वं शुक्तिरूप्यादेः तथा च घटः। सन्निति प्रत्यक्षस्य व्यावहारिकसत्त्वविष
यत्वेन प्रामाण्यमेवेति न विरोधः। अस्मिन्पक्षे च मिथ्यात्वलक्षणे पारमार्थिकत्वा
वच्छिन्नप्रतियोगिकत्वमत्यंताभावविशेषणं द्रष्टव्यं। तस्मादुपपन्नं
मिथ्यात्वमिति॥ ॥अथोपमानं निरूप्यते॥ ॥सादृश्यप्रमाकरणमुपमा
नं। तथा हि। नगरेषु दृष्टगोपिंडस्य पुरुषस्य वनं गतस्य गवेंद्रियसन्निक पे
र्षे सति भवति प्रतीतिरयं गोपिंडो गोसदृश इति तदनंतरं च भवति निश्चयो अ
नेन सदृशी मदीया गौरिति तत्रान्वयव्यतिरेकाभ्यां गवयनिष्ठगोसादृश्य श्री
ज्ञानं करणं। गोनिष्ठगवयसादृश्यज्ञानं फलं। न चेदं प्रत्यक्षेण संभवति। गो १८
पिंडस्य तदेंद्रियासंन्निकर्षात्। नाप्यनुमानेन। गवयनिष्ठगोसादृश्य व

गौर्गवयसदृशी

स्यादौता दृशसंसर्गाबाधात्। सप्रजापतिरात्मनो वपामुदखिददित्यादावपि
तात्पर्यनूपपश्रूप्राशस्त्याबाधायोग्यता। आसत्तिश्च पदजन्यपदार्थस्योपस्थि
तिर्भानांतरोपस्थापितपदार्थस्यान्वयबोधाभावात्। अतएवा श्रुतस्थले तत्त
त्पदाध्याहारो द्वारमिति। अतएव पिधेहि द्वारमितिपदाध्याहारः। अतएव
विकृतिषु सूर्याय जुष्टं निर्वपामीतिपदप्रयोगः। पदार्थश्च द्विविधः। शक्यो ल
क्ष्यश्चेति। तत्र शक्तिर्नाम पदानामर्थेषु मुख्या मुख्या वृत्तिः। यथा घटपद
स्य पृथुबुध्नोदराकारवस्तुविशेषे वृत्तिः। सा च वृत्तिः पदार्थांतरं। सिद्धांते
कारणेषु कार्यानुकूलशक्तिविषयत्वं शक्यत्वं। तच्च जातेरेव नतु व्यक्तेः। व्यक्तिनां न
मानेत्येन गुरुत्वात्। कथं तर्हि गवादिपदानां व्यक्तिभानमिति चेत्। जात्यव्यक्ति
समानसंवित्संवेद्यत्वादिति ब्रूमः। यद्वा गवादिपदानां व्यक्तौ शक्तिः स्वरू

न

पसतीनतज्ञाताज्ञातो तुल्यज्ञाताद्धेतुः। व्यक्तेःशेषशक्तिज्ञानमपिकारणंगौ
रवात्। जातिशक्यत्वज्ञानेसतिव्यक्तिशक्तित्वज्ञानंविना। व्यक्तिधी। विलंबाभा
वाच्च। अतएवन्यायमतेअन्वयेशक्तिःस्वरूपसतीतिसिद्धांतः। ज्ञायमान
शक्तिविषयत्वमेववाच्यत्वमितिव्यक्तावववाच्यत्वं। अथवाव्यक्तेर्लक्षणया
गमः। यथानीलोघटइत्यत्रनीलशब्दस्यनीलगुणविशिष्टेलक्षणा। तथाजाति
वाचकस्यतद्विशिष्टेलक्षणा। तदुक्तं। अनन्यलभ्यःशब्दार्थः॥ ॥एवंशक्यो ल
निरूपितः। अथलक्ष्यपदार्थोनिरूप्यते॥ ॥तत्रलक्षणाविषयोल
क्ष्यः। लक्षणाचद्विविधा। केवललक्षणालक्षितलक्षणाचेति। तत्रशक्यसा श्री।०
क्षात्संबंधः। केवललक्षणा। यथागंगायांघोषइत्यत्रप्रवाहसाक्षात्सं १८
बंधितीरेगंगापदस्यकेवललक्षणा यत्रशक्यपरंपरासंबंधेनअर्थांतर

प्रतीतिः तत्रलक्षितलक्षणा। यथाद्विरेफपदे रेफद्वययुक्तभ्रमरपदघटित
परंपरासंबंधेनमाणवकस्यप्रतीतिः प्रकारांतरेणात्रिधा। जहल्लक्षणा अजह
ल्लक्षणा जहदजहल्लक्षणा चेति। तत्रशक्यमनंतर्भाव्यैव अर्थांतरप्रतीति
स्तत्रजहल्लक्षणा। यथागंगायांघोषइत्यत्र गंगापदं स्वार्थमनंतर्भाव्यैवतीरे
वर्त्ततेलक्षणया। यत्रशक्यमनंतर्भाव्यैव अर्थांतरप्रतीतिस्तत्राजहल्लक्षणा। अ
यथाशुक्लोघटइत्यत्रशुक्लशब्दः स्वार्थंविहायशुक्लगुणमंतर्भाव्यैवतद्वति
द्रव्यवर्ततेलक्षणया। यत्रविशिष्टवाचशब्दः एकदेशंविहायएकदेशेवर्तते
तत्रजहदजहल्लक्षणा। यथासोयंदेवदत्तइत्यत्रहिपदद्वयवाच्ययोर्विशिष्टयोरै च्य
क्यानुपपत्त्यापदद्वयस्यविशेष्यमात्रपरत्वं यथावातत्वमसीत्यादौतत्पद
वाच्यसर्वज्ञत्वादिविशिष्टस्यत्वंपदवाच्येन अंतःकरणादिविशिष्टेन एक्यासं

भवादैक्यसिध्यर्थं स्वरूपे लक्षणेति सांप्रदायिकानयं क्रमः। सोयं देवदत्तस्तत्त्वमसीत्यादौ विशिष्टवाचकपदानामेकदेशपरत्वेपि न लक्षणा। शक्त्युपस्थित विशिष्टयोरन्वयानुपपत्तौ विशिष्ययोः शक्त्युपस्थितनन्वयाबोधात् विरोधात्। यथा घटो अनित्य इत्यत्र घटपदवाच्यैकदेशघटत्वस्यान्वयायोग्यत्वेपि योग्यघटव्यक्त्या सहानित्यत्वान्वयः। यत्र पदार्थैकदेशस्य विशेषणतयोपस्थितिस्तत्रैव स्वातंत्र्येण्योपस्थितये लक्षणाभ्युपगमः। यथा नित्यो घट इत्यत्र घटपदात् घटत्वस्य शक्त्या स्वातंत्र्येणानुपस्थितत्वात् तादृशोपस्थितये स्तत्त्वंपदार्थयोरभेदान्वये बाधकाभावादन्यथा गेहे घटः घटे रूपं घटमानयेत्यादौ घटत्व गेहत्वादेरभिमतान्वयबोधायोग्यत्वात् तत्रापि घटादिपदानां विशेष्यमात्रपरत्वे लक्षणा च स्यात्। तत्त्वमसीत्यादिवाक्येषु आचार्याणां श्री०

१९

लक्षणोक्तिरभ्युपगमवादेन बोध्या। जहदजहल्लक्षणा उदाहरणं तु काकेभ्यो
दधि रक्ष्यतामित्यादिकमेव शक्यकाकत्वपरित्यागेन अशेषदध्युपघातकत्वपुर
स्कारेण काकशब्दस्य वृत्तिः। लक्षणाबीजं तात्पर्यानुपपत्तिरेव न त्वन्वयानुपप
त्तिः। काकेभ्यो दधि रक्ष्यतामित्यत्र तात्पर्यानुपपत्त्यभावात्। गंगायां घोष इत्यत्र
तात्पर्यानुपपत्तेरपि भावात्। लक्षणा न पदमात्रवृत्तिः। किंतु वाक्यवृत्तिरपि।
यथा गंभीरायां नद्यां घोष इत्यत्र गंभीरायां नद्यामिति पदद्वयसमुदायस्य तीरे ल
क्षणा। ननु वाक्यस्याशक्ततया कथं शक्यरूपा लक्षणा। उच्यते। शक्त्या यज्ज्ञाः ल
प्यते तत्संबंधो लक्षणा। शक्तिज्ञाप्यश्च यथा पदार्थः तथा वाक्यार्थोपीति न कदा
चिदनुपपत्तिः। एवमर्थवादवाक्यानां प्रशंसारूपाणां प्राशस्त्ये लक्षणाभ्यु वा
पगमे एकेन पदेन लक्षणया तदुपस्थिति तिसंभवे पदांतरवैयर्थ्यं स्यात्। एवं

चविध्यपेक्षितप्राशस्त्यरूपपदार्थप्रत्यायकतया अर्थवादपदसमुदायस्य प
दस्थानितया पदं सर्वैर्विधिना एकवाक्यं भवतीति अर्थवादानां पदैक वाक्य
ता। यत्र प्रत्येकं भिन्नसंसर्गप्रतिपादकयोरुभयोर्वाक्ययोराकांक्षावशेन महा
वाक्यार्थबोधकत्वं यथा दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादिवाक्यानां॰ शा
प्रयाजादिवाक्यानां समिधो यजतीत्यादिवाक्यानां च परस्परापेक्षितांगीभावबोधक
तया एकवाक्यता। तदुक्तं भट्टपादैः। स्वार्थबोधे समाप्तानामंगांगित्वाद्यपेक्षया
वाक्यानां वाक्यमेकत्वं पुनः संहत्य जायते इति। एवं द्विविधः पदार्थो निरूपितः। त
दुपस्थितिश्चासत्तिः। सा च शाब्दबोधे हेतुः। तथैवान्वयव्यतिरेकदर्शनात्। एवं श्री
महावाक्यार्थबोधे अवान्तरवाक्यार्थधीर्हेतुः। तथैवान्वयव्यतिरेकदर्शनात् १०
क्रमप्राप्तं तात्पर्यं निरूप्यते। तत्प्रतीतीच्छयोच्चरितत्वं तात्पर्यं। तदर्थज्ञानशून्ये

न

पुरुषेणोक्ताद्वेदादर्थप्रत्ययाभावप्रसंगात्। अयमध्यापकः अव्युत्पन्न इति वि
शेषदर्शनेन तत्र तात्पर्यभ्रमस्याभावात्। न च ईश्वरतात्पर्यज्ञानात्तत्र वेदे शाब्दबो
ध इति वाच्यं। ईश्वरानंगीकर्त्तुस्तद्वाक्यार्थप्रत्ययदर्शनात्। उच्यते। तत्प्रतीतिज
नकत्वं तात्पर्यं। गेहे घट इति तावदयं गेहे घटसंसर्गप्रत्ययजननयोग्यं न तु पट
संसर्गप्रतीतिजननयोग्यमिति तद्वाक्यं घटसंसर्गपरं। न तु पटसंसर्गपरमित्यु
च्यते। ननु सैंधवमानयेति वाक्यं यदा लवणानयनप्रतीतीच्छया प्रयुक्तं। तदाप्यश्व
संसर्गप्रतीतिजनने स्वरूपयोग्यतासत्वात्। लवणपरत्वज्ञानदशायामपि अश्वा
दिसंसर्गज्ञानापत्तिरिति चेन्न। तदितरप्रतीतीच्छयानुच्चारितत्वस्यापि तात्पर्यवि
शेषणत्वात्। तथा च यद्वाक्यं यत्प्रतीतिजननयोग्यत्वे सति यदन्यप्रतीतीच्छयानोच्चा
रितं तद्वाक्यं तत्संसर्गपरमित्युच्यते। शुकादिवाक्ये अव्युत्पन्नोच्चारितवेदवाक्ये

नो व्याप्तिः । न चोभयोश्चरिते अव्याप्तिः । तद्व्यापा प्रतीति

दो प्रतीतीच्छाया एवाभावेन तदन्यप्रतीतीच्छयोच्चरितत्वाभावेन सत्वेन लक्षणसत्वस्य वि
वक्षितत्वादुक्तप्रतीतिजननस्वरूपयोग्यतापर्याप्तावच्छेदकत्वादिति न कोपि दोषः । एवं
तात्पर्यस्य तत्प्रतीतिजनकत्वस्वरूपस्य शाब्दज्ञानजनकत्वे चतुर्थवर्णके तात्पर्यज्ञा
नहेतुत्वनिराकरणवाक्यं तत्प्रतीतीच्छयोच्चरितत्वरूपतात्पर्यनिराकरणपरं । अ
न्यथा तात्पर्यनिश्चयफलकवेदांतविचारवैयर्थ्यप्रसंगात् । केचित्तु शाब्दज्ञानत्वा
वच्छेदेन तात्पर्यज्ञानं हेतुरित्येवं परं चतुर्थवर्णकवाक्यं तात्पर्यसंशयविपर्ययोत्त
तरशाब्दज्ञानविशेषे तात्पर्यज्ञानं हेतुरेव । इदं वाक्यमेतदर्थमुतान्यपरमिति
संशये तद्विपर्यये च तदुत्तरवाक्यार्थविशेषनिश्चयस्य तात्पर्यनिश्चयं विनाऽनु श्री
त्पत्तेरित्याहुः । तत्तात्पर्यं वेदमीमांसापरिशोधितन्यायादवधार्यते । लोके प्र २१
करणादिना । तत्र लौकिकवाक्यानां मानांतरावगतार्थतयाऽनुवादकत्वं । वेदे तु

वाक्यार्थस्यापूर्वतया नानुवादकत्वं । तत्र लोके वेदे च कार्यपराणामिव सिद्धार्थानामपि
प्रामाण्यं पुत्रस्ते जात इत्यादिषु सिद्धार्थेष्वपि पदानां सामर्थ्यावधारणात् । अत एव वे
दांतवाक्यानां ब्रह्मणि प्रामाण्यं यथा चैतत्तथा विषयपरिच्छेदे वक्ष्यते । तत्र वेदा नित्यस
र्वज्ञपरमेश्वरप्रणीतत्वेन प्रामाण्यमिति नैयायिकाः ॥ वेदानां नित्यत्वेन निरस्तसमस्तदूषण न
तया प्रामाण्यमिति अध्वरमीमांसकाः ॥ अस्माकं मते वेदो नित्यः उत्पत्तिमत्त्वात् । उत्पत्तिमत्त्वं
चास्य महतो भूतस्य निश्वसितमेतत् । यदृग्वेदो यजुर्वेद इत्यादिश्रुतेः ॥ नापि वेदानां त्रिक्षणा
वस्थायित्वं । य एव वेदो देवदत्तेनाधीतः स एव मयापीति प्रत्यभिज्ञाविरोधात् । तथा च वर्ण
पदवाक्यं तत्समुदायरूपस्य वेदस्य वियदादिवत् सृष्टिकालोत्पत्तिकत्वं प्रळयकाली
नध्वंसप्रतियोगित्वं न तु मध्ये वर्णानामुत्पत्तिविनाशौ । अनंतगकारादिकल्पनाप्र
अ ७१ वगकारादिवर्णानामनंतानां कल्पनागौरवं देवदत्तगकारप्रतिप्रत्यभिज्ञाविरोधात्

गात्। अनुच्चारणदशायां वर्णानभिव्यक्तिस्तु उच्चारणरूपव्यंजकाभावात् नावि
रुध्यते। अंधकारस्थघटानुपलंभवत्। उत्पन्नो गकार इत्यादिप्रत्यक्षं तु सोयं गका
र इत्यादिप्रत्यभिज्ञाविरोधात्। अप्रमाणं वर्णाभिव्यक्तिजनकध्वनिगतोत्पत्तिनिरूपि
तपरंपरासंबंधिविषयत्वेन प्रमाणं वा। तस्मान्न वेदानां क्षणिकत्वं। ननु। क्षणिकत्वाभा
५ वेपि यदादिप्रपंचवत् उत्पत्तिमत्वेन परमेश्वरकर्तृकतया पौरुषेयापत्तौ अपौरुषेय
त्वं वेदानामिति तत्सिद्धांतभंजनमिति चेन्न। नहि पुरुषोच्चार्यमाणत्वं पौरुषेयत्वं। गुरु
मतेपि पौरुषेयापत्तेः। नापि पुरुषाधीनोत्पत्तिकत्वं नैय्यायिकाभिमतपौरुषेयत्वानु
माने अस्मदादीनां सिद्धसाधनतापत्तेः। किंसजातीयोच्चारणानपेक्षोच्चारणविषय श्री
त्वमिति तेषां पौरुषेयत्वं। एवं पौरुषेयापौरुषेयभेदेन द्विविधआगमो निरूपितः इत्य। २२
तथा च सर्गाद्यकाले परमेश्वरः पूर्वसर्गसिद्धवेदानुपूर्वीसमानानुपूर्वीकं वेदं विरचि
तवान्॥ न तु तद्विपरीतं वेदमिति तेन सजातीयोच्चारणपेक्षे वोच्चारणविषयत्व

गमपरिछेदः। ।इदानीं अर्थापत्ति निरूप्यते।। ।।तत्र उपपाद्य मानेन उपपादकक्कल्प
नमर्थापत्तिः।तत्र ऽउपपाद्यज्ञानं करणं।उपपादक ज्ञानं फलं।येन विनाय दनुपपन्नं
तत्रोपपाद्यं।यस्यभावेयस्यानुपत्तिस्तत्रोपपादकं।यथायेनरात्रिभोजनेन विनादिवाभुंजा
नस्यपीनत्वमनुपपन्नमितितादृशपीनत्वमुपपाद्यं।यथारात्रिभोजनस्याभावे तादृश
पीनत्वस्यानुपपत्तिरितिरात्रिभोजनमुपपादकं।रात्रिभोजनकल्पनायां प्रमितो ऽर्थ=
स्यापत्तिकल्पनेतिषष्ठीसमासेन अर्थापत्तिशब्दोवर्तते।कल्पनाकरणे पीनत्वादिज्ञाने
तु अर्थस्यापत्तिः कल्पनायस्मादिति बहुव्रीहिसमासेनवर्ततइति फलकरणयोस्त=
त्पदप्रयोगः।साचार्थापत्तिर्द्विविधा।दृष्टार्थापत्तिः।श्रुतार्थापत्तिश्च।दृष्टार्थापत्तिर्यथा।
इदंरजतमितिपुनोवर्तिनिप्रतिपन्नस्यरजतस्य नेदंरजतमितत्रैव निषिध्यमानत्वंस
त्यत्वेनुपपन्नमितिरजस्यसङ्गिन्नत्वंसत्वात्यंताभाववत्वंवामिथ्यात्वंकल्पयति।श्रुता

र्थापत्तिर्यथायत्रश्रूयमाणवाक्यस्यस्वार्थानुपपत्तिमुखेनअर्थांतरकल्पकत्वं।य
थातरतिशोकमात्मविदित्यत्रश्रुतस्यशोकशोकशब्दवाच्यस्यबंधगतस्यज्ञाननिव-
र्त्यत्वस्यअनुपपत्त्याबंधस्यमिथ्यात्वंकल्प्यते।यथावाजीवीदेवदत्तोगृहेनेतिश्रव-
णानंतरंजीविनोगृहासत्वंबहिःसत्वंकल्पयति।श्रुतार्थापत्तिश्चद्विविधा।अभिधा
नानुपपत्तिरभिहितानुपपत्तिश्च।यत्रवाक्यैकदेशश्रवणेअन्वयाभिधानानुपपत्त्या
अन्वयाभिधा[illegible]न्वयोपयोगिपदांतरंकल्प्यतेतत्राभिधानानुपपत्तिः।
यथाद्वारमित्यत्रपिधेहीत्यध्याहारः।यथावाविश्वजितायजेयतेत्यत्रस्वर्गकामपदा
ध्याहारः।ननुद्वारमित्यत्रअन्वयाभिधानात्पूर्वमिदमन्वयाभिधानंपिधानोपस्था
पकंविनानुपपन्नमितिकथंज्ञानमितिचेन्न।अभिधानोपदेनकरणव्युत्पत्त्याता श्री २३
त्पर्यस्यविवक्षितत्वात्।तथाचद्वारकर्मकपिधानक्रियाकसंसर्गपरत्वंपिधानोप-

स्थापकपदं विना अनुपपन्नमिति ज्ञानं संभाव्यते। अभिहितानुपपत्तिस्तु यत्र वाक्याद
गतोर्थोनुपपन्नत्वेन ज्ञातः सन्नर्थांतरं कल्पयति तत्र द्रष्टव्या। यथा स्वर्गकामो ज्योतिष्टोमेन
यजेतेत्यत्र ज्योतिष्टोमस्य स्वर्गसाधनत्वं क्षणिकतया अनुपपन्नमिति मध्यमवर्त्यपूर्वं कल्प्यते।
न चैवमनुमानांतर्भवितुमर्हति। अन्वयव्याप्यज्ञानेन अन्वयिन्यंतर्भावात्। व्यतिरेकिणश्चानु
मानत्वं प्रागेव निरस्तं। अत एवार्थापत्तिस्थले नानुमिनोमीत्यनुव्यवसायः। किंतु अनेनेदं क
ल्पयामीति। नन्वर्थापत्तिस्थले इदमनेन विना अनुपपन्नमिति ज्ञानं करणमित्युक्तं। तत्र कि
मिदं केन विनानुपपन्नत्वं। तदभावव्यापकाभावप्रतियोगित्वमिति ब्रूमः। एवमर्थापत्तेर्मानांत
रसिद्धौ व्यतिरेकी नानुमानांतरं। पृथिवी इतरेभ्यो भिद्यते इत्यादौ गंधवत्वं इतरभेदं विनानु
पपन्नमित्यादिज्ञानस्य ज्ञानकारणत्वात्। अत एवानुव्यवसायः पृथिव्यामितरभेदं कल्प

यति॥ ॥इत्यर्थापत्तिः॥ ॥इदानीं षष्ठप्रमाणं निरूप्यते। ज्ञातकारणाजन्याभावोसाधारण
कारणमनुपलब्धिप्रमाणं। अनुमानजन्यातींद्रियाभावानुभवहेतावनुमानादावतिव्या
प्तिवारणायजन्यांतं। अदृष्टादौसाधारणकारणे ऽतिव्याप्तिवारणायअसाधारणेति
अभावस्मृत्यसाधारणहेतुसंस्कारेतिव्याप्तिवारणायनुभवेति विशेषणं। नचाभावानु वा
पलब्धिस्थलेप्यनुपलब्ध्यैवाभावोगृह्यतां विशेषाभावादितिवाच्यं। धर्माधर्माद्यनुपल
ब्धिसत्वे तदभावानिश्चयेन योग्यानुपलब्धेरेवाभावग्राहकत्वात्। ननु केयं योग्यानुप
लब्धिः किं योग्यस्य प्रतियोगिनो अनुपलब्धिः उत योग्याधिकरणे प्रतियोग्यनुपलब्धिः।
नाद्यः। स्तंभे पिशाचभेदस्याप्रत्यक्षतापत्तेः। नांत्यः। आत्मनि धर्माद्यभावस्याप्रत्यक्ष श्री २८
तापत्तेरितिचेन्न। योग्याचासावनुपलब्धिश्चेति कर्मधारयाश्रयणात्। अनुपलर्योग्य

धु

ताच तर्कितप्रतियोगिसत्त्व सत्त्व प्रसंजित प्रतियोगिसत्त्वं। यस्याभावोऽवगृह्यते। तस्य
यः प्रतियोगी तस्य सत्त्वे अधिकरणे तर्कितेन प्रसंजनयोग्यमापादनयोग्यं तत्प्रतियोग्यनु
पलब्धिस्वरूपं यस्यानुपलंभस्य तत्तदनुपलब्धेर्योग्यत्वमित्यर्थः। तथा च स्फीतालोक
वति भूतले यदि घटः स्यात्तदा घटोपलंभः स्यादित्यापादनसंभवात् तादृशभूतले
घटाभावः अनुपलब्ध्यः। अंधकारे तु तादृश आपादनासंभवात्। तदुपलब्धिगम्यता।
अत एव स्तंभे पिशाचत्वसत्त्वे स्तंभवत्प्रत्यक्षत्वापत्त्या तदभावोनुपलब्ध्यः। आत्मनि धर्मा
दिसत्त्वे प्यतींद्रियतया निरुक्तोपलंभापादनासंभवान्न धर्माद्यभावस्यानुपलब्ध्य
त्वं। ननु उक्तरीत्या अधिकरणेंद्रियसंनिकर्षस्थले अभावस्यानुपलब्ध्यत्वमभिमतं।
तत्र च चक्षुरिंद्रियमेवाभावाकारवृत्तावपि करणं। इंद्रियान्वयव्यतिरेकानुविधानादिति

चेन्न। प्रतियोग्यनुपलब्धेरपि अभावग्रहहेतुत्वेन क्लृप्तत्वात्। इंद्रियस्य चाभावे
न समं सन्निकर्षाभावेन अभावग्रहाहेतुत्वा। दिंद्रियाव्यतिरेकैरधिकरणज्ञाना
दावपेक्षणीयत्वेन अन्यथासिद्धेः। ननु भूतळे घटो नेत्याद्यभावानुभवस्थळे भूत
ळांशे प्रत्यक्षत्वमुभयसिद्धमिति तत्र वृत्तिर्गमनास्यावकाश्यत्वेन भूतळावच्छिन्न
चैतन्यवत्। तन्निष्ठघटाभावावच्छिन्नचैतन्यस्यापि प्रमात्रभिन्नतया घटाभावप्र
त्यक्षतैव सिध्यतीति चेत्। सत्यं। अभावप्रतीतेः प्रत्यक्षत्वेपि तत्करणस्यानु
पलब्धेर्मानांतरत्वं। नहि फलीभूतज्ञानस्य प्रत्यक्षत्वे न तत्करणस्य प्रत्यक्षप्रमा श्री
णतानियतत्वं। दशमस्त्वमसीत्यादिवाक्यजन्यज्ञानस्य प्रत्यक्षत्वेपि तत्क २५

रणं वाक्यस्यप्रत्यक्षप्रमाण भिन्नप्रमाणत्वाभ्युपगमात् । फलवैजात्यं विना
कथंप्रमाणभेदइतिचेन्न । वृत्तिवैजात्यमात्रेण प्रमावैजात्योपपत्तेः । यथाचघ ण
टाभावाकारवृत्तिर्नेंद्रियजन्या इंद्रियस्यविषयासन्निकर्षात् । किंतुघटाद्यनु
पलब्धिरूपमानांतरजन्येतिभवत्यनुपलब्धेर्मानांतरत्वं । नन्वनुपलब्धिरूपमा
नांतरपक्षेप्यभावप्रतीतेः प्रत्यक्षत्वे घटाभावग्रहस्याप्रत्यक्षत्वापत्तौ तत्राप्यनिर्व
चनीयघटाभावोभ्युपगमेत । नचेष्टापत्तिः तस्य मायोपादानत्वे अभावत्वानु
पपत्तेः मायोपादानत्वाभावे मायायाः सकलकार्योपादानत्वानुपपत्तिरितिचे
न्न । घटवतिभूतले घटाभावभ्रमो न तत्कालोत्पन्नघटाभावविषयः । किंतुभूतल
रूपादौ विद्यमानोलौकिकोघटाभावोभूतले आरोप्यतइति । अन्यथाख्याति

५ अन्यथाव्यावहारिकाघटाभावं प्रति कथंमायोपादानमिति कथनं शक्यम्भाः ५

रेवआरोप्यसन्निकर्षस्थळेसर्वत्रान्यथाख्यातेरेवव्यवस्थापनात्। अस्तुप्रति
योगिमतितदभावभ्रमस्थळेतदभावस्यानिर्वचनीयत्वं। तथापितदुपादानंमा
यैव।। नहिउपादानोपादेययोरत्यंतसाजात्यं। तंतुपटयोरपितंतुत्वपटत्वादि
पा। नावैजात्यात्। यत्किंचित्साजात्यस्यमाया अनीर्वचनीघटाभावस्यचमिथ्यात्वध
र्मस्यविद्यमानत्वान्न। नचविजातीययोरपिउपादानोपादेयभावेब्रह्मैवजगदुपा
दानंस्यादितिवाच्यं। प्रपंचविभ्रमाधिष्ठानरूपस्येष्टत्वात्। परिणामित्वरूपस्यउ
पादानत्वस्यनिरवयवब्रह्मण्यनुपपत्तेः। तथाचप्रपंचस्यपरिणामउपादानंमा श्री
यानब्रह्मेतिसिद्धांतइति अलंप्रपंचादागतप्रपंचेन। सचाभावश्चतुर्विधः। प्राग २६
भावः प्रध्वंसाभावोत्यंताभावोन्योन्याभावश्चेति। मृत्पिंडादौकारणेकार्यस्यघटा

श्री:

देरुत्पत्तेः। पूर्वं योभावः सप्रागभावः। सचभविष्यतीति विषयः। तत्रैव घटस्य मुद्ग
रपातानंतरं योऽभावः प्रध्वंसः ध्वंसस्यापिस्वाधिकरणकपालनाशनाशे एव न
चघटोन्मज्जनापत्तिः। ध्वंसध्वंसस्यापिघटप्रतियोगित्वात्। अन्यथाप्रागभावध्वं
सात्मकघटस्यविनाशेप्रागभावोन्मज्जनापत्तिः। नचैवमपियत्रध्वंसाधिकरणंनि
त्यंकथंध्वंसनाशइतिवाच्यं। तादृशमधिकरणंयदिचैतन्यव्यतिरिक्तं तदातस्यानित्य
त्वंसिद्धं। ब्रह्मव्यतिरिक्तस्य ब्रह्मज्ञाननिवर्त्यतयावक्ष्यमाणत्वात्। यदिध्वंसाधिकर
णंचैतन्यंतदाअसिद्धेः। आरोपितप्रतियोगिध्वंसस्याधिष्ठानेप्रतीयमानस्याधि

ग

त्यंताभावः। यथावायोरूपात्यंताभावः। सोपि वियदादिवत् ध्वंसप्रतियोग्ये
वइदमिदंनेतीतिप्रतीतिविषयोन्योन्याभावः॥ अयमेवविभागो भेदः। पृथक्
त्वंचेति। अधिकरणस्यसादित्वेसादिः। यथाघटेपटभेदः अधिकरणस्यअना
दित्वेअनादिरेव। यथाजीवेब्रह्मभेदः ब्रह्मणिजीवभेदइतिद्विविधोपि ध्वंसप्रति
योग्येव। अविद्यानिवृत्तौतत्परतंत्राणां निवृत्यवश्यंभावात्। पुनरपिभेदोद्विविधः
सोपाधिको। निरुपाधिकश्चेति। तत्रोपाधिसत्ताव्याप्यसत्ताकत्वंसोपाधिकत्वंत
च्छून्यत्वंनिरुपाधिकत्वं। तत्राद्योयथा एकस्यैवाकाशस्यघटाद्युपाधिभेदेनभेदः।
यथावाएकस्यैवसूर्यस्यजलभाजनभेदेनभेदः। यथावाएकस्यैवब्रह्मणोअंतःक
रणभेदाद्भेदः। निरुपाधिभेदोयथाघटेपटभेदः। नचब्रह्मण्यपिप्रपंचभेदात् श्री २

उपगमेऽद्वैत विरोधः। तात्विकभेदादेरनभ्युपगमेन वियदादिवद्द्वैतव्याघातत्वा
त्। तदुक्तं। अक्षमा भवतः केयं साधकत्वप्रकल्पने॥ किन्नपश्यसि संसारं तत्रैवा
ज्ञानकल्पितमिति। अतएव विवरणे विद्यानुमाने प्रागभावव्यतिरिक्तविशेषणं तत्व

का प्रदीपे विद्यालक्षणे भावत्वविशेषणं च संगच्छते। एवं चतुर्विधभावानां योग्यानुप
लब्ध्या प्रतीतिः। तत्रानुपलब्धिर्मानांतरमिति। एवमुक्तानां प्रमाणानां स्वतएव प्रामा
ण्यमुपपद्यते। ज्ञायते च। तथाहि। स्मृत्यनुभवसाधारणं संवादिप्रवृत्त्यनुकूलं तद्वति
तत्प्रकारकज्ञानत्वं प्रामाण्यं। तच्च ज्ञानसामान्यसामग्रीप्रयोज्यं। नत्वधिकं गुणम
पेक्षते। प्रमाप्रमात्रे अनुगतगुणाभावात्। नापि प्रत्यक्षप्रमायां भूयोऽवयवेंद्रियसंनिकर्षः
रूपादिप्रत्यक्षे आत्मप्रत्यक्षे च तदभावात्। सत्यपि तस्मिन्पीतः शंख इति प्रत्यक्षस्य

अतएवसल्लिंगपरामर्शादिकमपि अनुमित्यादिप्रमायांनगुणः॥असल्लिंगपरामर्शादिस्थले विष

भ्रमत्वाच्च।नचैवं अप्रमापिप्रमास्यात्।ज्ञानसामान्यसामग्र्या अविशेषादिति
वाच्यं।दोषाभावस्यापिहेतुत्वांगीकारात्।नचैवंपरतस्त्वमपि आगंतुकभाव
कारणापेक्षायामेवपरतस्त्वात्।ज्ञायतेचप्रामाण्यंस्वतः।स्वतोग्राह्यत्वंदोषाभावे
सतियावत्स्वाश्रयग्राहकग्राह्यत्वं।स्वाश्रयोवृत्तिज्ञानं।तद्ग्राहकंसाक्षिज्ञानं।तेनवृ
त्तिज्ञानेगृह्यमाणेतद्गतंप्रामाण्यमपिगृह्यते।नचैवंप्रामाण्यसंशयानुपपत्तिः।त
त्रसंशयानुरोधेनदोषस्यापिसत्त्वेनदोषाभावघटितस्वाश्रयग्राहकाभावेनतत्र
प्रामाण्यस्यैवाग्रहात्।यद्वायावत्स्वाश्रयग्राहकग्राह्यत्वयोग्यत्वंस्वतस्त्वं।संश
यप्रामाण्यस्योक्तयोग्यतासत्त्वेदोषवशेनाग्रहान्नसंशयानुपपत्तिः।अप्रामाण्यं
तुनज्ञानानसामानसामग्रीप्रयोज्यं।प्रमायामप्यप्रामाण्यापत्तेः॥ किंतुदोषप्रयो

यबाधे अनुमित्यादेः प्रमात्वात्

श्री
२८

ज्यं। नाप्यप्रामाण्यं। यावत्स्वाश्रयग्राहकग्राह्यत्वं। अप्रामाण्यघटकतदभाववत्वा
देर्वृत्तिज्ञानानुपनीतत्वे साक्षिणा ग्रहीतुमशक्यत्वात्। किंतु विसं। वादिप्रवृत्या
दिलिंगकअनुमित्यादिविषय इति परत एवाप्रामाण्यमुत्पद्यते ज्ञायते च॥ ॥

॥ इत्यनुपलब्धिपरिछेदः॥ ॥ ॥छ॥ ॥छ॥ ॥

एवं निरूपितप्रमाणानां प्रामाण्यं द्विविधं। व्यावहारिकत्वाद्वेदकत्वं परमार्थिकत्वा
द्वेदकत्वं चेति। तत्र ब्रह्मस्वरूपावगाहिप्रमाणव्यतिरिक्तानां सर्वप्रमाणानामा
प्र द्यं प्रामाण्यं। तद्विषयाणां व्यवहारदशायां बाधानवतारात्। द्वितीयं तु जीवब्रह्मैक्यप
राणां सदेव सौम्येदमग्र आसीदित्येवमादीनां तत्त्वमसीत्येवमंतानां तत्त्वद्विष

यस्यजीवपरैक्यकालत्रयाबाध्यत्वात्।तच्चैक्यंतत्त्वंपदार्थज्ञानाधीनज्ञानमिति
प्रथमंतत्पदार्थलक्षणप्रमाणाभ्यांनिरूप्यते॥ ॥तत्रलक्षणंद्विविधं॥ ॥
स्वरूपलक्षणंतटस्थलक्षणंचेति।तत्रस्वरूपमेवलक्षणंस्वरूपलक्षणं।यथास
त्यंज्ञानमनंतंब्रह्मेत्यत्रसत्यादिकंस्वरूपलक्षणं।ननुस्वस्यस्ववृत्तित्वाभावेकथं
लक्षणत्वमितिचेन्न।स्वस्यैवस्वापेक्षयातेधर्मधर्मिभावकल्पनोलक्षणसंभवात्। प
तदुक्तं।आनंदोविषयानुभावोनित्यत्वंचेतिसधर्मा।अपृथक्त्वेपिचैतन्यात्पृथ
गिवाभासंतेइति।तटस्थलक्षणंनामयावल्लक्ष्यकालमनवस्थितत्वेसतितद्व्या श्री
वर्तकंतदेव।यथापृथ्वीलक्षणंगंधवत्त्वंमहाप्रलयेपरमाणुषुउत्पत्तिकालेघ २९
टादौचगंधाभावात्।प्रकृतेचजगज्जन्मादिकारणत्वंतत्रजजगत्पदेनकार्यजा।

मी

ति
तंविवक्षितं।कारणंचकर्तृत्वंअतोविद्यादीनांव्याप्तिः।कर्तृत्वंचतदुपादानगो
चरापरोक्षज्ञानचिकीर्षाकृतिमत्वं।ईश्वरस्यतावदुपादानगोचरापरोक्षज्ञा
नसद्भावेयःसर्वज्ञःसर्वविद्यस्यज्ञानमयंतपः।तस्मादेद्ब्रह्मनामरूपमन्नंच
जायतइत्यादिश्रुतिर्मानं।तादृशचिकीर्षासद्भावेचसोकामयतबहुस्यांप्र
जाये त्यादिश्रुतिर्मानं।तादृशकृतौचतन्मनोकुरुतेत्यादिवाक्यंज्ञानेच्छाकृती
नांमध्येअन्यतमगर्भंलक्षणंनत्रितयंविवक्षितं।अन्यथाव्यर्थविशेष
णापत्तेः।अतएवजन्मस्थितिध्वंसानामपिअन्यतमस्येवलक्षणेप्रवेशः।
एवंचलक्षणानितावत्संपद्यंते।ब्रह्मजगज्जन्मादिकारणत्वेचयतोवा।

इमानिभूतानिजायंते। येनजातानिजीवंति। यत्प्रयंत्यभिसंविशंति। श्रुति
र्मानं। यद्वानिखिलजगदुपादानत्वंचब्रह्मणोलक्षणं। उपादानत्वंच्चाध्यासा
धिष्ठानत्वं। जगदाकारेणपरिणममानायाधिष्ठानत्वं। एतादृशमेवोपादा
नत्वमभिप्रेत्यइदंसर्वंयदयमात्मासच्चत्ययच्चाभवदितिबहुस्यांप्रजायेये
त्यादिषुब्रह्मप्रपंचयोस्तादात्म्यव्यपदेशः घटःसन्घटोभातिघटोदृष्टःइत्या
दौलौकिकव्यपदेशोपिसच्चिदानंदरूपब्रह्मैक्याध्यासात्। तत्रापिदुष्टत्वादिव्यव
हारापत्तिरितिचेन्न। आरोपेसतिनिमित्तानुसरणंनतुनिमित्तमस्तीतिआरोपइत्य
भ्युपगमेनदुःखादौचसच्चिदंशाध्यासेप्यानंदांशाध्यासाभावात्जगतिनामरू श्री ३०

पांशब्दरूपव्यवहारस्तु अविद्यापरिणामात्मकनामरूपसंबंधात्। तदुक्तं। अस्तिभा
तिप्रियंरूपंनामचेत्यंशपंचकं। आद्यैब्रह्मरूपंजगद्रूपंततोद्वयंइति। । अथज
न्मक्रमोनिरूप्यते॥ ॥तत्रसर्गा×त्रयं×द्यकालेपरमेश्वरःसृज्यमानप्रप
ञ्चवैचित्र्यहेतुप्राणिकर्मसहकृतापरिमितानिरूपितशक्तिविशेषविशिष्टमाया
सहितःसन्नामरूपात्मकनिखिलप्रपंचबुध्याकलय्यइदंकरिष्यामीतिसंक-
ल्पयति। तदैक्षतबहुस्यांप्रजायेयकामयतबहुस्यांप्रजायेयकामयतब
हुस्यांप्रजायेयेत्यादिश्रुतेः। ततःआकाशादीनिपंचमहाभूतानिअपंचीकृ
तानितन्मात्रपदप्रतिपाद्यानिउत्पद्यंते। आकाशस्यशब्दोगुणः। वायोश्चशब्दस्प
र्शौ। तेजसस्तुशब्दस्पर्शरूपाणि। अपांतुशब्दस्पर्शरूपरसाः। पृथिव्याःशब्दस्पर्शरू

परस्सगंधाः ननुशब्दस्याकाशमात्रगुणत्वं। वाय्वादावुपितदुपलंभात् नचासोभ्र
मः बाधकाभावात् इमानिभूतानि त्रिगुणमायाकार्याणि त्रिगुणानि। एतैश्चसत्व
गुणोपेतैः पंचमहाभूतैः श्रोत्रत्वक्चक्षूरसनघ्राणानि पंचेंद्रियाणि मनोबुद्धि
रहंकारश्चित्तंच जायते। श्रोत्रादीनां पंचानां क्रमेण दिग्वातार्कवरुणाश्विनो धिष्ठा
तृदेवताः ॐ एतैरेवरजोगुणोपेतैः पंचमहाभूतैः क्रमेण ब्रह्मैक्यपराणां सदेव
सोम्येदमग्र आसीदित्येवमादीनां तत्वमसीत्येवमंतानां तत्तद्विषयवाक्या
णि पाद पायूपस्थाख्यानि कर्मेंद्रियाणि च जायंते। तेषांच क्रमेण वह्नींद्रोपेंद्रमि श्री
त्रप्रजापतयो अधिष्ठातृदेवताः। रजोगुणोपेतभपंचमहाभूतैरेव पंचवायवः प्रा ३१
४ मनआदीनां चतुर्णां चंद्रचतुर्मुखशंकराच्युता अधिष्ठातृदेवताः ४

णापानव्यानोदानसमाना ख्याजायंते।तत्र प्राग्गमनवान्वायुः प्राणः।नासादिस्थान
र्ती।अवाग्गमनवानपानः।पाय्वादिस्थनवर्ती।विष्वग्गमनवान्व्यानः।अखिलशरीर
वर्ती।ऊर्ध्वगमनवानुदानः।नाभिस्थानवर्ती।तैश्चैवं तमोगुणोपेतैरपंचीकृतभूतैः पं
चीकृतभूतानिजायंते।तेषां त्रिवृत्तं त्रिवृत्तमेकैकं करवाणीति त्रिवृत्करणश्रुतेः।पंचीक
रणोपलक्षितार्थत्वात्।पंचीकरणप्रकारश्चेत्थं।आकाशं द्विधा विभज्य तयोनेक विभा
गं पुनः चतुर्धा विभज्य तेषां तुर्णां अंशानां वाय्वादिषु संयोजनं।एवंत्ते जोबन्नानाम
पि।तदेवमेकैकस्य भूतस्यार्धं स्वांशात्मकं कार्यं।अर्धेतरं चतुर्विधं भूतमयमिति स्वां
शाधिक्यात्।पृथिव्याद्यव्यवहारः।तदुक्तं।वैशिष्यात्तु तद्वादस्तद्वादइति।तैश्चापंचीकृ
तभूतैर्लिंगशरीरं परलोकयात्रानिर्वाहकं।मोक्षपर्यंतस्थायि मनोबुध्युपेतं ज्ञानेंद्रिय

पंचककर्मेंद्रियपंचकप्राणादिपंचकसंयुक्तंजायते।तदुक्तं।पंचप्राणमनोबुध्दिद
शेंद्रियसमन्वितं।अपंचीकृत भूतोत्थंसूक्ष्मांगंभोगसाधनमिति।तच्च द्विविधंपर
मपरंच।तत्रपरंहिरण्यगर्भलिंगशरीरं।अपरमस्मदादिशरीरं।तत्र हिरण्यगर्भलिंगशरी
रंमहत्तत्वं।अस्मदादिलिंगशरीरंअहंकारइतिव्याख्यायते।एवंतमोगुणयुक्तेभ्योपं
चीकृतभूतेभ्यः।भूर्भुवःस्वर्गमहर्जनस्तपःसत्यात्मकऊर्ध्वलोकसप्तस्यअतळपा
ताळरसातळवितळसुतळतळातळमहापाताळाख्याधोलोकसप्तकस्यब्रह्मांडस्य
जरायुजांडजस्वेदजोद्भिज्याख्यचतुर्विधस्थूलशरीराणामुत्पत्तिः।तत्रजरायुजानि
जरायुभ्योजातानिमनुष्यपश्वादिशरीराणि।अंडजानिपक्षिपन्नगादिशरीराणि।स्वे
दजानिस्वेदाज्जातानियूकामत्कुणादिशरीराणि।उद्भिज्यानिभूमिमुद्भिद्यजातानिवृक्षा श्री ३२
दीनितृणादीनामपिपापफलभोगायतनत्वेनशरीरत्वं।तत्रपरमेश्वरस्यपंचतन्मात्रा

व्युत्पत्तौ सप्तदशावयवोपेतलिंगशरीरोत्पत्तौ च साक्षात्कर्तृत्वमितरनिखिलप्रपंचोत्पत्तौ
हिरण्यगर्भादिद्वारा हंताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याक
रवाणीति श्रुतेः। हिरण्यगर्भो नाम मूर्त्तित्रयादन्यः प्रथमो जीवः। स वै शरीरी प्रथमः। स वै पुरुष
उच्यते। आदिकर्त्ता स भूतानां ब्रह्माग्रे समव र्तत। हिरण्यगर्भः समवर्तताग्रे इत्यादिश्रुतेः।
एवंभूतभौतिकसृष्टिर्निरूपिता। ।अथ प्रळयो निरूप्यते। ।तत्र प्रळयो नाम त्रैलोक्यनाशः।
स चतुर्विधः। नित्यः प्राकृतो नैमित्तिक आत्यंतिकश्चेति। तत्र नित्यप्रळयः सुषुप्तिः। तस्याः स
कलकार्यप्रविलयरूपत्वात्। धर्माधर्मपूर्वकसंस्काराणां च तदा कारणात्मनावस्था
न्यते सुप्तोत्थितस्य न सुखदुःखाद्युत्पत्तिः। न वा स्मरणानुपपत्तिः। न च सुप्तावंतःकरण
नाशे तदधीनप्राणनादिक्रियानुपपत्तिः। वस्तुतः श्वासाद्यभावेपि तदुपलब्धेः पुरुषा
न्तरविभ्रममात्रत्वात्। सुप्तशरीरोपलंभाभावान्न चैवं सुप्तस्य परेतादविशेषः। सुप्त

४.५.न्नु

स्य लिंगशरीरात्मना नैव वर्तते। परेतस्य लोकांतर इति वेल क्षणपात। यद्वा अंतःकरणस्य द्वे
शक्ती। क्रियाशक्तिश्चेति। तत्र ज्ञानशक्तिविशिष्टांतःकरणस्य सुषुप्तौ विनाशः। ननु क्रियाश
क्तिविशिष्टस्येति। अथैवं वाक् सर्वैर्नामभिः सहाप्येति सता सोम्य तदा संपन्नो भवति।
एवमपीतो भवति इत्यादि श्रुतिरुक्तिः सुषुप्तौ मानं। प्राकृतप्रळयस्तु कार्यब्रह्म विनाश
निमित्तः सकलकार्यनाशः यदा तु प्रागेवोत्पन्नब्रह्मसाक्षात्कारस्य कार्यब्रह्मणो
ब्रह्मांडाधिकारलक्षणप्रारब्धकर्मसमाप्तौ विदेहकैवल्यात्मिका परममुक्तिः। तदा

स्वर्लोकवासिनामप्युत्पन्नब्रह्मसाक्षात्काराणां
ब्रह्मणा सह विदेहकैवल्यं। ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे। परस्यांते कृता श्री
त्मानः प्रविशंति परं पदं इति श्रुतेः। एवं स लोकवासिभिः सह कार्यब्रह्मणि मुच्य ३३
मानेतदधिष्ठित ब्रह्मांड तदंतर्वर्ति निखिल लोक

तदंतर्वर्तिनिखिलस्थावरादीनांभूतानांच प्रकृतौमायायांचलयः।नतुब्रह्मणि।बा
धरूपविनाशस्यैव ब्रह्मनिष्ठत्वादतः प्राकृतउच्यते। कार्यब्रह्मणोदिवसावसाननि
मित्तकः त्रैलोक्यमात्रप्रळयो नैमित्तिकः प्रळयः। ब्रह्मदिवसश्चचतुर्युगसहस्रपरिमि
तकालः। चतुर्युगसहस्राणि ब्रह्मणोदिनमुच्यते इतिवचनात्। प्रळयकालः दिवस
परिमितरात्रिकालस्य दिवसकालतुल्यत्वात्। प्राकृतप्रळयेनैमित्तिकप्रळये च पुराण
वचनानि। द्विपरार्धेव्यतिक्रम्यपरमेष्ठिनः। तदाप्रकृतयः सप्तकल्प्यंते। प्रळयायहि।
एषःप्राकृतिकोराजन् प्रळयोयत्रलीयते इतिभप्राकृतप्रळयेमानं। एवंनैमित्तिकः प्रळ
योयत्र विश्वसृक्। शेतेनंतासनेनित्यमात्मसात्कृत्य चात्मभूः। इति वचनंनैमित्ति
प्रळयेमानं। तृतीयप्रळयस्तु ब्रह्मसाक्षात्कारनिमित्तः सर्वमोक्षः। स एकजीववादे
वनानाजीववादे क्रमेण। सर्वैचैकीभवंतीश्रुतेः। तत्राद्यास्त्रयः प्रळयाः कर्मोप[illegible]य

मानिमित्ताः।तुर्यस्तुज्ञानोदयनिमित्तःप्रळयः।अज्ञानेनसहैवेतिविशेषः।एवंचतु
र्विधप्रळयोनिरूपितः॥ ॥तस्येदानींक्रमोनिरूप्यते॥ ॥भूतानांभौतिकानांच
कारणपालयक्रमेणोलयः।कारणलयसमयेकार्यपामाश्रयेणोतरेणावस्थानानु
पपत्तेः।किंतुसृष्टिक्रमविपरीतक्रमेण।तत्तत्कार्यनाशेतज्जकादृष्टनाशस्यैवप्रयोज
कतयाउपादाननाशस्याप्रयोजकत्वात्।अन्यथान्यायमतेमहाप्रळयेपृथिवी
परमाणुगतरूपरसादेरविनाशापत्तेः।यथाचाप्सुपृथिव्याः।आपांतेजसि।ते
जसोवायौ।वायोराकाशे।आकाशस्यजीवाहंकारे।तस्याहिरण्यगर्भाहंकारे।तस्या
विद्यायामित्येवंरूपप्रळयः।तदुक्तं।विष्णुपुराणे।जगत्प्रतिष्ठादेवर्षेपृथिव्यप्सु श्री
प्रलीयते॥तेजःस्यापःप्रलीयंतेतेजोवायुःप्रलीयते॥वायुश्चलीयतेव्योम्नितच्चा २४
व्यक्तेप्रलीयते॥अव्यक्तंपुरुषब्रह्मन्अव्यक्तेसंप्रलीयतेइति।एवंविविधप्रळय

कारणत्वं तत्पदार्थस्य तटस्थलक्षणं। ननु ब्रह्मणि जगत्कारणत्वे प्रतिपाद्यमाने सति
सप्रपंचं ब्रह्म स्यादन्यथा सृष्टिवाक्यानामप्रामाण्यापत्तेरिति चेन्न। नहि सृष्टिवाक्या
नां सृष्टौ तात्पर्यं। किंतु अद्वितीये ब्रह्मण्येव। तत्प्रतिपत्तौ कथं सृष्टेरुपयोगः। इत्थं य
दि सृष्टिमनुपन्यस्य प्रपंचस्य निषेधो ब्रह्मणि प्रतिपद्येत। तदा ब्रह्मणि निषिद्ध
स्यैव ब्रह्मणोऽन्यत्रावस्थानशंकया न निर्विचिकित्सितमद्वितीयत्वमुपपादितं स्या
त्। ततः सृष्टिवाक्यात् ब्रह्मणोपादेयत्वज्ञाने सत्युपादानं विना कार्यस्यान्यत्र सद्भा
वशंकायां निरस्तायां नेति नेतीत्यादिना ब्रह्मण्यपि तस्यासत्त्वोपादाने प्रपंचस्य
तुच्छत्वावगमे निरस्तनिखिलद्वैतविभ्रममखंडसच्चिदानंदैकरसं ब्रह्म सिध्य
तीति परंपरया सृष्टिवाक्यानामपि अद्वितीये ब्रह्मण्येव तात्पर्यं। उपासनाप्रकरणप
ठितसगुणवाक्यानां च उपासनाविध्यपेक्षितगुणारोपमात्रपरत्वात्। ननु

पापनत्वं। निर्गुणप्रकरणे पठितानां सगुणवाक्यानां निषेधवाक्यापेक्षित निषेध
संपादकत्वेन विनियोग इति नाकिंचिदपि वाक्यमद्वितीयब्रह्मप्रतिपादनेन विरु
ध्यते। तदेवंस्वरूपतटस्थलक्षणलक्षितं तत्पदवाच्यमीश्वरचैतन्यं मायायां प्रति
बिंबितमितिचेत्। तेषामयमाशयः। जीवपरमेश्वरजीवसाधारणचैतन्यमात्रं प्र
तिबिंबितं। तस्यैवं बिंबस्याविद्यात्मिकायां मायायां। प्रतिबिंबमीश्वरचैतन्यं अंतः
करणेषुप्रतिबिंबं जीवचैतन्यं। कार्योपाधिरयंजीवः कारणोपाधिरीश्वरः इतिश्रु
तेः। एतन्मते जलाशयगतशरावगतप्रतिबिंबयोरिव जीवपरमेश्वरयोर्भेदः। अ
विद्यात्मकोपाधेर्व्यापकतयात दुपाधिकेश्वरस्यापि व्यापकत्वं। अंतःकरणस्य
परिछिन्नतया तदुपाधिकजीवस्यपरिछिन्नत्वं। एतन्मतेविद्याकृतदोषाः जीवपर श्री
मेश्वरयोरपिस्युः। उपाधेः प्रतिबिंबपक्षपातित्वादिति। अस्वरसात्। बिंबात्मके ३५

तन्यमित्यपरे। तेषामयः। एकमेव चैतन्यं बिंबत्वाक्रांतं ईश्वरचैतन्यं प्रतिबिंबत्वा
क्रांतं जीवचैतन्यं। बिंबप्रतिबिंबकल्पनोपाधिश्च। एकजीववादे अंतःकरणान्यत्र।
अविद्यांतःकरणोपाधिप्रयुक्तो जीवपरभेदः। उपाधिकृतदोषाश्च जीव एव वर्तते। ननु
बिंबे परमेश्वरे। उपाधेः प्रतिबिंबस्यैव जीवपरमेश्वरयोर्भेदः। ननु यथा वास्तवमु
खदर्पणप्रवेश इव बिंबचैतन्यपरमेश्वरजीवप्रदेशे अभावात्तस्य सर्वांतर्यामित्वं न
स्यादिति चेन्न। साभ्रनक्षत्रस्य जलादौ प्रतिबिंबितेन बिंबभूतमहाकाशस्यापि ज
लादिप्रवेशासंबंधदर्शनपरिच्छिन्नबिंबस्य प्रातिबिंबदेशापरिच्छिन्नत्वेप्यपरिच्छिन्न
ब्रह्मबिंबस्य प्रतिबिंबदेशसंबंधाविरोधात्॥ ननु रूपहीनस्य ब्रह्मणो न प्रतिबिं
बसंभवः। रूपवतः एव तथात्वदर्शनात् इति वाच्यं। नीरूपस्यापि रूपस्य प्रतिबिं
बदर्शनात्। न च नीरूपस्य द्रव्यस्य प्रतिबिंबभावनियमः। आत्मनो द्रव्यत्वाभावच्

स्योक्तत्वात्। एकधाबहुधाचैव दृश्यते जलचंद्रवत्॥ यथोते ह्ययं ज्योतिरात्मा विवस्वा
न्। यो भिन्नान बधकोगच्छं न इत्यादिवाक्येन ब्रह्मप्रतिबिंबाभावानुमानाज्ञस्यबा
धितत्वाच्च। तदेवं तत्पदार्थो निरूपितः इदानीं त्वंपदार्थो निरूप्यते॥ ॥एकजीववा
दे अविद्याप्रतिबिंबो जीवः। अनेकजीववादे त्वंतःकरणप्रतिबिंबः। सचजाग्रत्स्वप्न
सुषुप्तिरूपावस्थात्रयवान्। तत्र जाग्रद्दशा नाम इंद्रियजन्यज्ञानावस्था। अवस्था
ते इंद्रियेभावान्नातिव्याप्तिः। इंद्रियजन्यज्ञानं चांतःकरणवृत्तिः। स्वरूपाज्ञानस्या
नादित्वात्। सा चांतःकरणवृत्तिः। आवरणअवरणाभिभवार्थ्येकिस्यैमतं। तथाह्य
विद्योपहितचैतन्यजीवत्वपक्षे घटाद्यधिष्ठानचैतन्यस्य जीवरूपतया जीवस्य सर्व श्री
दा घटादिभानत्वपक्षे न प्रसक्तो घटाद्यवच्छिन्नचैतन्यावरकरकमेज्ञानं मूलाविद्या ३६
परतंत्रमवस्थापदवाभ्युपगंतव्यं। एवं सति घटादेर्नभानप्रसंगः। अनावृत्तचैतन्य

संबंधस्यैवभानप्रयोजकत्वात्। तस्यचावरस्यसदात्‌ नत्वेकदाचिदपिघटभानंन
स्यादिति। तद्भंगेचवक्तव्यंतद्भंजकंनचचैतन्यमात्रं। तद्भासकस्यतदानिवर्तकत्वा
त्। नापिवृत्युपहितंचैतन्यं। परोक्षस्थलेपितंनिवर्त्यापत्तेरिति परोक्षव्यावृत्त
वृत्तिविशेषतदुपहितचैतन्यस्यवा आवरणभंगजनकत्वमित्यावरणार्थाभिभा
वार्थवृत्तिरित्युच्यते। संबंधघटनार्था वृत्तिरित्यपरंमतं। तद्विद्योपाधिकोपरिछि
न्नोजीवः। सचघटादिप्रदेशेविद्यमानोपि घटाद्याकारापरोक्षवृत्तिविरहदशायां
नघटादिकमवभासति। घटादिनासमसंबंधाभावात्। तदाकारवृत्तिदशायांतु
भासयति। तदासंबंधसत्वात्। नन्वविद्योपाधिकस्यापरिछिन्नस्यजीवस्यस्वत
एवसमस्तवस्तुसंबंधस्यवृत्तिविरहदशायांसंबंधाभावाभिधानमसंगतं। अ
संगत्वदृष्ट्यासंबंधाभावाभिधानेचवृत्त्यंतरमितिपरसंबंधोनस्यादितिचेन्न।

उच्यते। न वृत्तिदशायां जीवस्य घटादिना सह संबंधसामान्यनिषेधावगमः।
किं तर्हि घटादिभानप्रयोजकसंबंधविशेषः। सच संबंधविशेषः। जीवचैतन्यस्य
विषयस्य च व्यंजकतत्परता लक्षणः। कदाचित्कः। तत्तदाकारवृत्तिनिबंधनः। तथा
हि तैजसमंतःकरणं स्वच्छद्रव्यत्वात्। स्वत एव जीवचैतन्याभिव्यंजनसमर्थं।
घटादिकं तु न तथा। अस्वच्छद्रव्यत्वात्। ततः स्वाकारवृत्तिदशायां वृत्त्यभिभूतजा
अधर्मकतया वृत्त्युत्पादितचैतन्याभिव्यंजनयोग्यताश्रयतया च वृत्त्युत्थानानं
तरं चैतन्यमभिव्यनक्ति। तदुक्तं विवरणे। अंतःकरणं हि स्वस्मिन्निव स्वसंसर्गि
ण्यपि घटादौ चैतन्याभिव्यक्तियोग्यतामादधाति। अस्वच्छद्रव्यस्यापि स्वच्छद्र श्री
व्यत्वसंबंधदशायां प्रतिबिंबग्राहित्वं। यथा कुड्यादेः जलादिसंयोगदशायां ३७
मुखादिप्रतिबिंबग्राहिता। घटादेरभिव्यंजकत्वं च प्रतिबिंबग्राहित्वं चैतन्याभि

व्यंजकत्वं च तत्प्रतिबिंबितत्वं। एवंविधाभिव्यंजकत्वसिध्यर्थमेव वृत्तेः परोक्ष
स्थले बहिर्निर्गमनानंगीकारः। परोक्षस्थले तु वह्न्यादेर्वृत्तिसंयोगाभावेन चैत
न्याभिव्यंजकतया न प्रत्यक्षत्वं। एतन्मते च विषयाणां अपरोक्षत्वं च चैतन्याभि
व्यंजकत्वमिति द्रष्टव्यं। एवमस्यापरिछिन्नत्वेपि वृत्तेः संबंधत्वमिरूपितं। इदानीं
परिछिन्नत्वपक्षे संबंधार्थकत्वं प्रतिपाद्यते। तथाहि अंतःकरणोपाधिको जीवः।
तस्य च घटाद्युपदानता। घटादिदेशासंबंधात्। किंतु ब्रह्मैव घटाद्युपादानं। तस्य
मायोपहितस्य सकलघटाद्यन्वयित्वादत एव ब्रह्मणः सर्वज्ञता। तथा च जीवस्य
घटाद्यधिष्ठानब्रह्मचैतन्याभिदामंतरेण घटाद्यवभासाभावे प्राप्ते तदभासाय
घटाद्यधिष्ठानब्रह्मचैतन्याभेदसिध्यर्थं घटाद्याकारवृत्तिरिष्यते। ननु तथापि
कथं प्रमातृचैतन्यविषयचैतन्ययोरभेदसंभवादितिचेन्न। वृत्तेर्विषयदेशानि

गमिनांगीकारेण वृत्त्यंतःकरणविषयाणामेकदेशस्थत्वेन उपाधेयभेदभा
वस्योक्तत्वात्। एवमपरोक्षस्थले वृत्तेर्मृतभेदेनोपयोग उपपादितः। इंद्रि
याजन्यविषयगोचरांतःकरणवृत्त्यवस्था स्वप्नावस्था। जाग्रदवस्थाव्यावृत्त्यर्थ
मिंद्रियाजन्येति। अविद्यावृत्तिमत्यां सुषुप्तौ अतिव्याप्तिवारणायांतःकरणे
ति। सुषुप्तिर्नाम। अविद्यागोचराविद्यावृत्त्यवस्था। जाग्रत्स्वप्नयोरविद्याकारवृत्ते
रंतःकरणवृत्तित्वान्नातिव्याप्तिः। अत्र केचित्। मरणमूर्छयोरवस्थांतरत्वमाहुः।
अपरेतु सुषुप्तावेतयोरंतर्भावमाहुः। तत्र तयोरवस्थाद्वयांतर्भावबहिर्भावयोस्त्वं
पदार्थनिरूपणे उपयोगाभावान्नात्र प्रतिपाद्यते। तस्य च मायोपाध्यपेक्षयैकत्वं श्री
अंतःकरणोपाध्यपेक्षया नानात्वं व्यवह्रियते। एतेन जीवस्याणुत्वं प्रोक्तं बु ३८
द्धेर्गुणेनात्मगुणेन चैव वालाग्रमात्रो ह्यवरोऽपि दृष्ट इत्यादिदो जीवस्य बुद्धि

शब्दवाच्यांतःकरणोपरिणामोपाधिकपरिणामाश्रवणात्।सचजीवस्वयंप्र
काशः स्वप्नामधिकृत्यायंपुरुषःस्वयंज्योतिरितिश्रुतेः।अनुभवरूपश्चप्रज्ञा
नघनइत्यादिश्रुतेः।अनुभवामीतिव्यवहारस्तु प्रवृत्तिप्रतिबिंबितचैतन्यमा
दायोपपद्यते।एवंत्वंपदार्थोनिरूपितः॥अधुनातत्त्वंपदार्थयोरैक्यंमहावाक्य
प्रतिपाद्यमभिधीयते॥ ॥ननुनाहमीश्वरइत्यादिप्रत्यक्षेण किंचिज्ज्ञत्वादिवि
रुद्धधर्माश्रयत्वादिभेदेनद्वासुपर्णेत्यादिश्रुत्याद्वाविमौपुरुषौलोकेक्षरश्चा
क्षरएवच।क्षरःसर्वाणिभूतानिकूटस्थोक्षरउच्यतेइत्यादिस्मृत्याचजीवपर
भेदस्यावगतत्वेनतत्त्वमस्यादिवाक्यमादित्योयूपःयजमानःप्रस्तरइत्या
दिवदुपचारितार्थमेवेतिचेन्न।भेदप्रत्यक्षस्यसंभावितकरणाकरणदोषस्या
संभावितदोषस्यावेदजन्याभेदज्ञानेनबाध्यमानत्वात्॥अन्यथाचंद्रगता

धिकपरिमाणग्राहि ज्योतिःशास्त्रस्य चंद्रप्रादेशत्वग्राहिकत्वग्राहि प्रत्यक्षेणाबा
धापत्तेः। पाकरक्ते घटे रक्तोयं न तु श्याम इतिवत् सतिविशेषणेहीति न्यायेन जीव
परपरभेदग्राहिप्रत्यक्षस्य विशेषणीभूतधर्मभेदविषयत्वाच्च। नाप्यागमविरो
धः। तत्परास्तत्परयोस्तत्परावाक्यस्य बलवत्त्वेन लोसिद्धत्वात्। नानु वादिद्वारूप
त्वादिवाक्यापेक्षया उपक्रमोपसंहाराद्यवगतोद्वैततात्पर्यविशिष्टस्य तत्त्वमा
दिवाक्यस्य प्रबलत्वात्। न च जीवपरऐक्ये विरुद्धधर्माश्रयानुपपत्तिः। शीतस्यैव
जलस्योपाधिकौष्ण्याश्रयत्ववत् स्वभावतो निर्गुणस्यैव जीवस्यांतःकरणाद्यु
पाधिककर्तृत्वाश्रयत्वप्रतिभासोपपत्तेः। यदि च जलादावौष्ण्यमारोपितं तदा
प्रकृतेपि तुल्यं। न चासिद्धांतेकर्तृत्वस्य कचित् दृष्टभावादारोप्यप्रमाहितसंस्का
राभावे कथमारोप इति वाच्यं। लाघवेनारोप्यविषयसंस्कारानत्वे नैतत्स्य हेतुत्वात्। श्री० ३९

नचप्राथमिकानोपेक्षागतिः। कर्तृत्वादध्यासप्रवाहस्य अनादित्वात्। तत्त्वंपद
वाच्ययोः विशिष्टयोरैक्ययोगेलक्ष्यस्वरूपयोरैक्यमुपपादितमेव। ए अतएव
तत्प्रतिपादकतत्त्वमस्यादिमहावाक्यानामखंडार्थत्वं। सोयमित्यादिवत्। नच
कार्यपरत्वाभावेप्रामाण्यं। पुत्रस्तेजातइत्यादौसिद्धेपिसंगतिग्रहात्। एवंसर्व
प्रमाविरुद्धश्रुतिस्मृतीतिहासपुराणप्रतिपाद्यब्रह्मजीवपरैक्यंवेदांतशास्त्रवि
षयइतिसिद्धं॥ ॥इतिवेदांतपरिभाषायांविषयपरिछेदः॥ ॥इदानींप्रयोज
नंनिरूप्यते॥ यदवगतंसत्स्ववृत्तितयाइष्यतेत्प्रयोजनं। तच्चद्विविधं।मुख्यंगौ
णंचेति। सुखदुःखाभावौमुख्यप्रयोजने। तदन्यतरसाधनंगौणंप्रयोजनं। सुखं
चद्विविधंसातिशयंनिरतिशयंचेति। तत्रसातिशयंसुखंविषयानुषंगजनितां
तःकरणतारतम्यकृतानंदलेशाविर्भावविशेषः। एतस्यैवानंदस्याभिव्यक्तानि

मात्रामुपजीवतीति श्रुतेः। निरतिशयसुखं च ब्रह्मैव। आनंदो ब्रह्मेति व्यजानाति
श्रुतेः। आनंदात्मब्रह्मात्मकमोक्षः। शोकनिवृत्तिश्च। ब्रह्मविद्ब्रह्मैव भवति। तरं
ति शोकमात्मविदिति श्रुतेः। ननु लोकांतरावाप्तिश्च तज्जन्यवैषयिकानंदो वा
मोक्षः। तस्य कृतकत्वेनानित्यत्वे मुक्तस्य संसारित्वप्रसंगः। ननु त्वन्मतेप्यानंदा
वाप्तेरनर्थनिवृत्तेश्च तुल्यसदित्वदोषः। अनादित्वे मोक्षमुद्दिश्य श्रवणप्रवृत्त्य
नुत्पत्तेरिति चेन्न। सिद्धस्यैव ब्रह्मस्वरूपमोक्षस्यासिद्धत्वात् भ्रमेण तत्साध
नेप्रवृत्त्युपपत्तेः। अनर्थनिवृत्तेरप्यधिष्ठानरूपब्रह्मस्वरूपतया सिद्धैव। लोकेपि
प्राप्तप्राप्तिपरिहृतपरिहारयोः प्रयोजनं दृष्टमेव। यथा हस्तगतविस्मृतसुवर्णा श्री
दौ तव हस्ते सुवर्णमित्याप्तोपदेशे प्राप्तमेव प्राप्नोति। यथा वा बलात् रज्जौ सर्पभ्र ४०
मतः नायं सर्प इत्याप्तवाक्यात्परिहृतस्यैव सर्पस्य परिहारः। एवं प्राप्तस्यानं

दस्य प्राप्तिः। परिहृतस्याप्यनर्थस्य निवृत्तिर्मोक्षः प्रयोजनं। स च ज्ञानैकसाध्यः।
त्वमेव विदित्वातिमृत्युमेति। नान्यः पंथा विद्यतेऽयनायेत्यादिश्रुतेः। अज्ञाननिवृ
त्तेर्ज्ञानैकसाध्यत्वनियमाच्च। तच्च ज्ञानं ब्रह्मात्मैक्यगोचरं। अभयं वै जनक प्राप्तो
सि तदात्मानमेवावेदहं ब्रह्मास्मीत्यादिश्रुतेः। तत्त्वमस्यादिवाक्योत्थज्ञा
नं मोक्षस्य साधनमिति नारदीयवचनाच्च। तच्च ज्ञानमपरोक्षरूपं। परोक्षस्य
परोक्षभ्रमनिवर्तकत्वानुपपत्तेः। तच्चापरोक्षज्ञानं तत्त्वमस्यादिवाक्यादिति च
त। मनननिदिध्यासनसंस्कारांतःकरणादेवेत्यपरे। तत्र पूर्वाचार्याणामयमा
शयः। संविदापरोक्ष्यं नकारणविशेषोतिनिबंधनं। किंतु प्रमेयविशेषनिबंधनमित्यु
पपादितं। तथा च ब्रह्मणः प्रमातृजीवाभिन्नतया तद्गोचरशब्दजन्यमपि ज्ञानं
मपरोक्षं। अतएव प्रतर्दनाधिकरणे प्रतर्दनं प्रति प्राणोस्मि प्रज्ञात्मा तम मा

फ तुपास्त इती द्वियोक्त वाक्ये प्राणशब्दस्य ब्रह्मपरत्वे निश्चिते मामुपास्त इति
अस्मच्छब्दानुपपत्तिमाशंक्य तदुत्तरत्वेन प्रवृत्तशास्त्रदृष्ट्या तूपदेशो वामदेववि
दिति सूत्रे शास्त्रीया दृष्टिरिति तत्वमस्यावाक्यजन्यज्ञानं अहं ब्रह्मेति ज्ञानं दृ
ष्टिशब्देनोक्तमिति। अन्येषां त्वेवमाशयः। कारणविशेषनिबंधनमेव ज्ञानानां प्र
त्यक्षत्वं। न विषयविशेषनिबंधनमेकस्मिन्नेव सूक्ष्मवस्तुनि यदुपकरणापटु
पकरणयोः प्रत्यक्षव्यवहारदर्शनात्। तथा च संवित्साक्षात्त्वे। प इंद्रियजन्यत्व
स्यैव प्रयोजकतया न शाब्दजन्यज्ञानस्यापरोक्षत्वं। ब्रह्मसाक्षात्कारे मननिदि
ध्यासनसंस्कृतांतःकरणः औपनिषदत्वानुपपत्तिः। अस्मदुक्तमनसो वेदज
न्यज्ञानानंतरमेव प्रवृत्ततया वेदोपजीवित्वाद्वेदानुपजीवि मानांतरगम्यत्व श्री
स्यैव वेदागम्यत्वे विरोधात्। शास्त्रदृष्टिसूत्रमपि ब्रह्मविषयमानसप्रत्यक्षस्य ४२

ऽय १.

शास्त्रप्रयोजनत्वादुपपत्तेः। तदुक्तं। आतिसंराधने सूत्रे शास्त्रार्थज्ञानजा प्रमा॥
शास्त्रदृष्टिर्मतांतां वैवेत्ति वाचस्पतिः परमिति। तच्चज्ञानं पापक्षयाद्भवति। सचकर्मा
नुष्ठानादिति परंपरया कर्मणां विनियोगः। अतएव वेदानुवचनेन ब्राह्मणा विवि
दिषंति यज्ञेन दानेन तपसानाशकेनेति श्रुतेः। कषायकर्मभिः पक्वे ततो ज्ञानप्रवर्त
तेइत्यादि स्मृतिः संगच्छते। एवं श्रवणमनननिदिध्यासनान्यपि साधनानि भवंति
मैत्रेयीब्राह्मणे आत्मावारे दृष्टव्य इति दर्शनमनूद्य तत्साधनत्वेन श्रोतव्यो मंतव्यो
निदिध्यासितव्यः। श्रवणमनननिदिध्यासनानां विधानात्। श्रवणंनाम वेदांतानां ब्र
ह्मणि तात्पर्यावधारणानुकूलमानसी क्रिया। मननंनाम शब्दावधारितार्थे मानां ८
तरविरोधाशंकायां तन्निराकरणानुकूलतर्कात्मकज्ञानजनको मानसो व्यापारः।
निदिध्यासनंनाम अनादिदुर्वासनया विषयेष्वाकृष्यमाणस्य चित्तस्य विषयेभ्यो

पक्ष्यात्मविषयत्वस्थैर्यानुकूलो मानसो व्यापारः। तत्र निदिध्यासनं नाम
ब्रह्मसाक्षात्कारे साक्षात्करणं। ते ध्यानयोगानुगता अपश्यन्। देवात्मश
क्तिं स्वगुणैर्निगूढां इत्यादिश्रुतेः। निदिध्यासने च मननं हेतुः। अकृतमननस्या
र्थदार्ढ्याभावे तद्विषयानिदिध्यासनायोगात्। मने श्रवणं हेतुः। श्रवणाभावे ता
त्पर्यानिश्चयेन शाब्दज्ञानायोगेन श्रुतार्थविषयकयुक्तायुक्तत्वनिश्चयानुकूल
मननायोगात्। एतानि त्रीण्यपि ज्ञानोत्पत्तौ कारणानीत्येतावन्मात्रं केचिदा
चार्या ऊचिरे। अपरे तु श्रवणं प्रधानं मनननिदिध्यासनयोस्तु श्रवणात्पराचीन
योरपि श्रवणं ब्रह्मदर्शननिर्वर्तकतया आरादुपकारकतया अंगित्वमित्याहुः। श्री
तदप्यंगत्वं नातीव शोभनं तस्य श्रुत्यातस्य श्रुत्याद्यन्यतमप्रमाणगम्यस्य प्रकृ ४२
ते श्रुत्याद्यभावसंभवात्। तथाहि। बर्हि। भिर्यजेत दध्ना जुहोतीत्यादौ विवमन

ननिदिध्यासनयोरंगत्वे काचिच्छ्रुतिरस्ति। नापि बर्हिःश्रुतिः देवसदनेसी
दानीत्यादिमंत्राणां बर्हिःखंडनप्रकाशनसामर्थ्यवत् किंचिल्लिंगमस्ति। नापिप्र
देशांतरपठितस्य प्रवर्ग्यस्याग्निष्टोमे प्रवृणक्तीति वाक्यवत्। श्रवणानुवादेन
निदिध्यासनविनियोजकं किंचिद्वाक्यमस्ति। नापि दर्शपूर्णमासाभ्यां यजेत स्व
र्गकाम इति वाक्यावगतफलसाधनताकदर्शपूर्णमासप्रकरणे प्रयाजानामिव
फलसाधनत्वेनावगतस्य श्रवणस्य प्रमनननिदिध्यासनयोराम्नातं। ननु द्रष्टव्य इ
ति दर्शनानुवादेनागुणे विहिते सति फलवत्तया श्रवणप्रकरणे तत्संनिधावाम्नातं।
तयोर्मनननिदिध्यासनयोः प्रयाजन्यायेन प्रकरणादेवावगतेरिति चेन्न। तेध्यानयो ८
गानुगता अपश्यदित्यादिश्रुत्यंतरे ध्यानस्य दर्शनस्य दर्शनसाधनत्वेनावगतस्यां
गाकांक्षायां प्रयाजन्यायेन श्रवणमनननयोरेवांगतापत्तेः। क्रमसमाख्ये च द्वे इत्यद्र

नि[illegible]ता। किंचप्रयाजादौ गेऽजीवेंगत्वविचारः सप्रयोजनः पूर्वपक्षे विकृतिषु नप्रयाजानुष्ठा
नंसिध्यांतेतुतत्रापितदनुष्ठानमिति। प्रकृतेः श्रवणांनकस्यचिद्विकृतिः। येनमननानिदि
ध्यासनयोः तत्राप्यनुष्ठानांगत्वविचारः सफलोभवेत्॥ तस्मान्नतादर्थ्यशेषत्वंमन
ननिदिध्यासनयोः। किंतुयथाघटादिकार्यमृत्पिंडानांप्रधानकारणताच्चक्रादीनांस
हकारिकारणतेतिप्राधान्याप्राधान्यव्यपदेशः तथाः श्रवणमनननिदिध्यासनानामं
तव्यं। सूचितंचैतद्विवरणाचार्यैः। शक्तितात्पर्यविशिष्टशब्दावधारणंप्रमेयावगमं
प्रतिअव्यवधानेनकारणंभवति। प्रमाणस्यप्रमेयावगमंप्रतिअव्यवधानं। मनन
निदिध्यासनेतुचित्तस्यप्रत्यगात्मप्रवणत्वसंस्कारनिष्पंन्नतदेकाग्रवृत्तिकार्यद्वारे श्री
णब्रह्माद्वैतहेतुतांप्रतिपद्येते। इतिफलंप्रतिअव्यवहितस्यकरणस्यविशिष्टशब्दा ४३
वधारणस्यअव्यवहितमनननिदिध्यासनेतदंगेअंगीक्रियेते। इतिश्रवणादिषुचमु

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ౧

[illegible] ... తత్ర ప్రమాణాంతర ... తథాహి వివాద విషయాః ... [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

సచవివశేష సాంఖ్యవశాత్ త్రిత్వయోస్త్రయ్యుపాధేః త్రిసాంఖ్యవాన ప్రతిషఠి విషయోవిషయాస్తావం యధాభూయో ప్రతికషన వివక్షితా తత్తాలి
తద్వ్యధానాత్ శంవరభేదవతా వ్యపేరపి బ్రహ్మచచిన్నాసాం ఇత్యత్ర బ్రహ్మణం ఇతికషనవివక్షి తవ్యవధానాత్ తద్వ్యవయోస్త్ర్యాసాం ప్యయోస్త్రాం
ధారణం అవిద్యానామ విద్యావివ్రతాప్య అవిశేషనియామ్యాం ద్యావరణవితి వ్యాసే తే ద్విలాన్తర తద్భావత్వవ్యావృత్తి విశేషః పరబ్రహ్మ
వృత్తిం సంకల్ప విలయరహితః త్వదిత్త తస్మాదేతావయత వస్త్ర సాంఖ్య రహితాత్ప్రదిత్యతి సిద్ధః విస్తారం గతి సంస్కారం వివంచసాక్షా
త్ప్రపంచస్యతాదివిరుద్ధాదినిత్యాత్ తత్త్వవదుపాదానాయం విశ్వతాపవిద్యుత్ వస్తుప్రదిశ్యాదినిత్ర్యపాశ్యస్య యోగ్యం వంతి ప్రత్యక్ష
పరః అత్రభూతప్రాతికస్యం గావరావశాంత్త ఉపలక్ష్య సిద్ధం ప్రబుద్ధానాం కృప్రపంచసప్యాతిప్రలయ యోగ్యాం ప్రపం
చై బ్రహ్మణో ఇత్యాస్తయమాయసిద్ధః ఏవంప్రకారం తటస్థలక్షణం వస్తుదర్శనస్వరూపలక్షణం వాఖ్యాంశాదితి యద్యపిసత్యాదిశం
ప్రత్యక్షం లక్ష్యం తథాపి ప్రధానంబ నీనాంపనిత్య సామానందస్వరూపం కసె వాని త్త్వదం న్యాద్యం అనందస్వరూపాభి హితే ప్రయో
తదుపాదానం ప్రయోగే యావానంద్ర స్వరూప ధృతి యర్ణ వాపం చారాంగమ్ సత్యదిప్రత్యక్షే విరోధాత్ ఆనందబ్ర
హ్మణం ఇతి ప్రత్యక్ష విరోధాద్యాస్మ నబ్రహ్మాదిరూపం బ్రహ్మ తివాక్యం సత్యం విజ్ఞానమానందం బ్రహ్మ ఆనందో బ్రహ్మేత్యాది

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

రూపత్వస్య పరంపరయా నిత్యయస్సాప్యత్వాత్. చతుర్యర్థ శాస్త్రస్య ప్రథమం తత్ర సత్ప్రధనతాం సూత్రయతి అథాతో బ్రహ్మజిజ్ఞాసేత్యాదినా సవి
శేషత్వేన వేదాంతవిచారసాధ్యత్వాదిత్యర్థః ఉపోద్ఘాతః తథా వేదాంతవిచారసాధ్యత్వస్య ప్రతిపాదనస్య ప్రసంగ ఏవ ఉక్తేతి తత్ప్రథమసూత్రం
ర్థః బ్రహ్మజ్ఞానస్య విచారఫలత్వం ప్రతిపాదయతి పురుషార్థ ఇతి పురుషార్థో వేదాంతశ్రవణ సాధనాంతరనిరపేక్షత్వాత్ తదేవ
యథా శాస్త్రాదిషు విద్యాస్వప్రతిపాద్యబ్రహ్మాత్మైక్యతత్త్వజ్ఞానాత్ తదా పురుషార్థమాహ వినాపి శాస్త్రాణామ్
రమేతి ఇత్యర్థః తస్య కర్తృత్వాదివిశేషణరహితత్వాత్ తస్య ప్రతిపాదనస్య విచారాధీనత్వాదిత్యర్థః ఏవమితి ఏవం తత్త్వావబోధే
ద్వితీయం విచారాంతరం ద్వారత్వేన బ్రహ్మైక్యజ్ఞానస్య విచారఫలత్వం సప్రపంచం దర్శయతి తత్త్వజ్ఞానేతి
ద్వితీయస్య లోకప్రసిద్ధతా యదితాహ పుంబుద్ధేతి కస్య తత్త్వసిద్ధిరతిప్రకాశత్వప్రసిద్ధిః స్వరూపం లక్షణం ప్రమాణం తత్త్వమితి
తదితరాత్ అనన్యపునరుక్తి ప్రత్యక్షత్వం ప్రతిపత్తిః సంసారాపవర్గసాధనం ప్రతిపాదనం శాస్త్రే శాస్త్రే
తథా తత్త్వాదివిరహితస్య సత్త్వాదిప్రతిపాదకస్య ఇత్యాదినా తత్ప్రతిపాదనాదితి శాస్త్రస్య వృత్తిరుపలక్షణం
दृक्षया प्रव्रजंत्यकृतोद्वाहाः परंवैराग्यमाश्रिताः प्रवृत्तिलक्षणोयोगोज्ञा
नंसंन्यासलक्षणं तस्माज्ज्ञानंपुरस्कृत्यसंन्यसेदिहबुद्धिमानित्यादिवि
विदिषासंन्यासः यदातुविदितंतत्वंपरंब्रह्मसनातनं तदैकदंडंसंगृह्यसो
पवीतांशिखांत्यजेत् ज्ञात्वासम्यक्परंब्रह्मसर्वंत्यक्त्वापरिव्रजेदित्यादि
विद्वत्संन्यासः ननुकलाविद्यास्विवकदाचिदौत्सुक्यमात्रेणापिवेदितु
मिच्छासंभवस्यैव विद्वत्ताप्यापातदर्शिनः पंडितंमन्यमानस्यावलोक्य
ते नचतोप्रव्रजंतोदृष्टा अतोविविदिषाविद्वत्तेकीदृशौविवक्षितेइति

जी॰मु॰ चेदुच्यते यथातीव्रायांबुभुक्षायांउत्पन्नायांभोजनादन्योनरोचतेव्यापा
८ रःभोजनेचविलंबोनसोढुंशक्यते तथायदाजन्महेतुषुकर्मस्वत्यंतमरुचिः
वेदनसाधनेषुश्रवणादिषुत्वरामहतीसंपद्यते तादृशीविविदिषासंन्या
सहेतुःविद्वत्तायाअवधिरुपदेशसहस्र्यामभिहितः देहात्मज्ञानवज्ज्ञानंदे
हात्मज्ञानबाधकं आत्मन्येवभवेद्यस्यसनेछन्नपिमुच्यतइतिश्रुता
वपि भिद्यतेहृदयग्रंथिःछिद्यंतेसर्वसंशयाः क्षीयंतेचास्यकर्माणितस्मि
तस्मा न्दृष्टेपरावरेइति परमपिहैरण्यगर्भादिपदमवरंयस्मात्परावरः हृदये ॐ ८
वुद्धौसाक्षिणस्तादात्म्याध्यासोनाद्यविद्यानिर्मितत्वेनग्रंथिवदृढसंश्ले
षरूपत्वाद्ग्रंथिरित्युच्यते आत्मासाक्षीकर्तावासाक्षित्वेप्यस्यब्रह्मत्व

मुक्तिनवाब्रह्मत्वेपितद्बुध्वावेदितुंशक्यतेनवा शक्यत्वेनतद्वेदनमात्रेणमुक्ति
रस्तिनवेत्यादयःसंशयाः कर्माण्यनारब्धानिआगामिजन्मकारणानितदेत
द्बुध्यादित्रयमविद्यानिर्मितत्वादात्मदर्शनेननिवर्ततेस्मृतावप्ययमर्थउप
लभ्यते यस्यनाहंकृतोभावोबुद्धिर्यस्यनलिप्यते हत्वापिसइमांल्लोकान्नहं
तिननिबध्यतइति यस्यब्रह्मविदोभावःसत्तास्वभावआत्मानाहंकृतोना
हंकारेणतादात्म्याध्यासादंतर्भावितोबुद्धेर्लेपःसंशयः तदभावेत्रैलोक्य
वधेनापिननिबध्यतेकिमुतान्येनकर्मणेत्यर्थः नन्वेवंसतिविविदिषास
न्यासफलेनतत्त्वज्ञानेनैवागामिजन्मनांनिवारितत्वाद्वर्तमानजन्म
शेषस्यभोगमंतरेणनिवारयितुमशक्यत्वात् कृतमनेनविद्वत्संन्या

सप्रयासेनेतिचेत् मेवं विद्वत्संन्यासस्यजीवन्मुक्तिहेतुत्वात् तस्माद्दना
यविविदिषासंन्यासइवजीवन्मुक्तयेविद्वत्संन्यासःसंपादनीयः इतिवि
द्वत्संन्यासः अथकेयंजीवन्मुक्तिः किंवातत्रप्रमाणं कथंवातत्सिद्धिः सि
द्धावाकिंप्रयोजनमितिचेत् उच्यते जीवतःपुरुषस्यकर्तृत्वभोक्तृत्वसु
खदुःखादिलक्षणश्चित्तधर्मःक्लेशरूपत्वात्बंधोभवति तस्यनिवारणंजी
वन्मुक्तिः ननुअयंबंधःकिंसाक्षिणोनिवार्यतेकिंवाचित्तात् नाद्यः तत्त्वज्ञा
नेनैवनिवारितत्वात् नद्वितीयःअसंभवात् यदातुजलाद्द्रवत्वंनिवार्य
तेवन्हेर्वौष्ण्यंतदाचित्तात्कर्तृत्वादिनिवारणासंभवः स्वाभाविकत्वंतुसमा
नंसर्वत्रैवं आत्यंतिकनिवारणासंभवेप्यभिभवसंभवात् यथाजल

गतं द्रवत्वं मृत्तिकामेलनेनाभिभूयते वन्हेरौष्ण्यं मणिमंत्रादिना तथासर्वा
श्चित्तवृत्तयो योगाभ्यासेनाभिभवितुं शक्यंते ननु प्रारब्धं कर्म कृत्स्नाविद्याका
र्यनाशे प्रवृत्तस्य तत्वज्ञानस्य प्रतिबंधं कृत्वा स्वफलदानाय देहेंद्रियादिक
मवस्थापयति नच सुखदुःखादिभोगश्चित्तवृत्तिभिर्विना संपादयितुं शक्य
ते ततः कथमभिभवः मैवं अभिभवसाध्याया जीवन्मुक्तेरपि सुखातिशय
रूपत्वेन प्रारब्धफलएवांतर्भावात् तर्हि कर्मैव जीवन्मुक्तिं संपादयिष्यति
माभूत्पुरुषप्रयत्न इति चेत् कृषिवाणिज्यादावपि समानपर्यनुयोगः । क
र्मणः स्वयमदृष्टरूपस्य दृष्टसाधनसंपत्तिमंतरेण फलं तात्कालिकं दे
नत्रांतावप्यागामिजनिश्चयः ब्रह्मज्ञानं विना न स्यादिति वेदांतडिंडिमः

जी॰मु॰ जनना समर्थत्वादपेक्षितः कृष्यादौ पुरुषप्रयत्न इति चेत् जीवन्मुक्तावपि
९० समं समाधानं। सत्यपि पुरुषप्रयत्ने कृष्यादेः फलपर्यवसानं यत्र न दृश्यते
तत्र प्रबलेन कर्मांतरेण प्रतिबंधः कल्पनीयः तच्च प्रबलं कर्म स्वानुकूलवृष्ट्य
भावरूपां सामग्रीं संपाद्यैव प्रतिबध्नाति सच प्रतिबंधो विरोधिना प्रबलतरे
णोत्तंभकेन कारीर्यादिरूपेण कर्मणापनीयते तच्च कर्म स्वानुकूलां वृष्टिल
क्षणां दृष्टसामग्रीं संपाद्यैव प्रतिबंधकमपनयति किंबहुना। प्रारब्धकर्म
ण्येवात्यंतभक्तेन भवता योगाभ्यासरूपस्य पुरुषप्रयत्नस्य वैयर्थ्यं मन ॐ १०
सापि चिंतयितुमशक्यं अथवा प्रारब्धं कर्म यथा तत्त्वज्ञानात्प्रबलं तथा
तस्मादपि कर्मणो योगाभ्यासः प्रबलोऽस्तु तथाच योगिनामुद्दालकप्रभृ

तीनां स्वेच्छया देहत्याग उपपद्यते यद्यप्यल्पायुषामस्माकं तादृशो योगो न
संभवति तथापि कामादिरूपधीवृत्तिनिरोधमात्रे योगे को नाम प्रयासः य
दि शास्त्रीयप्रयत्नस्य प्राबल्यं नांगीक्रियते तदा चिकित्सामारभ्य मोक्ष
शास्त्रपर्यंतानां सर्वेषामानर्थक्यं प्रसज्येत नहि कश्चित्कदाचित्कर्मफ
लविसंवादमात्रेण दौर्बल्यमापादयितुं शक्यं अन्यथा कदाचित्कं परा
जयं दृष्ट्वा सर्वैर्भूपैर्गजाश्वादिसेनोपेक्ष्येत अत एवानंदबोधाचार्या आ
हुः नह्यजीर्णभयादाहारपरित्यागो भिक्षुकभयाद्वा स्थाल्यनधिश्रय
णं यूकाभयाद्वा प्रावरणपरित्याग इति शास्त्रीयस्य प्रयत्नस्य प्राबल्यं
वसिष्ठरामसंवादे विस्पष्टमवगम्यते सर्वमेवेह हि सदेत्यारभ्य तदप्यव

जी·मु· मुच्यसाधुनिषेध्यंतेनग्रंथेन वशिष्ठउवाच सर्वमेवेहहिसदासंसारेरघुनं
११ दन सम्यक्प्रयुक्तात्सर्वेणपौरुषात्समवाप्यते पुत्रवित्तस्वर्गलोकब्रह्म
लोकादिकंफलं पौरुषंपुत्रकामेष्टिकृषिवाणिज्यज्योतिष्टोमब्रह्मोपास
नानुष्ठानादिलक्षणःपुरुषप्रयत्नः उच्छास्त्रंशास्त्रितंचेतिपौरुषंद्विविधं
स्मृतं तत्रोच्छास्त्रमनर्थायपरमार्थायशास्त्रितं उच्छास्त्रंपरस्त्रीगमन
द्रव्यापहारादि शास्त्रितंनित्यनैमित्तिकानुष्ठानादि अनर्थःनरकः अर्थे
षुस्वर्गादिषुपरमोमोक्षःपरमार्थः आबाल्यादलमभ्यस्तैःशास्त्रसत्संग ॐ
मादिभिः गुणैःपुरुषयत्नेनसोर्थःसंप्राप्यतेहितः अलंसंपूर्णंसम्यगित्य ११
र्थः गुणैर्युक्तेनेत्यध्याहारोहितःश्रेयोरूपः श्रीरामउवाच प्राक्तनंवास

नाज्ञात्वं नियोजयति मां यथा । मुने तथैव तिष्ठामि कृपणः किं करोम्यहं वास
नाधर्माभिधं रूपजीवगतसंस्कार । वृत्तिविशेषः । अत एव हि हे राम श्रेयः प्राप्नोषि
शाश्वतं स्वप्रयत्नोपनीतेन पौरुषेणैव नान्यथा । यतो वासनापरतंत्रो भवा
न् अत एव हि पारतंत्र्यनिवारणाय स्वोत्साहसंपादितो मनोवाक्कायजन्यः
पुरुषव्यापारोपेक्षितः । द्विविधो वासनाव्यूहः शुभश्चैवाशुभश्च ते प्राक्तनो वि
द्यते राम द्वयोरेकतरोथवा । किं धर्माधर्मावुभावपि त्वां नियोजयतः उतैकतर
इति विकल्पः एकतरपक्षेपि शुभोशुभो वेत्यर्थात् सिद्धो विकल्पः । वासनौघेन
शुद्धेन तत्र चेदपनीयसे तत्क्रमेणाशु तेनैव पदं प्राप्स्यसि शाश्वतं । तत्र ते
षु पक्षेषु तत्तर्हि तेनैव क्रमेण शुभवासनाप्रापितेनैवाचरणेन प्रयत्नांतर

जी॰मु॰ निरपेक्षेण शाश्वतं पदं मोक्षं ।अथ चेदशुभो भावस्त्वां योजयति संकटे प्राक्त
१२ नस्तदसौ यत्नाज्जेतव्यो भवतां स्वयं ।भावो भावना तर्हि यत्नोऽशुभविरोधिशास्त्री
यं धर्मानुष्ठानं स्वयं जेतव्यो न तु सुहृद्भृत्यामात्यमुखेनैव पुरुषांतरमुखेन जंतु
मत्राकृः ।शुभाशुभाभ्यां वहंती वासनासरित् पौरुषेण प्रयत्नेन योजनीया शु
भे पथि ।उभयपक्षेऽपि शुभभागस्य प्रयत्नैनैरपेक्ष्येऽपि अशुभभागं शास्त्रीय
प्रयत्नेन निवार्य शुभमेव तस्य स्थाने समाचरेत् अशुभेषु समाविष्टं शुभेष्वे राम
वावतारयेत् स्वमनः पुरुषार्थेन बलेन बलिनां वर अशुभेषु परस्त्रीद्रव्या १२
दिषु शुभेषु शास्त्रार्थदेवताध्यानादिषु पुरुषार्थेन पुरुषप्रयत्नेन बलेन प्र
बलेन ।अशुभाच्चालितं याति शुभं तस्मादपीतरत् जंतोश्चित्तं तु शिशुवत्तस्मा

तच्चालयेद्बलात् यथा शिशुर्मृद्भक्षणान्निवार्य्य फलभक्षणे योजयेत् मणिमु
क्ताकर्षणान्निवार्य्य कंदुकाद्याकर्षणे योज्यते तथा चित्तमपि सत्संगेन च त
द्विपरीतविषयान्निवारयितुं शक्यं समतात्सांत्वनेनाशु न द्रागिति शनैः
शनैः पौरुषेण प्रयत्नेन लालयेच्चित्तबालकं चपलस्य पशोर्बंधनस्थान
प्रवेशनाय द्वावुपायौ भवतः हरिततृणप्रदर्शनकंडूयनादिकं वाक्पारुष्यं
दंडादिभर्त्सनं चेति तत्राद्येन सहसा प्रवेश्यते द्वितीयेन तस्ततो धावन् शनैः
प्रवेश्यते तथा शत्रुमित्रादिसमत्वंस्फरवबोधनं प्राणायामप्रत्याहारादिपु
रुषप्रयत्नश्चेत्येतौ द्वौ चित्तवशांस्युपायौ तत्राद्येन मृदुयोगेन शीघ्रं लाल
येत् द्वितीये हठयोगेन द्रागिति न लालयेत् किंतु शनैः शनैः द्रागभ्यासव

जी॰मु॰ शाम्यति यदा ते वासनोदयं तदाभ्यासस्य साफल्यं विद्धि त्वमरिमर्दन मृदुयो
१३ गाभ्यासाच्छीघ्रमेव सद्वासनोदये सति साफल्यमभ्यासस्य मंतव्यं न त्वल्प
कालेनासंभावनाशंकनीया संदिग्धायामपि भृशं शुभामेव समाहर शुभायां
वासनावृद्धौ तात दोषो न कश्चन शुभवासनाभ्यस्यमाना संपूर्णा न वेति यदा
पि संदेहस्तदापि शुभामभ्यसेदेव तद्यथा सहस्रजपप्रवृत्तस्य दशमीशतसं
ख्या यदा संदिग्धा तदा पुनरपि शतं जपेत् असंपूर्णो संपूर्तिः फलिष्यतीमसं
पूर्णेतिह्यानसहस्रजपो दुष्यतीति तद्वत् अव्युत्पन्नमना यावद्भवानज्ञात ॐ
तत्पदः गुरुशास्त्रप्रमाणैस्तु निर्णीतं तावदाचर ततः पक्वकषायेण नूनं १३
विज्ञातवस्तुना शुभोप्यसौ त्वया त्याज्यो वासनौघो निराधिना यदति शुभ

गमार्यसेवितं तच्छुभमनुसत्यमनोज्ञभावबुद्ध्या अधिगमय्यपदं तदद्विती
यं तदनुतदप्यवमुच्य साधु तिष्ठ इत्यर्थः तस्माद्योगाभ्यासेनकामाद्यभि
भवसंभवाज्जीवन्मुक्तो न विवदितव्यः॥ ॥इतिजीवन्मुक्तिस्वरूपं श्रुतिस्मृति
वाक्यानिजीवन्मुक्तिसद्भावेप्रमाणानि तानिचकठवल्ल्यादिषुपठ्यंते विमु
क्तश्चविमुच्यतइति जीवन्नेवदृष्टबंधनात्कामादेःविशेषेणमुक्तःसन्दे
हपातेभाविबंधाद्विशेषेणमुच्यते वेदनात्प्रागपिशमदमादिसंपादनेन
कामादिभ्योमुच्यतएव तथाव्युत्पन्नकामानांतत्रप्रयत्नेननिरोधः अ
त्रधीवृत्त्यनुदयमात्रादनुत्पत्तिरेवातोविशेषेणेत्युच्यते तथा प्रलयेदे
हपातेसतिकंचित्कालंभाविदेहबंधान्मुच्यते अत्रत्वात्यंतिकामोक्षइ

त्यभिप्रेत्यविशेषेणेत्युक्तं बृहदारण्यकेपिपठ्यते यदासर्वेप्रमुच्यंतेकामा
येस्यहृदिश्रिताः अथमर्त्योऽमृतोभवत्यत्रब्रह्मसमश्नुतइति श्रुत्यंतरेपि
सचक्षुरचक्षुरिवसकर्णोऽकर्णइवसमनाअमनाइवेति एवमन्यत्राप्युदा
हार्यंस्मृतिषुजीवन्मुक्तविदेहमुक्तस्थितप्रज्ञभगवद्भक्तगुणातीतब्राह्मणा
तिवर्णाश्रमादिनामभिस्तत्रतत्रव्यवह्रियते वशिष्ठरामसंवादे नृणांज्ञा
नैकनिष्ठानामित्यारभ्यसत्किंचिदवशिष्यतइत्यंतेनग्रंथेनजीवन्मुक्तःप
ठ्यते वशिष्ठः नृणांज्ञानैकनिष्ठानामात्मज्ञानविचारिणां साजीवन्मुक्ति
तोदेतिविदेहमुक्ततेवया ज्ञानैकनिष्ठत्वंलौकिकवैदिककर्मत्यागः देहेंद्रिय
सदसद्भावमात्रेणमुक्तिद्वयस्यविशेषानत्वनुभवतः द्वैतप्रतीतेरुभयत्रा

भावात् श्रीरामउवाच अस्मान्विदेहमुक्तस्यजीवन्मुक्तस्यलक्षणं ब्रूहियेनत
थैवाहंयतेशास्त्रगयादृशा वशिष्ठउवाच यथास्थितमिदंयस्यव्यवहारव
तोपिच असंगतंस्थितंव्योमसजीवन्मुक्तउच्यते इदंप्रतीयमानंगिरिनदी
समुद्रादिकंजगत्प्रतिपत्तुर्देहेंद्रियव्यवहारेणासहमहाप्रलयेपरमेश्वरेणा
पसंहृतंसत्स्वरूपायमर्द्दनास्संगतंभवति अत्रतुनतथाकिंतुविघनएवदेहें
द्रियव्यवहारःपरमेश्वरेणानुपसंहृतत्वात् यथापूर्वमवतिष्ठमानंसत्सर्वैः
प्राणिभिर्विस्पष्टमवलोक्यतेजीवन्मुक्तस्यतत्सत्यायकधीवृत्त्यभावात्सुषु
प्ताविवसर्वमसंगतंभवति स्वयंप्रकाशमानंचिद्व्योमकेवलमवशिष्यते
बद्धस्यसुषुप्तेतात्कालिकधीवृत्त्यभावसाम्येपिभाविधीवृत्तिबीजस्यस

द्भावान्न जीवन्मुक्तत्वं नोदेति नास्तमायाति सुखदुःखे मुखप्रभा यथाप्राप्ते
स्थितिर्यस्य स जीवन्मुक्त उच्यते मुखप्रभाहर्षः स्रक्चंदनसत्कारादि सुखे प्रा
प्तेपि संसारिण इव हर्षो नोदेति मुखप्रभा अस्तमया दैन्यं धनहानिधिक्कारा
दि दुःखे प्राप्तेपि न दीनो भवति इदानीं तत्र स्वप्रयत्नविशेषमंतरेण प्रारब्धक
र्मापादितपूर्वप्रवाहागतभिक्षान्नादिकं यथाप्राप्तं तस्मिन् स्थितिर्देहरक्षा स
माधिदार्ढ्येन स्रक्चंदनादिप्रतीत्यभावात् कदाचिद्व्युत्थानदशायामापा
ततः प्रतीतावपि विवेकदार्ढ्येन हेयोपादेयबुद्ध्याद्यभावाद्धर्षादिराहित्य
मुपपद्यते यो जागर्ति सुषुप्तिस्थो यस्य जाग्रन्न विद्यते यस्य निर्वासनो बो
धः स जीवन्मुक्त उच्यते चक्षुरादीन्द्रियाणां स्वस्वगोलकेवस्थानेनोपरत्यभा

वा जागर्ति मनसो वृत्तिरहितत्वात् सुषुप्तिस्थः अत एवेंद्रियैरर्थोपलब्धिरित्येत
स्य जागरणलक्षणस्याभावात् जाग्रन्नविद्यते सत्यपि बोधे जायमाने ब्रह्म
वित्वाभिमानादिभिर्भोगार्थापादितकामादिश्च धीदोषोयस्तस्य वासनावृत्तिरा
हित्येन तद्दोषाभावात् निर्वासनत्वं रागद्वेषभयादीनामरूपं चरन्नपि योंत
र्व्योमवदत्यछः स जीवन्मुक्तोच्यते रागानुरूपं भोजनादिप्रवृत्तिः द्वेषादिरू
पं बौद्धकापालिकादिभ्यो विमुखत्वं भयानुरूपं सर्पव्याघ्रादिभ्योपसरणं आ
दिशब्देन मात्सर्यादिरूपं इतरयोगिभ्य आधिक्येन समाध्यनुष्ठानं सत्या
मपि व्युत्थानदशायामीदृशआचरणे पूर्वाभ्यासप्रापिते विश्रांतचित्तस्य
कालुष्यरहितत्वादंतःस्वच्छत्वं यथाव्योम्नि धूमधूलिमेघादियुक्ते निर्लेप

जी॰मु॰ स्वभावत्वादतिशयेनस्वच्छत्वंतद्वत् यस्यनाहंकृतोभावोबुद्धिर्यस्यनलिप्य
९६ ते कुर्वतोकुर्वतोवापिसजीवन्मुक्तउच्यते पूर्वार्द्धंविद्वत्संन्यासप्रस्तावेव्या
ख्यातं लोकेबद्धस्यपुरुषस्यशास्त्रीयंकर्मकुर्वतोहंकर्तेति चिदात्माहंकृतो
भवति स्वर्गंप्राप्स्यामीतिहर्षेणबुद्धिर्लिप्यते अकुर्वतस्त्वकृत्यकृत्वानस्मीति
अहंकृतत्वंस्वर्गालाभविषादोलेपः एवंप्रतिषिद्धकर्माणिलौकिककर्मा
णिचयथासंभवंयोजनीयानि मुक्तस्यतुतादात्म्याध्यासाभावाद्धर्षाद्य
भावाच्चनदोषत्वं यस्मान्नोद्विजतेलोकोलोकान्नोद्विजतेचयः हर्षामर्ष ॐ
भयान्मुक्तःसजीवन्मुक्तउच्यते अधिक्षेपताडनादौअसहत्वादेतस्मा ९६
ल्लोकोनोद्विजते अतएवैतस्मिन्लोकस्याधिक्षेपाद्यप्रवृत्तेः कस्यचिदु

ष्टस्य तत्त्ववृत्तावपि एतच्चित्तेनाहंताविकल्पानुदयाच्चायमपि नोद्विजते ।
शांतसंसारकलनः कलावानपि निष्कलः यः सच्चित्तोपि निश्चित्तः स जीवन्मु
क्त उच्यते शत्रुमित्रमानादिविकल्पाः संसारकलनाः चतुःषष्टिविद्याः कलाः
तत्सद्भावेपि तदभिमानव्यवहारयोरभावात् निष्कलत्वं । चित्तस्य स्वरूपेण स
द्भावेपि वृत्त्यनुदयान्निश्चित्तत्वं चिंतनिपाठे वासनावशादात्मध्यानवृत्तिस
द्भावेपि लौकिकवृत्त्यभावान्निश्चित्तत्वं यः समस्तार्थजातेषु व्यवहार्यपि शी
तलः परार्थेष्विव पूर्णात्मा स जीवन्मुक्त उच्यते परगृहे विवाहोत्सवादौ स्व
यं गत्वा तत्रोचितदायकार्यं व्यवहरन्नपि लाभालाभयोर्हर्षविषादरूपं सं
तापं बुद्धिसंतापं न प्राप्नोति यथा एवमयं मुक्तः स्वदे[illegible]

जी॰मु॰ कार्येपिशीतलः न केवलं संतापाभावाच्छीतलत्वं किंतु परिपूर्णस्वरूपानुसं
१७ धानादपि॥ ॥इतिजीवन्मुक्तिलक्षणं इदानीं विदेहमुक्तिंतवयेत्यनेनैवदृ
ष्टांतेनसूचितविदेहमुक्तिस्वरूपंनावदाह। श्लोकत्रयेणजीवन्मुक्तिपदं
त्यक्तास्वदेहेकालसात्कृते विशत्यदेहमुक्तित्वंपवनोस्पंदतामिव। यथा
वायुःकदाचिच्चलनंत्यक्त्वानिश्चलस्वरूपेणावतिष्ठते। तथामुक्तात्मा
प्युपाधिकृतसंसारंत्यक्त्वास्वरूपेणावतिष्ठते। विदेहमुक्तोनोदेतिनास्त
मेतिनशाम्यति। नसन्नासन्नदूरस्थोनचाहंनचनेतरः। उदयास्तमयोर्हर्ष ॐ
विषादौनशाम्यति नचतस्यपरित्यागः लिंगदेहस्यात्रैवलीनत्वात्। सद्रू १७
पोजगद्धेतुरविद्यामायोपाधिर्नसप्राज्ञेश्वरः। असद्रूपोनापिभूतभौतिकः।

नदूरस्थइत्येकत्वानमायातीतः नचैत्यकत्वात्स्थूलभुक्समीपस्थोनिषिध्यते
अहंनचेतिनसमष्टिश्चनेतरइतिव्यष्टिश्चव्यवहारयोग्योविकल्पःकोपिना
स्तीत्यर्थः नतस्तिमितगंभीरंनतेजोनतमस्ततं अनाख्यमनभिव्यक्तंसत्किं
चिदवशिष्यते एवंविधयाविदेहमुक्त्यासदृशात्लोत्कर्षत्वोक्तेर्यथोक्तजीव
न्मुक्तावपियावद्यावन्निर्विकल्पकत्वातिशयस्तावत्तावदुत्तमत्वंद्रष्टव्यं
भगवद्गीतासुद्वितीयाध्यायेस्थितप्रज्ञःपठ्यते अर्जुनः स्थितप्रज्ञस्यकाभा
षासमाधिस्थस्यकेशव स्थितधीःकिंप्रभाषेतकिमासीतव्रजेतकिं प्रज्ञा
नत्वज्ञानं तत्द्विविधंस्थितमस्थितंचेति यथाजारानुरक्तायानार्याःसर्वे
ष्वपिव्यवहारेषुबुद्धिर्जारमेवध्यायति प्रमाणप्रतीतान्यपिक्रियमाणा

निगृहकर्माण्यपिसद्यएवविस्मर्यते तथापरवैराग्योपेतस्ययोगाभ्यासपा
टवेनात्यंतवशीकृतचित्तस्यउत्पन्नेतत्त्वज्ञानेतद्बुद्धिर्जारिभिवनैरंतर्येणतत्त्वं
ध्यायति तदेदंस्थितप्रज्ञानं उक्तलक्षणरहितस्यकेनापिपुण्यविशेषेणक
दाचिदुत्पन्नेपितत्त्वज्ञानेगृहकर्मवत्तत्रैवतत्त्वंविस्मर्यते तदिदमस्थितप्रज्ञा
नं एतदेवाभिप्रेत्यवशिष्ठआह परव्यसनिनीनारीव्यग्रापिगृहकर्मणि त
देवास्वादयत्यंतःपरसंगरसायनं एवंतत्त्वेपरेशुद्धेधीरोपिविश्रांतिमागतः त
देवास्वादयत्यंतर्बहिर्व्यवहरन्नपि इति तत्रस्थितप्रज्ञःकालभेदाद्द्विविधः ॐ
समाहितोव्युत्थितश्च तयोरुभयोर्लक्षणंपूर्वोत्तराभ्यामर्द्धाभ्यांपृच्छति स १८
माधिस्थस्यस्थितप्रज्ञस्यकाभाषा कीदृशोःलक्षणवाचकैःशब्दैःसर्वैरयं

भाष्यते व्युत्थितस्थितप्रज्ञः कीदृशं वाग्व्यवहारं करोति तस्योपवेशनगमने
मूढेभ्यो विलक्षणे कीदृशे श्रीभगवानुवाच प्रजहाति यदा कामान् सर्वा
न्पार्थ मनोगतान् आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते कामास्त्रि
विधाः बाह्याः आंतरा वासनामात्ररूपाश्चेति उपार्जितमोदकादयो बाह्याः
आशामोदकादय आंतराः पथिगततृणादिवदापाततः प्रतीता वासनारू
पाश्चेति समाहितोऽशेषधीवृत्तिसंक्षयात्सर्वान्परित्यजति अस्ति चास्य
मुखप्रसादलिंगगम्यः संतोषः स च न कामेषु किंत्वात्मन्येव कामानांत्य
क्त्वा शुद्धे परमानंदरूपात्मतत्त्वाभिमुखत्वाच्च न चात्र संप्रज्ञातसमा
धाविव आत्मानंदो मनोवृत्त्योल्लिख्यते किंतु स्वप्रकाशचिद्रूपेणात्मसं

जी॰मु॰ तोषो न वृत्तिरूपः किंतु तत्संस्काररूपः एवंविधैर्लक्षणवाचकशब्दैः समाहि
१९ तो भाष्यते दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः वीतरागभयक्रोधः स्थि
तधीर्मुनिरुच्यते दुःखं रोगादिनिमित्तजन्या रजोगुणविकाररूपा संतापा ख३
त्मिका प्रतिकूला चित्तवृत्तिः तादृशे दुःखे प्राप्ते सति अहं पापी धिङ्मां दुरात्मा
नमित्यनुतापात्मिका तमोगुणविकारत्वेन भ्रांतिरूपा चित्तवृत्तिरुद्वेगः
यद्यप्ययं विवेक इव भाति तथापि पूर्वस्मिन्जन्मनि तत्पापवृत्तिप्रतिबं
धकत्वात्सप्रयोजनोऽभविष्यत् इदानीं तु निष्प्रयोजन इति भ्रांतित्वं द्रष्ट ॐ
व्यं सुखं राज्यपुत्रलाभादिनिमित्तजन्या सात्विकी प्रीतिरूपानुकूला चि १८
त्तवृत्तिः तस्मिन्सुखे सत्यागामिनस्तादृशस्य सुखस्य कारणं पुण्यमन

तृष्णाय रथैवं देपेक्षा तामसी वृत्तिः स्पृहा । तत्र च सुखदुःखयोः प्रारब्धकर्म
प्रापितत्वाद्व्युत्थितचित्तस्य वृत्तिसंभवाच्च तदुभयमुपपद्यते उद्वेगस्पृ
हाहेतुत्वं न विवेकिनः संभवतस्तथा रागभयक्रोधाश्च तामसत्वेन कर्मप्रा
पितत्वाभावान्नास्य विद्यन्ते एवंलक्षणलक्षितस्थितधीः स्वानुभवप्रकटने
न शिष्यशिक्षार्थमनुद्वेगनिस्पृहत्वादिगमकं वचो भाषेतेत्यर्थः । यः सर्वत्रा
नभिस्नेहस्तत्तत्प्राप्य शुभाशुभं नाभिनंदति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता
यस्मिन्सत्यन्यदीयहानिवृद्धी स्वस्मिन्नारोप्येते तादृशोन्यविषयस्ता
मसवृत्तिविशेषः स्नेहः शुभं सुखहेतुः स्वकलत्रादिस्तद्गुणकथनादिप्रव
र्तिका धीवृत्तिरभिनंदः अत्र गुणकथनस्य परप्रचोदनार्थत्वाभावेनव्य

जी॰मु॰ २९

र्थत्वान्नद्वेष्टुरभिनंदस्तामसः । असूयोत्पादनेनदुःखहेतुःपरकीयविद्यादि
रेनंप्रत्यशुभोविषयस्तन्निंदाप्रवर्त्तिकाधीवृत्तिर्द्वेषः सापितामसस्तन्नि
दायानिवारणार्थत्वाभावेनव्यर्थत्वात्तएतेतामसाधर्माःकथंविवेकिनि
संभवेयुः । यदासंहरतेचायंकूर्मोंगानीवसर्वशः इंद्रियाणींद्रियार्थेभ्यस्तस्य
प्रज्ञाप्रतिष्ठिता । व्युत्थितस्यसमस्ततामसवृत्त्यभावःपूर्वश्लोकाभ्यामभिहि
तःसमाहितस्यतुवृत्तयएवनसंति कुतस्तामसत्वशंकेत्यस्यश्लोकस्याभि ॐ
प्रायः । विषयाविनिवर्त्तंतेनिराहारस्यदेहिनः रसवर्जंरसोप्यस्यपरंदृष्ट्वा २९
निवर्त्तते प्रारब्धंकर्मसुखदुःखहेतून्कांश्चिद्विषयांश्चंद्रोदयांधकारादि
रूपान्स्वयमेवसंपादयति । अन्यांश्चगृहक्षेत्रादीन्पुरुषाद्योगद्वारेणत

तश्चंद्रोदयादयः पूर्णेनइंद्रियसंहारलक्षणेनसमाधिनैवनिवर्त्तंते नान्य
थागृहादयस्तुसमाधिमंतरेणापिनिवर्तंते॥आहारणमाहारउद्योगःनिरुद्यो
गस्यगृहादिविषयानिवर्त्तंते रसस्तुनिवर्त्तते रसोमानसीतृष्णासोपिपर
परस्य मानंदरूपस्यब्रह्मणोदर्शनेसतिस्वल्पानंदहेतुभ्योनिवर्तंते किंप्रजयाक
रिष्यामोयेषांनायमात्मायंलोकइतिश्रुतेः।यततोह्यपिकौंतेयपुरुषस्यवि
पश्चितः इंद्रियाणिप्रमाथीनिहरंतिप्रसभंमनः तानिसर्वाणिसंयम्ययुक्त
आसीतमत्परः।वशेहियस्येंद्रियाणितस्यप्रज्ञाप्रतिष्ठिता उद्योगत्यागेब्र
ह्मदर्शनप्रयत्नंकुर्वतोपिकदाचित्कप्रमादपरिहारायसमाध्यभ्यासः
तदेतत्किमासीतेतिप्रश्नस्योत्तरं।ध्यायतोविषयान्पुंसःसंगस्तेषूपजाय

जी॰मु॰ ते संगात्संजायतेकामःकामात्क्रोधोभिजायते क्रोधाद्भवतिसंमोहःसंमो
२१ हात्स्मृतिविभ्रमः स्मृतिभ्रंशाद्बुद्धिनाशोबुद्धिनाशात्प्रणश्यति असतिसमा
ध्यभ्यासेप्रमादप्रकारउपन्यस्तः |संगोध्येयविषयसन्निधिःसंमोहोविवे
कपराङ्मुखत्वं स्मृतिविभ्रमस्तत्वानुसंधानाभावः|बुद्धिनाशोविपरीतभाव
नोपचयदोषेणप्रतिबद्धस्यज्ञानस्यमोक्षप्रदत्वेसामर्थ्याभावः|रागद्वेष
वियुक्तैस्तुविषयानिंद्रियैश्चरन् आत्मवश्यैर्विधेयात्माप्रसादमधिगच्छ
ति विधेयात्मत्वंवशीकृतमनस्त्वं प्रसादोनैर्मल्यं बंधराहित्यं समाध्य ॐ
भ्यासयुक्तस्तद्वासनाबलाद्व्युत्थानदशायामिंद्रियैर्व्यवहरन्नपिप्रसादं २१
सम्यक्प्राप्नोति तदेतत्किंव्रजेतेतिप्रश्नस्योत्तरं|उपरितनेनापिबहुना

ग्रंथेनस्थितप्रज्ञः प्रपंचितः ननु प्रज्ञायाः स्थित्युत्पत्तिभ्यां प्रागपि साधनत्वेन राग
द्वेषादिराहित्यकमपेक्षितं बाढं तथाप्यस्ति विशेषः स च श्रेयोमार्गकारैर्द
र्शितः विद्यास्थितये प्राग्यसाधनभूताः प्रयत्ननिष्पाद्याः लक्षणभूतास्तु पु
नः स्वभाववत्स्तेस्थिताः स्थितप्रज्ञेषु जीवन्मुक्तिरितीमां वदंत्यवस्थां स्थिता
त्मसंबोधां बाधितभेदप्रतिभासामबाधितात्मावबोधसामर्थ्यादिति । भग
वद्भक्तो द्वादशाध्याये भगवता वर्णितः । अद्वेष्टा सर्वभूतानां मैत्रः करुण ए
व च निर्ममो निरहंकारः सुखदुःखसमः क्षमी संतुष्टः सततं योगी यतात्मा
दृढनिश्चयः मय्यर्पितमनोबुद्धिर्यो मे भक्तः स मे प्रियः । ईश्वरार्पितमनस्त्वे
न समाहितस्यान्यानुसंधानाभावात् उत्थितस्य सत्यप्युदासीनानुसंधा

जी·सु·
२२

नं
नेहर्षविषादाभावाच्च सुखदुःखसाम्यं एवं वक्ष्यमाणेष्वपि द्वंद्वेषु द्रष्टव्यं ॥
यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः हर्षामर्षभयोद्वेगैर्मुक्तो यः
स च मे प्रियः अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः सर्वारंभपरित्यागी यो
मद्भक्तः स मे प्रियः यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति शुभाशुभपरित्या
गी भक्तिमान्यः स मे प्रियः समः शत्रौ च मित्रे च तथा मानापमानयोः शीतो
ष्णसुखदुःखेषु समः संगविवर्जितः तुल्यनिंदास्तुतिर्मौनी संतुष्टो येन के ॐ २२
नचित् अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नर इति अत्रापि पूर्ववद्विशे
षो वार्तिककारैर्दर्शितः उत्पन्नात्मप्रबोधस्य ह्यद्वेष्टृत्वादयो गुणाः अ
यत्नतो भवंत्यस्य न तु साधनरूपिण इति गुणातीतश्चतुर्दशाध्याये वर्णि

तः अर्जुनः कैर्लिंगैस्त्रीन्गुणानेतानतीतो भवति प्रभो किमाचारः कथंचै
तांस्त्रीन्गुणाननिवर्त्तते त्रयो गुणाः सत्वरजस्तमांसि तेषां परिणामविशे
षात्सर्वसंसारः प्रवर्त्तते ततो गुणातीतत्वं असंसारित्वं जीवन्मुक्तत्वमिति
यावत् लिंगानि परेषामेतदीयगुणातीतत्वबोधकानि आचार आचरणं
तदीयमनःसंचारप्रकारः कथमिति साधनप्रश्नः श्रीभगवानुवाच प्रका प्रकार
शंच प्रवृत्तिंच मोहमेवच पांडव न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति
॥उदासीनवदासीनो गुणैर्यो न विचाल्यते गुणा वर्त्तत इत्येवं योवतिष्ठति
नेंगते समदुःखसुखस्वस्थः समलोष्टाश्मकांचनः तुल्यप्रियाप्रियो धी
रस्तुल्यनिंदात्मसंस्तुतिः मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः॥

जी.न्मु. सर्वारंभपरित्यागी गुणातीतः स उच्यते मांच योव्यभिचारेण भक्तियोगेन से
२२ वते स गुणान्समतीत्यैतान् ब्रह्मभूयाय कल्पते प्रकाश प्रवृत्ति मोहाः सत्व
रजस्तमोगुणाः ते च जाग्रत्स्वप्नयोः प्रवर्तंते सुषुप्तिसमाधिमूर्छ्यचित्तला
वस्थासु निवर्तंते प्रवृत्तिश्च द्विविधा अनुकूला प्रतिकूला चेति तत्र मूढो जाग
रणे प्रतिकूलप्रवृत्तिं द्वेष्टि अन्यां चानुकूलप्रवृत्तिं कांक्षति गुणातीतस्य त्व
नुकूलप्रतिकूलाध्यासाभावात् द्वेषाकांक्षे न स्तः यथा द्वयोः कलहं कुर्व
तोरवलोकनकर्ता कश्चित्तटस्थः स्वयं केवलमुदास्ते न तु जयपराजया ॐ २२
भ्यामितस्ततश्चाल्यते तथा गुणातीतो विवेकी स्वयमुदास्ते गुणाव
र्तंते न त्वहमिति विवेकात् औदासीन्यं अहमेव करोमीत्यभ्यासश्चलनं।

द्वितिस्लो

नचास्यतदस्ति तदिदंकिमाचारइतिप्रश्नस्योत्तरं समदुःखसुखादीनिलिं
गानि अव्यभिचरितभक्तिसहितज्ञानध्यानाभ्यासेनपरमात्मसेवागुणा
त्ययसाधनं ब्राह्मणोव्यासादिभिर्वर्णितः अनुत्तरीयवसनमनुपस्तीर्य
शायिनं बाहूपधायिनंशांतंतंदेवाब्राह्मणंविदुः ब्राह्मणशब्दोब्रह्मवि
ति द्वाची अथब्राह्मणःश्रुत्यावर्णितः ब्रह्मविदश्चविद्वत्संन्यासाधिकारात्
यथाजातरूपधरोनाच्छादनंचरतिपरमहंसइत्यादिश्रुत्यापरिग्रहरा
हित्यस्यमुख्यत्वाभिधानात् अनुत्तरीयवासस्त्वादिकंतस्ययुक्तं येनकेन
चिदाच्छन्नोयेकेनचिदाशितः यत्रक्वचनशायीस्यात्तंदेवाब्राह्मणंवि
दुः देहनिर्वाहायाशनाच्छादनशायनस्थलापेक्षायामपि अशनादि

गतो गुणदोषौ नान्विष्येते उदरपूरणपुष्ट्यादिरूपस्य निर्वाहस्य समत्वा
त् निष्प्रयोजनस्य गुणदोषविचारस्य चित्तदोषत्वात् । अत एव भागवते
पठ्यते किं वर्णितेन बहुना लक्षणं गुणदोषयोः गुणदोषदृशिर्दोषो गुण
स्तूभयवर्जितः इति कंथाकौपीनवासास्तु दंडधृग्ध्यानतत्परः । एकाकी र
मते नित्यं तं देवा ब्राह्मणं विदुः । ब्रह्मोपदेशादिना प्राण्यनुजिघृक्षया मुत्र
मत्वज्ञापनेन श्रद्धामुत्पादयितुं दंडकौपीनादिलिंगं धारयेत् कौपीनं दंड
माच्छादनं च स्वशरीरोपभोगार्थाय च लोकस्योपकाराय च परिग्रहे दि
ति श्रुतेः अनुजिघृक्षयापि तदीयगृहकृत्यादिवार्तां न कुर्यात् किं तु ध्या
नपरो भवेत् तमेवैकं विजानीथ आत्मानमन्या वाचो विमुंचथेति श्रुतेः

तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः नानुध्यायाद्बहूंछब्दान्वाचोविग्ला
पनंहितदितिश्रुतेश्च ब्रह्मोपदेशात्त्वन्यावाक्नभवतीति न ध्यानविरोधीत
च्च ध्यानमेकाकित्वेन निर्विघ्नं संभवति अतएव स्मृत्यंतरेभिहितं एको भि
क्षुर्यथोक्तः स्यात् द्वावेव मिथुनं स्मृतं त्रयो ग्रामः समाख्यात ऊर्ध्वंतु नगरा
ता यते नगरं नहि कर्तव्यं ग्रामो हि मिथुनं तथा राजादिवार्तातेषु स्याद्भिक्षावा ग्रामे
र्तापरस्परमिति स्नेहपैशुन्यमात्सर्य्यसन्निकर्षात्प्रवर्तते निराशिषमना
रंभं निर्नमस्कारमस्तुतिं अक्षीणं क्षीणकर्माणं तं देवा ब्राह्मणं विदुः विशि
ष्टैः संसारिभिः प्रणमतां पुरुषाणां आशीर्वादः प्रयुज्यते यस्य यदपेक्षितं तं
प्रति तदभिवृद्धिप्रार्थनमाशीः तथा च पुरुषाणां भिन्नरुचित्वात्तत्तदभिम

जी॰ मु॰ २५

तान्वेषणेव्यग्रचित्तस्य लोकवासनावर्द्धते साच ज्ञानविरोधिनी । तथा स्मृत्यं
तरेच । लोकवासनया जंतोः शास्त्रवासनयापि च । देहवासनया ज्ञानं यथाव
न्नैव जायते एतच्चारंभनमस्कारादिष्वपि द्रष्टव्यं । आरंभः स्वार्थपरोपकारा
र्थं वा गृहक्षेत्रसंपादनप्रयत्नः तावता वाशीर्वादारंभो मुक्तेन त्याज्यो न चा
शीर्वादाभावे प्रणमतां नृणां खेदः शंकनीयः लोकवासनाखेदयोरुभयोः प
रिहाराय निखिलाशीर्वादप्रतिनिधित्वेन नारायणशब्दयोगात् आरं म्र
(प) भस्क सर्वे दृष्टदोष एव तथा च स्मृतिः सर्वारंभा हि दोषेण धूमेनाग्निरिवा ॐ २५
वृता इति । नमस्कारोपि विविदिषासंन्यासिनोभिहितः यो भवेत्पूर्वसंन्या
सी तुल्यो वै धर्मतो यदि तस्मै प्रणामः कर्तव्यो नेतराय कदाचनेति तत्र

पूर्वत्तधर्मतुल्यत्वविचारेचित्तंविक्षिप्यते अतएवनमस्कारमात्रेबहवःक
लहायमानाउपलभ्यंते।तत्रनिमित्तंवार्त्तिककारैर्दर्शितं।प्रमादिनोबहिश्चि
त्ताःपिशुनाःकलहोत्सुकाः संन्यासिनोपिदृश्यंतेवासनादूषिताशयाइति।
मुमुक्षस्यनमस्काराभावोभगवत्पूज्यपादैर्दर्शितः।नामादिभ्यःपरेभूम्निस्वारा
ज्येचेत्स्थितोद्वये प्रणमेत्कंतदात्मज्ञोनकार्यंकर्मणातदेति।चित्तकालुष्य
हेतोर्नमस्कारस्यप्रतिषेधेपिसर्वसाम्यबुद्ध्याप्रसादहेतुर्नमस्कारोभ्युपे
यते तथाचस्मृतिः ईश्वरोजीवकलयाप्रविष्टोभगवानिति प्रणमेद्दंडव
द्भूमावाश्वचंडालगोखरं।स्तुतिर्मनुष्यविषयाप्रतिषिद्ध्यतेनेश्वरविषया
तथाचस्मृतिः।आदरेण यथास्तौति धनवंतंधनेच्छया।तथाचेद्विश्वकर्त्तारं

ध्या

जी॰मु॰ २६ को न मुच्येत बंधनात् इति। अक्षीणत्वं अदीनत्वं। अत एव स्मृतिः अलाभे न विषा
दी स्यात्काले कालेऽन्नं क्वचित् लब्ध्वा न तुष्येद्धृतिमान् उभयं दैवतंत्रमिति
लाभश्चैवं न हर्षयेदिति। क्षीणकर्मत्वं विधिनिषेधातीतत्वं। निस्त्रैगुण्ये पथि वि
चरतां को विधिः को निषेध इति स्मरणात्। एतदेवाभिप्रेत्य भगवताप्युक्तं त्रै
गुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन निर्द्वंद्वो नित्यसत्त्वस्थो निर्योगक्षेम
आत्मवानिति। नारदोऽपि। स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातुचित्। सर्वे
विधिनिषेधाः स्युरेतयोरेव किंकरा इति। योहेरिव गणाद्भीतस्सन्मानान्नर राम २६
कादिव। कुणपादिव यः स्त्रीभ्यस्तं देवा ब्राह्मणं विदुः। राजावार्त्तादि तेषां स्या
दित्युक्तत्वात्सर्पवद्गणाद्भीतिरुपपद्यते। सन्मानस्यासक्तिकारणतया

पुरुषार्थविरोधित्वात् नरकवद्धेयत्वं अत एव स्मृतिः असन्मानात्तपोवृद्धिः स
न्मानात्तपसः क्षयः अर्चितः पूजितो विप्रो दुग्धा गौरिव सीदति । एतदेवाभिप्रे
त्यावमान उपादेयतया स्मर्यते २ तथा चरेत वै योगी सतां धर्ममदूषयन् ज
ना यथावमन्येरन् गच्छेयुर्नैव संगतमिति । स्त्रीशुद्धिविधौ दोषः प्रतिषिद्धत्वं
जुगुप्सितत्वं चेति तत्र प्रतिषिद्धत्वमात्रं कदाचिद्रागबलादुल्लंघ्यते तदेतद
भिप्रेत्य आह स्मृतिः मात्रा स्वस्रा दुहित्रा वा नैकशय्यासनो भवेत् बलवा
निंद्रियग्रामो विद्वांसमपि कर्षति तथा स्मृतिभिर्जुगुप्सा च दर्शिता स्त्रीणा
मवाच्यदेशस्य क्लिन्ननाडीव्रणस्य च अभेदेपि मनोभेदाज्जनः प्रायेण वं
चते चर्मखंडं द्विधा भिन्नमपानोद्गारधूपितं ये रमंति नरास्तत्र क्रिमितुल्याः

जी॰मु
२७

कथं न ते ॥ येरमंति नमस्तेभ्यः साहसं किमतः परमिति अतः प्रतिषेधजुगुप्स
योरुभयोर्विवक्षया कुणपदृष्टांतोत्राभिहितः ॥ येन पूर्णमिवाकाशं भवत्येके स्य
न सर्वदा ॥ शून्यं यस्य जनाकीर्णं तं देवा ब्राह्मणं विदुः ॥ संसारिणामेकाकित्वे
नावस्थानं भयालस्यादिहेतुत्वाद्दुर्जनसंमर्दस्तु तथाविधत्वादभ्युपेयः यो
गिनस्तद्विपरीतत्वं जगतो मिथ्यात्वादात्मनः पूर्णत्वाच्चेत्यर्थः ॥ मुक्तस्य त्वेका
कित्वे सत्यविघ्नेन ध्यानानुवृत्तोपरि पूर्णेन परमानंदात्मना सर्वमाकाशं पू
र्णमिवावभासते अतो भयालस्यशोकमोहादयो न भवंति ॥ तत्र को मोहः कः ॐ
शोक एकत्वमनुपश्यत इति श्रुतेः ॥ जनाकीर्णं मनुष्यस्थानं राजवार्त्तादिना २७
ध्यानविरोधित्वादानंदात्मप्रतीतिरहितं सच्छून्यमिव चित्तं क्लेशयति जग

तो मिथ्यात्वादात्मनः पूर्णत्वाच्चेत्यर्थः। अतिवर्णाश्रमी सूतसंहितायां मुक्तिखं
डे पंचमाध्याये परमेश्वरेण वर्णितः ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षु
कः अतिवर्णाश्रमी चेति क्रमाच्छ्रेष्ठा विचक्षणाः अतिवर्णाश्रमी प्रो
क्तो गुरुः सर्वाधिकारिणां न कस्यापि भवेच्छिष्यो यथाहं पुरुषोत्तम अतिव
र्णाश्रमी साक्षाद्गुरूणां गुरुरुच्यते तत्समो नाधिकश्चास्मिंल्लोकेस्त्येव न संश
यः यः शरीरेंद्रियादिभ्यो विभिन्नं सर्वसाक्षिणं पारमार्थिकविज्ञानं सुखात्मा
नं स्वयंप्रभुं परतत्वं विजानाति सोतिवर्णाश्रमी भवेत् यो वेदांतमहावाक्य
श्रवणेनैव केशव आत्मानमीश्वरं वेद सोतिवर्णाश्रमी भवेत् योवस्थात्र
यनिर्मुक्तमवस्थासाक्षिणं सदा महादेवं विजानाति सोतिवर्णाश्रमी भवेत्

ा॰मु॰ वर्णाश्रमादयो देहे मायया परिकल्पिताः नात्मनो बोधरूपस्य मम ते संति
८ सर्वदा इति यो वेद वेदांतैः सोति वर्णाश्रमी भवेत् आदित्यसन्निधौ लोकश्चे
ष्टते स्वयमेव तु। तथा मत्संनिधावेव समस्तं चेष्टते जगत् इति यो॰ सुवर्णे
बाहुकेयूरकटकस्वस्तिकादयः। कल्पिता मायया तद्वज्जगन्मय्येव सर्वदा
इति यो वेद वेदांतैः सोति वर्णाश्रमी भवेत् शुक्तिकायां यथा तारं कल्पितं मा
यया तथा महदादि जगन्मायामयं मय्येव कल्पितं ॥ इति यो वेद वेदांतैः सो॰। ॐ
चांडालदेहे पश्वादिशरीरे ब्रह्मविग्रहे अन्येषु तारतम्येन स्थितेषु पुरुषो २८
त्तम व्योमवत्सर्वदा व्याप्तः सर्वबंधविवर्जितः एकरूपो महादेवः स्थितः सो
हं परामृतः इति यो वेद वेदांतैः सो॰ विनष्टदिग्भ्रमस्यापि यथा पूर्वं विभाति

दिक् तथाविज्ञानविध्वस्तं जगन्मे भाति तन्नहि इतियोवेद वेदांतैः सो॰ यथा
स्वप्नप्रपंचोयं मयिमायाविजृंभितः तथाजाग्रत्प्रपंचोपि मयिमायाविजृं
भितः इतियोवेद वेदांतैः सो॰ यस्यवर्णाश्रमाचारोगलितः स्वात्मदर्शनात्
सचवर्णाश्रमान्सर्वानतीत्यस्वात्मनिस्थितः यस्त्यक्त्वास्वाश्रमान्वर्णान्स्वा
त्मन्येवस्थितःपुमान् सोतिवर्णाश्रमीप्रोक्तः सर्ववेदार्थवेदिभिः नदेहोनेंद्रि
यप्राणोनमनोबुद्ध्यहंकृती नचित्तंनैवमायाचनचव्योमादिकंचयत् नक
र्तानैवभोक्ताचनचभोजयिता तथा केवलंसच्चिदानंदंब्रह्मैवात्मा यथा
र्थतः जलस्यचलनादेवचंचलत्वंयथारवेः तथाहंकारसंसारादेवसंसा
रआत्मनः तस्मादन्यगतावर्णाआश्रमाअपिकेशव आत्मन्यारोपिताए

जी॰मु॰ वर्ण्णांस्या तेनात्मवेदिनः न विधिर्न निषेधश्च न वर्ज्यावर्ज्यकल्पना आत्मविज्ञा
२९ निनामस्ति तथा नान्यज्जनार्दन आत्मविज्ञानिनां निष्ठा मीदृशी मंवुजेक्षण मा
यया मोहिता मर्त्या नैव जानन्ति सर्वदा न मांसचक्षुषा निष्ठा ब्रह्मविज्ञानिना
मियं द्रष्टुं शक्या स्वतःसिद्धा विदुषां सैव केशव यत्र सुप्ता जना नित्यं प्रबुद्धस्तत्र
संयमी प्रबुद्धा यत्र ते विद्वान्सुषुप्तस्तत्र केशव एवमात्मानमद्वंद्वं निर्विकारं
निरंजनं नित्यशुद्धं निराभासं चिन्मात्रं परमामृतं यो विजानाति वेदांतैःस्वा ॐ
नुभूत्या च निश्चितं सोतिवर्णाश्रमी प्रोक्तः स एव गुरुरुत्तम इति तदेवं विमु २९
क्तश्च विमुच्यत इत्यादि श्रुतयो जीवन्मुक्तस्थितप्रज्ञभगवद्भक्तगुणातीत
ब्राह्मणातिवर्णाश्रमी प्रतिपादकस्मृतिवाक्यानि च जीवन्मुक्तिसद्भावे प्रमा

४ वासनाक्षयविज्ञानमनोनाशामहामते समंकालंचिराभ्यस्ताभवंतिफलदायिन
मुक्ताइति अन्वयव्यतिरेकमाह

णानीनिस्थितं॥ ॥इतिजीवन्मुक्तिप्रकरणं॥ ॥अथजीवन्मुक्तिसाधनंनिरूपया
मः तत्वज्ञानमनोनाशवासनाक्षयास्तत्साधनं अतएववाशिष्टरामायण
उपशमप्रकरणस्यावसानेजीवन्मुक्तिशरीरिणामित्यस्मिन्प्रस्तावेवशिष्ठ
आह॥ त्रयएतेसमंयावन्नस्वभ्यस्तामुहुर्मुहुः तावन्नपदसंप्राप्तिर्भवत्य
पिसमाशतैरिति समकालाभ्यासाभावबाधकमाह एकैकशोनिषेव्यंते
यद्येतेचिरमप्यलं तन्नसिद्धिंप्रयच्छंतिमंत्राःसंकीर्णिताइवेति यथासं
ध्यावंदनेमार्जनेनसहविनियुक्तानामापोहिष्ठेत्यादीनांतिसृणामृचांम
ध्येप्रतिदिनमेकैकस्याऋचःपाठेशास्त्रीयानुष्ठानंनसिद्ध्यति यथावाष
डंगमंत्राणामेकैकमंत्रेणनसिद्धिः यथावालोकेशाकसूपोदनादीनामे

जी॰मु॰ ३० केकेननभोजनसिद्धिः तद्वच्चिराभ्यासस्यप्रयोजनमाह त्रिभिरेतैश्चिराभ्यस्तै
र्हृदयग्रंथयोदृढाः निःशंकमेवत्रुट्यंतिबिसछेदाद्गुणाइवेति कमलनालछे
दात्तदंतस्थसूक्ष्मतंतुछेदवत् तस्यैवव्यतिरेकमाह जन्मांतरशताभ्यस्तारा
मसंसारसंस्थितिः साचिराभ्यासयोगेनविनानक्षीयतेक्वचिदिति नकेवल
मेकैकाभ्यासेफलभावः किंतुतत्स्वरूपमपिनसिध्यतीत्याह तत्वज्ञानंमनो
नाशोवासनाक्षयएवच मिथःकारणतांगत्वादुःसाध्यानिस्थितानिहीति
त्रयाणामेतेषांमध्येद्वयोर्द्वयोर्मेलनेनत्रीणिद्वंद्वानिभवंति तत्रमनोनाश ॐ
वासनाक्षयद्वंद्वस्यान्योन्यकारणत्वंव्यतिरेकमुखेनाह यावद्विलीनंनम ३०
नोनतावद्वासनाक्षयः नक्षीणावासनायावच्चित्तंतावन्नशाम्यति प्रदीप

ज्वालासंतानवद्वृत्तिसंतानरूपेणपरिणममानमंतःकरणंद्रव्यंमननात्मक
त्वान्मनइत्युच्यते तस्यनाशोनामवृत्तिरूपपरिणामंपरित्यज्यनिरुद्धत्वाका
रेणापरिणामः तथाचपतंजलिर्योगशास्त्रेसूत्रयामास व्युत्थाननिरोधसं
स्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयोनिरोधपरिणामइति
व्युत्थानसंस्कारा अभिभूयंते निरोधसंस्काराःप्रादुर्भवंति निरोधयुक्तःक्षणः
चित्तेनान्वीयते सोयंमनोनाश इत्यवगंतव्यं। पूर्वापरपरामर्शमंतरेणास
हसोत्पद्यमानस्यक्रोधादिवृत्तिविशेषस्यहेतुश्चित्तगतःसंस्कारोवास
ना पूर्वपूर्वाभ्यासेनचित्तेवास्यमानत्वात् तस्याश्चवासनायाःक्षयोनाम
जन्यायांशांत्यादिवासनायांदृढायांसत्यामपिबाह्यनिमित्तेक्रोधाद्यनु

न

जी॰मु॰ त्पत्तिः। तत्र मनोनाशाभावे वृत्तिषूत्पद्यमानासु कदाचिद्धास्यनिमित्ते क्रोधा
३१ द्युत्पत्तेः नास्ति वासनाक्षयः। अक्षीणायां च वासनायां तथैव वृत्त्युत्पादना
न्नास्ति मनोनाशः। तत्त्वज्ञानमनोनाशयोः परस्परं कारणत्वं व्यतिरेकमुखे
नाह यावन्न तत्त्वविज्ञानं तावच्चित्तशमः कुतः यावन्न चित्तोपशमो न तावत्त
त्त्ववेदनमिति इदं सर्वमात्मैव प्रतीयमानं तु रूपरसादिकं जगन्मायामयं न
त्वेन वस्तुतो स्तीति निश्चयस्तत्त्वज्ञानं तस्यानुत्पत्तौ रूपरसादिविषयाणां
सद्भावे सति तद्गोचराश्चित्तवृत्तयो न निवारयितुं शक्यंते यथा प्रक्षिप्यमा ॐ
णेषु इंधनेषु वह्निज्वाला न वार्यंते तद्वत् असति च चित्तोपशमे वृत्तिभि ३१
र्गृह्यमाणेषु रूपादिषु सत्सु नेह नानास्ति किंचन श्रुतेर्यजमानप्रस्तार

इत्यादेरिव प्रत्यक्षविरोधशंकया ब्रह्माद्वितीयमित्येतादृशात्तत्त्वनिश्चयो
नोदेति यावत्। वासनाक्षयतत्त्वज्ञानयोः परस्परकारणत्वं व्यतिरेकमुखेना
ह यावन्न वासनानाशस्तावत्तत्त्वागमः कुतः यावन्न तत्त्वसंप्राप्तिर्न तावद्वा
सनाक्षय इति क्रोधादिवासनास्वनष्टासु शमादिसाधनाभावान्न तत्त्वज्ञान
मुदेति अज्ञाते चाद्वितीयब्रह्मतत्त्वे क्रोधादिनिमित्तस्य सत्यत्वभ्रमानपाया
न्न वासना क्षीयते यथोक्तानां त्रयाणां द्वंद्वानां अन्योन्यकारणत्वमन्वयमु
खेन च वयमुदाहरामः मनसि नष्टे सति संस्कारोद्बोधकस्य बाह्यनिमित्तस्या
प्रतीतौ वासना क्षीयते क्षीणायां च वासनायां हेत्वभावेन क्रोधादिवृत्त्यनु
दयान्मनो नश्यति। तदिदं मनोनाशवासनाक्षयद्वंद्वं दृश्यते त्वयथाबुद्ध्यै

जी॰मु॰ ३२ तिश्रुतेरात्मैक्याभिमुखवृत्तेर्दर्शनहेतुत्वादितरकृत्स्नवृत्तिनाशस्यतत्वज्ञानहेतु
त्वमवगम्यते सतिचतत्वज्ञानेमिथ्याभूतेजगतिनरविषाणादाविवधीवृत्त्य
नुदयादात्मनश्चदृष्टत्वेनपुनर्वृत्त्यनुपयोगात् निरिंधनाग्निवन्मनोनश्यतीतित
दिदंमनोनाशतत्वज्ञानयोर्द्वंद्वंतत्वज्ञानस्यक्रोधादिवासनाक्षयहेतुतांवार्ति
ककाराआहुः रिपौबंधौस्वदेहेचसमैकात्म्यंप्रपश्यतः विवेकिनःकुतःकोपः
स्वदेहावयवेष्विवेति क्रोधादिवासनाक्षयरूपस्यशमादेर्ज्ञानहेतुत्वंप्रसिद्धं
वशिष्ठोप्याह गुणाःशमादयोज्ञानाच्छमादिभ्यस्तथाज्ञता परस्परंविवर्द्धे ॐ ३२
तेह्येतेपद्मसरसीइवेति तदिदंवासनाक्षयतत्वज्ञानयोर्द्वंद्वं तत्वज्ञानादीनां
त्रयाणांसंपादनेसाधनमाह तस्माद्राघवयत्नेनपौरुषेणविवेकिना भोगे

च्छां दूरतस्त्यक्त्वा त्रयमेतत्समाश्रयेदिति पौरुषो यत्नः केनाप्युपायेनावश्यं सं-
पादयिष्यामीत्येवंविधोत्साहरूपो निर्बंधः विवेको नाम। विभज्य निश्चयः त-
त्त्वज्ञानस्य श्रवणादिकं साधनं मनोनाशस्य योगः वासनाक्षयस्य प्रतिकूल-
वासनोत्पादनमिति भोगेच्छायाः स्वल्पायाः अभ्युपगमे हविषा कृष्णवर्त्मेव भू-
य एवाभिवर्द्धत इति न्यायेनातिप्रसंगस्य दुर्वारत्वात् दूरत इत्युक्तं। ननु पूर्व-
त्र विविदिषासंन्यासस्य तत्त्वज्ञानं फलं विद्वत्संन्यासस्य जीवन्मुक्तिरिति व्य-
वस्था वर्णिता तथा च सति प्रथमतस्तत्त्वज्ञानं संपाद्य पश्चाद्विद्वत्संन्यासं कृ-
त्वा जीवतः स्वस्य बंधरूपयोर्वासनामनोवृत्त्योर्विनाशः संपादनीय इति प्र-
तिभाति। अत्र तु तत्त्वज्ञानादीनां सहैवाभ्यासो नियम्यते अतः पूर्वोत्तरविरो-

जी॰मु॰ ३३ ध इति चेत् नायं दोषः प्रधानोपसर्जनभावेन व्यवस्थोपपत्तेः विविदिषासंन्या
सिनस्तत्त्वज्ञानं प्रधानं मनोनाशवासनाक्षयावुपसर्जनीभूतौ विद्वत्संन्या
सिनस्तु तद्वैपरीत्यं अतः सहाभ्यास उभयत्राप्यविरुद्धः । न च तत्त्वज्ञानोत्पत्ति
मात्रेण कृतार्थस्य किमुत्तरकालीनेनाभ्यासप्रयासेनेति शंकनीयं । जीवन्मु
क्तिप्रयोजननिरूपणे परिहरिष्यमाणत्वात् । ननु विद्वत्संन्यासिनो वेदनसा
धनश्रवणाद्यनुष्ठानवैफल्याद्वेदनस्य च स्वरूपेण कर्तुमकर्तुमन्यथाकर्तु
मशक्यस्य अननुष्ठेयत्वात् उपसर्जनत्वेनाप्युत्तरकालीनोभ्यासः कीदृश ॐ ३३
इति चेत् । केनापि द्वारेण पुनः पुनस्तत्त्वानुस्मरणमिति ब्रूमः तादृशाभ्या
सो लीलोपाख्याने दर्शितः तच्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनं एतदेक

परत्वंच ज्ञानाभ्यासं विदुर्बुधाः। सर्गादावेव नोत्पन्नं दृश्यं नास्त्येव तत्सदा इदंज
गदहंचेति बोधाभ्यासं विदुः परमिति मनोनाशवासनाक्षयाभ्यासावपि तत्रैव
दर्शितौ अत्यंताभावसंपत्तौ ज्ञातृज्ञेयस्य वस्तुनः युक्त्या शास्त्रैर्यतंते ये तेप्य
त्राभ्यासिनः स्थिता इति। ज्ञातृज्ञेययोर्मिथ्यात्वधीरभावसंपत्तिः स्वरूपेणाप्य
प्रतीतिरत्यंताभावसंपत्तिः युक्तिर्योगः सोयं मनोनाशाभ्यासः। दृश्यासंभवबो
धेन रागद्वेषादितानवे रतिर्बलोदिता यासौ ब्रह्माभ्यासः स उच्यते इति सो
यं वासनाक्षयाभ्यासः तेषेतिषु त्रिष्वभ्यासेषु सामान्येन प्रतीयमानेषु प्र
धानोपसर्जनभावो न विवेक्तुं शक्यत इति मैवं। प्रयोजनानुसारेण विवेक्तुं
शक्यत्वात् मुमुक्षोः पुरुषस्य जीवन्मुक्तिर्विदेहमुक्तिश्चेति द्वयं प्रयोजनं

जी·मु· विमुक्तश्चविमुच्यतइतिश्रूयते इतिप्रयोजनद्वयं तत्रजीवतःपुरुषस्यदैव
३४ संपदामोक्षःआसुरसंपदाबंधः एतच्चषोडशाध्यायेभगवताभिहितं दैवी
संपद्विमोक्षायनिबंधायासुरीमतेति तेचसंपदौतत्रैवाभिहिते अभयंसत्व
संशुद्धिःज्ञानयोगव्यवस्थितः दानंदमश्चयज्ञश्चस्वाध्यायस्तपआर्जवं अ
हिंसासत्यमक्रोधस्त्यागःशांतिरपैशुनं दयाभूतेष्वलोलुप्त्वंमार्दवंह्रीरचा
पलं तेजःक्षमाधृतिःशौचमद्रोहोनातिमानिता भवंतिसंपदंदैवीमभिजा
तस्यभारत दंभोदर्पोभिमानश्चक्रोधःपारुष्यमेवच अज्ञानंचाभिजातस्य एम
पार्थसंपदमासुरीमिति पुनरप्यध्यायसमाप्तेरासुरीसंपत्प्रपंचिता ३४
तत्राशास्त्रीयायाःस्वभावसिद्धायाःआसुरसंपदोदुर्वासनायाःशास्त्रीय

यापुरुषप्रयत्नसाध्यादेवीसंपदासद्वासनयाक्षयेसतिजीवन्मुक्तिर्भव
ति वासनाक्षयवन्मनोनाशस्यापिजीवन्मुक्तिहेतुत्वंश्रूयते मनएवमनुष्या
णांकारणंबंधमोक्षयोः बंधायविषयासक्तंमुक्त्यैनिर्विषयंस्मृतं यतोनि
र्विषयस्यास्यमनसोमुक्तिरिष्यते अतोनिर्विषयंनित्यंमनःकार्यंमुमुक्षु
णा निरस्तविषयासंगंसन्निरुद्धंमनोहृदि यदायात्युन्मनीभावंतदातत्प
रमंपदं तावदेवनिरोद्धव्यंयावद्धृदिगतंक्षयं एतज्ज्ञानंचध्यानंचशेषोन्याय
स्यविस्तरइति बंधोद्विविधः तीव्रोमृदुश्च तत्रआसुरसंपत्साक्षाद्देवक्ले
शहेतुत्वात्तीव्रोबंधः द्वैतप्रपंचमात्रप्रतीतिस्तुस्वयमक्लेशरूपत्वादासु
रसंपदुत्पादकत्वाच्चमृदुबंधः तत्रवासनाक्षयेणतीव्रबंधएवनिवार्य

न

ते मनोनाशेऽस्तूभयं तर्हि मनोनाशेनैवालं वासनाक्षयस्तु निरर्थक इति चेत्
नभोगहेतुना प्रबलेन प्रारब्धेन व्युत्थापिते मनसि सति तीव्रबंधनिवारणार्थ
त्वात् भोगस्य मृदुबंधेनाप्युपपत्तेः तामसवृत्तयस्तीव्रबंधः सात्विकरा
जसवृत्तिद्वयं मृदुबंधः एतच्च दुःखेष्वनुद्विग्नमना इत्यत्र स्पष्टीकृतं एवंच
सति मृदुबंधस्याप्युपेयत्वात्तीव्रबंधस्य वासनाक्षयेणैव निवृत्तेरनर्थको
मनोनाश इति चेत् नादुर्बलप्रारब्धापादितावश्यंभाविभोगप्रतीकारार्थ
त्वात् तादृग्भोगस्य प्रतीकारनिवर्त्यत्वमभिप्रेत्येदमाहुः अवश्यंभाविभा ॐ ३५
वानां प्रतीकारो भवेद्यदि तदा दुःखैर्न लिप्येरन्नलरामयुधिष्ठिरा इति
तेषां मनोनाशाभावात् तदेवं जीवन्मुक्तिं प्रति वासनाक्षयमनोनाशयोः

साक्षात्साधनत्वात्प्राधान्यं तत्वज्ञानंतुतयोरुत्पादनेनव्यवहितत्वादुपस
र्जनं तत्वज्ञानस्यवासनाक्षयहेतुत्वंबहुशःश्रुतौश्रूयते ज्ञात्वादेवंसर्वपा
शापहानिरध्यात्मयोगाधिगमेनदेवंमत्वाधीरोहर्षशोकौजहाति तरति
शोकमात्मवित्तत्रकोमोहःकःशोकएकत्वमनुपश्यतः ज्ञात्वादेवंमुच्यते
सर्वपाशैरिति।मनोनाशहेतुत्वंचतत्वज्ञानस्यश्रुतिसिद्धं विद्यादशामभि
प्रेत्येदंश्रूयते यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकिंजिघ्रेदित्यादिगौडपा
दाचार्याश्चाहुः आत्मसत्यानुबोधेननसंकल्पयतेयदा अमनस्तांतदा
यातिग्राह्याभावेतदग्रहमिति।जीवन्मुक्तेर्वासनाक्षयमनोनाशाविववि
देहमुक्तौसाक्षात्साधनत्वात्ज्ञानंप्रधानं।ज्ञानादेवतुकैवल्यंप्राप्यतेये

जी॰मु॰ ३६

नमुच्यत इति स्मृतेः केवलस्यात्मनो भावः कैवल्यं देहादिरहितत्वं तच्च तत्त्व
ज्ञानादेव प्राप्यते सदेहत्वस्याज्ञानकल्पितत्वेन ज्ञानैकनिवर्त्यत्वात् ज्ञाना
देवेत्येवकारेण कर्मव्यावृत्तिः न कर्मणा न प्रजयेति श्रुतेः यस्तु ज्ञानमात्र
मनभ्यस्य यथासंभवं वासनाक्षयमनोनाशावभ्यस्य सगुणब्रह्मोपास्ते
न तस्य कैवल्यमस्ति लिंगदेहस्यानपायात् अत एवकारेण तावपि व्यावर्त्ये
कैवल ते येन मुच्यत इत्यस्यायमर्थः येन ज्ञानप्रापितत्वेन कृत्स्नबंधाद्विमुच्यत ॐ
इति बंधश्चानेकविधः अविद्याग्रंथिरब्रह्मत्वं तद्धृदयग्रंथिः संशयः कर्मा ३६
णि अ सर्वकामत्वं मृत्युः पुनर्जन्मेत्यादिशब्दैस्तत्र तत्र व्यवहारात् एते बं
धाः सर्वे च ज्ञाननिवर्त्याः तथा च श्रुतयः एतद्यो वेद निहितं गुहायां सोऽविद्या

२ अनंतरा
ज्ञा

[illegible]

र्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे यो वेद निहितं गुहायां प
रमे व्योमन् सोऽश्नुते सर्वान्कामान्सह तमेव विदित्वाति मृत्युमेति यस्तु विज्ञान
वान्भवति समनस्कः सदा शुचिः स तु तत्पदमाप्नोति यस्माद्भूयो न जायते य ए
वं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवतीत्यादि अन्यान्यपि सर्वज्ञत्वादि बंधनि
वृत्तिपराणि वाक्यानि अत्रोदाहरणीयानि। सेयं विदेहमुक्तिर्ज्ञानोत्पत्तिसम
कालीना ज्ञेया ब्रह्मण्यविद्यारोपितानामेतेषां बंधानां विद्यया विनाशे सति
पुनरुत्पत्त्यसंभवादननुभवाच्च। न देतद्विद्यासमकालत्वं भाष्यकारः समन्व
यसूत्रे प्रपंचयामास। तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदे

जी॰मु॰ शात् ननु वर्त्तमानदेहपातानंतरं भाविनी देहमुक्तिरिति बहवो वर्णयंति तथा
३७ च श्रुतिः तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति वाक्यवृत्तावप्युक्तं
प्रारब्धकर्मवेगेन जीवन्मुक्तो यदा भवेत् किंचित्कालमनारब्धकर्मबंधस्य
संक्षये निरस्तातिशयानंदं वैष्णवं परमं पदं पुनरावृत्तिरहितं कैवल्यं प्रति
पद्यते सूत्रकारोप्याह भोगेन त्वितरे क्षपयित्वा संपद्यत इति इतरे प्रारब्ध
पुण्यपापे वशिष्ठोप्याह जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात्कृते विशत्य
देहमुक्तत्वं पवनोऽस्पंदतामिवेति नायं दोषः विवक्षाविशेषेण मतद्वयस्या ॐ ३७
विरोधात् विदेहमुक्तिरित्यत्र त्वेन देहशब्देन कृत्स्नदेहजातं विवक्षितत्वाद्
बहुभिर्वर्णितं अस्माभिस्तु भाविदेहमात्रविवक्षयोच्यते तदनारंभायैवज्ञा

त

नसंपादनात् अयंतुदेहः पूर्वमेवारब्धः अतोज्ञानेनापिनास्यारंभोनिवारयितुं
शक्यते एतद्देहनिवृत्तिरपिज्ञानफलमस्तु अज्ञानिनामप्यारब्धकर्मक्षयेन
न्निवृत्तेः तर्हिवर्तमानलिंगदेहनिवृत्तिर्ज्ञानफलमस्तुज्ञानमंतरेणतदनिवृत्ते
रितिचेत् न सत्यपिज्ञानेजीवन्मुक्तेतन्निवृत्त्यभावात् ननुज्ञानस्यकिंचित्का
लंप्रारब्धकर्मणाप्रतिबद्धत्वेनानिवर्तकत्वेपिप्रतिबंधक्षयेलिंगदेहनिवर्त्तः
किंसाधनमितित्वंभविष्यतीतिचेत् ~~सामग्रीनिवृत्तिरितिब्रूमः द्विविधंहिकार्य~~
निवर्तकं न पंचपादिकाचार्येण यतोज्ञानमज्ञानस्यैवनिवर्तकमित्युपपादि
तत्वात् । तर्हिलिंगदेहनिवृत्तेः किंसाधनमितिचेत् सामग्रीनिवृत्तिरितिब्रूमः
द्विविधंहिकार्यनिवर्तकं विरोधिसद्भावः सामग्रीनिवृत्तिश्च तद्यथा विरोधिना

जी॰मु॰ वायुना तैलवर्तिसामग्रीनिवृत्त्या वा दीपो निवर्त्तते लिंगस्य साक्षाद्विरोधिनेन
३८ पश्यामः सामग्री हि द्विविधा प्रारब्धमनारब्धं चेति ताभ्यामुभाभ्यामज्ञानिनां
लिंगदेह इहामुत्र चावतिष्ठते ज्ञानिनां त्वनारब्धस्य ज्ञानेन निवृत्तेः प्रारब्ध
स्य च भोगेन निवृत्तेः तैलवर्तिरहितप्रदीपवत् सामग्रीनिवृत्त्या लिंगदेहोपि
न निवर्त्तते अतो न तन्निवृत्तिर्ज्ञानफलं नन्वनेनन्यायेन भाविदेहानारंभो
पि न ज्ञानफलं तथा हि किमनारंभ एव फलं किं वा तत्प्रतिपालनं नाद्यः त ॐ
स्य प्रागभावरूपत्वेनानादिसिद्धत्वात् न द्वितीयः अनारब्धकर्मरूपसाम ३८
ग्रीनिवृत्त्यैव भाविदेहानारंभप्रागभावपरिपालनसिद्धेः न च तन्निवृत्तिः
फलं अविद्यानिवृत्तेरेव विद्याफलत्वात् नैष दोषः भाविजन्मानारंभादि

रूप

नांविद्याफलत्वस्य प्रमाणिकत्वात् यस्माद्वियोजनायतइत्याद्युदाहृताःश्रुत
यः तत्रप्रमाणं । नचज्ञानमज्ञानस्यैवनिवर्तकमितिन्यायेनविरोधः । अज्ञा
नसहभावनियतानामब्रह्मत्वादीनामज्ञानशब्देनपंचपादिकाचार्यैर्वि
वक्षितत्वात् अन्यथानुभवविरोधादनुभूयतेह्यज्ञाननिवृत्तिवद्ब्रह्मत्वा
दिनिवृत्तिरपि तस्माद्वाविदेहराहित्यलक्षणाविदेहमुक्तिर्ज्ञानसमकाली
ना । तथाचयाज्ञवल्क्यवचनंश्रूयते अभयंवैजनकप्राप्तोसीति एतावद
रेखल्वमृतत्वमितिच श्रुत्यंतरेपि तमेवंविद्वानमृतइहभवतीति । यद्युत
न्नेपितत्वज्ञानेनतत्फलभूताविदेहमुक्तिस्तदानींनभवेत् । अथोच्यतेका
लांतरेचभवेत्तदाज्योतिष्टोमादाविवज्ञानजन्यमपूर्वंकिंचित्कल्प्येत

गी॰ मु॰ तथाच कर्मशास्त्रे एव ज्ञानशास्त्रमंतर्भवेत् । अथोच्यते मंत्रादिप्रतिबद्धा
३९ ग्निवत् प्रारब्धप्रतिबद्धं ज्ञानं कालांतरे विदेहमुक्तिं दास्यतीति । मैवमविरो
धात् नह्यस्मदभिप्रेताभाविदेहात्यंताभावलक्षणा विदेहमुक्तिर्वर्तमा
नदेहमात्रस्थापकेन प्रारब्धेन विरुध्यते येन प्रतिबध्येत । किंच क्षणिक
त्वेन कालांतरे स्वयमविद्यमानं ज्ञानं कथं मुक्तिं दद्यात् । ज्ञानांतरं चरम
ब्रह्मसाक्षात्कारलक्षणमुत्पत्स्यत इति चेत् न साधनाभावात् प्रतिबंध ॐ
कप्रारब्धनिवृत्त्यैव सह गुरुशास्त्रदेहेंद्रियाद्यशेषजगत्प्रतिभासनिवृत्तेः ३९
किं तत्साधनं स्यात् नहि भूयश्चांते विश्वमायानिवृत्तिरित्यस्याः श्रुतेः
कोऽर्थ इति चेत् आरब्धांते निमित्ताभावात् देहेंद्रियाद्यशेषनैमित्तिकनि

वृत्तिरित्येवार्थः ततो भवदभिमता वर्तमानदेहराहित्यलक्षणा विदेहमुक्तिः
पश्चादस्मद्देहपातानंतरं अस्मदभिमता तु ज्ञानसमकालीनैव एतदेवाभि
प्रेत्य भगवान्शेष आह तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि परित्यजन्देहं ज्ञा
नसमकालमुक्तः कैवल्यं याति हतशोक इति तस्माद्विदेहमुक्तौ साक्षात्सा
धनस्य तत्त्वज्ञानस्य प्रधानत्वमुपपन्नं वासनाक्षयमनोनाशयोः ज्ञान
साधनत्वेन व्यवहितत्वादुपसर्जनत्वं आस्करवासनाक्षयकारिण्यादेव
वासनायाः ज्ञानसाधनत्वं श्रुतिस्मृत्योरुपलभ्यते शांतो दांत उपरतस्ति
तिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येदिति श्रुतिः स्मृतिरपि अमानि
त्वमदंभित्वमहिंसा क्षांतिरार्जवं आचार्योपासनं शौचं स्थैर्यमात्मविनिग्र

गी॰ मु॰ हः इंद्रियार्थेषु वैराग्यमनहंकार एव च जन्ममृत्युजराव्याधिदुःखदोषानु
४० दर्शनं असक्तिरनभिष्वंगः पुत्रदारगृहादिषु नित्यं च समचित्तत्वमिष्टानि
ष्टोपपत्तिषु मयि चानन्ययोगेन भक्तिरव्यभिचारिणी विविक्तदेशसेवित्वम
रतिर्जनसंसदि अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनं एतज्ज्ञानमिति
प्रोक्तमज्ञानं यदतोन्यथेति अन्यस्मिन्नहंबुद्धिरभिष्वंगः ज्ञायतेनेनेति व्यु
त्पत्त्या च ज्ञानसाधनमित्यर्थः मनोनाम्नास्यापि ज्ञानसाधनत्वं श्रुतिस्मृति
सिद्धं ततस्तु तं पश्यति निष्कलं ध्यायमान इति श्रुतेः अध्यात्मयोगाधिग ॐ ४०
मेन देवं मत्वा धीरो हर्षशोकौ जहातीति च प्रत्यगात्मसमाधिप्रास्त्यादेवं
ज्ञात्वेत्यर्थः विविनिद्राजितश्वासाः संतुष्टाः संयतेंद्रियाः ज्योतिः पश्यंति युं

ज्ञानानतस्मै विद्यात्मने नम इति स्मृतिः। तदेवं तत्त्वज्ञानादीनां त्रयाणां विदेहमुक्ति
जीवन्मुक्तिवद्यात् गुणप्रधानोपसर्जनभावेनव्यवस्थासिद्धा। ननु विविदिषा
संन्यासिना संपादितानामेतेषां किं विद्वत्संन्यासादूर्ध्वमनुवृत्तिमात्रं किं वा पु
नरपि संपादनप्रयत्नोपेक्षितः। नाद्यः तत्त्वज्ञानस्यैवान्ययोरपि अयत्नसि
द्धत्वात् प्राधान्यप्रयुक्तादसंभवप्रसंगात्। न द्वितीयः इतरयोरिव ज्ञानस्या
पि यत्नसापेक्षत्वे सत्युपसर्जनप्रयुक्तौदासीन्याभावप्रसंगात्। नायं दोषः
ज्ञानस्यानुवृत्तिमात्रमितरयोर्यत्नसाध्यत्वमित्यंगीकारात्। तथाहि वि
द्याधिकारी द्विविधः कृतोपास्तिरकृतोपास्तिश्चेति। तत्रोपास्यसाक्षात्का
रपर्यंतमुपास्तिं कृत्वा यदि ज्ञाने प्रवर्तेत तदा वासनाक्षयमानोनाशयोः

जी॰मु॰ दृढतरत्वेनज्ञानादूर्ध्वंविद्वत्संन्यासजीवन्मुक्तीस्वतएवसिद्ध्यतः तादृशएव
४१ शास्त्राभिमतोमुख्योविद्याधिकारीअतस्तंप्रतिशास्त्रेषुसहोपन्यासात्स्वरू
पेणविविक्तावपिविविदिषासंन्यासविद्वत्संन्यासौसंकीर्णाविवप्रतिभासे
ते।इदानींतनास्तुप्रायेणाकृतोपास्तयएवोत्कटकर्ममात्रात्सहसाविद्यायां
प्रवर्त्तन्तेवासनाक्षयमनोनाशौचतात्कालिकौसंपादयंति तावताश्रवण
मनननिदिध्यासनानिनिष्पाद्यंते तैश्चदृढाभ्यस्तैरज्ञानसंशयविपर्यय
निरासात् तत्त्वज्ञानंसम्यगुदेतिउदितस्यज्ञानस्यबाधकप्रमाणाभावा ॐ ४१
त् निवृत्ताविद्यायाःपुनरुत्पत्तिकारणाभावाच्चनास्तितस्यशैथिल्यं।वा
सनाक्षयमनोनाशौतुदृढाभ्यासाभावात्भोगप्रदेनप्रारब्धेनतदातदा

बाध्यमानत्वंच्च सवातप्रदेशादीपवत्सह सानिवर्त्तेते तथाहि वशिष्ठः पूर्वैः
भ्यस्तुप्रयत्नेभ्योविषमोयंहिसंस्मृतः दुःसाध्योवासनात्यागः सुमेरून्मूलना
दपीति अर्जुनोपि चंचलंहिमनःकृष्णप्रमाथिबलवद्दृढं तस्याहंनिग्रहंमन्ये
वायोरिवसुदुःकरमिति तस्मादिदानींतनानांविद्वत्संन्यासिनांज्ञानस्यानु
वृत्तिमात्रं वासनाक्षयमनोनाशोनुप्रयत्नसंपाद्याविति स्थितं ननुकेयंवा
सनातस्याःक्षयायकथंप्रयतितव्यं इतिचेत् तत्स्वरूपमाहवशिष्ठः दृढभा
वनयात्यक्तापूर्वापरविचारणं यदादानंपदार्थस्यवासनासाप्रकीर्तिता
भावितंतीव्रसंवेगादात्मनायत्तदेवसः भवत्याशुमहाबाहोविगतेतरसं
स्मृतिः तादृग्रूपोहिपुरुषोवासनाविवशीकृतः संपश्यतियदेवैतत्सद्व

जी॰मु॰ स्त्वितिविमुह्यति वासनावेगतो वशात्स्वरूपं प्रजहाति तत् भ्रांतं पश्यति दुर्दृष्टिः
४२ सर्वं मदवशादिवेति अत्र च स्वस्वदेशाचार कुलधर्मभाषाभेद तद्गतापशब्द
सुशब्दादिषु प्राणिनामभिनिवेशः सामान्यत उदाहरणं विशेषतस्तु भेदानु
क्त्वा पश्चादुदाहरामः यथोक्तां वासनामभिप्रेत्य बृहदारण्यके श्रूयते स य
थाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते त
दभिसंपद्यत इति वासनाभेदो वाल्मीकिना दर्शितः वासना द्विविधा प्रोक्ता ॐ
शुद्धा च मलिना तथा मलिना जन्महेतुः स्याच्छुद्धा जन्मविनाशिनी अज्ञा ४२
नसुघनाकारा घनाहंकारशालिनी पुनर्जन्मकरी प्रोक्ता मलिना वास
ना बुधैः पुनर्जन्मांकुरं त्यक्त्वा स्थिता संभ्रष्टबीजवत् देहार्थं ध्रियते ज्ञातज्ञे

याशुद्धेति सोच्यते देहादीनां पंचकोशानां तत्साक्षिणश्चिदात्मनश्च भेदाव
रकमज्ञानं तेन स्फुटघनीभूत आकारो यस्याः सेयमज्ञानस्फघनाकाराय
थाक्षीरं तक्रसेचनेन घनीभवति यथाविलीनं घृतमत्यंतशीतलप्रदेशेचि
रमवस्थापितं स्फुटघनीभवति तथावासनादृष्टव्याघनीभावश्चात्रभ्रांतिप
रंपरा तां चासुरसंपद्विवरणे भगवानाह प्रवृत्तिं च निवृत्तिं च जना न विदुरा
सुराः न शौचं नापि चाचारो न सत्यं तेषु विद्यते असत्यमप्रतिष्ठं ते जगदा
हुरनीश्वरं अपरस्परसंभूतं किमन्यत्कामहेतुकं एतां दृष्टिमवष्टभ्य नष्टा
त्मानोऽल्पबुद्धयः प्रभवंत्युग्रकर्माणः क्षयाय जगतोऽहिताः काममाश्रि
त्य दुःपूरं दंभमानमदान्विताः मोहाद्गृहीत्वासद्ग्राहान्प्रवर्त्तंतेऽशुचिव्रताः॥

गी॰भु॰ ४३ श्चिंतामपरिमेयांच प्रलयांतामुपाश्रिता कामोपभोगपरमा एतावदितिनिश्चि
ताः आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ईहंते कामभोगार्थमन्यायेना
र्थसंचयानिति घनाहंकारश्चतत्रैवोदाहृतः इदमद्यमयालब्धमिदंप्राप्स्येमनो
रथं इदमस्तीदमपिमेभविष्यतिपुनर्धनं असोमयाहतःशत्रुर्हनिष्येचापरान
पि ईश्वरोहमहंभोगीसिद्धोहंबलवान्सुखी आढ्योभिजनवानस्मिकोन्यो
स्तिसदृशोमया यक्ष्येदास्यामिमोदिष्यइत्यज्ञानविमोहिताः अनेकचि ॐ
त्तविभ्रांतामोहजालसमावृताः प्रसक्ताःकामभोगेषुपतंतिनरकेशुचा ४३
विति एतेनपुनर्जन्मकरत्वमुदाहृतंभवंति तच्चजन्ममरणकरत्वंपुनःप्र
पंचितं आत्मसंभाविताःस्तब्धाधनमानमदान्विताः यजंतेनामयज्ञैस्तेदं

भेनेविधिपूर्वकं अहंकारंबलंदर्पंकामंक्रोधंचसंश्रिताः मामात्मपरदेहेषु
प्रद्विषंतोभ्यसूयकाः तानहंद्विषतःक्रूरान्संसारेषुनराधमान् क्षिपाम्यजस्र
मशुभानासुरीष्वेवयोनिषु आसुरींयोनिमापन्नामूढाजन्मनिजन्मनि मा
मप्राप्यैवकौंतेयततोयांत्यधमांगतिं शुद्धवासनानुज्ञानज्ञेयस्वरूपंत्रयोदशा
ध्यायेभगवानाह ज्ञेयंयत्तत्प्रवक्ष्यामियज्ज्ञात्वामृतमश्नुते अनादिमत्परंब्र
ह्मनसत्तन्नासदुच्यते सर्वतःपाणिपादंतत्सर्वतोक्षिशिरोमुखं सर्वतःश्रुति
मल्लोकेसर्वमावृत्यतिष्ठति सर्वेंद्रियगुणाभासंसर्वेंद्रियविवर्जितं असक्तं
सर्वभृच्चैवनिर्गुणंगुणभोक्तृच बहिरंतश्चभूतानामचरंचरमेवच सूक्ष्मत्वा
त्तदविज्ञेयंदूरस्थंचांतिकेचतत् अविभक्तंचभूतेषुविभक्तमिवचस्थितं भूत

जी॰मु॰ ४४ भर्तृ च तद्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यत इ
ति। अत्र तटस्थलक्षणस्वरूपलक्षणाभ्यामवगंतुं सोपाधिकनिरुपाधिकस्व
द्वयमुप रूपंन्यस्तं कदाचित्संबंधिसत् यल्लक्षयति तत्तटस्थलक्षणं यथा काकवद्देव
दत्तगृहं तथा कालत्रयसंबंधिसत् यल्लक्षयति तत्स्वरूपलक्षणं यथा प्रकृष्ट
प्रकाशश्चंद्र इति। ननु त्वयोक्तपूर्वापरविचारणत्वं वासनालक्षणमुक्तं ज्ञेयत्ता
नं च विचारजन्यं अतो न शुद्धायां तल्लक्षणमस्तीति मैवं लक्षणे दृढभावनये
त्युक्तत्वात् यथा बहुषु जन्मसु दृढभावितत्वेनास्मिन्जन्मनि विनैव परो ॐ
पदेशमहंकारममकारयोः कामक्रोधादयो मलिनवासना उत्पद्यंते ४४
यथा प्रामिकस्य बोधकस्य विचारजन्यत्वेपि दीर्घकालनैरंतर्य्यसत्कारे

र्भावितत्वे पश्चाद्वाक्ययुक्तिपरामर्शमंतरेणैव पुरोवर्तिघटवत्सहसा तत्त्वंप
रिस्फुरति नाहं त्वया बाधानुवृत्त्या सहित इंद्रियव्यवहारः शुद्धवासना साच
देहनिर्वाहमात्रायोपयुज्यते न तु दंभदर्पाद्यासुरसंपदुत्पादनाय नापि
जन्मांतरहेतुधर्माधर्मोत्पादनाय यथा संभ्रष्टानि व्रीह्यादिबीजानि कुक्षि
पूरणमात्रायोपयुक्तानि न तु रुचिकरान्नाय नापि सस्यनिष्पत्तये त
द्वत् मलिना च वासना त्रिविधा लोकवासना शास्त्रवासना देहवासना चे
ति सर्वे जना यथा न निंदंति यथा च स्तुवंति तथैव सर्वदाचरिष्यामीति
अभिनिवेशो लोकवासना तस्याः संपादयितुमशक्यत्वान्मलिनत्वं तथा
हि कोन्वस्मिन्सांप्रतं लोके गुणवान्कश्च वीर्यवान् इत्यादिना बहुधा वा

जी॰ मु॰ ४५ ल्मीकिः पप्रच्छ इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुत इत्यादिना प्रत्युत्त
रं नारदो ददौ तादृशस्यापि रामस्य पतिव्रताशिरोमणिभूताया जगन्मातुः
सीतायाश्च श्रोतुमप्यशक्यो जनापवादः संप्रवृत्तः किमु वक्तव्यमन्येषां
तथा देशविशेषेण परस्परनिंदाबहुलमुपलभ्यते दाक्षिणात्यैर्विप्रैरौत्त
राः वेदविदोपि विप्रा मांसभक्षिणो निंद्यंते औत्तरैश्च मातुलसुतोद्वाहि
नो दाक्षिणात्या निंद्यंते बह्वृचा आश्वलायनशाखां काण्वशाखायाः
प्रशस्तां मन्यंते वाजसनेयिनस्तु वैपरीत्येन एवं स्वस्वकुलगोत्रबंधुवर्गे ॐ ४५
ष्टदेवतादिपरिप्रशंसा परकीयनिंदा च विद्वांसं आरभ्य अंगनागोपालं
सर्वत्र प्रसिद्धा एतदेवाभिप्रेत्योक्तं को लोकमाराधयितुं समर्थ इति ॥

विद्यते न खलु कश्चिदुपायः सर्वलोकपरितोषकरो यः सर्वथा स्वहितमाचर
णीयं किं करिष्यति जनो बहुजल्प इति च अतो लोकवासनाया मलिनत्व
मभिप्रेत्य योगीश्वरस्य तुल्यनिंदास्तुतित्वं मोक्षशास्त्रेषु वर्णितं शास्त्रवा
सना च त्रिविधा पाठव्यसनं बहुशास्त्रव्यसनं अनुष्ठानव्यसनं चेति पाठ
व्यसनं भरद्वाजोवगम्यते स हि पुरुषायुषात्रयेण बहून्वेदानधीत्येंद्रेण
चतुर्थायुषे प्रलोभितः तत्रापि परिशिष्टवेदाध्ययनायोद्यमं चकार तस्या
पि पाठस्याशक्यत्वान्मलिनत्वं तां च शाक्ति भिंद्रः प्रतिबोध्य पाठान्निवर्त्य
ततोप्यधिकाय पुरुषार्थाय सगुणब्रह्मविद्यामुपदिदेशात देतत्सर्वं तै
त्तिरीयब्राह्मणे द्रष्टव्यं भरद्वाजो त्रिभिरायुषिर्ब्रह्मचर्यमुवास तं ह

जी॰मु॰ जीर्णं स्थविरं शयानं इंद्र उपव्रज्योवाच भारद्वाज यत्ते चतुर्थमायुर्दद्यां ८
४६ किमेनेन कुर्या इति ब्रह्मचर्यमेवैतेन चरेयमिति होवाच तं त्रीन् गिरिरू
पान् विज्ञातानिव दर्शयांचकार तेषां हैकैकस्मान्मुष्टिनाददे स होवाच
भरद्वाजेत्यामंत्र्य वेदा वा एते मंथेन चर्वितचर्वणेन अनंता वै वेदाः एतद्वा
एतैस्त्रिभिरायुर्भिरन्ववोचथाः अथ त इतरदननूक्तमेव एहीमां विद्धि अयं
वै सर्वविद्येति तस्मै हैतमग्निं सावित्रमुवाच तं स चर्वितचर्वणं विदित्वा ॐ ४६
अमृतो भूत्वा स्वर्गं लोकमियाय आदित्यसायुज्यं अमृतो ह वै भूत्वा स्वर्गं
लोकमेति आदित्यस्य सायुज्यं य एवं वेद एषा च त्रयीविद्येति तथैवा
त्यंतिकपुरुषार्थाभावाद्दुःशास्त्रव्यसनस्य मालिन्यं काव्येषु गीता या

मुपलभ्यते दुर्वासा मुनिर्बहुशास्त्रपुस्तकभारैः सह महादेवं नमस्कर्तुं आ
गत्य तत्सभायां नारदेन मुनिना भारवाहिगर्दभसाम्यमापादितः कोपात्पु
स्तकानि लवणार्णवे परित्यज्य महादेवेनात्मविद्यायां प्रवर्त्तित इति आ
त्मविद्या चानंतर्मुखस्य गुरुकारुण्यरहितस्य न वेदशास्त्रमात्रेणोत्पद्य
ते तथा च श्रुतिः नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेने
ति अन्यत्राप्युक्तं बहुशास्त्रकथाकंथारोमंथेन वृथैव किं अन्वेष्टव्यं
प्रयत्नेन तत्वज्ञैर्ज्योतिरांतरमिति अधीत्य चतुरो वेदान् धर्मशास्त्रा
ण्यनेकशः ब्रह्मतत्वं न जानाति दर्वीपाकरसं यथेति नारदः चतुः
षष्टिविद्याकुशलोप्यनात्मवित्वेनानुतप्तः सनत्कुमारमुपससारेति

जी॰मु॰ छंदेतिगा अधीयंते अनुष्ठानव्यसनं विष्णुपुराणे निदाघस्योपलभ्यते व
४७ शिष्ठरामायणे दाशूरस्य निदाघो हि ऋभुणा पुनः पुनः बोध्यमानोपि कर्म
श्रद्धाजाड्यं चिरं न जहौ दाशूरश्चात्यंतश्रद्धाजाड्येनानुष्ठानाय शुद्धं प्रदेशं
भूमौ न क्वापि उपलेभे अस्याश्च कर्मवासनायाः पुनर्जन्महेतुत्वान्मलिन
त्वं तथा चाथर्वणिका अधीयंते प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशो
क्तमवरं येषु कर्म एतच्छ्रेयो येऽभिनंदंति मूढा जरामृत्युं ते पुनरेवापि यंति ॐ
अविद्यायामंतरे वर्तमानाः स्वयं धीराः पंडितंमन्यमानाः जघन्यमानाः ४७
परियंति मूढा अंधेनैव नीयमाना यथांधाः अविद्यायां बहुधा वर्तमा
ना वयं कृतार्था इत्यभिमन्यंति बालाः यत्कर्मिणो न प्रवेदयंति रागा

त्तेनातुराः क्षीणलोकाश्च्यवंते इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयंते प्र
मूढाः नाकस्य पृष्ठे सुकृतेन भूत्वा इमं लोकं हीनतरं वा विशंतीति भगवताप्यु
क्तं यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः वेदवादरताः पार्थ नान्यदस्ती
तिवादिनः कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदां क्रियाविशेषबहुलां भो
गैश्वर्यगतिं प्रति भोगैश्वर्यप्रसक्तानां तयापहृतचेतसां व्यवसायात्मिका
बुद्धिः समाधौ न विधीयते त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन निर्द्वं
द्वो नित्यसत्वस्थो निर्योगक्षेम आत्मवान् यावानर्थ उदपाने सर्वतः संप्लुतो
दके तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानत इति दर्पहेतुत्वाच्च शास्त्रीय
वासनाया मलिनत्वं श्वेतकेतुरल्पेनैव कालेन सर्वान्वेदानधीत्य पितुः पुर

जी॰मु॰ तोविनयंनचकारेति छंदोगाःषष्ठाध्यायेपठंति तथाबालाकिःकानिचिदुपास
४८ नान्यवगस्य दृप्तउशीनरादिषुबहुदेशेषुदिग्विजयेनबद्धान्विप्रानविज्ञायका
श्यामजातशत्रुंब्रह्मविच्छिरोमणिमनुशासितुंधार्ष्ट्यंचकारेति कौषीतकीनो
वाजसनेयिनश्चाधीयंते देहवासनाख्यात्मत्वगुणाधानदोषापनयनभ्रांति
भित्त्रिविधा तत्रात्मत्वंभाष्यकारउदाजहार देहमात्रंचैतन्यविशिष्टंआत्मेति
प्राकृतजनालोकायतिकाश्चप्रतिपन्नाइति सवाएषपुरुषोन्नरसमयइ
त्यारभ्यतस्मादन्नंतदुच्यतइत्यंतेनग्रंथेनतामेवप्राकृतप्रतिपत्तिंतैत्तिरीयाः ॐ
स्पष्टीकुर्वंति विरोचनःप्रजापतिनानुशिष्टोपिस्वचित्तदोषेणदेहात्मबुद्धिं ४८
दृढीकृत्यासुरान्सर्वाननुशासेति छंदोगाअष्टमेध्यायेसमामनंति गुणा

धानंद्विविधंलौकिकंशास्त्रीयंच समीचीनशब्दादिविषयसंपादनंलौकिकं
कोमलध्वनिनागातुमध्येतुंचतैलपानमरिचभक्षणादिनालोकाः मृदुस्प
र्शायपुष्टिकरावौषधाहारावुपयुंजते लावण्यायअभ्यंगोद्वर्तनदुकूला
लंकारानुपसेवंते सौगंध्यायस्त्रगालेपनेधारयंति शास्त्रीयंगुणमाधातुंगं
गास्नानशालग्रामतीर्थादिकंसंपादयंति दोषापनयनंचिकित्सकोक्तैरौष
धैर्मुखादिप्रक्षालनेनलौकिकंवैदिकंशौचाचमनादिनेत्युभयविधं अस्या
श्चदेहवासनायामालिन्यमग्रेवक्ष्यते देहस्यात्मत्वंतावदप्रमाणिकत्वा
दशेषदुःखहेतुत्वाच्चमलिनत्वं अस्मिंश्चार्थेपूर्वाचार्यैःसर्वैरपिपराक्रां
तंगुणाधानंचप्रायेणनपश्यामः प्रसिद्धाएवगायकाअध्यापकाश्चप्रय

जी॰मु॰ तमानाअपिबहवोध्वनिसौष्ठवंनलभंते मृदुस्पर्शोनहिपुष्टिश्चनियता ला
४९ वण्यसौगंध्येअपिदुकूलस्रगादिनिष्ठेनतुदेहनिष्ठे अतएवविष्णुपुराणे
भिहितं त्वङ्मांसकफविण्मूत्रस्नायुमज्जास्थिसंहतौ देहेचेत्प्रीतिमान्मूढो
भवितानरकेपिच स्वदेहाशुचिगंधेननविरज्येत यःपुमान् वैराग्यकारणं
तस्यकिमन्यदुपदिश्यतइतिचशास्त्रीयगुणानांप्रबलेनशास्त्रांतरेणा
पोद्यते यथानहिंस्यात्सर्वभूतानीत्यस्याग्नीषोमीयंपशुमालभेतेत्यने राम ४९
नापवादः तद्वत्प्रबलंचशास्त्रमेतत् यस्यात्मबुद्धिःकुणपेत्रिधातुकेस्व
धीःकलत्रादिषुभौमइज्यधीः यत्तीर्थबुद्धिःसलिलेनकर्हिचित्जनेष्वभि
ज्ञेषुसएवगोखरः अत्यंतमलिनोदेहोदेहीचात्यंतनिर्मलः उभयोरंतरं

शालाकस्यशौचं विधीयते इति च यद्यप्यनेन शास्त्रेण दोषापनयनं प्रतिषि
ध्यते न तु गुणाधानं तथापि सति विरोधिनि प्रबलदोषे गुण आधातुमशक्य
इति अर्थाद्गुणाधानस्य प्रतिषेधः अत्यंतमैलिन्यं चात्र मैत्रायणीयशाखा
यां श्रूयते भगवन्नस्थिचर्मस्नायुमज्जामांसशुक्रशोणितश्लेष्माश्रुदूषिते
विण्मूत्रवातपित्तसंघाते दुर्गंधे निःसारेऽस्मिन् शरीरे किमु वोपभोगैरिति
शरीरमिदं मैथुनादेवोद्भूतं संविद्ध्यपेतं निरय एव मूत्रद्वारेण निष्क्रांतं अ
स्थिभिश्चितं मांसेनानुलिप्तं चर्मणावनद्धं विण्मूत्रपित्तकफमज्जामेदो
वसाभिरन्यैश्च मलैर्बहुभिः परिपूर्णं कोशा इव वस्कनेति च चिकित्सया च
रोगशांतिर्न नियता शांतोऽपि रोगः कदाचित्पुनरुदेति नवच्छिद्रैर्निरंतरं

जी॰मु॰ स्रवत्सु मलेषु रोमकूपैरसंख्यातैः स्विन्ने गात्रे को नाम स्वेदेन प्रक्षालयितुं श
५० क्नुयात् तदुक्तं पूर्वाचार्यैः नवच्छिद्रयुता देहाः स्रवन्ति घटिका इव बाह्यशौचैर्न
शुध्यन्ति नान्तःशौचं च विद्यत इति अतो देहवासना मलिना तदेतन्मालिन्यम
भिप्रेत्य वसिष्ठ आह आपादमस्तकमहं मातापितृविनिर्मितः इत्येको निश्च
यो राम बंधायासद्विलोकनात् सा कालसूत्रपदवी सा महावीचिवागुरा
सासिपत्रवनश्रेणी या देहेहमिति स्थितिः सा त्याज्या सर्वयत्नेन सर्वनाशे ॐ
प्युपस्थिता स्प्रष्टव्या सा न भव्येन सश्वमांसेव पुल्कसीति तदेतल्लोकशा ५०
स्त्रदेहवासनात्रयमविवेकिनामुपादेयत्वेन प्रतिभासमानमपि विवि
दिषोर्वेदनोत्पत्तिविरोधित्वात् विदुषो ज्ञाननिष्ठाविरोधित्वाच्च विवे

किंभिर्हेयं अतएवस्मर्यते लोकवासनयाजंतोः शास्त्रवासनयापिच देह
वासनयाज्ञानंयथावन्नैवजायतइति यातुदंभदर्पाद्यासुरसंपद्रूपामान
स वासनातस्यानरकहेतुत्वान्मालिन्यमितिप्रसिद्धं अतःकेनाप्युपायेन
वासनाचतुष्टयस्यापक्षयः संपादनीयः यथावासनाक्षयःसंपादनीय
स्तथामनसोपि नचतार्किकवन्नित्यद्रव्यमणुपरिमाणंमनोवैदिकाअ
भ्युपगच्छंति येनमनोनाशोदुःसंपाद्यत्वात् किंतर्हिसावयवमनित्यंसर्व
दाजतुस्कवर्णादिवद्बहुविधपरिणामार्हंद्रव्यंमनस्तस्यचलक्षणंप्रमा
णंचवाजसनेयिनःसमामनंति कामःसंकल्पोविचिकित्साश्रद्धाऽश्रद्धा
धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वंमनएवेत्येतल्लक्षणं कामादिवृत्तयः

जी॰मु॰ ५१ क्रमेणोत्पद्यमानाश्चाक्षुषप्रत्यक्षघटवत्साक्षिप्रत्यक्षेणातिस्पष्टंभासंते
तद्धेतूपादानंमनइत्यर्थः अन्यत्रमनाअभूवंनादर्शं अन्यत्रमनाअभूवं
नाश्रौषमिति मनसाह्येवपश्यतिमनसाशृणोतीत्यत्रप्रमाणं चक्षुःसन्नि
कृष्टस्फीतावलोकमध्यवर्त्तिघटःश्रोत्रसन्निकृष्टोच्चैःपठितवेदश्चयस्यानव
धानेसतिनप्रतीयते अवधानेतुप्रतीयते तादृशंसर्वविषयोपलब्धिसा
धनमन्वयव्यतिरेकाभ्यांप्रतीयतइत्यर्थः तस्मादपिपृष्ठतउपस्पृष्टोमन
साविजानातीति एतदुदाहरणंयस्माल्लक्षणप्रमाणाभ्यांसिद्धंमन ॐ ५१
स्तस्मात्तदेवमुदाहरणीयं पृष्ठभागेत्वनेनोपस्पृष्टोदेवदत्तोविशेषे
णजानाति हस्तस्पर्शोयमंगुलिस्पर्शोयमिति नहितत्रचक्षुःप्रसरति

त्वगिंद्रियंतु मार्द्दवकाठिन्यमात्रोपक्षीणं तस्मान्मन एव विशेषज्ञानकार
णं परिशिष्यते तच्च मननान्मन इति चेतनाच्चित्तमित्यतिचाभिधीयते
तच्च चित्तं सत्वरजस्तमोगुणात्मकं प्रकाशप्रवृत्तिमोहानां सत्वादिकार्या
णां तत्र दर्शनात् प्रकाशादीनां तु गुणकार्यत्वं गुणातीतेति तल्लक्षणेवगम्य
ते प्रकाशंच प्रवृत्तिंच मोहमेवच पांडवेत्यभिधानात् सांख्यशास्त्रेपि प्रका
शप्रवृत्तिमोहा इत्युक्तं प्रकाशोनात्रसितभास्वररूपं किंतु ज्ञानं सत्वात्सं
जायते ज्ञानं रजसो लोभ एवच्च प्रमादमोहौ तमसो भवतोज्ञानमेवचेत्स्फ
कत्वात् ज्ञानवत्स्फुरखमपिसत्वकार्यं तदप्युक्तं सत्वंस्फुरखेसंजयति रजः
कर्मणि भारत ज्ञानमावृत्यतु तमः प्रमादे संजयत्कनेति समुद्रतरंगव

जी॰न्मु॰ न्निरंतरंपरिणममानेषुगुणेषुकदाचित्कश्चिदुद्भवति इतरावभिभूयेते त
५२ दुक्तं रजस्तमश्चाभिभूयसत्वंभवतिभारत। रजः सत्वंतमश्चैव तमः सत्वंरज
स्तथेति। बाध्यबाधकतांयांतिकल्लोलाइवसागरइतिच। तत्रतमसउद्भवेस
त्यासुरसंपदुदेतिरजसउद्भवेसतिलोकादिवासनास्तिस्रोभवंति सत्वस्यो
द्भवेदैवीसंपदुपजायते एतदेवाभिप्रेत्योक्तं। सर्वद्वारेषुदेहेस्मिन्प्रकाशउ
पजायते ज्ञानंयदातदाविद्याद्विवृद्धंसत्वमित्युतेति। यद्यप्यंतःकरणंत्रि राम
गुणात्मकंभासते तथापिसत्वमेवास्यमुख्यमुपादानकारणं रजस्तम ५२
सीतूपष्टंभके अतएवज्ञानिनोयोगाभ्यासेनरजस्तमसोरपनीतयोः
सत्वमेवस्वरूपंपरिशिष्यते एतदेवाभिप्रेत्योक्तं ज्ञस्यचित्तमचित्तंस्या

उपादानसहकारिभूतौऽन्वयकारणं
कौ

नं
इ सत्वं तत्वमुच्यत इति तच्च सत्वं चांचल्यहेतुरजोगुणशून्यत्वादेकाग्र्यं भ्रां
तिकल्पितानात्मस्वरूपस्थूलपदार्थाकारहेतुतमोगुणशून्यत्वात्सूक्ष्मं तत
आत्मदर्शनयोग्यं अतएव श्रुतिः दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मद
र्शिभिरिति नखलु वायुनादोधूयमानेन प्रदीपेन मणिमुक्तादिलक्षणानि
निर्धारयितुंशक्यंते नापि स्थूलेन खनित्रेण सूच्येव सूक्ष्मपटस्यूतिः सं
भवेति तदेतदीदृशं सत्वमेव योगिषु तमोगुणसभितेन रजोगुणेनोपष्ट
ब्धं बहुविधद्वैतसंकल्पेन चेतयमानं चित्तं भवति तच्च चित्तं तमोगुणाधि
क्ये सति आसुरीं संपदमुपचिन्वत्क्षीणं भवति तदाह वशिष्ठः अनात्म
न्यात्मभावेन देहमात्रस्थयानया पुत्रदारकुटुंबैश्च चेतो गच्छति पीनतां

भेव तथा तथा

अहंकारविकारेण ममतामयलीलया इदं ममेति भावेन ~~[illegible]~~
चेतो गच्छति पीनतां आधिव्याधिविलासेन समाश्वासेन संसृतौ हेयादे
यविभागेन चेतो गच्छति पीनतां स्नेहेन धनलोभेन लाभेन मणियोषितां अ
पातरमणीयेषु चेतो गच्छति पीनतां दुराशाक्षीरपानेन भोगानिलबलेन
च आस्थादानेन चारेण चित्ताहिर्याति पीनतां इति तदेवं विनाशनीय
यो र्वासना मनसोः स्वरूपं निरूपितं अथ वासनाक्षयमनोनाशो निरूप्ये ॐ
ते तत्र वासनाक्षयप्रकारमाह वशिष्ठः बंधो हि वासनाबंधो मोक्षः स्याद्वा ५३
सनाक्षयः वासनास्त्वं परित्यज्य मोक्षार्थित्वमपि त्यज मानसी र्वासनाः
पूर्वं त्यक्त्वा विषयवासनाः मैत्र्यादिभावनानाम्नी गृहाणामलवासनाः

ताअप्यंतःपरित्यज्यताभिर्व्यवहरन्नपि अंतःशांततमस्नेहोभवचिन्मात्र
वासनः तामप्यथपरित्यज्यमनोबुद्धिसमन्वितां शेषेस्थिरसमाधानोये
नत्यजसितंत्यजेति अत्रमानसवासनाशब्देनपूर्वोक्तास्तिस्रोलोकशास्त्र
देहवासनाविवक्षिताः विषयवासनाशब्देनदंभदर्पाद्यासुरसंपदोविव
क्षिताः मृदुत्वतीव्रत्वेतद्द्विवक्षाकारणे यद्वाशब्दस्पर्शरूपरसगंधाविष
याःतेषांकाम्यमानत्वदशाजन्यःसंस्कारोमनोवासनाभुज्यमानत्वदशाज
न्यःसंस्कारोविषयवासना अस्मिन्पक्षेपूर्वोक्तानांचतसृणामनयोर
वांतर्भावः आंतरबाह्यव्यतिरेकेणवासनांतरासंभवात् ननुवासनानां
त्यागःकथंघटते नहि [illegible] तासांमूर्तत्वमस्तिचेत्येनसंमार्जनीसमूहित

जी॰मु॰ ५४ मूलितृणवद्धस्तेनोद्धृत्य बहिस्त्यक्ष्यामः मेवमुपवासजागरणवत्तदुपप
त्तेः स्वभावप्राप्तयोर्भुजिक्रियानिद्रयोरमूर्तत्वेपि तत्परित्यागरूपे उपवास
जागरणे सर्वैरनुष्ठीयेते तद्वदत्राप्यस्तु अद्य स्थित्वा निराहारः श्वो भोक्ष्ये पर
मेश्वर इति मंत्रेण संकल्पं कृत्वा सावधानेनैवावस्थानं तत्र त्याग इति चेद
त्रापि तन्न दंडवारितं प्रैषमंत्रेण संकल्प्याप्रमत्तत्वेनावस्थातुं शक्यत्वात्
वैदिकमंत्रानधिकारिणां भाषया संकल्पोस्तु यथात्र शाकसूपोदनादिस
न्निधिपरित्यागोस्तु तथैवात्रापि स्रक्चंदनवनितादिसन्निधिपरित्यागो राम
स्तु अथ तत्र बुभुक्षानिद्रालस्यादिनिवर्तकैः पुराणश्रवणदेवपूजानृत्य ५४
गीतवाद्यादिभिश्चित्तमुपलाल्यते तथैवात्रापि मैत्र्यादिभिस्तद्वदुपलाल

येत् मैत्र्यादयस्तु पतंजलिना सूत्रिताः मैत्रीकरुणामुदितोपेक्षाणां सुख
दुःखपुण्यापुण्यविषयाणांभावनातश्चित्तप्रसादनमिति चित्तंहिरागद्वेष
पुण्यपापैःकलुषीक्रियते रागद्वेषौपतंजलिरसूत्रयत् सुखानुशायीरागः
दुःखानुशायीद्वेषइति स्वेनानुभूयमानंसुखमनुशेते कश्चिद्वृत्तिविशेषः
सुखजातीयंसर्वंमेभूयादिति तच्चदृष्टादृष्टसामान्यभावान्नसंपादयितुं
शक्यं अतःसरागंचित्तंकलुषीकरोति यदासुखिषुप्राणिषुयोमैत्रींभाव
येत् सर्वेप्येतेसुखिनोमदीयाइति तदातत्सुखंस्वकीयमेवसंपन्नमिति
भावयेत् तत्ररागोनिवर्तते यथास्वस्यराज्याभावेपिपुत्रराज्यमेवस्वकीयं
राज्यंतद्वत् निवृत्तेचरागेवर्षास्वतीतासुशरत्सरिदिवचित्तंप्रसीदति

जी॰मु॰ तथादुःखमनुशेतेकश्चित्तस्ययः ईदृशंसर्वंदुःखंसर्वदामेमाभूदिति तच्च
५९ शत्रुव्याघ्रादिषुसत्स्वननिवारयितुंशक्यं नचसर्वंदुःखहेतवोहंतुंशक्यं
ते अतःसद्वेषःसदास्तदयंदहति यदास्वस्येवपरेषांसर्वेषांप्रतिकूलंदुः
खंमाभूदितिअनेनप्रकारेणकरुणांदुःखिषुभावयेत् तदावैर्यादिद्वेषनि
वृत्तौचित्तंप्रसीदति अतःस्मर्यते प्राणायथात्मनोभीष्टाभूतानामपितेत
था आत्मौपम्येनभूतानांदयांकुर्वीतमानवइति तत्कारणंचमहांतोद
र्शयंति सर्वेचसुखिनःसंतुसंतुसर्वेनिरामयाः सर्वेभद्राणिपश्यंतुमा रम
कश्चिद्दुःखमाप्नुयादिति तथाहि प्राणिनःस्वभावतएवपुण्यंनानुतिष्ठं ५५
तु तदाहुः पुण्यस्यफलमिछंतिपुण्यंनेछंतिमानवाः नपापफलमिछं

त्तिपापंकुर्वंतियत्नत इति तेचपुण्यपापेपश्चात्तापंजनयतः सचतापःश्रु
त्यानूद्यते किमहंसाधुनाकरवंकिमहंपापमकरवंइति यद्यसौपुण्यपुरु
षेषुमुदितांभावयेत् तदातद्वासनयास्वयमप्यप्रमत्तःपुण्येषुप्रवर्त्तते त
थापापिषूपेक्षांभावयन्स्वयमपिपापान्निवर्त्तेत अतःपश्चात्तापस्याभा
वेनचित्तंप्रसीदति सुखिषुमैत्रींभावयतोनकेवलंरागनिवृत्तिः किंत्वस्या
सूयेर्ष्यादयोपिनिवर्त्तंते गुणेषुदोषाविष्करणंअसूया परगुणानामस
हनंईर्ष्या यदामैत्रीवशात्परसुखंस्वकीयमेवसंपद्यते तदापरगुणेक
थमसूयादिकंसंभवेत् एवंदोषांतरनिवृत्तिरपियथायोग्यमनुमेया
दुःखिषुकरुणांभावयतःशत्रुवधादिकरोद्वेषोयथानिवर्त्तते तथादुःखि

जी॰ मु॰ त्वमति योगिकस्य कस्विन्नप्रयुक्तो दर्पोपि निवर्त्तते स च दर्प आस्फर संपद्य
५६ हंकार अस्तावैश्वर्यमुदास्ते ततः ईश्वरोहमहं भोगी सिद्धोहं बलवान्सुखीत्या
दि ननु पुण्यात्मकस्मुदितां भावयतः पुण्यप्रवृत्तिः फलत्वेनोक्ता सा च यो
गिनो न युक्ता मलिनायां ह्यास्य वासनायां पुण्यमंतर्भाव्य पूर्वमुदास्ते त
त्वात् मेवं पुनर्जन्मकरस्य काम्यस्येष्टापूर्त्तादेः तत्र मलिनत्वेनोदाहरणा
त् इह तु योगाभ्यासजन्यमशुक्लकृष्णत्वेन जन्मानापादकं कर्म विवक्षितं
अशुक्लकृष्णत्वं पतंजलिः सूत्रयामास कर्माशुक्लाकृष्णं योगिनस्त्रिवि राम
धमितरेषामिति काम्यं कर्म विहितत्वाच्छुक्लं निषिद्धं कृष्णं मिश्रं शु ५६
क्लं कृष्णं तदेतत्त्रयमितरेषामयोगिनां संपद्यते तच्च त्रिविधं जन्मप्रय

ष्णेति तदाहुर्विश्वरूपाचार्याः शुभैराप्नोति देवत्वं निषिद्धैर्नारकीं गतिं उभाभ्यां
पुण्यपापाभ्यां मनुष्यत्वं लभतेऽवशः। ननु योगस्यानिषिद्धत्वादकृष्णत्वेऽपि विहि
तत्वाच्छुक्लत्वमिति चेन्नैवं अकाम्यत्वाभिप्रायेणाशुक्लत्वाभिधानात्
अतोऽशुक्लकृष्णे पुण्यप्रवृत्तिर्योगिनापेक्षिता। नन्वयोगिनोप्यनेन न्याये
न यथोचितं पुण्यात्मकमुदितां भावयित्वा पुण्येष्वेव प्रवर्तेरन् इति चेत् प्र
वर्तन्तां ये मैत्र्यादिभिश्चित्तं प्रसादयन्ति तेषामेव योगित्वान्मैत्र्यादिचतुष्टय
मुपलक्षणं तेनाभयं सत्वसंशुद्धिरित्यादिदैवसंपदममानित्वमदंभित्व
मित्यादिज्ञानसाधनानि जीवन्मुक्तिस्थितप्रज्ञादिवचनोक्तधर्माश्चोप
लक्ष्यन्ते सर्वेषामेतेषां शुभवासनारूपत्वेन मलिनवासनानिवर्तकत्वा

जी॰मु॰ ५७ त् ननु संत्यनेकाः शुभवासनाः न च ता एकेन सर्वा अभ्यसितुं शक्यंते निरर्थ
कश्च तदभ्यासप्रयास इति चेत् तन्निवृत्तानामनंतानां मलिनवासनाना
मेकस्य मनस्य संभवात् न ह्यायुर्वेदोक्तानि सर्वाण्योषधान्येकेन सेवितुं
शक्यंते नापि तन्निवृत्त्या सर्वे रोगा एकस्य देहे संभवंति एवं सति स्वचित्तंप्र
थमतः परीक्ष्य तत्र यदा यावंत्यो मलिनवासनास्तदा तावतीः शुभवासनाः
विरोधिनीरभ्यसेत् यथा पुत्रमित्रकलत्रादिभिः पीड्यमानस्ततो विरक्तस्त रा॰म॰ ५७
न्निवर्तकं परिव्राज्यं गृह्णाति तथा विद्यामदधनमदकुलाचारमदादिम
लिनवासनाभिः पीड्यमानस्तद्विरोधिनं विवेकमभ्यसेत् स च विवेको ज
नकेन दर्शितः अद्य येम हतां मूर्ध्नि तद्दिनेनि पतंत्यधः हंत चित्तमह

न्नायां केषां विश्वस्तता तव क्व धनानि महीपाला ब्रह्माणः क्व जगंति वा प्रा
क्तनानि प्रनष्टानि केयं विश्वस्तता तव कोटयो ब्रह्मणां याता गताः सर्गपरं
पराः प्रयाताः पांशुवद्भूपाः का धृतिर्मम जीवने येषां निमेषणोन्मेषो जग
तः प्रलयोदयौ तादृशाः पुरुषाः संति मादृशां गणनैव केति नन्वयं विवेक
स्तत्वज्ञानोदयात्प्राचीनः नित्यानित्यादिवस्तुविवेकादिसाधनव्यतिरे
केण ब्रह्मज्ञानासंभवात् इह तूत्पन्नब्रह्मसाक्षात्कारस्य जीवन्मुक्तये
वासनाक्षयादिसाधनं वक्तुमुपक्रांतमतः किमिदमकांडतांडवमिति चे
त् नायं दोषः साधनचतुष्टयसंपन्नस्य पश्चात् ब्रह्मज्ञानमित्येष साधा
रणः निष्कंटकः प्रौढो राजमार्गः जनकस्य पुण्यपुंजपरिपाकेनाकाशफल

नुष्ठयभावेपि

जी॰मु॰ पातवदकस्मात् सिद्धः गीताश्रवणमात्रेण तत्वज्ञानमुत्पन्नं ततस्त्रिलवि
५८ श्रांतये विवेकोयं क्रियत इति कांड एव दर्शुचितं तांडवं नन्वेवमप्यस्य विवे
कस्य ज्ञानसमनंतरभावित्वेन मलिनवासनानुवृत्त्यभावात् शुद्धवास
नाया अभ्यासो नापेक्षितश्चेन्न जनकस्य मलिनवासनाभावेपि याज्ञव
ल्क्यभागीरथादेस्तदनुवृत्तिदर्शनात् अस्ति हि याज्ञवल्क्यस्य तत्प्रतिवाद
नामुषस्तकहोलादीनां च भूयान्विद्यामदस्तैः सर्वैरपि विजिगीषुकथा
यां प्रवृत्तत्वात् ननु तेषां विद्यांतरमेवास्ति न ब्रह्मविद्येति चेत् न कथा राम ५८
गतयोः प्रश्नोत्तरयोर्ब्रह्मविषयत्वात् ननु ब्रह्मविषयत्वेपि तेषामा
पातज्ञानमेव न तु सम्यग्वेदनमिति चेन्न तथा सत्यस्माकमपि तदीय

वाक्यैरुत्पन्नाया विद्याया असम्यग्वेदनत्वप्रसंगात् ननु सम्यक्त्वेपि परोक्ष
ज्ञानमेवेति चेन्न यत्साक्षादपरोक्षाद्ब्रह्मेति मुख्यापरोक्षविषयतयैव वि
शेषतः प्रश्नोपलंभात् नन्वात्मज्ञानिनाविद्यामद आचार्यैर्नाभ्युपगम्यते
तथा चोपदेशसाहस्र्यामभिहितं ब्रह्मवित्वं तथा मुक्त्वा स आत्मज्ञो न चेतर इ २
ति नैष्कर्म्यसिद्धावपि न चाध्यात्माभिमानोपि विदुषोस्त्यासुरत्वतः वि
दुषोप्यासुरश्चेत्स्यान्निष्फलं ब्रह्मदर्शनमिति चेत् नायं दोषः जीवन्मु
क्तिपर्यंतस्य तत्वज्ञानस्य तथाविवक्षितत्वात् न खलु वयमपि जीवन्मुक्ता
५ नां विद्यामदमभ्युपगच्छामः ननु विजिगीषारात्मबोध एव नास्ति रागो
त्लिंगमबोधस्य चित्तव्यायामभूमिषु कुतः शाड्वलता तस्य यस्याग्निस्त

जी॰मु॰ रुक्कोटरे इत्याचार्यैरभ्युपगमादितिचेन्न रागादयःसंतुकामंनतद्भावोप
५९ राध्यन्ति उत्त्वातदंष्ट्रोरगवदविद्याकिंकरिष्यति अत्रतैरेवरागाद्यभ्युप
गमात् नचात्रपरस्परव्याहृतिः स्थितप्रज्ञेज्ञानिमात्रेचवचनद्वयस्यव्य
वस्थापनीयत्वात् ननुज्ञानिनोरागाद्यभ्युपगमेधर्माधर्मद्वारेणजन्मां
तरप्रसंगइतिचेन्नैवं अदग्धबीजवदविद्यापूर्वककामादेरेवमुख्यरा
गादित्वेनपुनर्जन्महेतुत्वात् ज्ञानिनस्तुदग्धबीजवदाभासएवरागाद राम
यः एतदेवाभिप्रेत्योक्तं उत्पद्यमानरागाद्याःविवेकज्ञानवह्निना सदा ५९
तदैवदह्यंतेकुतस्तेषांप्ररोहणमिति तर्हिस्थितप्रज्ञस्यापितेसंत्विति
चेन्न तत्कालेमुख्यवदेवाभासानामपिबंधकत्वात् रज्जुसर्पोपिमुख्य

सर्वं वदेव तदानीं भीषयन्नुपलभ्यते तद्वत् नन्वाभासत्वानुसंधानानुवृ
त्तौ न कोपि बाध इति चेत् चिरंजीवतु भवान् इयमेवास्मदभिमता जीवन्मु
क्तिः याज्ञवल्क्यस्य विजिगीषुदशायां न तादृशः चित्तविश्रांतये विद्वत्सं
न्यासस्य तेन करिष्यमाणत्वात् न केवलमस्य विजिगीषा धनतृष्णापि
महती जाता बहूनां ब्रह्मविदां पुरः स्थापितं सालंकारगोसहस्रमपहृत्य
स्वयमेवेदमाह नमो वयं ब्रह्मिष्ठाय कुर्मो गोकामा एव वयं स्म इति इ
तरान् ब्रह्मविदो वज्ञातुं इयं काचिद्वचोभंगीति चेत् अयमपि तर्ह्यपरो
दोषः इतरे च ब्रह्मविदः स्वकीयं धनमनेनापहृतमिति मत्वा क्रुधुः
स्वयं च क्रोधपरवशः शाकल्यं शापेन मारयामास न चास्य ब्रह्मघ्नो

जी॰ मु॰ मोक्षाभावः शंकनीयः यतः कौषीतकिनः समामनंति नास्य केन च कर्मणा
६० लोको मीयते न मातृवधेन न पितृवधेन न स्तेयेन न भ्रूणहत्ययेति शेषोऽपि स्वकृ
तायामार्यापंचशीत्यामिदमाह हयमेधशतसहस्राण्यथ कुरुते ब्रह्मघा
तलक्षाणि परमात्मविन्न पुण्यैर्न च पापैः स्पृश्यते विमलः इति किं बहुना
ब्रह्मविदां याज्ञवल्क्यादीनामस्त्येव मलिनानुवृत्तिः भगीरथस्तु तत्त्वं नवा
विदित्वा राज्यं परिपालयन्मलिनवासनाभिश्चित्तविश्रांत्यभावे सति स ६०
र्वं परित्यज्य पश्चाद्विश्रांतवानिति वशिष्ठेनोपाख्यायते अतः स्वकीयं
वर्तमानमलिनवासनादोषं परकीयदोषवत्सम्यगुत्प्रेक्ष्य तत्प्रती
कारमभ्यसेत् अनेनाभिप्रायेण स्मर्यते यथा सुनिपुणः सम्यक्परदो

षेक्षणे रतः तथाचेन्निपुणः स्वेषु कोन्नु मुच्येत बंधनादिति । नन्वाद्येतावद्वि
द्यामदस्य कः प्रतीकार इतिचेत् किंस्वनिष्ठमदस्य परविषयस्य किंवा स्वः
विषयस्य परनिष्ठस्य आद्ये भंगोवश्यं कश्चिद्भविष्यतीति निरंतरं भावयेत्
तद्यथा श्वेतकेतुर्विद्यामत्तः प्रवाहणस्य राज्ञः सभां गत्वा तेन पंचाग्नि
विद्यायां पृष्टायां स्वयमजानन्तो निरुत्तरो राज्ञा भर्त्सितः पितुः समीपमा
गत्य स्वं निर्वेदमुदाजहार पितातु निर्मदस्तमेव राजानमुपसंपद्य तां वि
द्यां लेभे । दृप्तबालाकिश्चाजातशत्रुणा राज्ञा भर्त्सितो दर्पं संत्यज्य राजा
नमुपससाद । उषस्तकहोलादयश्च मदेन कथां कृत्वा पराजिताः । यदा
स्वविषयः परनिष्ठो मदः प्रवर्तेत तदा मत्तः स परो मां निंदतु अवमन्य

गी॰भु॰ तांअन्यत्रामेवासर्वथानमेहानिरितिभावयेत् तथाहि आत्मानंयदिनिं
६१ दंतिस्वयमेवहि शरीरंयदिनिंदंतिसहायास्तेजनाममेति उक्तत्वादतआ
ह॥ निंदावमानावत्यंतंभूषणंयस्ययोगिनः धीविक्षेपःकथंतस्यवाच्या
रैःक्रियतामिहेति निंदायाभूषणत्वंज्ञानांकुशेदर्शितं मन्निंदयायदिज
नःपरितोषमेतिनन्वप्रयत्नसुलभःसदनुग्रहोमे श्रेयोर्थिनोहिपुरुषाः
परतुष्टिहेतोर्दुःखार्जितान्यपिधनानिपरित्यजंति सततसुलभदैन्ये ६१
निःसुखेजीवलोकेयदिममपरिवादात्प्रीतिमाप्नोतिकश्चित् परिवद
तुयथेष्टंमत्समक्षंतिरोवाजगतिहिबहुदुःखदुर्लभःप्रीतियोगइति
अवमानस्यभूषणत्वंस्मर्यते तथाचरेतवैयोगीसतांधर्ममदूषय

न् जनाय थावमन्येरन् गच्छेयुर्नैव संगतिमिति याज्ञवल्क्योषस्तादीनां यो
स्वनिष्ठपरनिष्ठविद्यामदौतयोर्यथा विवेकेन प्रतीकारस्तथा धनाभिला
षक्रोधयोरप्यवगंतव्यः अर्थानामर्जने क्लेशस्तथैव परिरक्षणे नाशे दुः
खं व्यये दुःखं धिगर्थान् क्लेशकारिण इति धनविषयो विवेकः क्रोधोपि द्वि
विधः स्वनिष्ठः परविषयः परनिष्ठः स्वविषयश्चेति तत्र स्वनिष्ठं प्रत्येवमुक्तं
अपकारिणि चेत्कोपः कोपे कोपः कथं न ते धर्मार्थकाममोक्षाणां प्रस
ह्य परिपंथिनि फलान्वितो धर्मयशोर्थनाशनः स चेदपार्थः स्वशरीरता
पनः न चेह नामुत्र हिताय यः सतां मनांसि रोषः समुपाश्रयेत्कथमि
ति स्वविषयं प्रत्येवमीरितं न मे ऽपराधः किमकारणे नृणां मदभ्यसू

जी॰मु॰ येऽप्यपि नैव चिंतयेत् नयत्कृता प्राग्भवबंधनिःसृतिस्ततोऽपराधः परमो
६२ विचिंत्यतां नमोऽस्तु कोपदेवाय स्वाश्रयज्वालिने भृशं कोप्यस्य मम वै
राग्यदायिने दोषबोधिने इति धनाभिलाषक्रोधवद्योषित्पुत्राभिलाषावपि
विवेकेन निवर्तनीयौ तत्र योषिद्विवेको वशिष्ठेन दर्शितः मांसपांचालिका
यास्तु यंत्रलोलेंगपंजरे स्नाय्वस्थिग्रंथिशालिन्याः स्त्रियाः किमिव शोभनं
त्वङ्मांसरक्तबाष्पांबु पृथक्कृत्वा विलोचने समालोकय रम्यं चेत्किं मुधा
परिमुह्यसि मेरुशृंगतटोल्लासिगंगाजलरयोपमा दृष्टा यस्मिन्मुने राम ६२
मुक्ताहारस्योल्लासशालिनः श्मशानेषु दिगंतेषु स एव ललनास्तनः
श्वभिरास्वाद्यते काले लघुपिंड इवांधसः केशकज्जलधारिण्यो दुःस्प

र्गी लोचनप्रियाः दुःकृताग्निशिखा नार्यो दहंति तृणवन्नरं ज्वलतामति
दूरेपि सरसा अपि नीरसाः स्त्रियो हि नरकाग्नीनामिंधनं चारु दारुणं का
मेनाम्ना किरातेन विकीर्णा मुग्धचेतसा नार्यो नरविहंगानामंगबंधनवा
गुराः जन्मपल्वलमत्स्यानां चित्तकर्दमचारिणां पुंसां दुर्वासनारज्जुर्ना
री बडिशपिंडिका सर्वेषां दोषरत्नानां सुसमुद्गिकयानया दुःखशृंखल
या नित्यमलमस्क स्त्रिया खलु इतो मांसमितो रक्तमितोस्थीनीति वास
रैः ब्रह्मन् कतिपयैरेव याति स्त्री विषचारुतां यस्य स्त्री तस्य भोगेच्छा
निःस्त्रीकस्य क्व भोगभूः स्त्रियं त्यक्त्वा जगत्त्यक्तं जगत्त्यक्त्वा सुखी भवे
दिति पुत्रवासना विवेको ब्रह्मानंदेन दर्शितः अलभ्यमानस्तनयः

पितरौक्लेशयेच्चिरं लब्धोपिगर्भपातेनप्रसवेनचबाधते जातस्यग्रह
रोगादिकुमारस्यचधूर्त्तता उपनीतेप्यविद्यत्वमनुद्वाहश्चपंडिते पुन
श्चपरदारादिदारिद्र्यंचकुटुंबिनः पित्रोर्दुःखस्यनास्त्यंतोधनीचेन्म्रिय
तेतदेति यथाविद्याधनक्रोधयोषित्पुत्रविषयाणांमलिनवासनानां
विवेकेनप्रतिकारः तथान्यासामपियथायोग्यंशास्त्रेस्वबुद्ध्यादोषं
विविच्यप्रतिकारंकुर्यात् कृतेचप्रतिकारेजीवन्मुक्तिलक्षणंपरमपदं
लभ्यते तदाहवशिष्ठः वासनासंपरित्यागेयदियत्नंकरोष्यलं तास्ते
शिथिलतांयांतिसर्वाधिव्याधयःक्षणात् पौरुषेणप्रयत्नेनबला
त्संत्यज्यवासनाः स्थितिंबध्नासिचेत्तर्हिपदमासादयस्यलमिति न

त्रपौरुषप्रयत्नो नाम पूर्वोक्तो विषयदोषविवेकः सच पुनः पुनः क्रिय
माणोपि प्रबलेनेंद्रियव्यवहारेणाभिभूयते तदुक्तं भगवता यततोह्य
पि कौंतेय पुरुषस्य विपश्चितः इंद्रियाणि प्रमाथीनि हरंति प्रसभं मनः
इंद्रियाणां हि चरतां यन्मनोनुविधीयते तदस्य हरति प्रज्ञां वायुर्नावमि
वांभसि | इति चेन्न | एवं तर्ह्युत्पन्नविवेकरक्षार्थं इंद्रियाणि निरोद्धव्यानि
तदपि तत्रैवोत्तरश्लोकाभ्यां दर्शितं तानि सर्वाणि संयम्य युक्त आसीत
मत्परः वशेहि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता तस्माद्यस्य महाबा
हो निगृहीतानि सर्वशः इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठितेति स्मृ
त्यंतरेपि न पाणिपादचपलो न नेत्रचपलो यतिः न च वाक्चपलश्चैव

प्राज्ञा

जी॰मु॰ मितिशिष्टस्यलक्षणमिति एतदेवान्यत्रसंग्रहविवरणाभ्यांस्पष्टीकृतं अ
६४ जिह्वःषंढकःपंगुरंधोवधिरएवच मुग्धश्चमुच्यतेभिक्षुःषड्भिरेतैर्नसंशयः
इदमिष्टमिदंनेतियोश्नन्नपिनसज्जते हितंसत्यंमितंवक्तितमजिह्वंप्रच
क्षते अद्यजातांयथानारींतथाषोडशवार्षिकीं शतवर्षांचयोदृष्ट्वानिर्वि
कारःसपंडकः भिक्षार्थमटनंयस्यविण्मूत्रकरणायच योजनान्नपरं
यातिसर्वथापंगुरेवसः तिष्ठतोव्रजतोवापियस्यचक्षुर्नदूरगं चतुर्युगा ६४
भुवंमुक्त्वापरिव्राट्सोंधउच्यते हितंमितंमनोरामंवचःशोकापहंच
यत् श्रुत्वायोनशृणोतीवबधिरःसप्रकीर्तितः सान्निध्येविषयाणांच
समर्थोविकलेंद्रियः सुप्तवद्वर्ततेनित्यंभिक्षुर्मुग्धःसउच्यते ननिंदांन

स्क्षतिं कुर्यान्न केंचिन्मर्मणि स्पृशेत् नातिवादी भवेत् द्वन्द्वसर्वत्रैव समो भवेत्
न संभाषेत्स्त्रियं कांचित्पूर्वदृष्टांश्च न स्मरेत् कथांश्च वर्जयेत्तासां न पश्ये
ल्लिखितामपीति यथा कश्चिद्धुतीनक्तैकभुक्तोपवासमौनादिव्रतं संकल्प्य सा
वधानो भ्रंशमकृत्वा सम्यक्पालयति तथैवाजिह्मत्वादिव्रते स्थितः सावधा
नो विवेकं पालयेत् तदेवं विवेकेंद्रियरोधाभ्यां दीर्घकालनैरंतर्य्यसत्कारसे
विताभ्यां मैत्र्यादिभावनास्फ प्रतिष्ठास्वास्फरसंपद्रूपाः मलिनवासनाश्शी
यंते ततो निश्वासोच्छ्वासवन्निमिषोन्मिषवच्च पुरुषप्रयत्नमंतरेण प्र
वर्तमानाभिर्मैत्र्यादिवासनाभिर्लोकव्यवहरन्नपि दृश्यसाकल्यवैक
ल्यानुसंधानं चित्ते परित्यज्य निद्रांतद्री मनोराज्यादिरूपाः समस्तचेष्टाः

जी॰ मु॰
६५

प्रयत्नेन शान्ताः कृत्वा चिन्मात्रवासनामभ्यसेत् ततस्तावदिदं जगच्चिज्जडो
भयात्मकं भासते। यद्यपि शब्दस्पर्शादिजडवस्तुभासनायेन्द्रियाणि सृष्टा
नि पराञ्चि खानि व्यतृणत्स्वयंभूरिति श्रुतेः तथापि चैतन्यस्योपादानतयाव
र्जयितुमशक्यत्वाच्चैतन्यपूर्वकमेव जडं भासते तमेव भान्तमनुभाति सर्वं त
स्य भासा सर्वमिदं विभातीति श्रुतेः। तथापि पश्चाद्भासमानस्य जडस्य प्रथम
तो भासमानमेव चैतन्यं वास्तवं रूपमिति निश्चित्य जडमुपेक्ष्य चिन्मात्रं
चित्ते वासयेत् एतच्च बलिशुक्रयोः प्रश्नोत्तराभ्यां विस्पष्टमवगम्यते कि
मिहास्तीह किंमात्रमिदं किंमयमेव च कस्त्वं कोऽहं क एते वा लोका इति
वदाशु मे चिदिहास्तीह चिन्मात्रमिदं चिन्मयमेव च चित्त्वं चिदहमेते च

६६

लोकाच्चिदिति संग्रह इति यथा स्वर्णकारः कटकं विक्रीणन्नपि बलयाका
रस्य गुणदोषानुपेक्ष्य गुरुत्ववर्णयोरेव मनः प्रणिधित्सति तथा चिन्मात्रे म
नः प्रणिधातव्यं यावता कालेन जडं सर्वथैवोपेक्ष्य चिन्मात्रे मनसः प्रवृत्ति
र्निश्वासवत्स्वाभाविकी संपद्यते तावंतं कालं चिन्मात्रवासनायां प्रयतेत।
नन्वादावेव चिन्मात्रवासनास्कृतयैव मलिनवासनानिवृत्तेः किमनेनां
तर्गडुना मैत्र्याद्यभ्यासेनेति चेन्न चिद्वासनायाश्चाप्रतिष्ठितत्वप्रसंगात्
यथा कुट्टिमदार्ढ्यव्यतिरेकेण क्रियमाणस्तंभकुड्यादिकं गृहं न प्रतिति
ष्ठति यथा वा विरेचनेन प्रबलदोषमनिःसार्य सेवितमप्यौषधं नारो
ग्यकरं तद्वत् ननु तामप्यथ परित्यज्येति चिन्मात्रवासनायाः अपि परि

त्याज्यत्वमवगम्यते तदयुक्तं चिन्मात्रं परित्यज्यान्यस्य कस्यचिदुपादेयस्या
भावात् द्विविधा चिन्मात्रवासना मनोबुद्धिसमन्विता तद्रहिता चेति करणं
मनः कर्तृत्वोपाधिर्बुद्धिः तथापि सत्यप्रमेताहमेकाग्रेण मनसा चिन्मात्रं
भविष्यामीति एतादृशेन कर्तृकरणानुसंधानेन समन्विता प्राथमिकी या
चिन्मात्रवासना ध्यानशब्दाभिधेया तां परित्यजेत् यात्वभ्यासपाटवेन
कर्तृत्वाद्यनुसंधानव्यवधानरहिता समाधिशब्दाभिधेया तामुपाददी
त ध्यानसमाध्योर्लक्षणं पतंजलिः सूत्रयामास तत्र प्रत्ययैकतान
ता ध्यानं तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिरिति तादृशेस
माधौ दीर्घकालनैरंतर्य्यसंस्कारैः सेवितस्थैर्यं लब्ध्वा पश्चात्कर्तृकर

णानुसंधानपरित्यागार्थो यः प्रयत्नः तमपि परित्यजेत्। नन्वेवं सति तत्त्यागप्र
यत्नोऽपि परित्याज्य इत्यनवस्था स्यात् मैवं कतकरजोन्यायेन स्वपरनिवर्त्तकत्वा
त् यथा कलुषिते जले प्रक्षिप्तं कतकरजः सा सह स्वात्मानमपि निवर्त्तयति
तथा त्यागार्थः प्रयत्नः कर्तृकरणानुसंधानं निवर्त्तयन् स्वात्मानमपि निवर्त्त
यिष्यति निवृत्ते तस्मिन् मलिनवासनानाञ्छुभवानानामपि क्षीणत्वात् निर्वा
सनं मनोऽवतिष्ठते एतदेवाभिप्रेत्य वशिष्ठ आह तस्माद्वासनया बद्धं मुक्तं
निर्वासमं मनः राम निर्वासनीभावमाहराशु विवेकतः सम्यगालोनचात्स
त्याद्वासना प्रविलीयते वासनाविलये चेतः शमं याति प्रदीपवदिति च
यो जागर्ति सुषुप्तस्थो यस्य जाग्रन्न विद्यते यस्य निर्वासनो बोधः स जीव

जी॰मु॰ न्मुक्त उच्यत इति च सुषुप्तवत्स्वज्ञामितभावद्वृत्तिर्नास्थितः सदाजाग्रति ये
६७ नचेतसा कलान्वितोविधुरिवयःसदाबुधैर्निषेव्यतेमुक्तइतिहसस्मृतइति
च हृदयात्संपरित्यज्यसर्वमेवमहामतिः यस्तिष्ठतिगतव्यग्रःसमुक्तःप
रमेश्वरः समाधिमथकर्माणिमाकरोतुकरोतुवा हृदयेनात्तसर्वाशोमु
क्तएवोत्तमाशयः नैष्कर्म्येणनतस्यार्थस्तस्यार्थोस्तिनकर्मभिः नसमाधा
नजप्याभ्यांयस्यनिर्वासनंमनः विचारितमलंशास्त्रंचिरमुद्ग्राहितंमिथः
संत्यक्तवासनान्मौनादृतेनास्त्युत्तमंपदमिति नचनिर्वासनमनस्कस्य राम
जीवनहेतुव्यवहारो लुप्येतेतिशंकनीयं किंचक्षुरादिव्यवहारस्य ६७
लोपः किंवामानसव्यवहारस्य तत्राद्यमुद्दालकोनिराचष्टे वासनाही

नमप्येतच्चक्षुरादींद्रियं स्वतः प्रवर्तते बहिः स्वार्थे वासना नात्र कारणमिति
द्वितीयं वशिष्ठो निराचष्टे अयत्नोपनतेष्वक्षिदिक्‌द्रव्येषु यथा पुनः नीरा
गमेव पतति तद्वत्कार्येषु धीरधीरिति तादृश्या धिया प्रारब्धभोगं स एवो
पपादयति परिज्ञायोपभुक्तो हि भोगो भवति तुष्टये विज्ञाय सेवितश्चोरो
मैत्रीमेति न चोरतां अशंकितापि संप्राप्ता ग्रामयात्रा यथाध्वगैः प्रेक्ष्यते
तद्वदेवज्ञैर्भोगश्रीरवलोक्यत इति भोगकालेपि सवासनेभ्यो निर्वासन
स्य विशेषमाह नापदि ग्लानिमायांति हेमपद्मं यथा निशि नेहंते प्रकृ
तादन्यद्रमंते शिष्टवर्त्मनि नित्यमापूर्णतामंतरक्षुब्धामिंदुसुंदरीं
आपद्यपि न मुंचंति ज्ञानिनः शीततामिव अब्धिवद्धृतमर्यादा भवंति

विद्यादाद्यायाः नियतिंनविमुंचंतिमहांतोभास्करा इवेति जनकस्यापिसमा
धिव्युत्थितस्येदृशमेवाचरणंपठ्यते तूष्णीमथचिरंस्थित्वाजनकोजनजी
वितं व्युत्थितश्चिंतयामासमनसामननशालिना किमुपादेयमस्तीहय
त्नात्संसाधयामिकिं स्वतःस्थितस्यशुद्धस्यचित्तेकामेस्तिकल्पना नाभि
वांछाम्यसंप्राप्तंसंप्राप्तंनत्यजाम्यहं स्वस्थआत्मनितिष्ठामियन्ममा
स्तितदस्तुमे इतिसंचिंत्यजनकोयथाप्राप्तक्रियामसौ असक्तःकर्त्तुं
मुत्तस्थौदिनंदिनपतिर्यथा भविष्यन्नानुसंधत्तेनातीतंचिंतयत्यसौ व
र्त्तमाननिमेषंतु — सहन्नेवानुवर्त्तत इति यदेवंयथोक्तेनवासनाक्षयेण
यथोक्ताजीवन्मुक्तिर्भवतीतिस्थितं इतिवासनाक्षयः अथजीवन्मु

क्तिं साधनं च मनोनाशं च निरूपयामः यद्यप्यशेषवासनाक्षये सति अर्था
न्मनो नश्यत्येव तथापि स्वातंत्र्येण मनोनाशे सम्यगभ्यस्ते सति वासना
क्षयो रक्षितो भवति नचाजिह्वत्वपंडकत्वाद्यभ्यासेनैव तद्रक्षासिद्धेति वा
च्यं नष्टे मनसि जिह्वत्वादीनामर्थात्सिद्धत्वेनाभ्यासप्रयासाभावात् न
नु मनोनाशाभ्यासप्रयासस्तत्राप्यस्तीति चेदस्तु नाम तस्यावश्यकत्वा
त् अंतरेण मनोनाशमभ्यस्ता अपि अजिह्वत्वादयोऽस्थिरा भवंति अत
सो२ एवं मनोनाशानीयत्वं जनक आह सहस्रांकुरशाखात्मफलपल्लवशा
लिनः अस्य संसारवृक्षस्य मनोमूलमिति स्थितं संकल्पमेव तन्मन्ये
संकल्पोपशमेन तत् शोषयामि यथा शोषमेति संसारपादपः प्रबुद्धो

जी॰मु॰ ६९ स्मि प्रबुद्धोस्मि दृष्टश्चोरो मयात्मनः मनो नाम निहन्म्येनं मनसास्मि चि
रं हत इति वशिष्ठोप्याह अस्य संसारवृक्षस्य सर्वोपद्रवदायिनः उपाय ए
क एवास्ति मनसः स्वस्य निग्रहः मनसोभ्युदयो नाशो मनोनाशो महोद
यः ज्ञमनोनाशमभ्येति मनोऽज्ञस्य हि शृंखला तावन्निशीथवेताला वल्गं
ति हृदि वासनाः एकतत्त्वदृढाभ्यासाद्यावन्न विजितं मनः प्रक्षीणचित्त
दर्पस्य निगृहीतेंद्रियद्विषः॥ पद्मिन्य इव हेमंते क्षीयंते भोगवासनाः ह राम ६६
स्तं हस्तेन संपीड्य दंतैर्दंतान्विचूर्ण्य च अंगान्यंगैः समाक्रम्य जयेदादौ स्व
कं मनः एतावति धरणितले सुभगास्ते साधुचेतनाः पुरुषाः पुरुषकथा
सु च गण्या न जिता ये चैतसा स्वेन हृदयबिलकृतकुंडलउल्बणकलना
त

तं कव्यं

विषो मनोभुजंगः यस्योपशांतिमगमत् चंद्रवत् उदितं स्वसंविद्रूपं वंदे चित्तना
भि किलास्येदं मायाचक्रस्य सर्वतः स्थीयते चेत्तदाक्रम्य तन्न किंचित्प्रबाध
त इति गौडपादाचार्यैरप्युक्तं मनसो निग्रहायत्तदभयं सर्वयोगिनां दुःखक्ष
यः प्रबोधश्च अक्षया शांतिरेव चेति अर्जुनोक्तं चंचलं हि मनः कृष्ण प्रमाथि
बलवद्दृढं तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करं इत्येतद्वचनं हठयोगवि
षयं अत एव वसिष्ठ आह उपविश्योपविश्यैव चित्तज्ञेन मुहुर्मुहुः न श
क्यते मनो जेतुं विना योगमनिंदितं अंकुशेन विना मत्तो यथा दुष्टमतंग
जः विजेतुं शक्यते नैव तथा युक्त्या विना मनः अध्यात्मविद्याधिगमः सा
धुसंगम एव च वासनासंपरित्यागः प्राणस्पंदनिरोधनं एतास्ता युक्त

जी॰मु॰ ७० यः पुंषाः संति चित्तजये किल सक्ताः षुमुक्तिषेताः स्फ हठान्नियमयंति ये चेत
स्ते दीपमुत्सृज्य विनिघ्नंति तमोंजनैः विमूढाः कर्तुमुद्युक्ता ये हठाच्चेतसो
जयं ते निबध्नंति नागेंद्रमुन्मत्तं बिसतंतुभिरिति निग्रहो द्विविधः हठनिग्रहः क्र
मनिग्रहश्चेति तत्र चक्षुः श्रोत्रादिज्ञानेंद्रियाणि वाक्पाण्यादिकर्मेंद्रियाणि तत्तद्गो एम।४
लकोपरोधमात्रेण हठान्निगृह्यंते तद्दृष्टांतेन मनोपि तथा निग्रहीष्यामी
ति मूढस्य भ्रांतिर्भवति न तु तन्निगृह्यंते तद्गोलकस्य हृदयकमलस्य नि
रोधमशक्यत्वात् अतः क्रमनिग्रह एव योग्यः क्रमनिग्रहाय चाध्यात्म ॐ ७०
विद्याप्राप्त्यादयश्च उपायाः सा च विद्या दृश्यमिथ्यात्वं दृग्वस्तुसत्यत्वं स्व
प्रकाशत्वं च बोधयति तथा च सत्येतन्मनः स्वगोचरेषु दृश्येषु प्रयोजना

भावंप्रयोजनवत्तिदृग्वस्तान्यगोचरत्वंबुध्वानिरंधनाग्निवत्स्वयमेवोॅशाम्यति ५१
तथाचश्रूयते यथानिरिंधनोवन्हिः स्वयमेवोपशाम्यति तथावृत्तिक्षयाच्चि
त्तं स्वयोनावुपशाम्यति योनिरात्मा यस्तु बोधितमपितत्वंनसम्यग्बुध्यते य
श्चविस्मरति तयोरुभयोः साधुसंगमएवोपायः साधवोहि पुनः पुनर्बोध
यंति स्मारयंतिच यस्तुविद्यामदादिदुर्वासनयापीड्यमानोनसाधूननुव
र्तितुमुत्सहते तस्यपूर्वोक्तविवेकेनवासनापरित्यागोउपायः वासनाना
मतिप्राबल्येनत्यक्तुमशक्यत्वेप्राणस्पंदनिरोधोउपायः प्राणस्पंदनवा
सनयोश्चित्तप्रेरकत्वात् तयोर्निरोधेचित्तशांतिरुपपद्यते प्रेरकत्वंचवसि
ष्ठआह द्वेबीजेचित्तवृक्षस्यवृत्तिव्रततिधारिणः एकंप्राणपरिस्पंदोद्विती

जी·मु· यं दृढभावना सती सर्वगता संवित्प्राणस्पंदेन बोध्यते संवेदनादनंतानि ततो
७१ दुःखानि चेतसः इति यथा भस्मछन्नमग्निं लोहकारः इति भ्यां धमति तत्र च
दृत्फूत्पन्नवायुना सोग्निर्ज्वलति तथा चित्तोपादानेन काष्ठस्थानीयेनाज्ञाना
वृता संवित्प्राणस्पंदेन बोध्यमाना चित्तवृत्तिरूपेण प्रज्वलति तस्माच्चित्तवृ
त्तिनामकात्संविज्वालारूपात् संवेदनात् दुःखान्युत्पद्यंते सेयं प्राणस्पंदेन
प्रेरिता चित्तोत्पत्तिः अन्यां च स एवाह भावसंवित्प्रकटितामनुभूतां च राघ ॐ
व चित्तस्योत्पत्तिमपरां वासनाजनितां शृणु दृढाभ्यस्तपदार्थैकभावनाद ७१
तिचंचलं चित्तं संजायते जन्मजरामरणकारणमिति न केवलं प्राणवास
नयोश्चित्तप्रेरकत्वं किंतु परस्परप्रेरकत्वमप्यस्ति तदाह वसिष्ठः वासना

वशात्ः प्राणस्पंदस्तेन च वासना क्रियते चित्तबीजस्य तेन बीजांकुरक्रम इति
अतएवान्यतरनाशेनोभयनाशमप्याह द्वे बीजे चित्तवृक्षस्य प्राणस्पंदन
वासने एकस्मिंश्च तयोः क्षीणे क्षिप्रं द्वे अपि नश्यतः इति। तयोर्नाशोपायं नाश
फलं चाह प्राणायामदृढाभ्यासैर्युक्त्या च गुरुदत्तया। आशनाशनयोगेन प्रा
णस्पंदो निरुध्यते असंगव्यवहारित्वाद्भवभावनवर्जनात् शरीरनाश
दर्शित्वाद्वासना न प्रवर्तते। वासनासंपरित्यागाच्चित्तं गच्छत्यचित्तताम्। प्राण
स्पंदनिरोधाच्च यथेच्छसि तथा कुरु एतावन्मात्रकं मन्ये रूपं चित्तस्य राघव
यद्भावनं वस्तुनोऽन्तर्वस्तुत्वेन रसेन च। यदा न भाव्यते किंचिद्धेयोपादेयरूपि
यत्। स्थीयते सकलं त्यक्त्वा तदा चित्तं न जायते। अवासनत्वात्सततं यदा न म

जी॰मु॰ ७२ नुतेमनः अमनस्कतादोदेतिपरमोपशामसदेति अमनस्कानुदयेत्त्वांस्वभा
वमाह चित्तप्रसादलाभांतेनमित्राणिनबांधवाः शक्नुवंतिपरित्रातुंगुरवोन
वव चमानवंमिति आसनाद्यानयोगेनेतियदुक्तं तत्रासनस्यलक्षणंउपायंफलंच
त्रिभिःसूत्रैःपतंजलिःसूत्रयामास स्थिरसुखमासनं प्रयत्नशैथिल्यानंतस
मापत्तिभ्यां ततोद्वंद्वानभिघातइति पद्मकस्वस्तिकादिनायादृशेनदेहस्थापन
रूपेणयस्यपुरुषस्यावयवव्यथानुत्पत्तिलक्षणंसुखंदेहचलनराहित्य
लक्षणंस्थैर्यंचसंपद्यते तस्यतदेवसुखमासनं तस्यप्रयत्नशैथिल्यंलौ ॐ ७२
किकउपायः गमनगृहकृत्यतीर्थयात्रास्नानयागहोमादिविषयोयःप्रय
त्नोमानसउत्साहः तस्यशैथिल्यंकर्तव्यं अन्यथासउत्साहःबलात्देह

पुत्थाप्य यत्र क्वापि प्रेरयति फणासहस्रेण धरणीं धारयित्वा स्थैर्येणावति
ष्ठते योयमनंतः स एवायमस्मीति ध्यानं चित्तस्यानंते समापत्तिः यथाय
थोक्तासनसंपादकमदृष्टं निष्पद्यते सिद्धे चासने शीतोष्णसुखदुःखाव
मानादिद्वंद्वैर्यथापूर्वं नाभिहन्यते तथाविधस्य चासनस्य योग्यो देशः श्रू
यते: विविक्तदेशे च सुखासनस्थः शुचिः समग्रीवशिरःशरीर इति स
मे शुचौ शर्करावन्हिवालुकादिभिर्विवर्जिते शब्दजलाश्रयादिभिः मनो
नुकूले न तु चक्षुःपीडने गुहानिवाताश्रयेण प्रयोजयेत् इति च सोयमा
सनयोगः अत्रानयोगस्य मिताहारत्वं अत्याहारमनाहारं नित्यं योगी
विवर्जयेत् इति श्रुतेः भगवताप्युक्तं नात्यश्नतस्तु योगोस्ति न चैकांतम

गी॰ मु॰ ७३ नश्नतः नचातिस्वप्नशीलस्यजाग्रतोनैवचार्जुन युक्ताहारविहारस्ययुक्त
चेष्टस्यकर्मसु युक्तस्वप्नावबोधस्ययोगोभवतिदुःखहेति जितासनस्य
प्राणायामेनमनोविनाशः श्वेताश्वतरैराम्नायते त्रिरुन्नतंस्थाप्यसमंश
रीरंहृदींद्रियाणिमनसासन्निवेश्य ब्रह्मोडुपेनप्रतरेतविद्वान्स्रोतांसि
सर्वाणिभयावहानि प्राणान्प्रपीड्येहसयुक्तचेष्टःक्षीणेप्राणेनासिकयोः
श्वसीत दुष्टाश्वयुक्तमिववाहमेनंविद्वान्मनोधारयेताप्रमत्तः योगीद्वि ॐ
विधः विद्यामदाद्यासुरीसंपद्रहितस्तत्सहितश्चेति तयोराद्य स्यब्र ७३
ह्माध्यानेनमनसिनिरुद्धेसतितन्नांतरीयकतयाप्राणोनिरुध्यते तं
प्रतित्रिरुन्नतमितिमंत्रःपठितः द्वितीयस्याभ्यासेनप्राणेनिरुद्धेतन्नां

तरीयकतयामनोनिरुध्यते तंप्रतिप्राणान्प्रपीडयेति मंत्रःप्रवृत्तः प्राणप्र
पीडनप्रकारोवक्ष्यते तेनचपीडनेनयुक्तचेष्टोभवति मनश्चेष्टाविघामदा
दयानिरुध्यंते प्राणनिरोधेनचित्तदोषनिरोधेदृष्टांतोन्यत्रश्रूयते यथा
पर्वतधातूनांदह्यंतेधमतामलाः तथेंद्रियकृतादोषादह्यंतेप्राणनिग्र
हादिति अत्रोपपत्तिर्वसिष्ठेनदर्शिता यःप्राणपवनस्पंदःचित्तस्पंदःस
एवहि प्राणस्पंदक्षये यत्नःकर्तव्योधीमतोच्चकैरिति मनोवाक्चक्षु
रादींद्रियदेवताःस्वस्वव्यापारंनिरंतरंकरिष्यामइ तिव्रतंधृत्वाश्रमरू
पेणमृत्युनाग्रस्ताःसचमृत्युःप्राणंनाप्नोत्ततो निरंतरमुच्छ्वासोकु
र्वन्नपिप्राणोनश्राम्यति तदाविचार्यदेवताःप्राणरूपंप्राविशन्सा

जी॰मु॰ ७४

यमर्थो वाजसनेयिभिराम्नायते अयं वै नश्रेष्ठो यः संचरंश्चासंचरंश्च न व्य
थते यो न रिष्यति हंतास्यैव सर्वे रूपमसामेति एतस्यैव सर्वे रूपमभयंत
स्मादेत एतेनाख्यायंत प्राणा इति अत इंद्रियाणां प्राणरूपत्वं नाम प्राणा
धीनचेष्टावत्वं तच्चांतर्यामिब्राह्मणे सूत्रात्मप्रस्तावे श्रूयते वायुर्वै गोत
म सूत्रं वायुना वै गोतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूता
नि संदृब्धानि भवंति तस्माद्वै गोतम पुरुषं प्रेतमाहुर्व्यस्रंसिषतास्यांगा
नीति वायुना हि गोतम सूत्रेण संदृब्धानि भवंतीति अतः प्राणमनःस्पं ७४
दयोः सहभावित्वात्प्राणनिग्रहे मनोनिग्रहः स्यात् ननु सहस्पंदो न युक्तः
सुषुप्तौ चेष्टमानेपि प्राणे मनसोऽचेष्टमानत्वात् न विलीनत्वेन तदा

नीं मनस एवाभावात् ननु क्षीणे प्राणे नासिकयोः श्वसीतीति हि व्याहतं
नहि क्षीणप्राणस्य मृतस्य श्वासं कश्चित्पश्यामः नापि श्वासतो जीवतः प्राण
क्षयोस्तीति मैवं अनुल्बणत्वस्य क्षयत्वेनात्र विवक्षितत्वात् यथा खन
नच्छेदनादिषु व्याप्रियमाणस्य पर्वतमारोहतः शीघ्रं धावतो वा श्वासवे
गो यावान् भवति न तावांस्तत्रावस्थितस्यासीनस्य वा विद्यते तथा प्राणा
यामपाटवोपेतस्यैतस्मादल्पः श्वासो भवति एतदेवाभिप्रेत्य श्रूयते
भूत्वा तत्रायतः प्राणः शनैरेव समुच्छ्वसेदिति यथा दुष्टैरश्वैरुपेतो र
थो मार्गं त्यक्त्वा यत्र क्वापि नीयते स च सारथिना दृढमश्वं रज्जुभ्याकृ
ष्य मार्गेषु पुनर्धार्यते तथेन्द्रियैर्वासनाभिरितस्ततो नीयमानं प्राणर

मनः

गी·भ्रु· ज्जो दृढं धारितायां धार्यते प्राणान्सपीडेति यदुक्तं तत्र प्राणपीडनप्रकारो
७५ न्यत्र श्रूयते सव्याहृतिकां सप्रणवां गायत्रीं शिरसा सह त्रिः पठेदायतप्रा
णः प्राणायामः स उच्यते प्राणायामास्त्रयः प्रोक्ताः रेचपूरककुंभकाः उ
त्क्षिप्य वायुमाकाशं शून्यं कृत्वा निरात्मकं शून्यभावेन युंजीयाद्रेचकस्ये
ति लक्षणं वक्रेणोत्पलनालेन तोयमाकर्षयेन्नरः एवं वायुर्गृहीतव्यः पू
रकस्येति लक्षणं नोच्छ्वसेन्न च निश्वासेन्नैव गात्राणि चालयेत् एवं ताव ॐ
न्नियुंजीत कुंभकस्येति लक्षणमिति शरीरांतर्गतं वायुं बहिर्निःसारयितुं ७५
उत्क्षिप्य शरीरमाकाशं शून्यं निरात्मकं वायुरहितं कृत्वा स्वल्पमपि वायुं
अप्रवेश्य शून्यभावेनैव नियमयेत् तदिदं रेचकं भवति कुंभको द्विविधः

आंतरोबाह्यश्चेति तदुभयंचवसिष्ठआह अपानेस्तंगतेप्राणोयावन्नाभ्यु
दितोहृदि तावत्साकुंभकावस्थायोगिभिर्यानुभूयते बहिरस्तंगतेप्राणेया
वन्नापानउद्भवः तावत्पूर्णसमावस्थंबहिष्ठंकुंभकंविदुरिति । अत्रोच्छ्वा
सनिश्वासौप्राणापानौउच्छ्वासआंतरकुंभविरोधी गात्रचालनमुभय
विरोधीतस्मिन्सतिनिश्वासोच्छ्वासयोरन्यतरस्यावश्यंभावित्वात् पतं
जलिरपिआसनानंतरभाविनंप्राणायामंसूत्रयामास तस्मिन्सतिनिः
श्वासप्रश्वासयोर्गतिविच्छेदःप्राणायामः ननुकुंभकेगत्यभावेपिरेच
कपूरकयोरुच्छ्वासनिःश्वासगतीविद्येते इतिचेन्न अधिकमात्राभ्यासे
नस्वभावसिद्धायाःसमप्राणगतेर्विच्छेदात् तमेवाभ्यासंसूत्रयति बा

जी॰मु॰ स्वाभ्यंतरस्तंभवृत्तिः देशकालसंख्यादिभिःपरिदृष्टोदीर्घःसूक्ष्मइति रेचको
७६ बाह्यवृत्तिः पूरकोआंतरवृत्तिःकुंभकस्तंभवृत्तिः तत्रैकैकोदेशादिभिःपरि
क्षणीयः तद्यथा स्वभावसिद्धेरेचकेहृदयान्निर्गत्यनासाग्रसंमुखेद्वाद
शांगुलपर्यंतेश्वासःसमाप्यते अभ्यासेनतुक्रमेणनाभेराधाद्वावायु १
र्निर्गच्छति चतुर्विंशत्यंगुलपर्यंतेषट्त्रिंशदंगुलपर्यंतेवासमाप्तिः अ
त्ररेचकेप्रयत्नातिशयेसतिनाभ्यादिप्रदेशक्षोभणांतर्निश्वतुंशकं ॐ ७६
बहिःसूक्ष्मतूलंधृत्वातच्चालनेननिश्वतव्यं सेयंदेशपरीक्षा रेचकका
लेप्रणवस्यावृत्तयोदशविंशतित्रिंशदादिभिः कालपरीक्षा अस्मिन्मा
सेप्रतिदिनंदशरेचकाआगामिमासेविंशतिउत्तरमासेत्रिंशत्इत्या

दिभिः संख्यापरीक्षा यथोक्तदेशकालविशिष्टः प्राणायामाः एकस्मिन्दिने
दशविंशतित्रिंशदित्यादिभिः संख्यापरीक्षा पूरकेप्येवं योजनीयं यद्यपि
कुंभके देशव्याप्तिविशेषो नावगम्यते तथापि कालसंख्याव्याप्तिरवगम्य
त इति यथा घनीभूतस्तूलपिंडः प्रसार्यमाणो दीर्घो विरलतया सूक्ष्मश्च
भवति तथा प्राणोपि देशसंख्याधिक्येनाभ्यस्यमानो दीर्घो दुर्लक्षतया सू
क्ष्मश्च संपद्यते रेचकादिभ्योन्यं प्रकारं सूत्रयति बाह्याभ्यंतरविषयाक्षे
पी चतुर्थ इति यथाशक्ति सर्ववायुं विरेच्यानंतरं क्रियमाणो बहिः कुंभकः
यथाशक्ति वायुमापूर्यानंतरं क्रियमाणोंतः कुंभकः रेचकपूरकावनाद्द
स्य केवलकुंभकोभ्यस्यमानः पूर्वत्रापेक्षयाश्चतुर्थो भवति निद्रातंद्रा

जी·सु· दिप्रबलदोषयुक्तानां रेचकादित्रयदोषरहितानां चतुर्थ इति विवेकः प्राणा
७७ यामफलं सूत्रयति ततः क्षीयते प्रकाशावरणमिति प्रकाशस्य तत्त्वस्याव
रणं तमो निद्रालस्यादिहेतुः तस्य क्षयो भवति फलांतरं सूत्रयति धारणा
सु योग्यता मनस इति आधारनाभिचक्रहृदयभ्रूमध्यब्रह्मरंध्रादिदेश
विशेषे चित्तस्य स्थापनं धारणा देशबंधश्चित्तस्य धारणेति सूत्रणात् स्मृ
तिश्च मनः संकल्पकं ध्यात्वा संक्षिप्यात्मनि बुद्धिमान् धारयित्वा तथात्मानं ॐ
धारणा परिकीर्तितेति प्राणायामेन रजोगुणकारितात् चांचल्यात् तमोगु ७७
णकारितादालस्यादेश्च निवारितं मनस्तस्यां धारणायां योग्यं भवति
प्राणायामदृढाभ्यासैर्युक्ता च गुरुदत्तयेति अत्र त्येन युक्तिशब्देन योगि

जनप्रसिद्धं शिरोरूपमेरुचालनं जिह्वाग्रेण घंटिकाभ्रमणं नाभिचक्रे ज्यो
तिर्ध्यानं विस्मृतिप्रदोषधसेकचेत्येवमादिकं कृत्यते तदेवमध्यात्मविद्यासा
धुसंगमवासनाक्षयप्राणनिरोधाश्चित्तनाशोपाया दर्शिताः अथतदुपाय
भूतं समाधिं वक्ष्यामः पंचभूम्युपेतस्य चित्तस्य भूमित्रयत्यागेनावशिष्टं भू
मिद्वयं समाधिः चित्तभूमयश्च योग्यभाष्यकृता दर्शिताः क्षिप्तं मूढं विक्षिप्तं
एकाग्रं निरुद्धमिति चित्तभूमय इति आसुरसंपद्व्लोकशास्त्रदेहवासनाप्र
वर्तमानं क्षिप्तं निद्रातंद्रादिग्रस्तं मूढं कादाचित्कध्यानयुक्तं क्षिप्ताद्विशिष्ट
तया विक्षिप्तं तत्र क्षिप्तमूढयोः समाधिशंकैव नास्ति विक्षिप्ते तु चेतसि
विक्षेपोपसर्जनीभूतः समाधिर्योगपक्षे न वर्तते विक्षेपांतर्गततयादह

जो·सु· नांतर्गतबीजवत्सद्य एव नश्यति यस्त्वेकाग्रेतु चेतसि संभूतमर्थं द्योतयति
७८ क्षिणोति च क्लेशान्कर्मबंधनानि श्लथयति निरोधमभिमुखीकरोति ससंज्ञा
तो योग इत्याख्यायते सर्ववृत्तिनिरोधे तु असंप्रज्ञातः समाधिः तत्र संप्रज्ञात
समाधिभूमिकैकाग्रतां सूत्रयति शांतोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रता
परिणाम इति शांतोतीतउदितो वर्त्तमानः प्रत्ययश्चित्तवृत्तिः अतीतप्रत्य ॐ
योयं पदार्थं गृह्णाति तमेव चेदुदितोपि गृह्णीयात्तदा तावुभौ तुल्यौ भवतः ७८
तादृशश्चित्तस्य परिणाम एकाग्रतेत्युच्यते एकाग्रताभिवृद्धिलक्षणं स
माधिं सूत्रयति सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणाम
इति रजोगुणेन चाल्यमानं चित्तं क्रमेण सर्वार्थान् गृह्णाति तस्य रजोगु

णस्यनिरोधायक्रियमाणेनयोगिनःप्रयत्नविशेषेणदिनेदिनेसर्वार्थताक्षी
यते एकाग्रताचोदेति तादृशश्चित्तस्यपरिणामःसमाधिरित्युच्यते तस्यस
माधेरष्टांगेषुयमनियमासनप्राणायामप्रत्याहाराःपंचबहिरंगाणि तत्र
यमान्सूत्रयति अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहायमाइति हिंसा
दिभ्योनिषिद्धकर्मभ्योयोगिनंयमयंति निवर्तयंतीतियमाःनियमान्सूत्र
यति शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानिनियमाइति जन्महेतोः
काम्यधर्मान्निवर्त्यमोक्षहेतौनिष्कामधर्मेनियमयंतिप्रेरयंतीतिनिय
माः यमनियमयोरनुष्ठानवैलक्षण्यंस्मर्यते यमान्सेवेतसततंननि
त्यंनियमान्बुधः यामान्पतत्यकुर्वाणोनियमान्केवलान्भजन् पतति

जी॰ मु॰ नियमवान्यमेषसक्तोननुयमवान्नियमालसोवसीदेत् । इतियमनियम
७९ मोसमीक्ष्यबुद्ध्यायमबहुलेषनुसंदधीतबुद्धिं इति यमनियमफलानिसू
त्रयति तत्संनिधौवैरत्यागः क्रियाफलाश्रयित्वं रत्नोपस्थानं वीर्यलाभः
जननादिभयाभावः जन्मकथनासंबोधः शौचात्स्वांगजुगुप्सापरैरसंस
र्गः सत्वशुद्धिसौमनस्यैकाग्र्येंद्रियजयात्मदर्शनयोग्यत्वानिचसंभवं
ति संतोषादनुत्तमःसुखलाभः कायेंद्रियबुद्धिशुद्धिरशुद्धिक्षयात्तपसः ॐ
स्वाध्यायादिष्टदेवतासंप्रयोगः समाधिसिद्धिरीश्वरप्रणिधानादिति । ७९
आसनप्राणायामौव्याख्यातौ प्रत्याहारंसूत्रयति । स्वविषयसंप्रयो
गेचित्तस्वरूपानुकारइवेंद्रियाणांप्रत्याहारइति शब्दस्पर्शरूपरस

गंधाविषयास्तेभ्योनिवर्तिताः श्रोत्रादयः चित्तस्वरूपमनुकुर्वंतीवव्यवतिष्ठंते श्रुतिश्चभवति शब्दादिविषयाः पंचमनश्चैवातिचंचलं चिंतयेदात्मनोरश्मीन्प्रत्याहारः स उच्यत इति शब्दादयोविषयाः येषांश्रोत्रादीनां श्रोत्रादयः पंचमनः षष्ठानामेतेषामनात्मरूपेभ्यः शब्दादिभ्योनिवर्तनमात्मरश्मित्वेनचिंतनंप्रत्याहारः स इत्यर्थः प्रत्याहारफलंसूत्रयति ततः परमावश्यतेंद्रियाणामिति धारणाध्यानसमाधीन्सूत्रैस्त्रिभिः सूत्रयति देशबंधश्चित्तस्यधारणा तत्रप्रत्ययैकतानता ध्यानं तदेवार्थमात्रनिर्भासंस्वरूपशून्यमिवसमाधिरिति आधारादिदेशाः पूर्वमुक्ताः देशांतरंश्रूयते मनः संकल्पकंध्यात्वा संक्षिप्यात्मनिबुद्धिमान् धारयित्वातथात्मा

जी॰ मु॰
२०

नं धारणापरिकीर्तितेति यत्सर्ववस्तुसंकल्पकं मनः ध्यात्वा संक्षिप्यात्मनि
तदात्मानमेव संकल्पयतु न त्वन्यदित्येवंविधः प्रयत्न आत्मनि संक्षेपः प्र
त्ययस्यैकतानता ध्यानं तत्त्वैकविषयप्रवाहः स च द्विविधः विच्छिद्य विच्छि
द्य जायमानः संततश्चेति तावुभौ क्रमेण ध्यानसमाधी भवतः तदुभयं स
र्वानुभवयोगिना दर्शितं चित्तैकाग्र्यं यतो ज्ञानमुक्तं समुपजायते तत्सा
धनं मनो ध्यानं यथावदुपदिश्यते विलाप्य विकृतिं कृत्स्नां संभवव्यत्यय
क्रमात् परिशिष्टं च सन्मात्रं चिदानंदं विचिंतयेदिति ब्रह्माकारमनोवृत्ति
प्रवाहोऽहंकृतिं विना संप्रज्ञातसमाधिः स्याद्ध्यानाभ्यासप्रकर्षत इति तं
च भगवत्पादा उदाजह्रुः दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकम

ॐ
२१

स्तरं अलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्तः ॐ दृशिस्तु शुद्धो
हमविक्रियात्मको न मेस्ति कश्चिद्विषयः स्वभावतः पुरस्तिरश्चोर्ध्वमधश्च
सर्वतः संपूर्णभूमात्वज आत्मनि स्थितः अजोऽमरश्चैव तथारोजंमृतः स्व
यंप्रभः सर्वगतोहमद्वयः न कारणं कार्यमतीव निर्मलः सदैव तृप्तश्च ततो
मुर्विक्तः ॐमिति ननु संप्रज्ञात समाधिमंगीकृत्य स कथं ध्यानानंतरं भावि
नोष्टमांगस्य समाधिस्थाने उदाहृतः नायं दोषः अत्यंतभेदाभावात् य
थावेदमधीयानो माणवकः पदे पदे स्खलन् पुनः पुनः समादधाति अधी
तवेदः सावधानो न स्खलति अध्यापको निरवधानस्तंद्रीं कुर्वन्नपि न
स्ख१ लति तथाविषयेक्योपि परिपाकतारतम्येन ध्यानसमाधिसंप्रज्ञा

जी॰मु॰ ८१ तानामवांतरभेदोवांगंतव्यः धारणादित्रयंमनोविषयत्वात्संप्रज्ञाते
रंतरंगं यमादिपंचकंतुबहिरंगंतदेतत्सूत्रयति त्रयमंतरंगंपूर्वेभ्यइति त
तःकेनापिपुण्येनांतरंगेप्रथमंलब्धेबहिरंगलाभायनातिप्रयासःकर्तव्यः
यद्यपिपतंजलिनाभौतिकभूततन्मात्रेंद्रियाहंकारविषयाःसविकल्पकस
माधयोबहुधाप्रपंचितास्तथापितेषामंतर्धानादिसिद्धिहेतुतयामुक्तिहे
तुसमाधिविरोधित्वान्नास्माभिस्तत्रादरःक्रियते तथाचसूत्रितं तेसमाधा ॐ ८१
वुपसर्गाव्युत्थानेसिद्धयइति स्थान्युपमंत्रणेसंगस्मयाकरणंपुनरनि
ष्टप्रसंगादिति स्थानिनोदेवाःउद्दालकोदेवैरामंत्रितोप्यवज्ञायदेवा
निर्विकल्पकसमाधिमेवचकारेत्कपारव्यायते प्रश्नोत्तराभ्यामप्येव

गम्यते श्रीरामः जीवन्मुक्तशरीराणां कथमात्मविदांवर शक्तयो नेह दृश्यं
ते आकाशगमनादिकाः वसिष्ठः अनात्मविद्मुक्तोपि नभोविहरणादिकं
द्रव्यमंत्रक्रियाकालयुक्त्याप्नोत्येव राघव नात्मज्ञस्यैष विषय आत्मज्ञो
ह्यात्ममात्रदृक् आत्मनात्मनि संतृप्तो नाविद्यामनुधावति ये केचन ज
गद्भावास्तानविद्यामयान्विदुः कथं तेषु किलात्मज्ञस्त्यक्तविद्यो निमज्जति
द्रव्यमंत्रक्रियाकालशक्तयो साधुसिद्धिदाः परमात्मपदप्राप्तो नोपकुर्व
न्ति काश्चन सर्वेछाजालसंशांतावात्मलाभो हि यः स कथं सिद्धिवांछा इयो३
यां मग्नचित्तेन लभ्यते इति न केचन जगद्भावास्तत्वज्ञं रंजयंत्यमी ना
-गरं नागरीकांतं कुग्रामललना इवेति अपि शीतरुचावर्के सुतीक्ष्णे

जी॰मु॰ चेंदुमंडले अप्यधः प्रसरत्यग्नौ जीवन्मुक्तो न विस्मयी चिदात्मन इमा
८२ इत्थं प्रस्फुरंतीह शक्तयः इत्यस्याश्चर्यजालेषु नाभ्युदेति कुतूहलं इति च
आत्मविषयस्य संप्रज्ञातसमाधिः वासनाक्षयस्य निरोधसमाधिर्हेतुः
तस्मात्तत्रादरः कृतः अथ पंचभूमिरूपो निरोधसमाधिर्निरूप्यते तं च नि
रोधं च सूत्रयति व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोध
क्षणचित्तान्वयो निरोधपरिणाम इति व्युत्थानसंस्काराः समाधिविरोधि ॐ
नस्ते चोद्दालकस्य समाधौ उदाहृताः कदाहं त्यक्तमनने पदे परमपाव ८२
ने चिरं विश्रांतिमेष्यामि मेरुशृंग इवांबुदः इति चिंतापरवशो बलादु
द्दालको द्विजः पुनः पुनस्तूपविश्य ध्यानाभ्यासं चकार ह विषयैर्नीय

मानेतु चित्ते मर्कटचंचले न स लेभे समाधानप्रतिष्ठां प्रीतिदायिनीं कदाचि
द्बाह्यसंस्पर्शपरित्यागादनंतरं तस्यागच्छच्चित्तकपिरांतरस्पर्शसंचयं
कदाचिदांतरस्पर्शाद्बाह्यं विषयमाददे तस्योड्डीय मनो याति कदाचिन्न
भपक्षिवत् कदाचिदुदितार्काभं तेजः पश्यति विस्तृतं कदाचित्केवलं व्योम
कदाचिन्निर्वितं तम इति आगच्छतो यथाकामं प्रतिभासान्पुनः पुनः अधि
तन्मनसा भूरः खड्गेनेव रणे रिपून् विकल्पौघैः समालूने सा पश्यद्धृदयांब
रे तमः छिन्नविवेकार्कलोलकज्जलमेकं च तमप्युत्सादयामास सम्य
ग्ज्ञानविवस्वता तमस्युपरते स्वांते तेजःपुंजं ददर्श सः तद्धुनाव स्थला
ब्रानां वनं बाल इवाहृमः तेजस्युपरते तस्य घूर्णमानं मनो मुनेः निशा

जी॰मु॰ ८३
ब्रुवद् गान्निद्रां तामप्याशु लुलाव सः निद्राव्यपगमे तस्य व्योमसंवित्समु
दयौ व्योमसंविदि नष्टायां मूढं तस्याभवन्मनः मोहमप्येष मनसस्तन्म
मार्जमहाशयः ततस्तेजस्तमोनिद्रामोहादिपरिवर्जितां काप्यवस्थामासा
द्य विश्राश्राम मनःक्षणमिति च तएते व्युत्थानसंस्कारा निरोधहेतुना योगि
प्रयत्नेन प्रतिदिनं प्रतिक्षणं चाभिभूयंते तद्विरोधिनश्च निरोधसंस्काराः प्रा
दुर्भवंति तथा सति निरोधः एकैकस्मिन् क्षणे चित्तमनुगच्छति सोयमीदृशः
चित्तस्य निरोधपरिणामो भवति। ननु प्रतिक्षणपरिणामिनो हि भावा ऋते ॐ ८३
चितिशक्तेरिति न्यायेन तथा चित्तस्य सर्वदा परिणामप्रवाहो वक्तव्यः
बाढं। तत्र व्युत्थितचित्तस्य वृत्तिप्रवाहः स्फुटः निरुद्धचित्तस्य तु कथमित्या

शं कोत्तरं स्रुत्रयति ततः प्रशांतवाहिता संस्कारादिति यथा समिदाज्याहुति
प्रक्षेपे वन्हिरुत्तरोत्तरवृद्ध्या प्रज्वलति समिदादिक्षये प्रथमक्षणे किंचिच्छा
म्यति उत्तरोत्तरक्षणे शांतिर्वर्धते तथा निरुद्धचित्तस्योत्तरोत्तराधिकः प्रशमः
प्रवहति तत्र पूर्वपूर्वप्रशमजनितः संस्कार एवोत्तरप्रशमस्य कारणं तामेतां
प्रशांतवाहितां भगवान् विस्पष्टमुदाजहार यदा विनियतं चित्तमात्मन्येवाव
तिष्ठते निस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा यथा दीपो निवातस्थो नेंग
ते सोपमा स्मृता योगिनो यतचित्तस्य युंजतो योगमात्मनः यत्रोपरमते चि
त्तं निरुद्धं योगसेवया यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति सुख
मात्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रियं वेत्ति यत्र न चैवायं स्थितश्चलति त

जी॰मु॰ त्वतः यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः यस्मिन्स्थितो न दुःखेन गुरु
८४ णापि न चाल्यते तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितं स निश्चयेन योक्त
व्यो योगोऽनिर्विण्णचेतसेति निरोधसमाधेः साधनं सूत्रयति विरामप्रत्यया
भ्यासपूर्वकः संस्कारशेषोऽन्य इति विरामो वृत्त्युपरमः तस्य प्रत्ययः कारणं
वृत्त्युपरमार्थः पुरुषप्रयत्नः तस्याभ्यासः पौनःपुन्येन संपादनं तत्पूर्वकस्त
ज्जन्यः अनंतरातीतसूत्रे संप्रज्ञातसमाधेरुक्तत्वात्तदपेक्षयाऽन्योऽसं
प्रज्ञातसमाधिस्तत्र वृत्तिरहितस्य चित्तस्वरूपस्य दुर्लक्ष्यत्वात्संस्कार ॐ
रूपेण चित्तं स्थाप्यते विरामप्रत्ययजन्यत्वं भगवान्विस्पष्टमाह संक ८४
ल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः मनसैवेंद्रियग्रामं विनियम्य

समं ततः शनैः शनैरुपरमेद्बुध्या धृतिगृहीतया आत्मसंस्थं मनः कृत्वा
न किंचिदपि चिंतयेत् यतो यतो निश्चरति मनश्चंचलमस्थिरं ततस्ततो
नियम्यैतदात्मन्येव वशं नयेत् काम्यमानाः स्रक्चंदनवनितापुत्रमित्र
गृहक्षेत्रादयो मोक्षस्यात्यकुशलविवेकिजनप्रसिद्धैर्बहुभिर्दोषैरुपेता
अपि अनादि अविद्यावशात् दोषानाच्छाद्य तेषु विषयेषु सम्यक्त्वं कल्प
यंति तस्माच्च संकल्पादिदं मे स्यादित्येवं रूपाः कामाः प्रभवंति तथा चस्म
र्यंते संकल्पमूलः कामो वै यज्ञाः संकल्पसंभवाः कामजानामिति मूलं सं
कल्पात्किल जायसे न त्वां संकल्पयिष्यामि समूलस्त्वं विनंक्ष्यसि त
थविवेकेन विषयदोषेषु साक्षात्कृतेषु शुनां वांतेपायस इव कामास्त

गी·म्रु· ज्यंते स्त्रक्चंदनादिष्वि वये ब्रह्मलोकादिष्वणिमाद्यैश्वर्येषु च कामा
८५ स्त्याज्या इत्यभिप्रेत्य सर्वानित्युक्तं मासोपवासव्रतिनां तस्मिन्मास्यन्ने
च्छाकेपि कामः पुनः पुनरुदेति तद्वन्मा भूदित्यशेषत इत्युक्तं कामत्यागेम
नःपूर्वकप्रवृत्त्यभावेपि चक्षुरादीनां रूपादिषु स्वभावसिद्धा प्रवृत्तिः सापि
प्रयत्नयुक्तेन मनसैव नियंतव्या देवतादर्शनादिषु अपि अननुसरणाय
समंतत इत्युक्तं भूमिकाजयक्रमेणोपरमस्य विवक्षितत्वात् शनैः शनै ॐ
रित्युक्तं ताश्च भूमिकाश्च तत्रः कठवल्लीषु श्रूयंते यच्छेद्वाङ्मनसी प्रा ८५
ज्ञस्तद्यच्छेत् ज्ञान आत्मनि ज्ञानमात्मनि महति नियच्छेच्छांत आत्म
नीति वाग्व्यापारो द्विविधः जल्पादिरूपः लौकिकजपादिरूपो वैदिकश्च त

त्रैलोकिकश्चबहुविक्षेपकरत्वाद्व्युत्थानकालेपियोगीतंपरित्यजेत् अत
एवस्मर्यते मौनंयोगासनंयोगस्तितिक्षैकांतशीलता निस्पृहत्वंसमत्वंच
सप्तैतान्येकदंडिनइति जपादिकंनिरोधसमाधौपरित्यजेत् सोयंवाक्
भूमिः प्रथमंतांभूमिंप्रयत्नमात्रेणकतिपयैर्दिनैर्मासैर्वादृढंविजित्यपश्चा
द्द्वितीयायांमनोभूमौप्रयतेत अन्यथाबहुभूमिकप्रासादवत्प्रथमभूमि
कापातेनैवोपरितन्योयोगभूमयोविनश्येयुः यद्यपिचक्रादयोनिरोद्ध
व्याः तथापि तेषांवाक्भूमौमनोभूमौवांतर्भावोदृष्टव्यः ननुवाचंमनसिनि
यच्छेदित्यनुपपन्नंनहींद्रियांतरेप्रवेशोस्ति मैवं प्रवेशस्याविवक्षितत्वा
त् नानाविक्षेपकारिणोर्वाङ्मनसयोर्मध्येप्रथमतोवाग्व्यापारमात्रपरि

जी॰मु॰ ८६ शेष इह विवक्षितः गोमहिषाश्वादीनामिव वाङ्मयमस्वाभाविके संपन्ने त
तोऽज्ञानात्मनि मनो नियच्छेत् आत्मा त्रिविधः ज्ञानात्मा महानात्मा शान्ता
त्मा चेति जानात्यत्र स्थित आत्मेति ज्ञानात्मोपाधिरहंकारोऽत्र ज्ञानशब्देन वि
वक्षितः करणस्य मनसो नियम्यत्वेन पृथगुपात्तत्वात् अहंकारो द्विविधः
विशेषरूपः सामान्यरूपश्चेति अयमहमेतस्य पुत्र इत्येवं व्यक्तिमभिमन्य
मानो विशेषरूपः अस्मीत्येतावन्मात्रमभिमन्यमानः सामान्यरूपः स
च सर्वव्यक्तिषु व्याप्तत्वान्महानित्युच्यते ताभ्यामहंकाराभ्यामुपहितौ ३८
द्वावात्मानौ निरुपाधिकः शान्तात्मा तदेतत्सर्वमन्तर्बहिर्व्यापनेन वर्तते
शान्त आत्मा सर्वान्तरश्चिदेकरसस्तस्मिन्नाश्रितं जडशक्तिरूपमव्यक्तं

मूलप्रकृतिः साच प्रथमं सामान्याहंकाररूपं महत्तत्वं नाम भूत्वाव्यक्तीभव
ति ततो बहिर्विशेषाऽहंकाररूपेण ततो बहिर्मनोरूपेण ततो बहिर्वागादीं
द्रियरूपेण तदेतदभिप्रेत्योत्तरमांतरत्वं विविनक्ति श्रुतिः इंद्रियेभ्यः परा ह्यर्था
अर्थेभ्यश्च परं मनः मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः महतः परमव्य
क्तमव्यक्तात्पुरुषः परः पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति एवं
सति अत्र नानाविधसंकल्पविकल्पसाधनं करणरूपं मनोऽहंकर्तरि नियच्छेत्
मनोव्यापारान्परित्यज्याहंकारमात्रं शेषयेत् नचैतदशक्यमिति वाच्यं त
स्याहं निग्रहं मन्ये वायोरिव सुदुष्करमिति वदंतमर्जुनं प्रति भगवतो नरा
भिधानात् असंशयं महाबाहो मनो दुर्निग्रहं चलं अभ्यासेन तु कौंतेय वै

जी॰मु॰ राग्येणचगृह्यते असंयतात्मनोयोगोदुःप्रापइतिमेमतिः वश्यात्मनातुय
८७ ततात्राक्योवाप्तुमुपायतः इतिअभ्यासवैराग्येपतंजलिसूत्रोदाहरणेनव्या
ख्यास्येते पूर्वपूर्वभूमिदार्ढ्यरहितोऽसंयतात्मातत्सहितोवश्यात्मा उपाय
तःप्राप्तिंगोडाचार्यासदृष्टांतमाहुः उत्सेकउदधेर्यद्वत्कुशाग्रेणैकबिंदुना
मनसोनिग्रहस्तद्वद्भवेदपरिखेदतः बहुभिर्नविरोद्धव्यं एकेनापिबलीयसा
सपराभवमाप्नोतिसमुद्रइवटिट्टिभात् इत्यत्रसंप्रदायविदआख्यायिका ॐ
माचक्षते कस्यचित्किलपक्षिणोऽडानितीरस्थान्युदधिरुत्सेकेनापजहार ८७
तंचसमुद्रंशोषयामीतिप्रवृत्तः सचपक्षीस्वमुखाग्रेणैकैकंजलबिं
दुंप्रतिक्षिपति तदाबहुभिःपक्षिभिर्बंधुवर्गैर्वार्यमाणोप्यनुपरतः प्र

स्कंततानपिसहकारिणोवक्ने तांश्चपतनोत्पतनाभ्यांबहुधाच्छिन्द्यतः सर्वा
नवलोक्य कृपालुर्नारदो गरुडं समीपं प्रेषयामास ततो गरुडपक्षपातेन
क्षुभ्यन्समुद्रो भीतस्तान्यंडानि पक्षिणे ददौ एवमखेदेन मनोनिरोधपरमध
र्मे प्रवर्तमानं योगिनमीश्वरोनुगृह्णाति अखेदश्च मध्येतदनुकूलव्यापा
रमिश्रणेन संपद्यते यथौदनं भुंजानस्तद्ग्रासांतरे चोष्यलेह्यादीन्यास्वाद
यति तद्वत् इदमेवाभिप्रेत्य वसिष्ठ आह चित्तस्य भागद्वौ भोगैः शास्त्रेणैकं
प्रपूरयेत् गुरुशुश्रूषया भागं अव्युत्पन्नस्य संक्रमः किंचिद्व्युत्पत्तियुक्त
स्य भागं भोगैः प्रपूरयेत् गुरुशुश्रूषया जीवनं हेतुभिक्षाटनादिव्यापारे
वर्णाश्रमोचितव्यापारश्चोच्यते घटिकामात्रं मुहूर्तं वा यथाशक्ति योग

जी॰ मु॰ गुरुशुश्रूषया भोगो भागं शास्त्रार्थचिंतया व्युत्पत्तिमनुपानस्य पूरयेच्चेतसो
८८ न्वहं द्वौ भागौ शास्त्रवैराग्ये द्वौ ध्यानं गुरुपूजयेति भोगशब्देनात्र जीवनहे
तुभिक्षाटनादिव्यापारो वर्णाश्रमोचितव्यापारश्चोच्यते घटिकामात्रं मुहू
र्तं वा यथाशक्ति योगमभ्यस्य ततो मुहूर्तं शास्त्रश्रवणेन परिचर्यया वा गु
रूननुगम्य मुहूर्तं स्वदेहमनुसृत्य मुहूर्तं योगशास्त्रं पर्यालोच्य पुनर्मु
हूर्तं योगमभ्यसेत् एवं योगप्रधान्येन व्यापारांतराणि मेलयेत्तानि द्राकू
अभ्यस्य शयनकाले तद्दिनगतान् योगमुहूर्तान् गणयेत् ततः परेद्युर्वा राम
परपक्षे परमासे वा योगमुहूर्तान्वर्धयेत् तथा चैकैकस्मिन्मुहूर्ते एकै ८८
कक्षणयोगेपि संवत्सरमात्रेण भूयान् योगकालो भवति नचैवं योगेक

शारणत्वे व्यापारांतराणि लुप्येरन्निति शंकनीयं लुप्तेतरकृत्स्नव्यापारस्यै
व योगेऽधिकारात् अत एव विद्वत्संन्यासोऽपेक्ष्यते तस्मात्तदेकनिष्ठः पुमान
ध्येन वर्णादिवत् क्रमेण योगारूढो भवति यथाध्येता माणवकः पादं संपाद
मर्द्धर्चमृचमृग्द्वयं वर्गं च क्रमेण पठन् दशावर्षैरध्यापको भवति तथा च वा
णिज्यं कुर्वन् एकनिष्कद्विनिष्कादिक्रमेण लक्षपतिः कोऽपतिर्वा भवति त
था ताभ्यां वणिक् अध्येतृभ्यां सहैवोपक्रम्य मत्सरग्रस्त इव युंजानस्ताव
ता कालेन कुर्वन् योगमारोहेत् तस्मात्पुनः पुनः प्राप्यमाणान्संकल्पविक
ल्पानुद्दालकवत्पुरुषप्रयत्नेन परित्यज्याहंकर्तरि ज्ञानात्मनि मनो नियच्छे
छेत् तामेतां द्वितीयभूमिकां विजित्य बालभूमिकादिवन्निर्मनस्त्वसाभा

जी॰मु॰ ९९ विके सति ततो विशेषाहंकाररूपं विस्पष्टं ज्ञानात्मानमस्पृष्टे सामान्याहंकारे
महत्तत्त्वे नियच्छेत् यथा स्वल्पात्तंद्रां प्रासवतो विशेषाहंकारः स्वतएव संकु
चति विनैव तंद्रीं तथा विस्मरणे प्रयतमानस्याहंकारस्य संकोचो भवति
सेयं लोकप्रसिद्ध्या तंद्रा तार्किकाभिमतनिर्विकल्पकज्ञानेन च समाना
महत्तत्त्वमात्रपरिशेषावस्था तृतीया भूमिः अस्यां चाभ्यासपाटवेन वशीकृ
तायां तमते सामान्याहंकाररूपमहांतमात्मानं निरुपाधितया शांते चिदे
करसस्वभावे नियच्छेत् महत्तत्त्वं निरस्कृत्य चिन्मात्रं परिशेषयेत् अत्रापि राम
पूर्वोक्तविस्मृतिप्रयत्न एव ततोप्यतिशयेनोपायतामापद्यते यथा शा ९९
स्त्राभ्यासे प्रवृत्तस्य व्युत्पत्तेः प्राक्प्रतिग्रंथं व्याख्यानापेक्षायामपि व्यु

स्तन्नस्य स्वत एवोत्तरग्रंथार्थः प्रतिभाति तथा सम्यग्वशीकृतपूर्वभूमेः
योगिन उत्तरभूम्युपायः स्वत एव प्रतिभाति तदाह योगभाष्यकारः योगे
न योगो ज्ञातव्यो योगो योगात्प्रवर्तते योऽप्रमत्तस्तु योगेन स योगी रमते
चिरमिति ननु महत्तत्त्वशांतात्मनोर्मध्ये महत्तत्त्वोपादानमव्यक्ताख्यं त
त्त्वं श्रुत्योदाहृतं तत्र कुतो नियमनं नाभिधीयत इति चेन्न लयप्रसंगा
दिति ब्रूमः यथा घटोनुपादाने न निरुध्यमानो न लीयते न च स्वरूपल
यः पुरुषार्थः स्वात्मदर्शनानुपयोगात् दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया
सूक्ष्मदर्शिभिरिति पूर्ववाक्यमभिधाय सूक्ष्मत्वसिद्ध्ये निरोधस्यालय
स्य प्रतिदिनं स्फुष्टो स्वतः सिद्धत्वेन प्रयत्नवैयर्थ्याच्च ननु धारणाध्या

जी॰मु॰ नसमाधिसाध्यस्य संप्रज्ञातस्यैकाग्रवर्तिरूपत्वेन दर्शनहेतुत्वेपि शांता
९० त्मन्यवरुद्धस्यासंप्रज्ञातसमाधिमापन्नस्य चित्तस्य वृत्तिरहितत्वेन सुषु
प्तिवन्न दर्शनहेतुत्वमिति चेन्न स्वतःसिद्धस्य दर्शनस्य निवारयितुमश
क्यत्वात् अत एव श्रेयोमार्गेभिहितं आत्मानात्माकारं स्वभावतोवस्थितं
सदा चित्तं आत्मैकाकारतया तिरस्कृतानात्मदृष्टि विदधीतेति यथा घ
टोत्पद्यमानः स्वतो वियत्पूर्ण एवोत्पद्यते जलतंडुलादिपूरणं तूत्पन्ने घ राम
टे पश्चात्पुरुषप्रयत्नेन भवति तत्र जलादीनि सारितेपि न वियन्निःसार ९०
यितुं शक्यते मुखपिधानेपि अंतर्वियद्भवतिष्ठत एव तथा चित्तमुत्पद्य
मानमात्मचैतन्यपूर्णमेवोत्पद्यते उत्पन्ने चित्ते पश्चान्मूषानिषक्तद्रु

ततोऽन्यत्रदृष्टघटरूपरसस्फुरद्दुःखादिवृत्तिरूपत्वंभोगहेतुधर्माधर्मादि
वत्त्वाद्भवति तत्ररूपरसाद्यनात्माकारेणनिवारितेऽपिनिर्निमित्तश्चिदाकारो
ननिवारयितुंशक्यते ततोनिरोधसमाधिनानिर्वृत्तिकेनसंस्कारमात्रशे
षतयासूक्ष्मत्वेनचिदामात्राभिमुखत्वादेकाग्रेणचित्तेननिर्विघ्नमात्मा
नुभूयते अनेनैवाभिप्रायेणवार्तिककारसर्वानुभवयोगिनाबाहतुः घ
टदुःखादिरूपिलब्धियोधर्मादिहेतुतः निर्हेतुत्वात्मसंबोधरूपित्वस्फु
रत्ततः प्रशांतवृत्तिकंचित्तंपरमानंददायकं असंप्रज्ञातनामायंसमा
धिर्योगिनांप्रियइति आत्मदर्शनस्यस्वतःसिद्धत्वेऽप्यनात्मवारणाय
निरोधाभ्यासःअतएवोक्तं आत्मसंस्थंमनःकृत्वानकिंचिदपिचिंतये

जी॰मु॰ ८१ दिति योगशास्त्रस्य चित्तचिकित्सकसमाधिमात्रे प्रवृत्तत्वान्निरोधसमा
धावात्मदर्शनं न साक्षादुक्तं भंग्यंतरेणत्वभ्युपगम्यते योगश्चित्तवृत्तिनिरो
धइतिसूत्रयित्वा तदाद्रष्टुः स्वरूपेणवस्थानमिति सूत्रणात् यद्यपि निर्वि
कारो द्रष्टा सदा स्वरूप एवावतिष्ठते तथापि वृत्तिषूत्पद्यमानासु तत्तच्चि
च्छायायां तदाविवेकादस्वस्थ इव द्रष्टा भवति तदप्यनंतरसूत्रेणोक्तं वृत्ति
सारूप्यमितरत्रेति अन्यच्चापि सूत्रितं तत्वपुरुषयोरत्यंतासंकीर्ण ॐ
योः प्रत्ययाविशेषो भोगः परार्थत्वादिति चितेरप्रतिसंक्रमायास्तदा ८१
कारापत्तौ स्वबुद्धिसंवेदनमिति च निरोधसमाधिना शोधिते त्वंपदा
र्थे साक्षात्कृते पि तस्य ब्रह्मत्वं गोचरयितुं महावाक्येन ब्रह्मविद्याना

मकें स्ववृत्त्यंतरमुत्पद्यते नचशुद्धत्वंपदार्थसाक्षात्कारेनिरोधसमाधिरेक
एवोपायः किंतुचिज्जडविवेकेनापिपृथक्कृतेतत्साक्षात्कारसंभवात्
अतएववसिष्ठआह द्वौक्रमौचित्तनाशस्ययोगोज्ञानंचराघव योग
स्तद्वृत्तिरोधोहिज्ञानंसम्यगवेक्षणमिति असाध्यःकस्यचिद्योगःक
स्यचिज्ज्ञाननिश्चयः प्रकारौद्वौततोदेवोजगाद परमःशिवः इति ननु
विवेकोपियोगेपर्यवस्यति दर्शनवेलायांआत्ममात्रगोचरायाएका
ग्रवृत्तेःक्षणिकसंप्रज्ञातरूपत्वात् बाढं तथापिसंप्रज्ञातासंप्रज्ञात
योःस्वरूपतःसाधनतश्चास्त्येवमहद्वैलक्षण्यं वृत्त्यवृत्तिभ्यांस्फुटः
स्वरूपभेदः साधनंतुसंप्रज्ञातस्यसजातीयत्वाद्धारणादित्रयमंत्र

जी॰मु॰ रंगं असंप्रज्ञातस्य तु अवृत्तिकस्य विजातीयत्वाद्बहिरंगं तथा च सूत्रं तद
९२ पि बहिरंगं निर्वीजस्येति विजातीयस्यापि बहुविधानात्मवृत्तिनिवारणेनो
पकारितया बहिरंगत्वमविरुद्धं तदेवोपकारित्वं विज्ञादयितुं सूत्रयति श्र
द्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषामिति केषांचिद्देवादीनां पूर्व
सूत्रे जन्मनैव समाधिमुक्त्वा मनुष्याणामस्यैतदुच्यते ममायं योग एव प
रमपुरुषार्थस्य साधनमिति प्रत्ययः श्रद्धा सा चोत्कर्षश्रवणेनोपजाय ॐ ९२
स्म२ ते तदुत्कर्षः श्रूयते तपस्विभ्योधिको योगी ज्ञानिभ्योपि मतोधिकः
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुनेति उत्तमलोकसाधनत्वा
त् कृच्छ्रचान्द्रायणादितपसो ज्योतिष्टोमादिकर्मणो योगोधिकः ज्ञानं

प्रत्यंतरं गत्वाच्छिन्नविश्रांतिहेतुतया ज्ञानादप्यधिकत्वं एवं ज्ञानतो योगे श्रद्धा
जायते तस्यांच श्रद्धायां वासितायां वीर्यमुत्साहो भवति सर्वथा योगं संपाद
यिष्यामीति एतादृशेनोत्साहेन तदा तदनुष्ठेयानि योगांगानि स्मर्य्यंते त
याच स्मृत्या सम्यगनुष्ठित समाधेरध्यात्मप्रसादे सत्यृतंभरा प्रज्ञोदेति
तत्प्रज्ञापूर्वकः प्रज्ञाकारणको संप्रज्ञातसमाधिरितरेषां देवादिभ्यो वाची
नां मनुष्याणां सिद्ध्यति तां च प्रज्ञां सूत्रयति ऋतंभरा तत्र प्रज्ञेति ऋतं
सत्यं वस्तुयाथात्म्यं बिभर्ति प्रकाशयतीति ऋतंभरा तत्र तस्मिन्समाध्यु
त्कर्षजन्ये अध्यात्मप्रसादे सतीत्यर्थः ऋतंभरत्वोपपत्तिं सूत्रयति श्रु
तानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वादिति सूक्ष्मव्यवहितविप्रकृ

प्रथ ३

जी॰ मु॰ ष्मवस्तुषु अयोगीविप्रत्यक्षत्वेन प्रवर्तते आगमानुमानाभ्यां तानि वस्तूनि अ
९३ योगिभिर्ज्ञायंते तच्च शास्त्रानुमानजन्यं प्रज्ञावस्तुसामान्यमेव गोचरयतः
इदंतु योगिप्रत्यक्षं विशेषवस्तुगोचरत्वादृतंभरं तस्य योगिप्रत्यक्षस्यासं
प्रज्ञातसमाधेर्बहिरंगत्वसिद्ध्यर्थमुपकारित्वं सूत्रयति तज्जन्यः संस्का
रोन्यसंस्कारप्रतिबंधीति असंप्रज्ञातसमाधेर्बहिरंगसाधनमुक्त्वा तन्नि
रोधस्यांतरंगसाधनतां सूत्रयति तस्यापि निरोधे सर्वनिरोधान्निर्बीजः स ॐ
माधिरिति सोयं समाधिः सुषुप्तिसाधनः साक्षिचैतन्येनानुभवितुं शक्यः ९३
न चासौ सर्वधीवृत्तिराहित्यात्सुषुप्तिरेवेति शंकनीयं मनःस्वरूपसदस
त्त्वाभ्यां विशेषात् तदुक्तं गौडपादाचार्यैः निगृहीतस्य मनसो निर्विकल्प

स्य धीमतः प्रचारः स तु विज्ञेयः सुषुप्तेन्यो न तत्समः लीयते हि सुषुप्ते त
न्निगृहीतं न लीयते तदेव निर्भयं ब्रह्म ज्ञानालोकं समन्तत इति मांडूक्यशा
खायामपि श्रूयते द्वैतस्याग्रहणं तुल्यमुभयोः प्राज्ञतुर्ययोः बीजनिद्रायु
तः प्राज्ञः सा च तुर्ये न विद्यते स्वप्ननिद्रायुतावाद्यौ प्राज्ञस्त्वस्वप्ननिद्रया न
निद्रां नैव च स्वप्नं तुर्ये पश्यन्ति निश्चिताः अन्यथा गृह्णतः स्वप्नो निद्रा तत्त्वम
जानतः विपर्यासे तयोः क्षीणे तुरीयं पदमश्नुत इति आद्यौ विश्वतैजसौ
अद्वैतस्य वस्तुनोन्यथाग्रहणं द्वैतरूपेण प्रतिभासः स च विश्वतैजसयो
र्वर्तमानः स्वप्न उच्यते तत्त्वस्याज्ञानं निद्रा चासौ विश्वतैजसप्राज्ञेषु वर्त
ते तयोः स्वप्ननिद्रयोः स्वरूपभूतयोः विपर्यासो मिथ्याज्ञानं तस्मिन्निवृ

जी॰मु॰ याक्षीणेसतितुरीयपरमहंसत्वंवस्त्वश्नुते नन्वस्यैवसंप्रज्ञातसमाधिसुषु
६५ प्त्योर्महान्भेदः तत्रतत्वदिदृक्षोर्दर्शनसाधनत्वेनसमाध्यपेक्षायामपिदृष्ट
तत्वस्यजीवन्मुक्तस्यनास्तितदपेक्षा रागद्वेषादिक्लेशाबंधस्यसुषुप्त्यापि
निवृत्तेः मैवं किंप्रतिदिनंस्वतःप्राप्ताकादाचित्कीसुषुप्तिर्बंधनिवर्तिका
किंवाभ्यासेननिरंतरवर्तिनी आद्येपिकिंसुषुप्तिकालीनस्यक्लेशाबंधस्य
निवृत्तिः किंवाकालांतरवर्तिनोनाद्यः अप्रसक्तेर्नहिमूढानामपिसुषु राम ६४
प्तौक्लेशाबंधःप्रसज्येत नद्वितीयोऽसंभवात् नत्वन्यकालीनयासुषु
प्त्याकालांतरवर्तिनःक्लेशस्यक्षयःसंभवति अन्यथामूढानामपिजा
गरणस्वप्नयोःक्लेशस्यक्षयःप्रसज्येत नापिसुषुप्तेर्नैरंतर्येणअभ्य

सितुत्राक्यं तस्याःकर्मक्षयनिवृत्तत्वात् तस्मात्तत्वविदोपि क्लेशक्षयायायास्ते
वासंप्रज्ञातसमाध्यपेक्षा तस्यच समाधेर्गवाश्वादिष्विव वाद्विरोधः प्रथमा
भूमिः बालकादिष्विव निर्मनस्त्वं द्वितीया तंद्राग्निवाहंकारराहित्यं तृतीया
सुषुप्ताविव महत्तत्वराहित्यं चतुर्थी तदेतद्भूमिचतुष्टयमभिप्रेत्य ज्ञानैः ज्ञाने
रुपरमेदित्युक्तं अत्र चोपरमे धृतिगृहीता बुद्धिः साधनं महदहंकारमनो
वागादीनां स्वत एव तीव्रवेगेन बहिःप्रवहतां कूलंकषाया इव नद्या निरोध
धैर्यमहदपेक्षितं बुद्धिर्विवेकः पूर्वभूमिर्जितानवेति परीक्ष्य जिताया मु
त्तरभूम्युपक्रमः अजितायां तु सैव पुनरभ्यसनीयेति तदा तदा विविच्या
त् आत्मसंस्थमित्यादिना सार्द्धश्लोकेन चतुर्थभूम्यभ्यासोपि स्मृतः

गौ॰मु॰ गौडपादाचार्या आहुः उपायेननिगृह्णीयात्विक्षिप्तंकामभोगयोः सुप्र
६५ सन्नंलयेचैवयथाकामोलयस्तथा दुःखंसर्वमनुस्मृत्यकामभोगान्निव
र्तयेत् अजंसर्वमनुस्मृत्यजातंनैवतुपश्यति लयेसंबोधयेच्चित्तंविक्षिप्तं
शमयेत्पुनः सकषायंविजानीयात्समप्राप्तंनचालयेत् नास्वादयेत्सु
खंतत्रनिःसंगःप्रज्ञयाभवेत् निश्चरंनिश्चलंचित्तमेकीकुर्यात्प्रयत्नतः य
दानलीयतेचित्तंनचविक्षिप्यतेपुनः अनिंगनमनाभासंनिष्पन्नंब्रह्मतत्त राम
देति लयविक्षेपकषायसमप्राप्तयश्चतस्रश्चित्तस्यावस्थाः तत्रनि ६९
रुध्यमानंचित्तंविषयेभ्योव्यावृत्तंपूर्वाभ्यासवशाद्यदिलयायसुषु
प्तयेअभिमुखंभवेत् तदानीमुत्थापनयत्नेनास्यकारणानिवारणे

न वा तच्चित्तं सम्यक् प्रबोधयेत् लयहेतवो निद्राशेषाजीर्णबह्वशनश्रमाः
अतएव आहुः समाप्य निद्रां सुजीर्णोल्पभोजी श्रमत्याज्यबाधे विविक्ते प्रदे
शे सदासीत निस्तृष्ण एव प्रयत्नोथवा प्राणरोधो निजाभ्यासमार्गादिति ल
यादुत्थापितं चित्तं दिने दिने प्रबोधाभ्यासवशात् यदि कामभोगयोर्विक्षिप्ये
त तदा विवेकिजनप्रसिद्धभोग्यवस्तुगतसर्वदुःखानुस्मरणेन शास्त्रप्रसि
द्धजन्मादिरहिताद्वितीयब्रह्मतत्त्वानुस्मरणपूर्वकेन भोग्यवस्त्वदर्शनेन
च पुनः पुनर्विक्षेपाच्चित्तं शामयेत् कषायस्तीव्रं चित्तदोषस्तीव्ररागद्वेषा
दिवासनाग्रस्तं चित्तं कदाचित्समाहितमिव लयविक्षेपरहितं दुःखैका
ग्रमवतिष्ठते तादृशं तच्चित्तं विजानीयात् समाहितचित्तात्स्थ्यकृतेनास

जी॰मु॰ माहितंचित्तंविवेकेनावगच्छेत् असमाहितमेतदित्यवगम्यलयविक्षेपवत्क
६६ षायस्यप्रतीकारंकुर्यात् समशब्देनब्रह्माभिधीयते समंसर्वेषुभूतेषुतिष्ठंतं
परमेश्वरमितिस्मृतेः लयविक्षेपकषायेषुपरिहृतेषुपरिशेषाच्चित्तेनसमं
ब्रह्मप्राप्यते तच्चसमप्राप्तंचित्तंकषायलयभ्रांत्यानचालयेत् सूक्ष्मयाबु
द्ध्यालयकषायप्राप्तौविविच्यात्तस्यांसमप्राप्तावतिप्रयत्नेनचित्तंस्था
पयेत् स्थापितेतस्मिन्ब्रह्मस्वरूपभूतःपरमानंदःसम्यगाविर्भवति त
थाचोदाहृतं सुखमात्यंतिकंयत्तद्बुद्धिग्राह्यमतींद्रियमिति श्रुतिश्च ६६
भवति समाधिनिर्धूतमलस्यचेतसोनिवेशितस्यात्मनियत्सुखंभवेत्
नशक्यतेवर्णयितुंगिरातदास्वयंतदंतःकरणेनगृह्यतइति ननुसमा

ध्याभिभूतस्यास्यानंदस्य बुद्धिग्राह्यत्वं श्रुतिस्मृतिभ्यामभिहितं आचार्यै
श्च नास्वादयेत्सुखं तत्रेति बुद्धिग्राह्यत्वं प्रतिषिध्यते नायं दोषः तत्र निरोध
सुखं बुद्धिग्राह्यं न प्रतिषिध्यते किंतु समाधिविरोधिनो व्युत्थानरूपस्य परा
मर्शस्यैव प्रतिषेधात् यथा निदाघदिवसेषु जान्हवीह्रदनिमग्नेनानुभूयमा
नमपि शैत्यसुखं तदा वक्तुमशक्यं पश्चादुन्मग्नेनाभिधीयते यथा वा सुषु
प्तावविद्यावृत्तिभिः सूक्ष्माभिरनुभूयमानमपि स्वरूपसुखं तदानीं सवि
कल्पकेनांतःकरणवृत्तिज्ञानेन गृहीतुमशक्यं प्रबोधकाले तु स्मृत्या वि
स्पष्टं परामृश्यते तथा समाधौ वृत्तिरहितेन संस्कारमात्रशेषतया सू
क्ष्मेण वा चित्तेन सुखानुभवः श्रुतिस्मृत्योर्विवक्षितः महदिदं समाधिसु

जी॰मु॰ खमनन्वभूवमित्येतादृशोव्युत्थितस्यसविकल्पःपरामर्शोत्रास्वादनं तदेवाचा
८७ र्यैःप्रतिषिध्यते तमेवस्याभिप्रायंप्रकटयितुंनिःसंगःप्रज्ञयाभवेदित्युक्तं
प्रकृष्टंसविकल्पकंज्ञानंप्रज्ञातयासहसंगंपरित्यजेत् यद्वापूर्वोक्ताधृतिगृ
हीताबुद्धिःप्रज्ञातदात्मकेनसाधनेनसुखास्वादनेनतृष्णादिरूपामास
क्तिंवर्जयेत् समाधौब्रह्मानंदेनिमग्नंचित्तंयदिकदाचित्सुखास्वादनाय
बाह्यांतवातमशकाद्युपद्रवेणनिश्चरेत् तदानिश्चरंतच्चित्तंपुनर्निश्चलं
यथाभवतितथापरब्रह्मणासहैकीकुर्यात् तत्रचनिरोधप्रयत्नएवसा ८७
धनं एकीभावएवयदानलीयतइत्यनेनस्पष्टीक्रियते अनिंगनमना
भासमित्याभ्यांपदाभ्यांकषायसुखास्वादौप्रतिषिध्येते लयविक्षेपक

धायस्कस्वास्थ्यादेभ्यो रहितं चित्तमविघ्नेन ब्रह्मण्यवस्थितं भवति एतदेवाभि
प्रेत्य कठवल्लीषूपरूप्यते यदा पंचावतिष्ठंते ज्ञानानि मनसा सह बुद्धिश्च न वि
चेष्टते तामाहुः परमां गतिं तां योग इति मन्यंते स्थिरामिंद्रियधारणां अप्रम
त्तस्तदा भवति योगो हि प्रभवाप्ययाविति उपेक्षितो योग इंद्रियवृत्तीनां प्रभवं
करोति अनुष्ठितस्तु तासां लयहेतुः अत एव योगस्य स्वरूपलक्षणं सूत्रय
ति योगश्चित्तवृत्तिनिरोध इति वृत्तीनामानंत्यान्निरोधाशक्य इति शंकां वा
रयितुमियत्तां सूत्रयति वृत्तयः पंच तत्र क्लिष्टा अक्लिष्टा इति रागद्वेषादिक्ले
शरूपा आसुरवृत्तयः क्लिष्टाः रागादिरहिता दैवीवृत्तयो ऽक्लिष्टाः यद्यपि पं
चस्वेव क्लिष्टानामक्लिष्टानामपि अंतर्भावस्तथापि क्लिष्टा एव निरोधव्या इ

जी॰ मु॰ तिमंदबुद्धिं वारयितुं ताभिः सहाक्लिष्टाउदाहृताः नामधेयलक्षणाभ्यां वृत्तिं वि
५८ शदयितुं सूत्रषट्कमाह प्रमाणविपर्ययविकल्पनिद्रास्मृतयः प्रत्यक्षानुमा
नागमाः प्रमाणानि विपर्ययोमिथ्याज्ञानमतद्रूपप्रतिष्ठितं शब्दज्ञानानुपा
तीवस्तुशून्योविकल्पः अभावप्रत्ययालंबनावृत्तिर्निद्रा अनुभूतविषयस्या
संप्रमोषः स्मृतिरिति वस्त्वभावः प्रतीयते यस्मिन् तमस्यावरके सति तत्तमो
भावप्रत्ययस्तमोगुणं विषयं कुर्वती वृत्तिर्निद्रेत्युच्यते अनुभूतविषयस्या ॐ
संप्रमोषस्तदनुभवजन्यमनुसंधानं पंचविधवृत्तिनिरोधसाधनं सूत्रे ५८
पठति अभ्यासवैराग्याभ्यां तन्निरोध इति यथा तीव्रवेगोपेतं नदीप्रवाहं
सेतुबंधनेन निवार्य कुल्याप्रणयनेन क्षेत्राभिमुखं तिर्यक्प्रवाहांतरमु

त्पाद्यते वैराग्येणचित्तनद्याविषयप्रवाहं निवार्य्य समाध्यभ्यासेन प्रशांतःप्र
वाहः संपाद्यते मंत्रजपदेवताध्यानादीनांक्रियारूपत्वेनावृत्तिलक्षणोभ्या
सः संभाव्यते सर्वव्यापारोपरमरूपस्यसमाधेः कोनामाभ्यास इत्याशंकांवा
रयितुंसूत्रयति तत्रस्थितौप्रयत्नोभ्यास इति स्थितिर्नैश्चल्यंनिरोधः यत्नोमा
नसउत्साहः स्वतएवबहिःप्रवाहशीलंचित्तं सर्व[illegible]निरोधयामीति एवंवि
धउत्साहः आवर्त्यमानोभ्यास इत्युच्यते अयमभ्यास इदानींप्रवृत्तः स्वय
मदृढः सन् अनादिप्रवृत्तायाः व्युत्थानवासनायाः कथमभिभवेदित्याशं
कामपवदितुंसूत्रयति सतुदीर्घकालनैरंतर्य्यसत्कारासेवितोदृढ
भूमिरिति लोकाहिमूढस्यवचनंउदाहरंति विद्यमानश्चत्वारएववेदा

जी॰मु॰ स्तानध्येतुंगतस्यमाणवकस्यपंचदिवसाअतीताअद्याप्यसौनागतइति
९९ नादृशाएवायंयोगीतदास्याद्यद्दिवसेवामासेवायोगसिद्धिंवांछेत् तस्मा
त्संवत्सरैर्जन्मभिर्वादीर्घकालंयोगआसेवितव्यः तथाचस्मर्यते अनेकज
नो॰ न्मसंसिद्धस्ततोयातिपरांगतिमिति चिरमासेव्यमानोपिविच्छिद्यविच्छिद्य
द्यासेव्यमानस्तदुत्पद्यमानानांयोगसंस्काराणांसमनंतरभाविभिर्विच्छेद
कालीनैर्व्युत्थानसंस्कारैरभिभवेसतिखंजनकारोक्तन्यायआपतेत् अ ॐ
थावश्यंव्याक्षुभ्यमानोविस्मरणशीलः श्रुतवान्किमालंबेतेति तस्मा ९९
न्निरंतरमासेवितव्यः सत्कारआदरः अनादरेणसेव्यमानेवसिष्ठोक्त
न्यायआपतेत् अनेनकुर्वदप्येतच्चेतश्चेत्क्षीणवासनं दूरंगतमनाजं

तुः कथासंश्रवणे यथेति अनादरेलयविक्षेपकषायसुखास्वा
दनानां अपरिहारस्तस्मादादरेण सेवितव्यः दीर्घकालादित्रैविध्येनासे
वितस्य समाधेर्दृढभूमित्वं नाम विषयसुखवासनया दुःखवासनया वा
चालयितुमशक्यत्वं तच्च भगवता दर्शितं यं लब्ध्वा चापरं लाभं मन्यते
नाधिकं ततः यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यत इति अपर
लाभस्यानाधिक्यं च वृत्तान्ते वशिष्ठ उदाजहार कचः कदाचिदुत्थाय
समाधेः प्रीतमानसः एकान्ते समुवाचेदमेको गद्गदया गिरा किं करो
मि क्व गच्छामि किं गृह्णामि त्यजामि किं आत्मना पूरितं विश्वं महाकल्पां
बुना यथा सबाह्याभ्यन्तरे देहे अध ऊर्ध्वं च दिक्षु च इत आत्मा न तथेहा

५

जी॰ मु॰ त्मानात्मनात्ममयं जगत् न तदस्ति यदत्राहं न तदस्ति न यन्मयि कि
१०० मन्यदभिवांछामि सर्वं संविन्मयं ततं स्फारब्रह्मामलांभोधौ फेनाः सर्वे
कुलाचलाः चिदादित्यमहातेजोमृगतृष्णा जगच्छ्रियः इति गुरुदुःखेना
प्यविचाल्यतच्छिखिध्वजस्य वत्सरत्रयसमाधिवृत्तांतेन उदाजहार
निर्विकल्पसमाधिस्थं तत्रापश्यन्महीपतिं राजानं तावदेतस्माद्बोध
यामि परात्पदात् इति संचिंत्य चूडाला सिंहनादं चकार सा भूयो भू
यः प्रभो ग्रे वनेचरभयप्रदं न चचाल तदा राम यदा नादेन तेन सः ॐ १००
भूयो भूयः कृतेनापि न तदा सा तं व्यचालयत् चालितः पातितो प्ये
ष तदा नो बुबुधे बुध इति प्रल्हादवृत्तांतेनाप्येतदेवोदाजहार

इति संचिंतयन्नेव प्रल्हादः परवीरहा निर्विकल्पपरानंदसमाधिंसमुदा
श्रयौ निर्विकल्पसमाधिस्थः चित्रार्पित इवाबभौ पंचवर्षसहस्राणि पीनां
सोतिष्ठदेकदृक् महात्मन्संप्रबुद्धस्तस्य वं विष्णुरुदाहरत् पांचजन्यं प्र
दध्मौ च ध्वनयन्ककुभांगणं महतानेनशब्देन वैष्णवप्राणजन्मना ब
भूव संप्रबुद्धात्मा दानवेशः शनैःशनैरिति एवं वीतहव्यादीनामपि स
माधिरुदाहरणीयः वैराग्यं द्विविधं अपरं परं चेति यतमानव्यतिरेकैकें
द्रियवशीकारभेदैरपरं चतुर्विधं तत्राद्यंत्रयं अर्थात्सूत्रयन्साक्षा
च्चतुर्थं सूत्रयति दृष्टानुश्राविकविषयवितृष्णस्य वशीकारसंज्ञा
वैराग्यमिति स्रक्चंदनवनितापुत्रमित्रक्षेत्रधनादयो दृष्टाः वेदोक्ताः

जी०मु० स्वर्गादय आनुश्रविकाः तत्रोभयत्र सत्यामपि तृष्णायांविवेकतारत
१०१ म्येन यतमानादिवैराग्यत्रयंभवति अस्मिन् जगतिकिंसारंकिमसारमि
तिगुरुशास्त्राभ्यांज्ञास्यामीत्युद्योगोयतमानत्वं स्वचित्ते पूर्वंविद्यमान
दोषाणांमध्येअभ्यस्यमानेनविवेकेनएतावंतःपक्वाएतावंतोऽवशि
ष्टाइतिविवेचनंव्यतिरेकः दृष्टानुश्रविकविषयप्रवृत्तेःदुःखात्मत्वबो राम
धेनतांप्रवृत्तिंपरित्यज्यमनसऔत्सुक्यमात्रेणतृष्णावस्थापनं ए १०१
केंद्रियत्वंवितृष्णत्ववशीकारः तदिदमपरंवैराग्यमष्टांगयोगप्रव
र्तकत्वेनसंप्रज्ञातस्यांतरंगं तस्यांतरंगंपरवैराग्यंसूत्रयति तत्प
रंपुरुषख्यातेर्गुणवैतृष्ण्यमिति संप्रज्ञातसमाधिपाटवेनगुणत्र

घात्मकात्प्रधानाद्विविक्तस्य पुरुषस्य ख्यातिः साक्षात्कार उपपद्यते त
स्माच्च साक्षात्काराद्दोषगुणात्मव्यवहारे वैतृष्ण्यं यत्तत्परं वैराग्यं त
स्य तारतम्येन समाधेः शीघ्रत्वतारतम्यं सूत्रयति तीव्रसंवेगानामास
न्नः समाधिलाभ इति संवेगो वैराग्यं तद्वदो योगिनस्त्रिविधाः मृदुसं
वेगाः मध्यमसंवेगाः तीव्रसंवेगाश्चेति आसन्नोऽल्पेनैव कालेन समा
धिर्लभ्यत इत्यर्थः तीव्रसंवेगेष्वेव समाधितारतम्यं सूत्रयति मृ
दुमध्याधिमात्रत्वात्ततोपि विशेष इति मृदुतीव्रो मध्यतीव्रो
धिमात्रतीव्र इति तेषूत्तरोत्तरस्य त्वरया सिद्धिर्द्रष्टव्या
उत्तमोत्तमाजनकप्रह्लादादयोधिमात्रतीव्राः मुहूर्तमात्र

जी॰मु॰ विचारेणैव दृढभूमावसंप्रज्ञातसमाधौ लब्धे सति पुनर्व्युत्थानमश
१०२ क्यं सन्मनो न नश्यति मनोनाशे न वासनाक्षये रक्षिते सति जीवन्मुक्तिः
प्रतिष्ठा भवति न च मनोनाशो विदेहमुक्तिरेव न तु जीवन्मुक्त इति शंकनी
यं प्रश्नोत्तराभ्यां तन्निर्णयात् श्रीरामः विवेकाभ्युदयाच्चित्तस्वरूपेंत
र्हिते मुने मैत्र्यादयो गुणाः कुत्र जायंते योगिनां वर । वशिष्ठः द्विविधश्चि
त्तनाशोस्ति सरूपोरूप एव च । जीवन्मुक्तो सरूपः स्यादरूपो देहमुक्ति राम १०२
दः प्राकृतंगुणसंभारं ममेति बहु मन्यते सुखदुःखाद्यवष्टब्धं विद्य
मानं मनो विदुः चेतसः कथिता सत्ता मया रघुकुलोद्वह अस्य
नाशमिदानीं त्वं शृणु प्रश्नविदां वर । सुखदुःखदशा धीरं साम्या

न्मोद्दुरंति यं निश्वासाइव चैलेंद्रं चिंतेन तस्य मननं विदुः चित्तमात्राभिधा
नं हि यदानंत्यतिराघव मैत्र्यादिभिर्गुणैर्युक्तं तदा सत्वमुरेत्यलं आपत्का
र्पण्यमुत्साहो मदो माद्यं महोत्सवः यं नयंति न वैराग्यं तस्य नष्टं मनो वि
दुः भूयोजन्मविनिर्मुक्तं जीवन्मुक्तस्य तन्मयः सरूपोसौ मनोनाशो जी
वन्मुक्तस्य विद्यते अरूपस्तु मनोनाशो यो मयोक्तो रघूद्वह विदेहमुक्ता
वेवासौ विद्यते निष्कलात्मकः समग्राग्र्यगुणाधारमपि सत्वं प्रलीयते
विदेहमुक्तावमले पदे परमपावने संशांतदुःखमजडात्मकमेकरू
पमानंदमंथरमपेतरजस्तमो यत् आकाशकोशतनवोऽतनवा म
हांतः तस्मिन्पदे गलितचित्तलवाव संतीति तस्मात्सरूपो मनोनाशो

जी॰मु॰ जीवन्मुक्तिसाधनमितिस्थितं॥ ॥इतिश्रीजीवन्मुक्तिसाधनमनोनाशप्र
१०३ करणं केयंजीवन्मुक्तिः किंवातत्रप्रमाणं कथंवातत्सिद्धिरिति एतस्यप्र
श्नत्रयस्योत्तरंनिरूपितं सिद्धायांवाकिंप्रयोजनमित्यस्यचतुर्थप्रश्नस्योत्तरं
इदानीमभिधीयते ज्ञानरक्षातपोविसंवादाभावदुःखनाशसुखाविर्भा
वाः पंचप्रयोजनानि ननुप्रमाणोत्पन्नस्यतत्वज्ञानस्यकोनामबाधप्र
संगोयेनरक्षापेक्षेतिचेदुच्यते चित्तविश्रांत्यभावेसंशयविपर्ययोःप्र राम
सज्यमानतो तथाहि तत्वविदोराघवस्यविश्रांतेःपूर्वंसंशयंविश्वामि १०३
त्रउदाजहार नराघवत्वयास्त्यन्यद्धिज्ञेयंज्ञानवतांवर स्वयैवसूक्ष्मया
बुद्ध्यासर्वंविज्ञातवानसि भगवद्व्याससुतस्यशुकस्येवमतिस्तव

विश्रांतमात्रमेवात्रज्ञातज्ञेयाप्यपेक्षते इति शुकस्त्वयमेवादौतत्वं
विदित्वातत्रसंशयानः पितरंद्रष्टुं पित्रातथैवानुशिष्टः तत्रापिसंशया
नोजनकमुपससाद तेनापितथैवानुशिष्टस्तंप्रत्येवमुवाच श्रीशुकः
स्वयमेवसमापूर्वमेवज्ञातंविवेकतः एतदेवच पृष्टेनपित्रामेसमुदाहृ
तं भवताप्येषएवार्थोकथितोवाग्विदांवर एषएवचवाक्यार्थःशास्त्रे
षुपरिदृश्यते यथायंस्वविकल्पोत्थः स्वविकल्पपरिक्षयात् जनकः
नातःपरतरंकिंचिन्निश्चयोस्तिपरोमुने स्वयमेवत्वयाज्ञातं ५ क्षीय
तेदग्धसंसारोस्यसारइतिनिश्चयः तत्किमेतन्महाबाहोसत्यंब्रूहिमे
माचलं ततोविश्राममाप्नोतिचेतसाभ्रमताजगत् ५ गुरुतश्चपुनःश्रुतं

जी॰मु॰ अस्युच्छिन्नचिदात्मैकः पुमानस्तीह नेतरत् स्वसंकल्पवशाद्बद्धो निःसंक
१०४ ल्पश्च मुच्यते तेन त्वया स्फुटं ज्ञातं ज्ञेयं यस्य महात्मनः भोगेभ्यो विरतिर्जा
ता दृश्याद्वा सकलादिह प्राप्तं प्राप्तव्यमखिलं भवता पूर्णचेतसा न दृश्ये
पतसि ब्रह्मन्मुक्तस्त्वं भ्रांतिमुत्सृज अनुशिष्टः स इत्येवं जनकेन महात्म
ना विशश्राम शुकस्तूष्णीं स्वस्थे परमवस्तुनि वीतशोकभयायासो निरी
हश्छिन्नसंशयः जगाम शिखरं मेरोः समाध्यर्थमनिंदितं तत्र वर्षसह ॐ
स्राणि निर्विकल्पसमाधिना दशास्थित्वा शशामासावात्मन्यस्नेहदी १०४
पवदिति तस्माद्विदितेपि तत्त्वे विश्रांतिरहितस्य शुकराघवयोरिव संशय
उत्पद्यते स चाज्ञानमिव मोक्षस्य प्रतिबंधकः अत एव भगवतोक्तं

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति नायं लोकोऽस्ति न परो न सुखं सं
शयात्मनः इति अश्रद्धाविपर्ययः स चानन्तरत्रोदाहरिष्यते अज्ञानविपर्य
यो मोक्षमात्रविरोधिनो संशयस्तु भोगमोक्षयोरुभयोरपि विरोधी तस्य
परस्परविरुद्धकोटिद्वयावलंबित्वात् यदा संसारसुखाय प्रवृत्तिस्तदा
मोक्षमार्गबुद्धिस्तां विरुणद्धि यदा मोक्षाय प्रवृत्तिस्तदा संसारबुद्धिस्तां
प्रतिबध्नाति तस्मात्संशयात्मनो न किंचित्सुखमस्तीति मुमुक्षुणा स
र्वथा संशयश्छेत्तव्यः अत एव श्रूयते छिद्यंते सर्वसंशया इति विपर्यय
स्यापि निदाघ उदाहरणं ऋभुः परमकरुणया निदाघस्य गृहमेत्य ब
हुधा बोधयित्वा निर्जगाम बुद्धेऽपि तदुपदिष्टवस्तुनि अश्रद्दधानो निदाघः

गी॰ मु॰
१०५

कर्मापि परमपुरुषार्थहेतुरिति विपर्ययं प्राप्य कर्मानुष्ठानेन यथापूर्वं प्रवृत्ते
शिष्यस्य परमपुरुषार्थभ्रंशो मा भूदिति कृपया गुरुः पुनरागत्य बोधया
मास तदापि विपर्ययं न जहौ तृतीयेन तु बोधनेन विपर्ययं परित्यज्य विश्रां
तिमलभत् संशयविपर्ययाभ्यामसंभावनाविपरीतभावनारूपाभ्यां त
त्त्वज्ञानस्य फलं प्रतिबध्यते तदुक्तं पराशरेण मणिमंत्रौषधैर्वह्निः स्फ
दीप्तोपि यथेंधनः प्रदग्धुं नैव शक्तः स्यात्प्रतिबंधस्तु कल्मषं भावनावि
परीता या या चासंभावना स्फुटं कुरुते प्रतिबंधं सा तत्त्वज्ञानस्य नाप
रमिति तस्मादविश्रांतचित्तस्य संशयविपर्ययप्रसंगेन तत्त्वज्ञान
स्य फलप्रतिबंधलक्षणात् बाधाद्रक्षापेक्ष्यते विश्रांतचित्तस्य तु म

ॐ
१०५

नोनात्रोन यदाजगदेवविलीयते तदा संज्ञायविपर्ययोः कः स संगः जगत्प्रति
भासरहितब्रह्मविदो देहव्यवहारो विनैवप्रयत्नं परमेश्वरप्रेरितेन प्राणवा
युनानिष्पद्यते अतएवच्छंदोगा आमनंति नोपजनंस्मरन्निदंशरीरंस यथा
प्रायोज्य आचरणेयुक्त एवमेवायमस्मिंच्छरीर प्राणोयुक्त इति उपजनं
जनानांसमीपवर्तमानमिदंस्वशरीरंनस्मरन् ब्रह्मविद्वर्तते पार्श्वस्थज
ना एवतत्त्वविदःशरीरंप्रतियंति स्वयंतुनिर्मनस्कत्वान्मदीयमिदंशरीर
मितिनस्मरतियोग्यःरथशाकटादिवहनेप्रयोक्तुमर्हःशिक्षितोश्वबलि
वर्दादिःसयथासारथिनामार्गस्याचरणेप्रेरितःपुनःपुनःसारथिप्रय
त्नमनवेक्ष्यस्वयमेवरथशाकटादिकंपुरोवर्तिग्राममंनयति एवमेवायं

जी॰मु॰ १०६ प्राणवायुः परमेश्वरेणास्मिन् शरीरे नियुक्तः सत्यसति वा जीवप्रयत्ने व्यव
हारं निर्वहति भागवतेपि स्मर्यते देहं विनश्वरमवस्थितमुत्थितं वा सिद्धो
न पश्यति यतोध्यगमत्स्वरूपं दैवादुपेतमथ दैववशादपेतं वासो यथा प
रिकृतं मदिरामदांध इति वसिष्ठोप्याह पार्श्वस्थबोधिताः संतः पूर्वाचारक्र
मागतं आचारमाचरंत्येव सप्तबुद्धवदस्थिता इति सिद्धो न पश्यति आचा
रमाचरंत्युभयोः परस्परविरोध इति चेन्न विश्रांतितारतम्येन व्यवस्थोप
पत्तेः तदेतत्तारतम्यमभिप्रेत्य श्रूयते आत्मक्रीड आत्मरतिः क्रियावाने १०६
ष ब्रह्मविदां वरिष्ठ इति अत्र चत्वारः प्रतीयंते ब्रह्मवित्प्रथमः ब्रह्मवि
द्वरो द्वितीयः वरीयांस्तृतीयः वरिष्ठश्चतुर्थः तएते सप्तसु योगभूमिषु

चतुर्थीयोगमारभ्यक्रमेणभूमिचतुष्टयंप्राप्ताएवेत्यवगंतव्यं भूमयश्चवसि
ष्ठेनदर्शिताः ज्ञानभूमिःशुभेछास्यात्प्रथमासमुदाहृता विचारणाद्वितीया
स्यात्तृतीयातनुमानसी १ सत्वापत्तिश्चतुर्थीस्यात्ततोसंसक्तिनामिका प
दार्थाभाविनीषष्ठीसप्तमीतुर्यगास्मृताइति २ स्थितःकिंमूढएवास्मिप्रेक्ष्ये
हंशास्त्रसज्जनैः वैराग्यपूर्वमिछेतिशुभेछेत्युच्यतेबुधैः ३ शास्त्रसज्ज
नसंपर्कवैराग्याभ्यासपूर्वकं सद्विचारप्रवृत्तिर्याप्रोच्यतेसाविचारणा ४
विचारणाशुभेछाभ्यांइंद्रियार्थेष्वसक्तता यत्रसातनुताभेतिप्रोच्यतेत
नुमानसी ५ भूमिकात्रितयाभ्यासाच्चित्तेर्थविरतेर्वशात् सत्वात्मनि
स्थितेशुद्धे सत्वापत्तिरुदाहृता ६ दशाचतुष्टयाभ्यासादसंसर्गफला

जी॰ मु॰ १०७ तुया रूढसत्वचमत्कारा प्रोक्ता संपत्तिनामिका ७ भूमिकापंचकाभ्यासा
त्स्वात्मारामतया भृशं आभ्यंतराणां बाह्यानां पदार्थानामभावनात् ८
परप्रयुक्तेन चिरं परप्रयत्नेनाववोधनं पदार्थाभाविनी नाम षष्ठी भवति भू
मिका ९ भूमिषट्कचिराभ्यासाद्भेदस्यानुपलंभनात् यत्स्वभावैकनिष्ठत्वं
सा ज्ञेया तुर्यगा गतिरिति १० अत्र भूमिकात्रितयं ब्रह्मविद्यायाः साधन
मेव न तु विद्याकोटावंतर्भवति भेदसत्यत्वबुद्धेरनिवारितत्वात् अत ए राम १०७
वैतज्जागरणमित्यपदिश्यते तदुक्तं भूमिकात्रितयं त्वेतद्राम जा
ग्रदिति स्थितं यथावद्भेदबुद्ध्येदं जगज्जाग्रति दृश्यते इति चतुर्थभू
मौ सर्वजगदुपादानस्य ब्रह्मणो वास्तवमद्वितीयसत्तास्वभावं नि

ष्ठितस्य ब्रह्मण्यारोपितयोर्जगच्छब्दाभिधेययोर्नामरूपयोर्मिथ्यात्वमव
गच्छति मुमुक्षोः पूर्वोक्तं जागरणमपेक्ष्यायं भूमिः स्वप्नः अद्वैते स्थैर्यमाया
ते द्वैते च प्रशमं गते पश्यंति स्वप्नवल्लोकं चतुर्थीं भूमिकामिता विच्छिन्न
शरदभ्रांशवल्लोकं प्रविलीयते स्वस्वेतरं च सन्मात्रे यत्नबोधादुपास
ते योगिनः सर्वभूतेषु सद्रूपं नोऽमितं हरिं सत्तावशेष एवास्ते चतुर्थीं भू
मिकामिति सोयं चतुर्थीं भूमिं प्राप्तो योगी ब्रह्मविदित्युच्यते पंचम्या
दयस्तिस्रो भूमयो जीवन्मुक्तेरवांतरभेदाः तेच निर्विकल्पसमाध्यभ्या
सबलेन विश्रांतितारतम्येन संपद्यंते पंचमभूमौ निर्विकल्पकात्स
माधेस्तदा तदा स्वयमेव व्युत्तिष्ठते सोयं योगी ब्रह्मविद्वरः षष्ठभूमौ

जी॰मु॰ पार्श्वस्थैर्बोधितोव्युत्तिष्ठते सोयंब्रह्मविद्वरीयान् तदेतद्भूमिद्वयंसुषुप्तिर्गा
१०८ ढसुषुप्तिरभिधीयते तदाह पंचमीभूमिकामेत्यसुषुप्तिपदनामिकां
शांताशेषविशेषांशास्तिष्ठत्यद्वैतमात्रके अंतर्मुखतयानित्यंबहिर्वृत्ति
परोपिसन् परिश्रांततयानित्यंनिद्रालुरिवलक्ष्यते कुर्वन्नभ्यासमेत
स्यांभूमिकायांविवासनः षष्ठींगाढसुषुप्त्याख्यांक्रमात्पततिभूमि
कां यत्रनासन्नसद्रूपोनाहंनाप्यनहंकृतिः केवलंक्षीणमननआ ॐ
स्तेद्वैतैक्यनिर्गतः अद्वैतंकेचिदिच्छंतिद्वैतमिच्छंतिकेचन समंब्रह्म १०८
नजानंतिद्वैताद्वैतविवर्जितं अंतःशून्योबहिःशून्यःशून्यकुंभइवांब
रे अंतःपूर्णोबहिःपूर्णःपूर्णकुंभइवार्णवे गाढंनिर्विकल्पसमाधिप्रा

तस्य संस्कारमात्रशेषस्य चित्तस्य मनोराज्यं कर्तुं बाह्यपदार्थान् ग्रहीतुं
वासामर्थ्याभावादाकाशावस्थितकुंभवदंतर्बहिः शून्यत्वं स्वयंप्रकाशस
च्चिदानंदैकरसे ब्रह्मणि निमग्नत्वेन समुद्रमध्यस्थापितपूर्णकुंभवदंत
र्बहिः पूर्णत्वं तुरीयाभिधां सप्तमीं भूमिं प्राप्तस्य योगिनः सततः परतो व्युत्था
नमेव नास्तीति ईदृशमेवोद्दिश्य देहं च नश्वरमवस्थितमुत्थितं वेत्या
दि वाक्यं प्रवृत्तं असंप्रज्ञातसमाधिप्रतिपादकानि योगशास्त्राण्यत्रैव
पर्यवसितानि सोयमीदृशो योगी पूर्वोदाहृतश्रुतौ ब्रह्मविद्वरिष्ठ इत्यु
च्यते तदेवं पार्श्वस्थबोधितः सिद्धो न पश्यतीत्यनयोर्भूमिद्वयोर्व्यवस्थि
तत्वान्न कोपि विरोधः पंचम्यादिभूमित्रयरूपायां जीवन्मुक्तौ संपाद्यमा

जी॰मु॰ नाशांजीवन्मुक्तौ संपाप्रद्वैतप्रतिभासाभावेन संशयविपर्ययप्रसंगाभावा
१०९ दुत्पन्नंतत्वज्ञानंअबाधेन रक्षितंभवति सेयंज्ञानरक्षाजीवन्मुक्तेः प्रथमं
प्रयोजनं तपोद्वितीयंप्रयोजनं योगभूमीनांदेवत्वादिपदप्राप्तिहेतुत
यातपस्त्वंद्रष्टव्यं तद्धेतुत्वंचार्जुनभगवतोः श्रीरामवशिष्ठयोश्चप्रश्नो
त्तराभ्यामवगम्यते अर्जुनः अयतिःश्रद्धयोपेतोयोगाच्चलितमानसः
अप्राप्ययोगसंसिद्धिंकांगतिंकृष्णगच्छति कच्चिन्नोभयविभ्रष्टःछि राम १०९
न्नाभ्रमिवनश्यति अप्रतिष्ठोमहाबाहोविमूढोब्रह्मणःपथि श्रीभ
गवानुवाच प्राप्यपुण्यकृतांलोकानुषित्वाशाश्वतीःसमाः शुचीनां
श्रीमतांगेहेयोगभ्रष्टोभिजायते अथवायोगिनामेवकुलेभवतिधीम

तो एतद्धि दुर्लभतरं लोके जन्म यदीदृशं तत्र तं बुद्धिसंयोगं लभते पौर्वदेहि
कं यतते च ततो भूयः संसिद्धौ कुरुनंदनेति श्रीराम० एकामथ द्वितीयां वात
तीयां भूमिकामुत आरूढस्य मृतस्याथ कीदृशी भगवन्गतिः वशिष्ठः यो
गभूमिकयाक्रांतजीवितस्य शरीरिणः भूमिकांशानुसारेण क्षीयते पूर्व
दुष्कृतं ततः सुरविमानेषु लोकपालपुरेषु च मेरूपवनकुंजेषु रमते रम
णीसखः ततः सुकृतसंभारे दुःकृते च पराकृते भोगक्षयपरीक्षीणे जायं
ते योगिनो भुवि शुचीनां श्रीमतां गेहे गुप्ते गुणवतां सतां तत्र प्राक् भावना
भ्यस्तं योगभूमिक्रमं बुधः स्पृष्ट्वापरितनान्युच्चै रुत्तमं भूमिकाक्रमं इ
ति अस्यैव योगभूमीनां देवलोकप्राप्तिहेतुत्वं तावता तपस्त्वं कुत इति

जी॰न्मु॰ चेत् श्रुतेरिति ब्रूमः तथाच तैत्तिरीया आमनंति तपसा देवे देवतामग्र आयन्
११० तपसर्षयः स्वरन्वविंदन्निति तत्वज्ञानात्प्राचीनस्य भूमिकात्रयस्य तपस्त्वे
सति तत्वज्ञानस्योत्तरकालीनस्य निर्विकल्पसमाधिरूपस्य पंचम्यादिभूमि
कात्रयस्य तपस्त्वं कैमुतिकन्यायसिद्धं अत एव स्मर्यते मनसश्चेंद्रियाणां
चैकाग्र्यं परमं तपः तज्ज्यायः सर्वधर्मेभ्यः स धर्मः पर उच्यत इति यद्यप्य
नेन न्यायेन तपसा प्राप्यं जन्मांतरं नास्ति तथापि लोकसंग्रहायेदं त ॐ
प उच्यते अत एव भगवानाह लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसी ११०
ति संग्राह्यश्च लोकस्त्रिविधः शिष्यो भक्ततटस्थश्चेति तत्र शिष्यस्यां
तर्मुखे योगिनि गुरौ प्रमाणिकत्वबुद्ध्यातिशयेन तदुपदिष्टे तत्वे परमं

चिन्त्वा संप्राप्यचिरं सहसा विश्राम्यति अतएव च श्रूयते यस्य देवे पराभ
क्तिर्यथा देवे तथा गुरौ तस्यैते कथिताह्यर्थाः प्रकाशन्ते महात्मन इति स्म
र्यते च श्रद्धावान्लभते ज्ञानं तत्परः संयतेंद्रियः ज्ञानं लब्ध्वा परां शांतिम
चिरेणाधिगच्छति अन्नप्रदाननिवासस्थानकल्पनादिभिर्योगिनं से
वमानो भक्तस्तदीयं तपः स्वयमादत्ते तथा च श्रूयते तस्य पुत्रा दायमुप
यंति सुहृदः साधुकृत्यां द्विषंतः पापकृत्यामिति तटस्थोपि द्विविधः
आस्तिको नास्तिकश्चेति तत्रास्तिको योगिनः सन्मार्गाचरणं दृष्ट्वा स्व
यमपि सन्मार्गे प्रवर्तते तथा च स्मृतिः यद्यदाचरति श्रेष्ठस्तत्तदेवेत
रो जनः स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते इति नास्तिकोपि योगि

जी॰ मु॰ नारष्टः पापान्मुच्यते तदुक्तं यस्यानुभवपर्यंतात्तत्वे बुद्धिः प्रवर्त्तते तद्दृ
१११ ष्टिगोचराः सर्वे मुच्यंते सर्वपातकैरिति अनेन प्रकारेण सर्वप्राण्युपका
रित्वं विवक्षित्वा स्मर्यते कुलं पवित्रं जननी कृतार्था विश्वंभरे पुण्यवती
च तेन अपारसंवित्सुखसागरेऽस्मिंल्लीनं परंब्रह्मणि यस्य चेत इति
न केवलं योगिनः शास्त्रीयव्यवहारस्यैव तपस्त्वं किंतु सर्वस्यैव लौकि
कव्यवहारस्यापि तथा च तैत्तिरीयशाखायां नारायणस्य अंतिमेना ॐ
नुवाकेन विदुषोपि महिमानं इति तस्मिंश्चानुवाके पूर्वभागे योगिनो व १११
व्यवहारा यज्ञांगद्रव्यत्वेनाम्नाताः तस्यैवं विदुषो यज्ञस्यात्मा यजमानः
श्रद्धा पत्नी शरीरमुरो वेदिर्लोमानि बर्हिर्वेदः शिखा हृदयं यूपः का

मआज्यंमन्युःपशुस्तपोग्निःदमःशमयितादक्षिणवाग्घोताप्राणउ
द्गाताचक्षुरध्वर्युर्मनोब्रह्माश्रोत्रमग्नीध्रइति अत्रचदानंदक्षिणेति
पदमध्याहार्यं अथयत्तपोदानमार्जवमहिंसासत्यवचनमितिचा
स्यदक्षिणेतिछंदोगैराम्नातत्वात् उक्तानुवाकेमध्यभागेनयोगिव्य
वहारास्तज्जीवनकालाश्चज्योतिष्टोमाभावयंतिक्रियारूपत्वेनोत्त
रंसर्वयज्ञावयवक्रियारूपत्वेनचाम्नाताः यावध्रियतेसादीक्षाय
दश्नातितद्धविर्यत्पिबतितदस्यसोमपानमितियद्रमतेतदुपसदो
यत्संचरत्युपविशत्युत्तिष्ठतेचप्रवर्ग्ययन्मुखंतदाहवनीयःयाव्या
हृतिराहुतिर्यदस्यविज्ञानंतज्जुहोतियत्सायंप्रातरत्तियत्समिधंय

त्यानं माध्यंदिनं यत्सायं चैतानि सवनानि अहोरात्रे ते दर्शपूर्णमासौ य
अर्द्धमासाश्चेति चातुर्मास्यानि य ऋतवश्चेति पशुबंधाः ये संवत्सराश्च
परिवत्सराश्च तेऽहर्गणः सर्ववेदसं वा एतत्सत्रं यन्मरणं तदवभृथ इति
सर्ववेदसं सर्ववेदक्षिणाकं तत्रैतच्छब्देन प्रकृताहोरात्रादिपरिवत्सरां
तं सर्वकालं समष्ट्युपलक्षितं योगिन आयुर्विवक्ष्यते यदायुस्तत्सर्व
स्वदक्षिणोपेतं सत्रमित्यर्थः उत्तरानुवाक्ये चरमभागे सर्वयज्ञात्मकं
योगिनमुपासीत तस्य क्रममुक्तिरूपं सूर्याचंद्रमसोः कार्यकारण
ब्रह्मणोः सात्म्यलक्षणं फलमाम्नायते एतद्वै जरामग्निहोत्रं
सत्रं य एवं विद्वानुदगयने प्रमीयते देवानामेव महिमानं गत्वादि

त्यस्य सायुज्यं सलोकतां गछति अथ यो दक्षिणे प्रमीयते पितृणामे
वमहिमानं गत्वा चंद्रमसः सायुज्यं सलोकतां प्राप्नोति एतौ वा सूर्याचंद्र
मसौ महिमानौ ब्राह्मणो विद्वानभिजयति तस्माद्ब्रह्मणो महिमानमा
प्नोति तस्माद्ब्रह्मणो महिमानमित्युपनिषदिति जरामरणावधिकं य
द्योगिचरितमस्ति तद्दर्शाग्निहोत्रसंवत्सरसत्रांतं कर्मस्वरूपमित्ये
वमुपासीनो भावनातिशयेन सूर्याचंद्रमसोः सायुज्यं तादात्म्यं प्राप्नोति
भावनामांद्येन समानकालं प्राप्य तस्मिंल्लोके सूर्याचंद्रमसोर्विभूतिम
नुभूय ततऊर्ध्वं सत्यलोके चतुर्मुखस्य ब्रह्मणो महिमानं कैवल्यं
प्राप्नोति इत्युपनिषदित्यनेन यथोक्तविद्यायास्तत्प्रतिपादकग्रंथस्य

जी॰मु॰ चोपसंहारः क्रियते तदेवंजीवन्मुक्तेस्तपोरूपंद्वितीयंप्रयोजनंसिद्धं वि
११३ संवादाभावस्तृतीयंप्रयोजनं नखल्वंतर्मुखेबाह्यव्यवहारमप
श्यतियोगीश्वरेलौकिकस्तैर्थिकोवाकश्चिद्विसंवदते विसंवादोहिद्विविधः
कलहरूपोनिंदारूपश्च तत्रक्रोधादिरहितेनयोगिनासहकथंनामलौ
किकःकलहायते तद्राहित्यंचस्मर्यते क्रुध्यंतंनप्रतिक्रुध्येदाक्रुष्टःकु
शलंवदेत् अतिवादांस्तितिक्षेतनावमन्येतकंचनेति ननुजीवन्मु राम
क्तेःप्राचीनोविद्वत्संन्यासस्ततोप्राचीनंतत्त्वज्ञानंतस्मादपिप्राचीनो ११३
विविदिषासंन्यासः तत्रैतेक्रोधाराहित्यादयोधर्माःकथंस्मृताइति
चेत् बाढं अतएवजीवन्मुक्तस्यक्रोधादयोत्रांकिंतुमन्त्राक्याः अत्य

र्वाचीनेविविदिषासंन्यासे यथाक्रोधादयोनसंतितस्योत्तमपदेतत्वज्ञा
नेकुतस्तेस्युः कुतस्तरांचविद्वत्संन्यासेकुतस्तमांचजीवन्मुक्तेो अतोयो
गिनासहनलौकिकस्यकलहः संभवति नापिनिद्रारूपोविसंवादःशंकनी
योनिद्रात्वस्याप्यनिश्चितत्वात् तथाचस्मर्यते यंनसंतंनचासंतंनाश्रु
तंनबहुश्रुतं नसुवृत्तंनदुर्वृत्तंवेदकश्चित्सवैयतिः सदसत्वेउत्तमाधम
जातीइतितैर्थिकोपिकिंशास्त्रप्रमेयेविसंवदते किंवायोगचरिते आद्ये
नतावद्योगीपरशास्त्रप्रमेयंदूषयति। तमेवैकंविजानीथाथ आत्मान
मन्यावाचोविमुंचथा नानुध्यायाद्बहूंछब्दान्वाचोविग्लापनंहितदि
त्यादिश्रुत्यनुरोधात् नापिस्वशास्त्रप्रमेयंप्रतिवादिनोग्रेसमर्थयते

जी·मु· पलालमिवधान्यार्थीत्यजेद्ग्रंथमशेषतः परमंब्रह्मविज्ञायउल्कावत्तान्य
११४ थोत्सृजेदित्यादिश्रुत्यर्थपरत्वात् यदाप्रतिवादिनमपिस्वात्मतयावीक्ष्य
ते तदाविजिगीषायांकथनापिलोकायतिशास्त्रज्ञोव्यतिरिक्तः सर्वोपि
नैर्थिकोमोक्षमंगीकुर्वन्योगिचरितेष्वविसंवादितुमर्हतीति अर्हतका
पालबौद्धवैशेषिकनैयायिकशैववैष्णवशाक्तसांख्ययोगादिमोक्षशा
स्त्रेषु प्रतिपाद्यप्रमेयस्यनानाविधत्वेपिमोक्षसाधनस्ययमनियमाद्य ॐ
ष्टांगयोगस्यैकविधत्वात् तस्मादविसंवादेनसर्वसंमतोयोगीश्वरःए ११४
तदेवाभिप्रेत्यवसिष्ठआह यस्येदंजन्मपाश्चात्यंतमाश्वेवमहामते
विंशंतिविद्याविमलामुक्तावेणुमिवोत्तमं आर्य्यतालक्षणामैत्रीसौ

म्यतामुक्तनात्मानं समाश्रयंति तन्नित्यमंतःपुरमिवांगनाः प्रेम्णा लावा
रमधुरं सर्वे वांछंति तं जनाः वेणुं मधुरनिध्वानं वने वनमृगा इव क्षु
प्तिवत्प्रशमितभाववृत्तिना स्थितः सदा जागृति येन चेतसा कलान्वितोपि
धुरिवयः सदा बुधैर्निषेव्यते मुक्त इतीह संस्मृत इति मातरीव शमं यां
ति विषमाणि मृदूनि च विश्वासमिह भूतानि सर्वाणि शमशालिनि त
पस्विषु बहुज्ञेषु याजकेषु नृपेषु च बलवत्सु गुणाढ्येषु शमवानेव
राजत इति तदेवमबाधं जीवन्मुक्तेर्विसंवादाभावरूपं तृतीयं प्रयोज
नं सिद्धं दुःखनाशसुखाविर्भावरूपे चतुर्थपंचमे प्रयोजने विद्यानं
दनामके ब्रह्मानंदगते चतुर्थाध्याये निरूपिते तदुभयमत्र संक्षिप्या

जी॰मु॰ ध्यते आत्मानंचेद्विजानीयादहमस्मीतिपूरुषः किमिच्छन्कस्यकामाय
११५ शरीरमनुसंज्वरेदित्यादिश्रुत्यादुःखस्यैहिकस्यविनाशउक्तः एतंहवाव
नतपतिकिमहंसाधुनाकरवंकिमहंपापमकरवमित्यादिश्रुतयः
आमुष्मिकहेतुपुण्यपापचिंतारूपस्यदुःखस्यनाशमाहुः सुखाविर्भा
वस्त्रेधा सर्वकामावाप्तिः कृतकृत्यत्वंप्राप्तप्राप्यत्वंचेति सर्वकामावा ॐ
प्तिस्त्रेधा सर्वसाक्षित्वंसर्वत्राहंकारमहत्वं सर्वभोक्तृरूपत्वंचेति हि ११५
रण्यगर्भादिस्थावरांतेषुदेहेष्वनुस्यूतंसाक्षिचैतन्यरूपंयद्ब्रह्मतदे
वाहमस्मीतिजानतःस्वदेहइवपरदेहेष्वपिकामसाक्षित्वमस्तित
देतदभिप्रेत्यश्रूयते सोश्नुतेसर्वान्कामान्सहब्रह्मणाविपश्चितेति

लोकेभुंक्तेषुभोगेषु आकामहतत्वंतत्कामप्राप्तिरित्युच्यते तथाच
सर्वभोगदोषदर्शिनस्तत्वविदः सर्वत्राकामहतत्वादस्तिसर्वकामावाप्तिः
अतएवसर्वाभौमापक्रमेषुहिरण्यगर्भपर्यंतेषुउत्तरोत्तरशतगुणेष्वा
नंदेषुश्रोत्रियस्यचाकामहतस्येतिश्रुतंसद्रूपेणचिद्रूपेणानंदरूपे
णासर्वत्रचावस्थितंस्वात्मानमनुसंदधतः सर्वभोक्तृरूपत्वमस्तीत्य
भिप्रेत्यैवंश्रूयते अहमन्नमहमन्नमहमन्नं अहमन्नादोहमन्नादो
हमन्नादइति कृत्यकृत्यत्वंतुस्मर्यते ज्ञानामृतेनतृप्तस्यकृतकृत्य
स्ययोगिनः नैवास्तिकिंचित्कर्तव्यमस्तिचेन्नसतत्ववित् यस्त्वात्म
रतिरेवस्यादात्मतृप्तश्चमानवः आत्मन्येवचसंतुष्टस्तस्यकार्यंन

जी॰मु॰ विद्यतइतिसामसाप्यतांश्रूयते अभयंवैजनकप्राप्तोसीतितस्मात्तत्सर्व
११६ मभवदितिब्रह्मवेदब्रह्मैवभवतीतिच नन्वतोदुःखविनाशस्फुरणाविर्भावौ
तत्त्वज्ञानेनैवसिद्धत्वान्नजीवन्मुक्तिप्रयोजनतामर्हतः मैवं स्फुरस्थितयो
स्तयोरत्रविवक्षितत्वात् यथातत्त्वज्ञानंपूर्वमेवोत्पन्नमपिजीवन्मुक्त्या
स्फुरक्षितंभवति एवमेतावपिस्फुरक्षितौभवतः नन्वेवंजीवन्मुक्तेःपंच ॐ
प्रयोजनत्वेसतिसमाहितोयोगीश्वरोलोकव्यवहारंकुर्वतस्तत्त्वविदोपि ११६
श्रेष्ठइतिवक्तव्यं तच्चप्रश्नोत्तराभ्यांनिराकृतं श्रीरामः भगवन्भूतभव्ये
शाकश्चिज्ज्ञानसमाधिकः प्रबुद्धइवविश्रांतोव्यवहारपरोपिसन् क
श्चिदेकांतमाश्रित्यसमाधिनियमस्थितः तयोस्तुकतरःश्रेयानितिमे

भगवन्वद वशिष्ठः इमं गुणसमाहारमनात्मत्वेन पश्यतः अंतःशीतल
तायासौ समाधिरिति कथ्यते दृश्यैर्न मम संबंध इति निश्चित्य शीतलः क
श्चित्संव्यवहारस्थः कश्चिद्ध्यानपरायणः द्वावेतौ राम स्फसमावंतश्चेत्प
रिशीतलौ अंतःशीतलतामस्यतदनंततपः फलमिति नेव दोषः अत्रवा
सनाक्षयरूपं अंतःशीतलत्वं अवश्यं संपादनीयमित्येतावदेव प्रतिपा
द्यते ननु तदनंतरभाविनो नाशस्य श्रेष्ठत्वं निवार्यते शीतलत्वं तृष्णायाः
प्रशमनमित्येतादृशीं विवक्षां स्वयमेव स्पष्टीचकार अंतःशीतलता
यां तु लब्धायां शीतलं जगत् अंतस्तृषोपतप्तानां दावदाहमयं जगदि
ति ननु समाधिनिर्दाव्यवहारप्रशंसा चात्रोपलभ्यते समाधिस्तान

नी॰मु॰ कस्यस्यचेतश्चेद्वृत्तिचंचलं नतस्यतत्समाधानं सत्युन्मनतांव्रजेः उन्म
१९७ नतांउपस्यस्यचेतश्चेत्क्षीणवासनं तत्स्योन्मनत्वंतुसमंब्रह्मस
माधिनेतिमेवं अत्रहिसमाधिप्राशास्त्यमेवयोगीकृत्यवासनानिर्घृते इय
मत्रवचनव्यक्तिः यद्यपिव्यवहारात्समाधिः प्रशास्तस्तथाप्यसौसवास
नश्चेत्तदानिर्वासनात्व्यवहारादधमएवेति यदासमाहितव्यवहर्त्री
रावुभावपिअनत्वज्ञौसवासनौचतदासमाधेरुत्तमलोकप्राप्तिहेतु ॐ
पुण्यत्वेनप्राशास्त्यं यदाउभौज्ञाननिष्ठौनिर्वासनौच तदापिवासना ११७
क्षयरूपांजीवन्मुक्तिंपरिपालयन्नयंमनोनाशरूपः समाधिः प्र
शस्तएव तस्माद्योगीश्वरस्यश्रेष्ठत्वात्पंचप्रयोजनोपेतायाःजी

वन्मुक्तेनकोपिविघ्नइतिसिद्धं॥ ॥इतिविद्यारण्यविरचितंजीवन्मुक्ति
प्रकरणं ॥ समाप्तं॥शुभंभूयात्॥श्रीरामजयरामजयजयराम॥
भग्नपृष्ठिकटिग्रीवास्तब्धदृष्टिरधोमुखं कष्टेनलिखितंग्रंथंयत्नेन
परिपालयेत् १॥ ॥श्रीराधाकृष्णाभ्यांनमः॥श्रीरस्तु॥ ॥

వేదాం

౧ శ్రీగణేశాయనమః || యదవిద్యావిలాసేన భూతభౌతికసృష్టయః | తన్నౌమి పరమాత్మానం సచ్చిదానందవిగ్రహం ||౧
యదంతేవాసిపంచాస్యైర్నిరస్తా భేదవారణాః | తన్నౌమి నృసింహాఖ్యం యతీంద్రం పరమం గురుం ||౨|| శ్రీమ
ద్వేంకటనాథాఖ్యాన్వేలాంగుడినివాసినః | జగద్గురూనహం వందే సర్వతంత్రప్రవర్తకాన్ ||౩|| యేన చిం
తామణౌ టీకా దశటీకావిభంజినీ | తర్కచూడామణిర్నామ కృతా విద్వన్మనోరమా ||౪|| పక్షధర
స్యాపి బాలవ్యుత్పత్తిదాయినీ | పదయోజనయా పంచపాదికా వ్యాకృతా తథా ||౫|| తేన బోధాయ మం
దానాం వేదాంతార్థావలంబినీ | ధర్మరాజాధ్వరీంద్రేణ పరిభాషా వితన్యతే ||౬|| ఇహ ఖలు ధర్మా
ర్థకామమోక్షేషు చతుర్విధపురుషార్థేషు మోక్ష ఏవ పరమపురుషార్థః | న స పునరావర్తత ఇతి
శ్రుత్యా తస్యైవ నిత్యత్వావధారణాత్ | ఇతరేషాం త్రయాణాం ప్రత్యక్షేణ | తద్యథేహ కర్మచితో లోకః
క్షీయత ఏవమేవాముత్ర పుణ్యచితో లోకః క్షీయత ఇత్యాదిశ్రుత్యా చానిత్యత్వావగమాచ్చ ||
స చ బ్రహ్మజ్ఞానాదితి బ్రహ్మ తజ్జ్ఞానం తత్ప్రమాణం చ సప్రపంచం నిరూప్యతే | తత్ర ప్రమాకరణం ప్ర

శాం

౨ ప్రమాణం। తత్ర స్మృతివ్యావృత్తం ప్రమాత్వమనధిగతాబాధితార్థవిషయకజ్ఞానత్వం। స్మృతిసాధారణం తు
అబాధితవిషయకజ్ఞానత్వం। నీరూపస్యాపి కాలస్యేంద్రియవేద్యత్వాభ్యుపగమేన ధారావాహికబుద్ధేర
పి పూర్వపూర్వజ్ఞానావిషయతత్తత్క్షణవిశిష్టవిషయకత్వేన న తత్రావ్యాప్తిః। కించ సిద్ధాంతే ధారావాహిక
బుద్ధిస్థలే న జ్ఞానభేదః। కింతు యావద్ఘటస్ఫురణం తావద్ఘటాకారాంతఃకరణవృత్తిరేకైవ। న తు నా
నా వృత్తేః స్వవిరోధివృత్త్యుత్పత్తిపర్యంతం స్థాయిత్వాభ్యుపగమాత్। తథా చ తత్ప్రతిఫలితచైతన్యమపి త
త్ర తావత్కాలమేకమేవేతి నావ్యాప్తిశంకాపి। నను సిద్ధాంతే ఘటాదేర్మిథ్యాత్వేన బాధితత్వాత్తజ్జ్ఞానం క
థం ప్రమాణం। ఉచ్యతే। బ్రహ్మసాక్షాత్కారానంతరం ఘటాదీనాం బాధః యత్ర త్వస్య సర్వమాత్మైవాభూ
త్తత్కేన కం పశ్యేదితి శ్రుతేః। న తు సంసారదశాయాం బాధః। యత్ర హి ద్వైతమివ భవతి తదితర ఇతరం పశ్య
తీతి శ్రుతేః। తథా చాబాధితపదేన సంసారదశాయామబాధితత్వం వివక్షితం। ఇతి ఘటాదిప్రమాయా
మవ్యాప్తిః। తదుక్తం భాష్యే। దేహాత్మప్రత్యయో యద్వత్ప్రమాణత్వేన కల్పితః। లౌకికం తద్వదేవేదం
ప్రమాణం త్వాత్మనిశ్చయాదితి। ఆత్మనిశ్చయాత్। బ్రహ్మసాక్షాత్కారపర్యంతమిత్యర్థః। లౌకికేతి ప్ర

౧ లౌకికమితి ఘటాదిజ్ఞానమిత్యర్థః

మాణాని షట్। ప్రత్యక్షానుమానోపమానాగమార్థాపత్త్యనుపలబ్ధిభేదాత్। తత్ర ప్రత్యక్షప్రమాయాః క
రణం ప్రత్యక్షప్రమాణం। ప్రత్యక్షప్రమా చాత్ర చైతన్యమేవ। యత్సాక్షాదపరోక్షాద్బ్రహ్మేతి శ్రుతేః। అపరో
క్షాదిత్యస్య అపరోక్షమిత్యర్థః। నను చైతన్యమనాది తత్కథం చక్షురాదేస్తత్కరణత్వేన ప్రమాణత్వమితి
ఉచ్యతే। చైతన్యస్యానాదిత్వేపి తదభివ్యంజకాంతఃకరణవృత్తిరింద్రియసన్నికర్షాదినా జాయత ఇ
తి వృత్తివిశిష్టచైతన్యమాదిమదిత్యుచ్యతే। జ్ఞానావచ్ఛేదకత్వాచ్చ వృత్తౌ జ్ఞానత్వోపచారః। తదుక్తం వివ
రణే। అంతఃకరణవృత్తౌ జ్ఞానత్వోపచారాదితి। నను నిరవయవస్యాంతఃకరణస్య పరిణామాత్మికా
వృత్తిః కథం। ఉచ్యతే। న తావదంతఃకరణం నిరవయవం సాదిద్రవ్యత్వేన సావయవత్వాత్। సాదిత్వం చ త
న్మనోఽసృజతేత్యాదిశ్రుతేః। వృత్తిరూపజ్ఞానస్య మనోధర్మత్వే చ కామః సంకల్పో విచికిత్సా శ్రద్ధా
ఽశ్రద్ధా ధృతిరధృతిర్హ్రీర్ధీర్భీరిత్యేతత్సర్వం మన ఏవేతి శ్రుతిః ప్రమాణం। ధీశబ్దేన వృత్తిరూపజ్ఞానాభి
ధానాత్। అత ఏవ కామాదేరపి మనోధర్మత్వం। కామాదేరంతఃకరణధర్మత్వే అహమిచ్ఛా
మి అహం జానామీత్యాద్యనుభవః ఆత్మధర్మత్వమవగాహమానః కథముపపద్యతే। ఉచ్యతే।

ఆయః। ఏవం తస్య దగ్ధృత్వాభావేఽపి దగ్ధృత్వాశ్రయవహ్నితాదాత్మ్యాధ్యాసాద్యథా అయో దహతీతి వ్యవహారః
తథా సుఖాద్యాకారపరిణామవృత్తేః కరణస్యైతాదాత్మ్యాధ్యాసాదహం సుఖీత్యాదివ్యవహారః। నన్వంతఃకరణస్యేంద్రియ
తయా అతీంద్రియత్వాత్కథం ప్రత్యక్షవిషయతేతి। ఉచ్యతే। న తావదంతఃకరణమింద్రియమిత్యత్ర మానమ
స్తి। మనః షష్ఠానీంద్రియాణీతి భగవద్వచనం ప్రమాణమితి చేన్న। అనింద్రియేణాపి మనసా షట్త్వసంఖ్యాపూ
రణే విరోధాభావాత్। న హీంద్రియగతసంఖ్యాపూరణమింద్రియేణైవ భవతీతి నియమః। యజమానపం
చమా ఇడాం భక్షయంతీత్యత్ర ఋత్విగ్గతపంచత్వసంఖ్యాయా అనృత్విజాపి యజమానేన। వేదానధ్యా
పయామాస మహాభారతపంచమానిత్యత్ర వేదగతపంచత్వసంఖ్యాయా అవేదేనాపి మహాభారతేన పూర
ణదర్శనాత్। ఇంద్రియేభ్యః పరా హ్యర్థా అర్థేభ్యశ్చ పరం మనః ఇత్యాదిశ్రుత్యా మనసోఽనింద్రియ
త్వావగమాచ్చ। నన్వేవం మనసోఽనింద్రియత్వే సుఖాదిప్రత్యక్షస్య సాక్షాత్త్వం న స్యాత్। ఇంద్రియాజన్యత్వా
దితి చేన్న। న హీంద్రియజన్యత్వేన జ్ఞానస్య సాక్షాత్త్వం అనుమిత్యాదేరపి మనోజన్యతయా సాక్షాత్త్వా
పత్తేః। ఈశ్వరజ్ఞానస్యాసాక్షాత్త్వాపత్తేశ్చ। కింతు ప్రత్యక్షత్వప్రయోజకం కిమితి చేత్। కిం జ్ఞానగత

స్వప్రత్యక్షత్వస్య ప్రయోజకం ప్రభాణ కిం వా విషయగతస్య। అత్ర ప్రమాణచైతన్యస్య విషయావచ్ఛిన్నచైతన్యాభేద ఇతి బ్రూమః।
తథా హి। త్రివిధం చైతన్యం। ప్రమాతృచైతన్యం। ప్రమాణచైతన్యం। విషయచైతన్యం చేతి। తత్ర ఘటావచ్ఛిన్నం చైతన్యం విష
ప్రత్యక్ష యచైతన్యం। అంతఃకరణవృత్త్యవచ్ఛిన్నం చైతన్యం ప్రమాణచైతన్యం। అంతఃకరణావచ్ఛిన్నం చైతన్యం ప్రమాతృచైతన్యం। తత్ర
యథా తటాకోదకం ఛిద్రాన్నిర్గత్య కుల్యాత్మనా కేదారాన్ ప్రవిశ్య తద్వదేవ చతుష్కోణాద్యాకారం భవతి త
థా తైజసమంతఃకరణమపి చక్షురాదిద్వారా ఘటాదివిషయదేశం గత్వా ఘటాదివిషయాకారేణ పరి
ణమతే। స ఏవ పరిణామో వృత్తిరిత్యుచ్యతే। అనుమిత్యాదిస్థలే తు నాంతఃకరణస్య వహ్న్యాదిదేశగమనం। వహ్న్యాదేః
చక్షురాద్యసన్నికర్షాత్। తథా చాయం ఘట ఇతి ప్రత్యక్షస్థలే ఘటాదేస్తదాకారవృత్తేశ్చ బహిరేకత్ర దేశే సమ
వధానాత్ తదుభయావచ్ఛిన్నం చైతన్యమేకమేవ। విభాజకయోరప్యంతఃకరణవృత్తిఘటాదివిషయయో
రేకదేశస్థత్వేన భేదాజనకత్వాత్। అత ఏవ మఠాంతర్వర్తిఘటావచ్ఛిన్నాకాశో న మఠావచ్ఛిన్నాకాశాద్భి
ద్యతే। తథా చాయం ఘట ఇతి ప్రత్యక్షస్థలే ఘటాకారవృత్తేర్ఘటసంయోగితయా ఘటావచ్ఛిన్నచైతన్యస్య
తద్వృత్త్యవచ్ఛిన్నచైతన్యస్య అభిన్నతయా తత్ర ఘటజ్ఞానస్య ఘటాంశే ప్రత్యక్షత్వం। సుఖాద్యవచ్ఛిన్నచైత
న్య

వేదాం

౪

౫౫

స్యస్య తద్వృత్త్యవచ్ఛిన్నచైతన్యస్యైకదేశస్థితోపాధితయా అభిన్నత్వాదయమహం సుఖీత్యాదిజ్ఞా
నస్య ప్రత్యక్షత్వం। న చైవం స్వవృత్తిసుఖాది[illegible]స్మరణస్యాపి సుఖాద్యంశే ప్రత్యక్షతాపత్తిరితి చేన్న। తత్ర
స్వరూపాణాం స్వ అతీతత్వే స్మృతిరూపాంతఃకరణ[illegible]వృత్తేర్వర్తమానతయా ఉపాధ్యోర్భిన్నకాల
తయా తత్తదవచ్ఛిన్నచైతన్యయోర్భేదాత్। ఉపాధ్యోరేకదేశస్థత్వేన త్వేకకాలత్వస్యైవ ఉపధేయా
భేదప్రయోజకత్వాత్। యది చ ఏకదేశస్థత్వమాత్రముపాధేయాభేదప్రయోజకం తదా అహం పూర్వం
సుఖీత్యాదిస్మృతావతివ్యాప్తివారణాయ వర్తమానత్వం విషయవిశేషణం దేయం। నన్వేవమపి స్వకీయధర్మా
ధర్మౌ వర్తమానౌ తౌ యదా శబ్దాదినా జ్ఞాయేతే తదా తాదృశశాబ్దజ్ఞానాదావతివ్యాప్తిః తత్ర తద్ధ
ర్మాద్యవచ్ఛిన్నతద్వృత్త్యవచ్ఛిన్నచైతన్యయోరేకత్వాదితి చేన్న। యోగ్యత్వస్యాపి విషయవిశేషణత్వాత్। అంతఃక
రణధర్మత్వావిశేషేఽపి కించిద్యోగ్యం కించిదయోగ్యమిత్యత్ర ఫలబలకల్ప్యస్స్వభావ ఏవ శరణం। అన్యథా న్యా
యమతేఽప్యాత్మధర్మత్వావిశేషాత్సుఖాదివద్ధర్మాదేః ప్రత్యక్షత్వాపత్తిర్దుర్వారా। న చైవమపి వర్తమానదశా
యామహం సుఖీత్యాదివాక్యజన్యజ్ఞానస్య ప్రత్యక్షతాపత్తిస్స్యాదితి వాచ్యం ఇష్టత్వాత్। దశమస్త్వమసీత్యాదౌ

సన్నికృష్టవిషయత్వేన ద్వావప్యపరోక్షజ్ఞానాభ్యుపగమాత్। అతఏవ పర్వతో వహ్నిమానిత్యాదిజ్ఞానమపి పర్వ
తాంశే అపరోక్షం పర్వతాద్యవచ్ఛిన్నచైతన్యస్య బహిర్నిర్గతాంతఃకరణవృత్త్యవచ్ఛిన్నచైతన్యాభేదాత్। వహ్న్యంశే
తు అంతఃకరణవృత్తేర్నిర్గమనాభావేన వహ్న్యవచ్ఛిన్నచైతన్యస్య ప్రమాణచైతన్యస్య చ పరస్పరం భేదాత్। తథా చా
న్యాయా నుభవః పర్వతం పశ్యామి వహ్నిమనుమినోమీతి। న్యాయమతే పర్వతమనుమినోమీత్యనువ్యవసాయాపత్తిః।
అసన్నికృష్టపక్షకానుమితౌ తు సర్వాంశేపి జ్ఞానమపరోక్షం। సురభిచందనమిత్యాదిజ్ఞానమపి చందనఖండాం
శే అపరోక్షం। సౌరభాంశే పరోక్షం। సౌరభస్య చక్షురింద్రియాయోగ్యతయా యోగ్యత్వఘటితస్య నిరు
క్తలక్షణస్యాభావాత్। కథమేకత్ర జ్ఞానే పరోక్షత్వాపరోక్షత్వయోరభ్యుపగమ ఏతయోర్జాతిత్వేన సాంకర్యాది
తి వాచ్యం। ఇష్టత్వాత్। జాతిత్వోపాధిత్వపరిభాషాయాః సకలప్రమాణాగోచరతయా అప్రామాణికత్వా
త్। ఘటోయమిత్యాదిప్రత్యక్షం హి ఘటత్వాదివిశిష్టవిషయకం। న తస్య జాతిత్వేపి। జాతిరూపసాధ్యప్రసిద్ధే
రత్వాదభావానుమానస్యానవకాశాత్। సమవాయాసిద్ధ్యా ప్రపంచస్య అనిత్యతయా చ నిత్య

పే ఖాం

౨ సమవేతత్వ[illegible] ఘటతజ్జాతిత్యగ్నఘటత్వాదావపి క్షేత్రే | ఏవమప్యాపాదిత్వం కసయత్వం | వర్తమానాంశే
చ వర్తమానత్వాంశే చ ప్రత్యక్షత్వం | అంతఃకరణవృత్తిఘటాదిగతాకారేణ తత్ర ప్రత్యక్షత్వవ్యవహారః
ప్రమాక్షత్వప్రమాక్షత్వయోరంశే తత్ర చైతన్యవృత్త్యోరవిశేషః | తథా చ తత్ర తత్రేంద్రియయోగ్యవర్తమాన
విషయావచ్ఛిన్నచైతన్యాభిన్నత్వం తత్తదాకారవృత్త్యవచ్ఛిన్నజ్ఞానస్య తత్తదంశే ప్రత్యక్షత్వం | ఘటాదే
ర్విషయస్య ప్రత్యక్షత్వం తు ప్రమాత్రభిన్నత్వం | నను కథం ఘటాదేరంతఃకరణావచ్ఛిన్నచైతన్యాభేదః
అహమిమం పశ్యామీతి భేదానుభవవిరోధాదితి చేదుచ్యతే | ప్రమాత్రభేదో నామ న తావదై
క్యం కింతు ప్రమాతృసత్తాతిరిక్తసత్తాకత్వాభావః | తథా చ ఘటాదేః స్వావచ్ఛిన్నచైతన్యేఽధ్యస్తతయా
విషయచైతన్యసత్తైవ ఘటాదిసత్తా | అధిష్ఠానసత్తాతిరిక్తసత్తాయా ఆరోపితేఽనంగీ
కారాత్ | విషయచైతన్యం చ పూర్వోక్తప్రకారేణ ప్రమాతృచైతన్యమేవేతి ప్రమాతృచైతన్యస్యైవ ఘ
టాద్యధిష్ఠానతయా ప్రమాతృసత్తైవ ఘటాదిసత్తా నాన్యేతి సిద్ధం ఘటాదేరపరోక్షత్వం | అనుమిత్యా

విష్యతి అంతఃకరణావచ్ఛిన్నచిద్విషయదేశగమనాభావేఽపి వస్త్వవచ్ఛిన్నచైతన్యస్య ప్రమాతృచైతన్యాంశ
కతయా ఘటాదిసత్తా ప్రమాతృసత్తాతిరిక్తేతి నాతివ్యాప్తిః। నన్వేవమపి ధర్మాధర్మాదిగోచరా
నుమిత్యాదిదశాయాం ధర్మాధర్మయోః ప్రత్యక్షత్వాపత్తిః ధర్మాద్యవచ్ఛిన్నచైతన్యస్య ప్రమాతృచైతన్యా
భిన్నతయా ధర్మాదిసత్తాయాః ప్రమాతృసత్తాతిరేకాభావాదితి చేన్న। యోగ్యత్వస్యాపి విషయవిశే
షణత్వాత్। నన్వేవమపి రూపీ ఘట ఇతి ప్రత్యక్షస్థలే ఘటగతపరిమాణాదేః ప్రత్యక్షత్వాపత్తిః రూ
పాద్యవచ్ఛిన్నచైతన్యస్య పరిమాణావచ్ఛిన్నచైతన్యస్య చైకతయా రూపావచ్ఛిన్నచైతన్యస్య ప్రమాతృచైత
న్యాభేదే పరిమాణావచ్ఛిన్నచైతన్యస్యాపి ప్రమాత్రభిన్నతయా పరిమాణసత్తాయా రూపప్రమా
తృసత్తాతిరిక్తత్వాభావాదితి చేన్న। తత్తదాకారవృత్త్యుపహితత్వస్యాపి ప్రమాతృవిశేషణత్వాత్।
రూపాద్యాకారవృత్తిదశాయాం పరిమాణాద్యాకారవృత్త్యభావేన పరిమాణాద్యాకారవృత్త్యుపహితప్రమా
తృచైతన్యాభిన్నసత్తాకత్వాభావేనాతివ్యాప్త్యభావాత్। నన్వేవం వృత్తావవ్యాప్తిః అనవస్థాభయాత్ వృ

ఏకాం
౬

త్తిగోచరవృత్త్యనంగీకారాత్తత్ర సావకాశవృత్తవ్యాప్తత్వఘటితలక్షణాభావాదితి చేన్న। అనవ
స్థాభియా వృత్తేర్వృత్త్యంతరావిషయత్వేఽపి స్వవిషయత్వాభ్యుపగమేన స్వవిషయకవృత్తవ్యాప్తత్వ
ప్రమాతృచైతన్యాభిన్నసత్తాకత్వస్య తత్రాపి సంభవాత్। ఏవం చాంతఃకరణతద్ధర్మాదీనాం కేవల
సాక్షివిషయత్వేఽపి తత్తదాకారవృత్త్యభ్యుపగమేనోక్తలక్షణస్య తత్రాపి సంభవాన్నావ్యాప్తిః। నచాం
తఃకరణతద్ధర్మాదీనాం వృత్తివిషయత్వాభ్యుపగమే కేవలసాక్షివిషయత్వాభ్యుపగమవి
రోధ ఇతి వాచ్యం। నహి వృత్తిం వినా సాక్షివిషయత్వం కేవలసాక్షివిషయత్వం। కింత్వింద్రియాను
మానాదిప్రమాణవ్యాపారమంతరేణ సాక్షివిషయత్వం। అత ఏవాహంకారవిషయా యా మాయా వృ
త్తిరహమాకారాంతఃకరణవృత్తిరంగీకృతా। అత ఏవ చ ప్రాతిభాసికరజతస్థలే రజతాకారా
విద్యావృత్తిః సాంప్రదాయికైరంగీకృతా। తథా చాంతఃకరణతద్ధర్మాదిషు కేవలసాక్షివేద్యేషు
వృత్తవ్యాప్తత్వఘటితలక్షణసత్త్వాన్నావ్యాప్తిః। తదయం నిర్గలితోఽర్థః। సావకాశవృత్తవ్యాప్త

ప్రమాతృచైతన్యసత్తాతిరిక్తసత్తాశూన్యత్వే సతి యోగ్యత్వం విషయస్య ప్రత్యక్షత్వం। తత్ర సంయోగసంయుక్త
తాదాత్మ్యాదీనాం సన్నికర్షాణాం చైతన్యాభివ్యంజకవృత్తిజనకే వినియోగః। సా చ వృత్తిశ్చతుర్విధా। సం
శయో నిశ్చయో గర్వః స్మరణమితి। ఏవంవిధవృత్తిభేదేన ఏకమప్యన్తఃకరణం మన ఇతి బుద్ధిరితి అ
హంకార ఇతి చిత్తమితి చాభిధీయతే। తదుక్తం। మనో బుద్ధిరహంకారశ్చిత్తం కరణమాన్తరం।
సంశయో నిశ్చయో గర్వః స్మరణం విషయా ఇమే। తచ్చ ప్రత్యక్షం ద్వివిధం। సవికల్పకనిర్వికల్పకభే
దాత్। తత్ర సవికల్పకం వైశిష్ట్యావగాహిజ్ఞానం। యథా ఘటమహం జానామీత్యాదిజ్ఞానం।
నిర్వికల్పకం తు సంసర్గానవగాహిజ్ఞానం। యథా సోఽయం దేవదత్త [illegible] స్తత్త్వమసీత్యాది
వాక్యజన్యజ్ఞానం। నను శాబ్దమిదం జ్ఞానం న ప్రత్యక్షం ఇన్ద్రియాజన్యత్వాదితి చేన్న। ఇన్ద్రియ
జన్యత్వం ప్రత్యక్షత్వే తన్త్రం। దూషితత్వాత్। కిన్తు ప్రమాణచైతన్యస్య యోగ్యవర్తమానవిషయచైత
న్యాభిన్నత్వమిత్యుక్తం। తథా చ సోఽయం దేవదత్త ఇతి వాక్యజన్యజ్ఞానస్య సన్నికృష్టవిషయతయా బహి

వేదాంత

2 శ్చన్యత్వాంతః కరణానాం వృత్తిష్వప్యపగమాదేవ తత్త్వావచ్ఛిన్నచైతన్యస్య వృత్త్యవచ్ఛిన్నచైతన్యస్యాభేదః ప్రత్యక్ష
త్వం। ఏవం తత్త్వమస్యాదివాక్యజన్యజ్ఞానస్యాపి తత్ర ప్రమాతృచైతన్యవిషయతయోరభేద ఉభయోర
భిన్నత్వాత్। నను వాక్యజన్యజ్ఞానస్య పదార్థసంసర్గావగాహితయా శబ్దత్వేన పరోక్షత్వం। ఉచ్యతే।
వాక్యజన్యజ్ఞానవిషయత్వేపి న పదార్థసంసర్గత్వం తంత్రం। అఖండార్థసంసర్గస్యాపి వాక్యజన్యజ్ఞానవి
షయతాపత్తేః। కింతు తాత్పర్యవిషయత్వం। ప్రకృతే చ సదేవ సోమ్యేదమగ్ర ఆసీదిత్యుపక్రమ్య తత్త్వం
స ఆత్మా తత్త్వమసీత్యుపసంహారే నిష్ప్రపంచ బ్రహ్మణి వేదాంతానాం తాత్పర్యమవగమ్యత ఇతి కథం
తాత్పర్యవిషయసంసర్గమవగాహయేత్। అత ఏవ తత్త్వమస్యాదివాక్యానాం అఖండార్థత్వం
సంసర్గాగోచరప్రమాజనకత్వమితి। తదుక్తం। సంసర్గాసంగిసమ్యగ్ధీహేతుతా యా గిరామియం
ఉక్తాఖండార్థతా యద్వా తత్ప్రాతిపదికార్థతా। ప్రాతిపదికార్థమాత్రపరత్వం వా। అఖండార్థత్వమితి చతుర్థపాదార్థః। తచ్చ ప్రత్యక్షం ద్వివిధం। జీవసాక్షి ఈశ్వ
రసాక్షి చేతి। తత్ర జీవో నామాంతఃకరణావచ్ఛిన్నచైతన్యం। తత్సాక్షి తు అంతఃకరణోపహితం చైతన్యం।

అంతఃకరణస్య విశేషణత్వోపాధిత్వాభ్యాం జీవసాక్షిణోర్భేదః। విశేషణం చ కార్యాన్వయి వర్తమానం వ్యావర్తకం
ఉపాధిశ్చ కార్యానన్వయీ వ్యావర్తకో వర్తమానశ్చ। రూపవిశిష్టో ఘటోఽనిత్య ఇత్యత్ర రూపం వి
శేషణం। కర్ణశష్కుల్యవచ్ఛిన్నం నభః శ్రోత్రమిత్యత్ర కర్ణశష్కులీ ఉపాధిః। అయమేవోపాధిర్నైయా
యికైః పరిచాయక ఇత్యుచ్యతే। ప్రకృతే చాంతఃకరణస్య జడతయా విషయభాసకత్వాయోగేన
విషయభాసకచైతన్యోపాధిత్వం। అయం చ జీవసాక్షీ ప్రత్యాత్మం నానా। ఏకత్వే మైత్రావగతే చైత్రస్యా
ప్యనుసంధానప్రసంగాత్। ఈశ్వరసాక్షీ తు మాయోపహితం చైతన్యం। తచ్చైకం। తదుపాధిభూతాయా మా
యాయా ఏకత్వాత్। ఇంద్రో మాయాభిః పురురూప ఈయత ఇత్యాదిశ్రుతౌ మాయాభిరితి బ
హువచనస్య మాయాగతశక్తివిశేషాభిప్రాయతయా మాయాగతసత్త్వరజస్తమోరూపగుణాభి
ప్రాయతయా వోపపత్తేః। మాయాం తు ప్రకృతిం విద్యాన్మాయినం తు మహేశ్వరం। తరత్యవిద్యాం
వితతాం హృది యస్మిన్నివేశితే। యోగీ మాయామమేయాయ తస్మై విద్యాత్మనే నమః। అజామేకాం
లోహితశుక్లకృష్ణాం బహ్వీం ప్రజాం జనయంతీం సరూపాం। అజో హ్యేకో జుషమాణోఽనుశే

తైజసప్రాజ్ఞానాం భుక్తభూతానాముఖ్యార్థ్యల్లత్వాదిశ్రుతిషు ఏకవచనబలేన లాఘవాద్గృహీతే సమాయా
యా ఏకత్వం సిద్ధ్యతి। తతశ్చ తదుపహితచైతన్యమీశ్వరసాక్షి। తస్యానాది। తదుపాధిమాయాయా
అనాదిత్వాత్। మాయాయా వచ్ఛిన్నచైతన్యం చ పరమేశ్వరః। మాయాయా విశేషణత్వే ఈశ్వరత్వం ఉపాధి
త్వే సాక్షిత్వమితీశ్వరత్వసాక్షిత్వయోరంభేదః। తత్తు ధర్మిణోరైక్యాత్ సాక్షిణోః। స చ పరమేశ్వర ఏకో
పి స్వోపాధిభూతమాయానిష్ఠసత్త్వరజస్తమోగుణాభేదేన బ్రహ్మవిష్ణుమహేశ్వరరుద్రైత్యాదిశబ్ద
వాచ్యం భజతే। ఈశ్వరసాక్షిణోరనాదిత్వేన తత్కృతబహుసామ్యం ప్రత్యాయయతి ఇత్యాదిసృష్టిపూర్వకాలము
ఆపరమేశ్వరస్యాగంతుకమీక్షణముఖ్యమాణం కథముపపద్యతే। ఉచ్యతే। యథా విషయేంద్రియసం
నికర్షాదికారణవశేనోత్పాద్యంతః కరణవృత్తిభేదా జాయంతే తథా సృజ్యమానప్రాణికర్మవశే
న పరమేశ్వరమాయాయాః వృత్తివిశేషా ఇదమిదానీం స్రష్టవ్యమిదమిదానీం పాల
యితవ్యమిదమిదానీం సంహర్తవ్యమిత్యాద్యాకారా జాయంతే। తాసాం చ వృత్తీనాం సాదిత్వాత్తత్ప్రతిబిం
బచైతన్యమపి సాదిత్యుచ్యతే। ఏవం సాక్షిద్వైవిధ్యే ప్రత్యక్షజ్ఞానద్వైవిధ్యం। ప్రత్యక్షత్వం చ జ్ఞేయగతం జ్ఞ

ప్తిగతం చ॥ రూపితం। తత్ర జ్ఞప్తిగతప్రత్యక్షత్వస్య సామాన్యలక్షణం చిత్త్వమేవ। వర్తమానవస్తుమాత్రావ్యావా
చ్ఛిన్నవస్త్వాకారవృత్త్యవహితచైతన్యస్య సార్వత్రికస్య ప్రకాశతయా ప్రత్యక్షత్వాత్। తత్త్వదింద్రియాం
శే ప్రత్యక్షత్వం చ ప్రాం పూర్వోక్తమేవ। తస్య చ భ్రాంతిరూపప్రత్యక్షేణాతివ్యాప్తిః। భ్రమప్రమాసాధారణప్ర
త్యక్షత్వస్య సామాన్య॥ వరబ॥ తస్యాపి లక్షణత్వాత్। యదా తు ప్రత్యక్షప్రమాయా ఏవ లక్షణం వక్తవ్యం తదా
పూర్వోక్తలక్షణే అబాధితత్వం విషయవిశేషణం దేయం। శుక్తిరూప్యాదిభ్రమస్య సంసారదశాయాం బాధ
విషయప్రాతిభాసికరజతాదివిషయకత్వాత్॥ గురువిసంవాదిప్రవృత్త్యుత్పత్తిజ్ఞానవిషయీభూతవతస్య ప్రా
తిభాసికతత్త్వానామాత్యక్షరజతాదివిషయకత్వే ప్రమాణం। జ్ఞానాంతరరజతస్య కల్పితస్యైవ తద్విషయత్వసం
భవాదితి చేన్న। తస్యాసంనికృష్టతయా ప్రత్యక్షవిషయత్వాయోగాత్॥ చ జ్ఞానం తత్ర ప్రత్యాసత్తిః। జ్ఞాన
స్య ప్రత్యాసత్తిత్వే తత ఏవ వహ్న్యాదేః ప్రత్యక్షతాపత్త్యా అనుమానాద్యుచ్ఛేదాపత్తేః॥ గురురజతోత్పాదకానాం
రజతావయవానాం అభావే శుక్తౌ కథం తత్రాపి రజతముత్పద్యత ఇతి చేదుచ్యతే॥ లోకే రజతసిద్ధసా
మగ్రీ ప్రాతిభాసికరజతోత్పాదికా। కింతు విలక్షణైవ తథాహి కాచకామలాదిదోషదూషితలో

పేజాం
౯

చనస్య పురోవర్తిద్రవ్యసంయోగాత్ ఇదమాకారా చాకచక్యాకారా చ కాచిదంతఃకరణ
వృత్తిరుదేతి తస్యాం చ వృత్తావిదమవచ్ఛిన్నచైతన్యం ప్రతిబింబతే తత్ర పూర్వోక్తరీత్యా వృత్తేర్నిర్
గమనేన ఇదమవచ్ఛిన్నచైతన్యం వృత్త్యవచ్ఛిన్నచైతన్యం ప్రమాతృచైతన్యం చాభిన్నం భవతి। తతశ్చ ప్రమాతృచై
తన్యాభిన్నవిషయచైతన్యనిష్ఠా శుక్తిత్వప్రకారికా అవిద్యా చాకచక్యాదిసాదృశ్యసందర్శనసముద్బో
ధితరజతసంస్కారసధ్రీచీనా కాచాదిదోషసమవహితా రజతరూపార్థాకారేణ రజతజ్ఞానాభా
సాకారేణ చ పరిణమతే। పరిణామో నామ ఉపాదానసమసత్తాకకార్యాపత్తిః। వివర్తో నామ ఉ
పాదానవిషమసత్తాకకార్యాపత్తిః। ప్రాతిభాసికరజతం చ అవిద్యాపేక్షయా పరిణామః। చైతన్యా
పేక్షయా వివర్త ఇత్యుచ్యతే। అవిద్యాపరిణామరూపం చ తద్రజతమవిద్యాధిష్ఠానే ఇదమవచ్ఛిన్నచైతన్యే
వర్తతే। అస్మన్మతే సర్వస్యాపి కార్యస్య స్వోపాదానావిద్యాధిష్ఠానాశ్రితత్వనియమాత్। ఇదం చైతన్య
నిష్ఠరజతస్య కథమిదం రజతమితి పురోవర్తితాదాత్మ్యం। ఉచ్యతే। న్యాయమతే ఆత్మనిష్ఠసుఖాదేః శరీ
రనిష్ఠత్వేనోపలంభః శరీరస్య సుఖాద్యధికరణత్వావచ్ఛేదకత్వాత్। తథా చైతన్యమాత్రస్య రజతం ప్రత్య

ధిష్ఠానతయా ఇదమవచ్ఛిన్నచైతన్యస్య తదధిష్ఠానత్వే ఇదమోఽవచ్ఛేదకతయా రజతస్య పురోవర్తినా సం
సర్గప్రత్యయ ఉపపద్యతే। తస్య చ విషయచైతన్యస్య తదంతఃకరణోపహితచైతన్యాభిన్నతయా విష
యచైతన్యే అధ్యస్తమపి రజతం సాక్షిణ్యధ్యస్తం। కేవలసాక్షివేద్యం సుఖాదివదన్యవేద్యమిత్యుచ్యతే। నను
సాక్షిణ్యధ్యస్తత్వే అహం రజతమితి ప్రత్యయః స్యాత్ అహం సుఖీతివదితి చేదుచ్యతే। న హి సుఖాదీ
నాం అంతఃకరణావచ్ఛిన్నచైతన్యనిష్ఠావిద్యాకార్యత్వప్రయుక్తమహం సుఖీతి జ్ఞానం। సుఖాదీ
నాం ఘటాదివద్విషయచైతన్య ఏవాధ్యాసాత్। కింతు యస్య యదాకారానుభవసంస్కారసహకృతావి
ద్యాకార్యత్వం తస్య తదాకారానుభవవిషయత్వమిత్యేవానుగతం నియామకం। తథా చ ఇదమా
కారానుభవసంస్కారసహకృతావిద్యాకార్యత్వాద్ఘటాదేరిదమాకారానుభవవిషయత్వం।
అహమాకారానుభవాహితసంస్కారసహకృతావిద్యాకార్యత్వాదంతఃకరణాదేరహమనుభవ
విషయత్వం। శరీరేంద్రియాదేరుభయవిధానుభవసంస్కారసహితావిద్యాకార్యత్వాదుభయ
విధానుభవవిషయత్వం। తథా చోభయవిధానుభవః। ఇదం శరీరం। అయం దేహః। అహం మను

వెఖాం

౧౦ ష్ఠః। అహం బ్రాహ్మణః। ఇదం చక్షుః। అహం కాణః। ఇదం శ్రోత్రం। అహం బధిర ఇతి। శుక్తౌ చ ప్రాతి
భాసికరజతస్య ప్రమాతృచైతన్యాభిన్నేదమవచ్ఛిన్నచైతన్యే ఽధ్యాస్త విద్యాకార్యత్వే ఽపీదం రజతమితి సత్యస్థ
లీయేదమంశాకారానుభవాహితసంస్కారజన్యత్వాదిదమాకారానుభవవిషయతా। రజతం
రజతమిత్యత్రాంశానుభవవిషయతత్త్వానుసంధేయం। రజతమపి మిథ్యారజతస్య సాక్షాత్సాక్షిసంబంధ
తయా భాగానుభవే రజతేన గుణాచరజ్ఞానాభాసరూపాయా అవిద్యావృత్తే రభ్యుపగమః; కైషు ధర్మి
తి చేత్। ఉచ్యతే। స్వగుణాచరవృత్త్యపి హి తచ్చైతన్యాభిన్నసత్తాకతాపభావస్య విషయాపరోక్ష్యరూపతయా
తస్యాపరోక్ష్యస్యాసిద్ధయుతత్వాద్యభ్యుపగమాత్। కిమిదం వృత్తేః రజతాకారవృత్తేశ్చ ప్రత్యేకమస్తి
కవిషయత్వే గుణమతవద్విశిష్టజ్ఞానాభ్యుపగమకుతో భ్రమజ్ఞాననిర్ఘి రితి చేన్న। వృత్తిద్వయప్రతిబిం
బితచైతన్యస్యైకస్య సత్యమిథ్యావస్తుతాదాత్మ్యావగాహిత్వేన భ్రమత్వోపపాదనాత్। అత ఏవ సాక్షిజ్ఞానస్య
సత్యాసత్యవిషయతయా అప్రామాణ్యమపి యథా ప్రామాణ్యోత్పత్తిః స్వతః ప్రమాయికాణాం। కిం
సిద్ధాంతే దేశాంతరీయరజతమప్యవిద్యాకార్యమథ స్వం చేతి కథం శుక్తిరూప్యస్యత్రైకాలిక్యస్యాపి

తి చేన్న । త్వత్కృతేన సత్త్వతోఽవిశేషేఽపి కేషాంచిత్ క్షణికత్వం కేషాంచిత్ స్థాయిత్వమిత్యత్ర యదపరోఽయమస్తకం తద
వస్థాభావవిశేషాదికం మమాపి । యద్యప్యేషు పదార్థేష్వపి అవిద్యైవ మూలకత్వేనోపాదానం తు । శుక్తిరూప్య
స్వాపికాబాధ్యయోర్దోషాః । తథాచ ఆగంతుకదోషజన్యత్వం ప్రాతిభాసికత్వప్రయోజకం । అత ఏవ స్వ
వి ప్నోపలబ్ధరథాదీనాం ఆగంతుకనిద్రాదోషజన్యత్వాత్ప్రాతిభాసికత్వం । నను స్వప్నస్థలే స్వాప్నానుభూతరథాదేః
స్మరణమాత్రత్వేనైవోపపత్తౌ రథాదిసృష్టిః కల్పనాగౌరవాదితి చేన్న । రథాదేః స్మృతిమాత్రాభ్యుపగ
మే రథం పశ్యామి స్వప్నే రథమద్రాక్షమిత్యాద్యనుభవవిరోధాపత్తేః । అథ రథాన్ రథయోగాన్ పథః సృజత
ఇతి రథాదిసృష్టిప్రతిపాదకశ్రుతివిరోధాపత్తేశ్చ । తస్మాచ్ఛుక్తిరూప్యవత్స్వప్నోపలబ్ధరథాదయోఽపి ప్రా
తిభాసికాః యావత్ప్రతిభాసమవతిష్ఠంతే । నను స్వప్నరథాద్యధిష్ఠానతయోపలభ్యమానోఽయం దేశవిశేషః స్వా
పే తదాఽసన్నిహితతయా అపరోక్షప్రాతిభాసికదేశోఽభ్యుపగంతవ్యః తథాచాధిష్ఠానం కుత్రే
తి చేన్న । చైతన్యస్య స్వయంప్రకాశస్య రథాద్యధిష్ఠానత్వాత్ । ప్రతీత్యపరోక్షరథాదిరస్తీత్యేవ ప్రతీయ
తదితి సత్త్వాంశే స్వప్రకాశచైతన్యమేవ అధిష్ఠానం దేశవిశేషాంశశ్చిదధ్యస్తః । ప్రాతిభాసికరథాదీనాం

౧౧ త్రియత్రావస్థత్వమవిశ్రాంతిభాసకం। తథా సత్యం త్రితయం నామ ప్రపంచమాత్రం। అహం గతం ప్రణతత్వాదిప్రతీతౌ తాసాం
ఫలం తు పూర్వపూర్వనష్టస్య స్పష్టం। స్వప్నగతాదయః సాక్షాద్యోగ్యాః పరిణామా ఇతి కేచిత్। అంతఃకరణాధ్యా
సాతత్పరిణామా ఇత్యన్యే। శుక్తిరజతాదేః సంస్థితైతద్యావత్సత్త్వే బాధ్యంతత్వాత్సాక్షాత్కారాభావే జాగరణే విస్పష్టే
శో దర్శితరజతాదయో అనువర్తేరన్। ఇష్యతే। తాదృక్త్వేనోపాధివిశేషః స్వచిదుపాదానస్య కల్పితత్వవిశేషా
దేవోపాదానే। అబాధ్యా బాధః। స్థితియత్నస్తు నివృత్తిః। అధిష్ఠానసాక్షాత్కారః। తేన విరోధ
సాదానభూతం [illegible] తంమూలావిద్యాయా అనివృత్తిః। తదిదం ప్రత్యక్షం సాక్షాత్కారాభావాత్స్వప్నప్రపంచమూల
బాధకత్వముసలప్రహారేణ ఘటాదేరివ విరోధిప్రత్యయాంతరోదయే స్వజనకీభూతనిద్రాదిదోషనాశే
నాగతాదేర్నివృత్తౌ విరోధః। ఏవం చ శుక్తిరూప్యస్య శుక్త్యవచ్ఛిన్నచైతన్యనిష్ఠతూలావిద్యాకార్యత్వపక్షే
శుక్తివిజ్ఞానేన తదజ్ఞానేన సహ రజతస్య బాధః। మూలావిద్యాకార్యత్వపక్షే మూలావిద్యాయాః ప్రత్య
సాక్షాత్కారమాత్రనివర్త్యతయా రజతస్య తత్ర శుక్తిజ్ఞానానివర్త్యతయా రజతస్య తత్ర శుక్తిజ్ఞానాన్నివృత్తి
మాత్రం ముసలప్రహారేణ ఘటస్యేవ। శుక్తిరజతస్య ప్రతిభాసమాత్రసత్త్వాభ్యుపగమే ఇదం రజతమి

ది త్రైకాలికనిషేధబుద్ధేరసాధనత్వాత్। కిం త్విదానీమిదం రజతమిదానీం ఘటః శూన్యమితి వదతీతి చేన్న। నహి తత్ర ర
జతత్వావచ్ఛిన్నప్రతియోగితాకాభావో నిషేధధీవిషయః కింతు తాత్త్వికపారమార్థికత్వావచ్ఛిన్నప్రాతిభా
సికరజతప్రతియోగికః వ్యధికరణధర్మావచ్ఛిన్నప్రతియోగితాకాభావానభ్యుపగమాత్। నను ప్రాతిభా
సికే రజతే పారమార్థికత్వమవగతం న వా। అనవగతే ప్రతియోగితావచ్ఛేదకావచ్ఛిన్నాజ్ఞానాదభావప్రత్య
క్షానుపపత్తిః। అవగతేఽప్యపరోక్షావభాసస్య తత్త్వాత్ విషయసత్తాయత్తత్వాత్। రజతే పారమార్థిక
త్వమప్యనిర్వచనీయం రజతవదపి తుచ్ఛమితి తదవచ్ఛిన్నరజతసత్త్వే తదవచ్ఛిన్నాభావస్తత్ర కథం వర్తత ఇ
తి చేన్న। పారమార్థికత్వస్య అధిష్ఠానైకనిష్ఠస్య రజతప్రతిభాసనసంభవేన రజతనిష్ఠపారమార్థికత్వోత్పత్తే
రనభ్యుపగమాత్। యత్రారోప్యమసన్నికృష్టం తత్రైవ ప్రాతిభాసికవస్తూత్పత్తేరంగీకారాత్। అత ఏవేంద్రి
యసన్నికృష్టజపాకుసుమగతలౌహిత్యస్య స్ఫటికే ప్రతిభాసంభవాత్ స్ఫటికే అనిర్వచనీయలౌహిత్యోత్పత్తిః।
నన్వేవం యత్ర జపాకుసుమం ద్రవ్యాన్తరవ్యవధానాదసన్నికృష్టం తత్ర లౌహిత్యప్రతీత్యా ప్రాతిభాసికలౌ
హిత్యం స్వీక్రియతామితి చేన్న। ఇష్టత్వాత్। ఏవం ప్రత్యక్షభ్రమాన్తరేష్వపి ప్రత్యక్షసామాన్యలక్షణానుగమో ఽయ

భావార్థః ప్రత్యక్షలక్షణే సంభవాద్దర్శనీయః। ఉక్తప్రత్యక్షం ప్రకారాంతరేణ ద్వివిధం। ఇంద్రియాజన్యం ఇంద్రియజ
న్యం చేతి। తత్రేంద్రియాజన్యం సుఖాదిప్రత్యక్షం। మనస ఇంద్రియత్వస్యాకరణత్వాత్। ఇంద్రియాణి ఘ్రాణరసన
చక్షుశ్శ్రోత్రత్వగాఖ్యాని పంచ। సర్వాణీంద్రియాణి స్వస్వవిషయసంయుక్తాన్యేవ ప్రత్యక్షజ్ఞానం జనయంతి।
తత్ర ఘ్రాణరసనత్వగింద్రియాణి స్వస్థానస్థితాన్యేవ గంధరసస్పర్శోపలంభాన్ జనయంతి। చక్షుశ్శ్రోత్రే తు
స్వత ఏవ విషయదేశం గత్వా స్వస్వవిషయం గృహ్ణీతః। శ్రోత్రస్యాపి చక్షురాదివత్ పరిచ్ఛిన్నతయా భేర్యాది
దేశగమనసంభవాత్। అత ఏవ శంఖభేర్యాదిశబ్దో మయా శ్రుత ఇతి। వీచీతరంగన్యాయేన కర్ణశష్కుల్యాం ప్రవే
శే అనంతశబ్దోత్పత్తికల్పనాగౌరవం భేరీశబ్దో మయా శ్రుత ఇతి ప్రత్యక్షస్య భ్రమత్వం చ స్యాత్॥ ॥తదేవం
వ్యాఖ్యాతం ప్రత్యక్షం॥ ॥అథానుమానం నిరూప్యతే। అనుమితికరణమనుమానం। అనుమితిశ్చ వ్యాప్తిజ్ఞానత్వే
న వ్యాప్తిజ్ఞానజన్యా। వ్యాప్తిజ్ఞానానువ్యవసాయాదేస్తత్త్వేన తజ్జన్యత్వాభావాన్నానుమితిత్వం। అనుమితికరణం
చ వ్యాప్తిజ్ఞానం। తజ్జన్యసంస్కారోఽవాంతరవ్యాపారః। న తు తృతీయలింగపరామర్శః అనుమితికరణం। తస్యాను
మితిహేతుత్వాసిద్ధ్యా తత్కరణత్వస్య దూరనిరస్తత్వాత్। న చ సంస్కారజన్యత్వేనానుమితేః స్మృతిత్వప్రసంగః। స్మృతిప్రా

గభావజన్యత్వస్య సంస్కారమాత్రజన్యత్వస్య వా స్మృతిత్వప్రయోజకత్వం సంస్కారధ్వంససాధారణసంస్కారజన్యత్వ
స్యైవ ప్రయోజకత్వాత్। న చ యత్ర వ్యాప్తిస్మరణోదయ ఇతి తత్ర కథం సంస్కారనాశ ఇతి వాచ్యం। వ్యాప్తిస్మృతి
స్తత్సంస్కారస్యైవ నాశ ఇతి హేతుత్వాత్। న హి స్మృతేః సంస్కారనాశకత్వే నియమః। స్మృతిధారాదర్శనాత్।
నోద్బుద్ధసంస్కారానాశ ఇత్యాపత్తిః। తదుద్బోధకస్యాపి సహకారిత్వాత్। ఏవం చాయం ధూమవానితి పక్ష
ధర్మతాజ్ఞానే ధూమో వహ్నివ్యాప్య ఇత్యుద్బోధకాహితసంస్కారోద్బోధే సతి వహ్నిమానిత్యనుమితిర్భవతీ
తి న తు ముఖ్యవ్యాప్తిస్మరణం తజ్జన్యం వహ్నివ్యాప్యధూమవానయమిత్యాదివిషయవిశిష్టజ్ఞానం వా హేతుత్వేన క
ల్పనీయం। గౌరవాద్గ్రాహ్యమాచ్చ। తచ్చ వ్యాప్తిజ్ఞానం వహ్నివిషయకత్వాంశ ఏవ కారణం న తు పర్వతవిషయకత్వాం
శ ఇతి। పర్వతో వహ్నిమానితి జ్ఞానస్య పక్షధర్మాంశ ఏవానుమితిత్వం న పర్వతాద్యంశే తదంశే ప్రత్యక్షత్వస్యోపపాదిత
త్వాత్। వ్యాప్తిశ్చాశేషసాధనాశ్రయాశ్రితసాధ్యసామానాధికరణ్యరూపా। సా చ వ్యభిచారాదర్శనే సతి సహ
చారదర్శనేనైవ గృహ్యతే। తచ్చ సహచారదర్శనం భూయోదర్శనం సకృద్దర్శనం వేతి విశేషో నాదరణీయః। సహ
చారదర్శనత్వస్యైవ ప్రయోజకత్వాత్। తస్యానుమానాప్రామాణ్యరూపమేవ। న తు కేవలాన్వయి। సపక్షస్యాపి ధర్మ

తెఖాం

౧౨ స్వఅస్యక్షత్రం స్యాం స్వాత్వం తాభ్యాం వప్రతియోగిత్వేన త్వం తాభ్యాం వాప్రతియోగిసాధ్యకత్వరూపవత్వేవ
లాంక్ష్యయిత్వసాధ్యసిద్ధిః। సాధ్యమానస్యవృత్తిశేషరూపవత్వం। సాధ్యభావసాధ్యాభావశీరూపశవ్యాప్తి
జ్ఞానస్యసాధకేనసాధ్యస్య మితావశ్య వయోగాత్। కథం తర్హి కథం మూఢావశ్యయవ్యాప్తిమవిరుద్ధా
భివృత్తిశేషవ్యాప్తిజ్ఞానావశ్యమితి:। అథార్థపత్తిప్రమాణాదితిపక్షాన్తమః। అత ఏవాస్య మానస్యాభ్య
యవృత్తిశేషరూపవత్వం। వృత్తిశేషవ్యాప్తిజ్ఞానస్యాంగమిత్యపేంతుతావత్। తజ్జ్ఞానమానంసాధ్యధర్మవరా
ర్థభేదేద్వివిధం। తత్రసాధ్యధర్మం తూంక్తమేవ। పరార్థం తుస్వాంయసాధ్యం। న్యాయోంగానాం వయవసము
దాయః। అవయవాశ్చత్రయ ఏవ ప్రతిజ్ఞాహేతూదాహరణరూపాః। ఉదాహరణోపనయనిగమ
నరూపావా। తదేవంపాంచావయవరూపాః। అవయవత్రయస్యైవ వ్యాప్తిపక్షధర్మతయోరుపదర్శన
సంభవేనాధికావయవద్వయస్య వ్యర్థత్వాత్। ఏవముదాహరణేపితత్సాధ్యస్యాంతర్భావితత్వాత్ అధికమిథ్యాత్వ
సిద్ధిః। తథాహి ప్రపంచస్య మిథ్యాప్రపంచాధికత్వాత్ యదేవంతదేవం యథాశుక్తిరూప్యం। ఉభయ
వ్యాప్తౌ తావసిద్ధిః। తస్యసాధితత్వాత్। ఉభయప్రయోగే। శుక్తిరూప్యస్యజ్ఞానపార్శ్వదీనాం మిథ్యాత్వప్రసిద్ధ

భిన్నత్వస్యైవ లాఘవేన ప్రయోజకత్వాత్। మిథ్యాత్వం స్వాశ్రయత్వేనాభిమతయావన్నిష్ఠాత్యంతాభావ
ప్రతియోగిత్వం। అభిమతపదమసంభవవారణాయ। యావత్పదమర్థాంతరవారణాయ। తదుక్తం
సర్వేషామపి భావానాం స్వాశ్రయత్వేన సంమతే। ప్రతియోగిత్వమత్యంతాభావం ప్రతి మృషాత్మతేతి।
యద్వా అయం పటః ఏతత్తంతునిష్ఠాత్యంతాభావప్రతియోగీ పటత్వాత్। పటాంతరవత్। ఇత్యనుమా
నం మిథ్యాత్వే ప్రమాణం। తదుక్తం। అంశినః స్వాంశగాత్యంతాభావస్య ప్రతియోగితా। అంశిత్వాదితరాం
శవదిత్యేవ గుణాదిషు ఇతి। నను ఘటాదేర్మిథ్యాత్వే సన్ ఘట ఇతి ప్రత్యక్షేణ బాధః। అధిష్ఠానప్రత్యక్షం సత్తా
యాస్తత్ర విషయతయా ఘటాదేః సత్త్వాభావనిశ్చయః। నను నీరూపస్య బ్రహ్మణః కథం చాక్షుషాదివిషయ
తేతి వాచ్యం। నీరూపస్యాపి కాలాకాశాదేః ప్రత్యక్షవిషయతాపత్తేః। నను నీరూపస్య ద్రవ్యస్య చక్షురాద్యయో
గ్యత్వమితి నియమః। ముక్తత్వేన బ్రహ్మణో ద్రవ్యత్వాపత్తిశ్చేః। గుణాశ్రయత్వం సమవాయికారణత్వం వా
ద్రవ్యత్వమిత్యభిమతం। నిర్గుణస్య బ్రహ్మణో గుణాశ్రయతా। నాపి సమవాయికారణతా। సమ

వేదాం
౧౪ హాయాం నిషేధః। అస్తు వా ప్రపంచత్వం బ్రహ్మణః తథాపి ఘటాదీనాం ప్రపంచస్య తాదాత్మ్య చాక్షుషాదిజ్ఞానవిషయత్వేన అ
విరోధః। యద్వా త్రివిధం సత్త్వం పారమార్థికం వ్యావహారికం ప్రాతిభాసికం చ। పారమార్థికస
త్త్వం బ్రహ్మణః వ్యావహారికసత్త్వమాకాశాదేః ప్రాతిభాసికం శుక్తిరజతాదేః। తథా చ ఘటః సన్నితి ప్ర
త్యక్షస్య వ్యావహారికసత్త్వవిషయత్వేన ప్రామాణ్యం। అస్మిన్ పక్షే చ ఘటాదేర్బ్రహ్మణి నిషేధః స్వరూపేణ న
కింతు పారమార్థికత్వేనైవేతి న విరోధః। అస్మిన్ పక్షే మిథ్యాత్వలక్షణే పారమార్థికత్వావచ్ఛిన్నప్ర
తియోగిత్వమత్యంతాభావవిశేషణం ద్రష్టవ్యం। తస్మాదుపపన్నం మిథ్యాత్వానుమానమితి॥ ॥ ॥
అథోపమానం నిరూప్యతే। తత్ర సాదృశ్యప్రమాకరణముపమానం। తథా హి నగరేషు దృష్టగోపిండ
స్య పురుషస్య వనం గతస్య గవయేంద్రియసన్నికర్షే సతి భవతి ప్రతీతిరయం పిండో గోసదృశ ఇతి
తదనంతరం చ భవతి నిశ్చయః అనేన సదృశీ మదీయా గౌరితి। తత్రాన్వయవ్యతిరేకాభ్యాం గవయ
నిష్ఠగోసాదృశ్యజ్ఞానం కరణం। గోనిష్ఠగవయసాదృశ్యజ్ఞానం ఫలం। న చేదం ప్రత్యక్షేణ సంభవతి।

గేహాదిం చక్షుష్మత దిం ప్రత్యక్షం నిర్ణయాత్। నాప్యనుమానం। నగరీతగేహాసామర్థ్యసాధ్యతల్లింగప్రాప్తేః। నాపి
ముఖ్యయోర్గౌరివ గవయ ఇత్యాదౌ ఏతత్స్వాభావ్యప్రతియోగిత్వాత్ యోగ్యతా సాదృశ్యప్రతియోగి
న త్వన్యత్ర: యథా చైత్రస్య సాదృశ్యప్రతియోగీ చైత్రః మైత్రస్య సదృశ ఇత్యనుమానం తత్త్వం భవ ఇతి వాచ్యం
ఏవం విధానుమానాభావాత్ అన్యాదృశస్య మహ యోగ్యో రీతి ప్రతిపత్తేర్భవతి। ఉపమినోమీ
త్యనువ్యవసాయాత్। తస్మాదుపమానం మానాంతరం॥ ॥అథాగమో నిరూప్యతే॥ యస్య వాక్యస్య
తాత్పర్యవిషయీభూతసంసర్గో మానాంతరేణ న బాధ్యతే తత్ర తద్వాక్యం ప్రమాణం।
వాక్యజన్యజ్ఞానే ఆకాంక్షా యోగ్యతాసత్తయః తాత్పర్యజ్ఞానం చేతి చత్వారి కారణాని। తత్ర పద
దార్థానాం పరస్పరజిజ్ఞాసావిషయత్వయోగ్యత్వమాకాంక్షా। క్రియాశ్రవణే కారకస్య తస్య
శ్రవణే క్రియాయాః కారకాశ్రవణే ఇతి కర్తవ్యతాయాం జిజ్ఞాసావిషయత్వాత్। అజిజ్ఞాసోర
పి వాక్యార్థబోధా యోగ్యత్వముపాత్తం। తదభేదకం క్రియాత్వకారకత్వాదికమితి కేచిత్
వాస్తుతః। అభిధాన్వయానమాత్రవిశిష్టపదప్రతిపాద్యత్వం తదభేదకమితి తత్త్వమభావాత్

వేవాం

౧౨ విహాక్షేష్వషు గావాప్తిః। ఏతాదృశాభిప్రాయేణైవ బలాబలాధికరణే శాస్త్రైకదేశ్యప్యామిక్షా వాజిభ్యాం
వాజినమిత్యత్ర వైశ్వదేవయాగస్యామిక్షాఖ్యత్వేన వాజినికాంక్షేతి ప్రవదంతః। నను తత్రాపి వాజి
నస్యాజిజ్ఞాసావిషయత్వేన తదభావగ్రస్తత్వమస్త్యేవ ప్రదేయద్రవ్యత్వస్యయోగవశేనావితజిజ్ఞాసావి
షయత్వావచ్ఛేదకత్వాదితి చేన్న। స్వసమానజాతీయప్రదాతృత్వద్రవ్యయామాంధవినహంసహంకృతప్ర
దేయద్రవ్యత్వస్యైవ తదవచ్ఛేదకత్వేన వాజినద్రవ్యస్యస్వసమానజాతీయామిక్షాద్రవ్యోద్యయమా
ధనసహకృతత్వేన తాదృశావచ్ఛేదకతాభావాత్। ఆమిక్షాయాం తు నైవం। వాజినాద్యయసన్నతదా
నుపస్థానాత్। తదా వంశానంతరేష్వపి దుర్బలత్వప్రయోజకాకాంక్షా విరహః ఏవం ద్రష్టవ్యః।
యోగవత్తాచతాత్పర్యవిషయసంసర్గబాధః। వస్తుంగానిశ్చితత్వాదౌ తాదృశసంసర్గబా
ధాత్। న ప్రజాపతిరాత్మనోవపాముదఖిదదిత్యాదావపి తాత్పర్యవిషయపశుప్రాశస్త్యబా
త ధాత్। యోగవత్త్వమభావాత్సవిహాక్షేష్వపి। వాచ్యార్థబాధపి లక్షణాప్రయోజ్యాబాధాభా

వాదయోర్భిన్నత్వాత్। ఆసత్తిశ్చ అవ్యవధానేన పదజన్యపదార్థోపస్థితిః। మానాంతరోపస్థాపితపదార్థ
స్యాన్వయబోధాభావాత్। అత ఏవాశ్రుతస్థలే తత్పదాధ్యాహారో బాధకమిత్యాహుః। అత ఏవ వైశి
ష్ట్యేనాసాదాభిక్షిత్రితి పదాధ్యాహారః। తత ఏవ వికృతిషు సూర్యాయేత్యాద్యుహ్యం। నేత్యాదిపద
దప్రయోగః। పదార్థశ్చ ద్వివిధః। శక్యో లక్ష్యశ్చేతి। తత్ర శక్తిర్నామ పదానామర్థేషు ముఖ్యావృత్తిః।
సా చ శక్తిః పదార్థాంతరం। సిద్ధాంతే కారణేషు కార్యానుకూలశక్తిమాత్రస్య పదార్థాంతరత్వే
న। సా చ తత్తత్పదజన్యపదార్థజ్ఞానే ఈశ్వరేచ్ఛారూపా నయుమేయా। ప్రాభాకరశక్తివిషయత్వం శక్యత్వం। తచ్చ జా
తావేవ న వ్యక్తౌ వ్యక్తీనామానంత్యేన గౌరవాత్। కథం తర్హి గవాదిపదాద్వ్యక్తిభానమితి చేత్। జాతేర్వ్య
క్తిసమానసంవిత్సంవేద్యత్వాదితి బ్రూమః। యద్వా గవాదిపదానాం వ్యక్తౌ శక్తిః స్వరూపసతీ తు జ్ఞాతా।
జాతౌ తు జ్ఞాతా హేతుః। వ్యక్త్యంశే శక్తిజ్ఞానమవికారకం। గౌరవాత్। జాతిశక్తిత్వజ్ఞానే సతి వ్యక్తిశ
క్తిత్వజ్ఞానం వినా వ్యక్తిధీవిలంబాభావాచ్చ। అత ఏవ నైయాయికమతే వ్యక్త్యంశశక్తిః స్వరూపసతీ। సిద్ధాంతే జ్ఞా
యమానశక్తివిషయత్వమేవ వాచ్యత్వమితి వ్యక్తిరవాచ్యా। అథ వా వ్యక్తిర్లక్షణయావగమః।

యథా శోణో ధావతి ఇత్యత్ర శోణశబ్దస్య శోణగుణవిశిష్టే లక్షణా। జాతివాచకస్య తద్వ్యక్తౌ లక్షణా। తదుక్తం।
అనన్యలభ్యశ్శబ్దార్థ ఇతి। ఏవం శక్తిర్నిరూపితా। అథ లక్షణా నిరూప్యతే। తత్ర లక్షణా
విషయో లక్ష్యః। లక్షణా చ ద్వివిధా కేవలలక్షణా లక్షితలక్షణా చేతి। తత్ర శక్యసాక్షాత్సంబంధః కేవలలక్షణా।
యథా గంగాయాం ఘోష ఇత్యత్ర ప్రవాహసంబంధిని తీరే గంగాపదస్య కేవలలక్షణా। యత్ర శక్యపరం
పరాసంబంధేన అర్థాంతరప్రతీతిస్తత్ర లక్షితలక్షణా। యథా ద్విరేఫపదస్య రేఫద్వయయుక్తభ్రమరపదఘ
టితపరంపరాసంబంధేన భ్రమరే వృత్తిః। గౌణ్యపి లక్షితలక్షణైవ। యథా సింహో మాణవక ఇత్యత్ర సిం
హపదవాచ్యసంబంధిక్రౌర్యాదిసంబంధేన మాణవకస్య ప్రతీతిః। ప్రకారాంతరేణ లక్షణా త్రివిధా।
జహల్లక్షణా అజహల్లక్షణా జహదజహల్లక్షణా చేతి। శక్యమనంతర్భావ్య యత్రార్థాంతరస్య ప్రతీ
గృహం తిస్తత్ర జహల్లక్షణా। యథా విషం భుంక్ష్వేత్యత్ర స్వార్థం విహాయ శత్రుగృహే భోజననివృత్తిర్లక్ష్యతే।
యత్ర శక్యార్థమంతర్భావ్యైవ అర్థాంతరప్రతీతిస్తత్రాజహల్లక్షణా। యథా శుక్లో ఘట ఇతి। అత్ర
హి శుక్లశబ్దః స్వార్థశుక్లగుణమంతర్భావ్యైవ తద్వతి ద్రవ్యే వర్తతే। యత్ర హి విశిష్టవాచకః శబ్దః

ఏకదేశం విహాయ ఏకదేశే వర్తతే తత్ర జహదజహల్లక్షణా। యథా సోయం దేవదత్త ఇతి। అత్ర హి పదద్వ-
యవాచ్యయోర్విశిష్టయోరైక్యానుపపత్త్యా పదద్వయస్య విశేష్యమాత్రపరత్వం। యథా వా తత్త్వమసీత్యా-
దౌ తత్పదవాచ్యస్య సర్వజ్ఞత్వాదివిశిష్టస్య త్వంపదవాచ్యేనాంతఃకరణవిశిష్టేనైక్యాభావాదైక్యసిద్ధ్యర్థం స్వరూ-
పే లక్షణేతి సాంప్రదాయికాః। వయం తు బ్రూమః। సోయం దేవదత్తస్తత్త్వమసీత్యాదౌ విశిష్టవాచక-
పదానామేకదేశపరత్వేపి న లక్షణా శక్త్యుపస్థితవిశిష్టయోరభేదాన్వయానుపపత్తౌ విశేష్యయోః శక్త్యుపస్థిత-
యోరేవాభేదాన్వయావిరోధాత్। యథా ఘటోఽనిత్య ఇత్యత్ర ఘటపదవాచ్యైకదేశఘటత్వస్యాయో-
గ్యత్వేపి యోగ్యఘటవ్యక్త్యా సహానిత్యత్వాన్వయః। యత్ర పదార్థైకదేశస్య విశేషణతయోపస్థితిః
తత్రైవ స్వాతంత్ర్యేణోపస్థితయే లక్షణాభ్యుపగమః। యథా నిత్యో ఘట ఇత్యత్ర ఘటపదాద్ఘటత్వస్య
స్వాతంత్ర్యేణోపస్థిత్యర్థం ఘటపదస్య ఘటత్వే లక్షణా। ఏవం తత్త్వమసీత్యాదివాక్యే-
పి లక్షణా శక్త్యా స్వాతంత్ర్యేణోపస్థితయోస్తత్త్వంపదార్థయోరభేదాన్వయబాధకాభావాత్। అన్యథా
గేహం ఘటః ఘటో రూపం ఘటమానయేత్యాదౌ ఘటత్వగేహాద్యభిమతాన్వయబోధాయోగ్యత-

వేదాం

౧౨ యాంతత్రాంబహుతాందిగదానాంవిశేషణమాత్రపరత్వం లక్షణాభావాత్। తస్మాత్తత్త్వమస్యాదివాక్యేష్వఖండార్థానాం
లక్షణయోక్తిరభ్యుపగమవాదేనైవేతి ధ్యేయం। జహదజహల్లక్షణోదాహరణం తు కాకేభ్యో దధి రక్ష్యతామిత్యా
దికమేవ। అత్ర శక్యతావచ్ఛేదకపరిత్యాగేన అశక్యదధ్యుపఘాతకత్వపురస్కారేణ అకాకేషు కాకశబ్దస్య ప్రవృత్తిః।
లక్షణాబీజం తు తాత్పర్యానుపపత్తిరేవ। నత్వన్వయానుపపత్తిః కాకేభ్యో దధి రక్ష్యతామిత్యత్రాన్వయాను
పపత్త్యభావాత్। గంగాయాం ఘోష ఇత్యాదౌ తాత్పర్యానుపపత్తిరపి సంభవాల్లక్షణా। సా చ క్వచిత్పదమా
త్రవృత్తిః। క్వచిత్తు వాక్యవృత్తిరపి। తథా హి గభీరాయాం నద్యాం ఘోష ఇత్యత్ర గభీరాయాం నద్యామితి పద
ద్వయస్య పదద్వయస్వార్థే లక్షణా। నను వాక్యస్యాశక్తతయా శక్యసంబంధలక్షణా। ఉచ్యతే। శక్యస్య యత్ప
దసంబంధం పదజ్ఞాప్యస్యేవ లక్ష్యసంబంధో లక్షణా। శక్యజ్ఞాప్యస్య యథా యత్పదార్థః తథా వాక్యార్థస్యాపి
శక్యాచిదనుపపత్తిః। ఏవమర్థవాదవాక్యానాం ప్రశంసారూపార్థానాం ప్రాశస్త్యలక్షణాభ్యుపగమాత్। సో
రోదీదిత్యాదినిందావాక్యానామనిష్టలక్షణా। అర్థవాదగతపదపదార్థానాం ప్రాశస్త్యలక్షణాభ్యుపగమ

ఏకైకపదైకలక్షణాయాం తదుత్పత్తిసంభవే పదానాం తత్రైవ తుల్యం స్యాత్। ఏవం చ వివక్షితప్రాశస్త్యస్వరూప
పదార్థప్రత్యాయకత్వేనాం అర్థవాదపదసముదాయస్య పదస్యైవ యావత్పదసంగతిః ఏకవాక్యం
భవతీత్యర్థవాదవాక్యానాం పదైకవాక్యతా। శ్రుతహోమవాక్యైకవాక్యతా। యత్ర ప్రత్యేకం భిన్నభిన్నసంసర్గ
ప్రతిపాదకయోర్వాక్యయోః కాంక్షావశేన మహావాక్యార్థబోధకత్వం। యథా దర్శపూర్ణమా
సాభ్యాం స్వర్గకామో యజేతేత్యాది వాక్యానాం సమిధో యజతీత్యాది వాక్యానాం చ పరస్పరాంగాంగిభా
వబోధకత్వైనైకవాక్యతా। తదుక్తం భట్టపాదైః। స్వార్థబోధే సమాప్తానాం అంగాంగిత్వాద్యపేక్షయా।
వాక్యానామేకవాక్యత్వం పునః సంహత్య జాయత ఇతి। ఏవం ద్వివిధాపి వాక్యైకవాక్యతా నిరూపితా। తదుపస్థితా
పత్తిః। సా చ శాబ్దబోధే హేతుః। తథైవ వాక్యయుక్తతిరేకదర్శనాత్। ఏవం మహావాక్యార్థబోధే అవాంతర
వాక్యార్థబోధో హేతుః। తథైవ వాక్యయోః వర్ణనాత్। క్రమప్రాప్తం తాత్పర్యం నిరూప్యతే। తత్ర ప్రతీతీచ్ఛయా
షే చ్చరితత్వం తాత్పర్యం। అర్థజ్ఞానేచ్ఛయా స్వపురుషోచ్చరితవాక్యాద్ అర్థప్రత్యయం జాయతాం ఇతి।
అయమర్థః ప్రతీయతాం అన్యత్పురుషోచ్చరితేతి విశేషదర్శనే తాత్పర్యభ్రమసంభవాభావాత్। తథాపీతి తాత్పర్య

వేదాం
౧౮

యోర్జ్ఞానోత్తరప్రతిబంధయోరభావ ఇతి వాచ్యం। శబ్దాకాంక్షాదేరతృప్తావపి తద్వాక్యాదర్థప్రతిపత్తిదర్శనాత్॥ ఉచ్యతే॥
తత్ప్రతీతిజనకత్వం తాత్పర్యం। గేహే ఘట ఇతి వాక్యం గేహఘటసంసర్గప్రతీతిజననయోగ్యం। ఏతద్ఘట
సంసర్గప్రతీతిజననయోగ్యమపి। తద్వాక్యం ఘటసంసర్గపరమిత్యుచ్యతే। సైంధవమానయేత్యాది
వాక్యం యదా లవణానయనప్రతీతీచ్ఛయా ప్రయుక్తం తదాశ్వసంసర్గప్రతీతిజననస్వరూపయో
గ్యత్వేన తత్పరత్వం లవణపరత్వదశాయామశ్వాదిసంసర్గజ్ఞానోత్పత్తిరితి చేత్। తదితరప్రతీతీచ్ఛయాను
చ్చరితత్వస్యాపి తత్ప్రతీతిజనకత్వస్య విశేషణాత్। తథా చ యద్వాక్యం యత్ప్రతీతిజననయోగ్యం సతి
తదన్యప్రతీతీచ్ఛయానుచ్చరితం తద్వాక్యం తత్సంసర్గపరమిత్యుచ్యతే। శుకాదివాక్యే అప్యవ్యుత్[illegible]నో
చ్చరితవేదవాక్యస్య చ ప్రతీతీచ్ఛాయా ఏవాభావేన తదన్యప్రతీతీచ్ఛయోచ్చరితత్వాభావేన లక్షణాక్రాంతత్వాదవ్యా
ప్తిః। న చోభయప్రతీతీచ్ఛయోచ్చరితే అవ్యాప్తిః। తదన్యమాత్రప్రతీతీచ్ఛయానుచ్చరితత్వస్య వివక్షితత్వాత్।
ఉక్తప్రతీతిజననయోగ్యతాయాం ఘటపదాదికాలశక్తిః। అస్మాకం మతే సర్వత్ర కారణతాయాం శక్తిరేవాప

భేదకతావచ్ఛేదికేషాంచిన్మోహః। తత్ర తాత్పర్యస్య తత్ప్రతీతిజనకత్వరూపస్య శాబ్దజ్ఞానజనకత్వే చతుర్థవర్ణ
కే తాత్పర్యస్య జ్ఞానహేతుత్వే కారకతావాక్యం తత్ప్రతీతిభయోచ్చరితత్వరూపతాత్పర్యస్య కారకతానపేక్షం।
ఆవశ్యకం తాత్పర్యనిర్ణయఫలవేదాంతవిచారవైయర్థ్యప్రసంగాత్। కేచిత్తు శాబ్దజ్ఞానే తావదజ్ఞాతే తత్ర తా
త్పర్యజ్ఞానం హేతురిత్యేవం వదంతి చతుర్థవర్ణకే వాక్యం తాత్పర్యసంశయవిపర్యయయోరుత్తరశా
బ్దబోధవిశేషే తాత్పర్యజ్ఞానం హేతురేవ ఇదం వాక్యమితత్పరమేవం తాత్పర్యపరమితి సంశయే తద్విపర్య
యే చ తదుత్తరవాక్యార్థవిశేషనిర్ణయస్య తాత్పర్యనిర్ణయం వినానుపపత్తేరితి వదంతి। తచ్చ తాత్పర్యం
వేదేషు మీమాంసాపరిశోధితన్యాయాదేవావధార్యతే। లోకే తు ప్రకరణాదినా। తత్ర లౌకికవాక్యం
మానాంతరావగతార్థకతయా అనువాదకం। వేదే తు వాక్యార్థస్యాపూర్వతయా నానువాదకం। తత్ర
లౌకికవైదికవాక్యయోః పరార్థేషు నిష్ఠాభిర్జ్ఞానమపి ప్రామాణ్యం। ఉత్తరత్ర జాతమిత్యాదిషు నిష్ఠాభిర్వర్ణప
దకపదానాం సామర్థ్యావధారణాత్। అత ఏవ వేదాంతవాక్యానాం బ్రహ్మణి ప్రామాణ్యం। యథా సైతత్త్వార్థావి

౭౯ విషయపరిశోధే వక్ష్యతే। తత్ర వేదాంతానాం పౌరుషేయత్వేఽపి పరమేశ్వరప్రణీతత్వేన ప్రామాణ్యమితి నైయాయికాః। వేదానాం
నిత్యత్వేన నిరస్తదూషణతయా ప్రామాణ్యమిత్యధ్వరమీమాంసకాః। అస్మాకం తు మతే వేదోఽనిత్యః ఉత్పత్తిమత్త్వా
త్। ఉత్పత్తిమత్త్వం చాస్య మహతో భూతస్య నిశ్వసితమేతద్యదృగ్వేదో యజుర్వేద ఇత్యాదిశ్రుతేః। నాపి వేదానాం
త్రిక్షణావస్థాయిత్వం। య ఏవం వేదో వదస్త్రాగ్భూతః స ఏవ మయాఽధీత ఇత్యాదిజ్ఞానవిరోధాత్। అత ఏవ గకారాది
వర్ణానామపి క్షణికత్వం। సోఽయం గకార ఇతి ప్రత్యభిజ్ఞావిరోధాత్। తథా చ వర్ణపదవాక్యసముదాయరూ
పస్య వియదాదివత్ సృష్టికాలోత్పత్తికత్వం ప్రళయకాలే ధ్వంసప్రతియోగిత్వం చ। కథమధ్యవర్ణానాముత్ప
త్తివినాశౌ న। అనంతగకారాణాం కల్పనాగౌరవాత్। అతస్తాల్వాదికరణవ్యాపారేణ వర్ణానామభివ్యక్తిః। తదుచ్చా
రణరూపవ్యంజకాభావాన్న విరుధ్యతే। అంధకారస్థఘటస్యోపలంభవత్। ఉత్పన్నో గకార ఇతి ప్రత్యయః
వర్ణాభివ్యక్తిజనకధ్వనిమాత్రోత్పత్తిరూపవిషయకః। సోఽయం గకార ఇతి ప్రత్యభిజ్ఞావిరోధాత్ ప్రమాణం। వర్ణాభివ్యక్తిజనకధ్వనిమిత్రోత్పత్తిరూపవిషయక
చకాలసంబంధవిషయత్వేన ప్రమాణం। తస్మాద్వేదానాం క్షణికత్వం। క్షణికత్వాభావేఽపి వియదాదిప్రపం

చవముత్పత్తిమత్త్వే పరమేశ్వరకర్తృకతయా పౌరుషేయత్వం వేదానామితి తదభిన్నానాంతేషాముత్పత్తిరితి చేన్న। న హి పు
రుషేణోచ్చార్యమాణత్వం పౌరుషేయత్వం। గురుమతశిష్యాధ్యాపకపరంపరయా పౌరుషేయత్వాపత్తేః।
నాపి పురుషాధీనోత్పత్తిమత్త్వం పౌరుషేయత్వం। నైయాయికాభిమతపౌరుషేయత్వానఙ్గీకారే అస్మ
దాదీనాం నిత్యానాం తథాత్వాపత్తేః। కింతు సజాతీయోచ్చారణానపేక్షోచ్చారణవిషయత్వం। తథా చ సర్గా
ద్యకాలే పరమేశ్వరః పూర్వసర్గసిద్ధవేదానుపూర్వీసమానానుపూర్వీకం వేదం రచితవాన్ న తు తద్విజా
తీయం వేదమితి న సజాతీయోచ్చారణానపేక్షోచ్చారణవిషయత్వం పౌరుషేయత్వం। భారతాదీనాం తు
సజాతీయోచ్చారణమనపేక్ష్యైవోచ్చారణమితి తేషాం పౌరుషేయత్వం। ఏవం పౌరుషేయాపౌరుషేయ
భేదేనాగమో ద్వివిధో నిరూపితః॥ ఇతి వేదాన్తపరిభాషాయామాగమపరిచ్ఛేదః॥ ॥ఇదానీమర్థా
పత్తిర్నిరూప్యతే॥ తత్రోపపాద్యజ్ఞానేనోపపాదకకల్పనమర్థాపత్తిః। తత్రోపపాద్యజ్ఞానం కరణం।
ఉపపాదకజ్ఞానం ఫలం। యేన వినా యదనుపపన్నం తత్తత్రోపపాద్యం। యస్యాభావే యస్యానుపపత్తిః

వేదాం

౨౦ తత్రోపపాదకం। యథా రాత్రిభోజనేన వినా దివా అభుంజానస్య పీనత్వమనుపపన్నమితి తాదృశపీన
త్వముపపాద్యం। యథా రాత్రిభోజనస్యాభావే తాదృశపీనత్వస్యానుపపత్తిరితి రాత్రిభోజనముపపా
దకం। రాత్రిభోజనకల్పనారూపాయాం ప్రమితావర్థస్య ఆపత్తిః కల్పనేతి షష్ఠీసమాసేన అర్థాప
త్తిశబ్దో వర్తతే। కల్పనాకరణే తు అర్థస్యాపత్తిః కల్పనా యస్మాదితి బహువ్రీహిసమాసే
న వర్తత ఇతి ఫలకరణయోరుభయోస్తత్ర శబ్దప్రయోగః। సా చార్థాపత్తిః ద్వివిధా। దృష్టార్థాపత్తిః
శ్రుతార్థాపత్తిశ్చేతి। దృష్టార్థాపత్తిర్యథా। ఇదం రజతమితి పురోవర్తిని ప్రతిపన్నస్య రజతస్య నేదం
రజతమితి తత్రైవ నిషిధ్యమానత్వం సత్యత్వేనుపపన్నమితి రజతస్య సద్భిన్నత్వం సత్వాత్యంతాభావవత్త్వం
వా మిథ్యాత్వం కల్పయతి। శ్రుతార్థాపత్తిర్యథా। యత్ర శ్రూయమాణవాక్యస్య స్వార్థానుపపత్తిముఖే
న అర్థాంతరకల్పనం। యథా తరతి శోకమాత్మవిదిత్యత్ర శ్రుతస్య శోకశబ్దవాచ్యబంధజాతస్య జ్ఞాన
నివర్త్యస్యానుపపత్త్యా బంధస్య మిథ్యాత్వం కల్ప్యతే। యథా జీవీ దేవదత్తో గృహే నేతి వాక్యశ్రవణానంతరం

జీవితో గృహాసత్త్వే బహిః సత్త్వం కల్పయతి। శ్రుతార్థాపత్తిర్ద్వివిధా। అభిధానానుపపత్తిరభిహితానుపప-
త్తిశ్చ। తత్ర యత్ర వాక్యైకదేశశ్రవణే అన్వయాభిధానానుపపత్త్యా అన్వయాభిధానోపయోగి పదాంతరం యత్ర
కల్ప్యతే తత్రాభిధానానుపపత్తిః। యథా ద్వారమిత్యత్ర పిధేహీత్యధ్యాహారః। న హి ద్వారమిత్యేతావదన్వ-
యాభిధానం పూర్ణమిదమన్వయాభిధానం విధానోపస్థాపకపదం వినానుపపన్నమితి క-
థం జ్ఞాతమితి చేన్న। అభిధానపదే కరణవ్యుత్పత్త్యా తాత్పర్యస్య వివక్షితత్వాత్। యథా ద్వారక-
ర్మకపిధానక్రియాసంసర్గపరత్వం విధానోపస్థాపకపదం వినానుపపన్నమితి జ్ఞానం తత్రాపి
సంభావ్యతే। అభిహితానుపపత్తిస్తు యత్ర వాక్యావగతోఽర్థోఽనుపపన్నత్వేన జ్ఞాతః సన్నర్థాం-
తరం కల్పయతి తత్ర ద్రష్టవ్యా। యథా స్వర్గకామో జ్యోతిష్టోమేన యజేతేత్యత్ర స్వర్గసాధనత్వస్య
క్షణికయాగగతతయావగతస్యానుపపత్త్యా మధ్యవర్త్యపూర్వం కల్ప్యతే। నచేయమర్థా-
పత్తిరనుమానేఽన్తర్భవితుమర్హతి। అన్వయవ్యాప్త్యజ్ఞానేఽన్వయిత్వేనార్థాపత్తేః। వ్యతిరేకిణాం నా-

నుమానత్వం ప్రాగేవ నిరస్తం। అత ఏవార్థాపత్తిస్థలే నానుమినోమీత్యనువ్యవసాయః కింత్వనేనేదం కల్పయా
మీతి। యత్త్వర్థాపత్తిస్థలే ఇదమనేన వినా అనుపపన్నమితి జ్ఞానం కరణమిత్యుక్తం తత్ర కిమిదం తేన వినానుప
పన్నత్వం। తదభావవ్యాపకాభావప్రతియోగిత్వమితి బ్రూమః। ఏవమర్థాపత్తేర్మానాంతరత్వసిద్ధావ్య
తిరేకిణో నానుమానాంతరం। పృథివీ ఇతరేభ్యో భిద్యత ఇత్యత్ర గంధవత్త్వమితరభేదం వినా అనుపపన్నమిత్యా
దిజ్ఞానస్య కారణత్వాత్। అత ఏవానువ్యవసాయః పృథివ్యామితరభేదం కల్పయామీతి॥ ॥ఇతి వే
దాంతపరిభాషాయామర్థాపత్తిపరిచ్ఛేదః॥ ॥షష్ఠం ప్రమాణం నిరూప్యతే॥ జ్ఞానకరణాజన్యాభావా
నుభవాసాధారణకారణమనుపలబ్ధిరూపం ప్రమాణం। అనుమానాదిజన్యాతీంద్రియాభావానుభవహేతావను
మానాదావతివ్యాప్తివారణాయ జ్ఞానకరణాజన్యాంతం। అదృష్టాదిసాధారణకారణే అతివ్యాప్తివారణాయాసాధారణేతి।
అభావస్మృత్యసాధారణకారణే సంస్కారే అతివ్యాప్తివారణాయానుభవేతి విశేషణం। నను భావానుమితిస్థలేప్యను
పలబ్ధ్యా వ్యాప్యాభావప్రత్యక్షతాపాతః విశేషాభావాదితి వాచ్యం। ధర్మాధర్మాద్యనుపలబ్ధిసత్త్వేపి తదభావానిశ్చయేన
యోగ్యానుపలబ్ధేరేవ అభావగ్రాహకత్వాత్। నను కేయం యోగ్యానుపలబ్ధిః। కిం యోగ్యస్య ప్రతియోగినో

అనుపలబ్ధిః ఉత యోగ్యస్య అధికరణే ప్రతియోగ్యనుపలబ్ధిః । నాద్యః స్తంభపిశాచాదిభేదస్య ప్రత్యక్షతాపత్తేః ।
నాంత్యః । ఆత్మని ధర్మాధర్మాభావస్యాపి ప్రత్యక్షాపత్తిరితి చేన్న । యోగ్యస్యానుపలబ్ధిరితి కర్మధారయాశ్ర
యణాత్ । అనుపలబ్ధేర్యోగ్యతా చ తర్కితప్రతియోగిసత్త్వప్రసంజితప్రతియోగికత్వం । యస్యా
భావో గృహ్యతే సతస్య ప్రతియోగినస్సత్త్వేనాధికరణే తర్కితేన ప్రసంజనయోగ్యత్వం యత్ప్రతియోగ్యనుపలబ్ధి
స్స్వరూపం యస్యానుపలంభస్తత్ర తదనుపలబ్ధేర్యోగ్యత్వమిత్యర్థః । తథా హి స్ఫీతాలోకవతి భూతలే
తే యది ఘటః స్యాత్తదా ఘటోపలంభస్స్యాదిత్యాపాదనసంభవాత్తాదృశఘటానుపలబ్ధిః ఘటాభావే యోగ్యానుపలబ్ధి
గమ్యః । అంధకారే తు తాదృశాపాదనాభావేనానుపలబ్ధిగమ్యతా । స్తంభపిశాచత్వస్య స్తంభత్వవత్ప్రత్య
క్షతాపత్త్యా తదభావో యోగ్యానుపలబ్ధిగమ్యః । ఆత్మని ధర్మాదిసత్త్వేఽప్యాత్మత్వం ద్రియతయా యుక్తస్య కథం
ఉపలంభాపాదనాసంభవాన్న ధర్మాద్యభావస్య అనుపలబ్ధిత్వం । ఉక్తరీత్యా అధికరణేంద్రియసన్ని
కర్షస్థలే అభావస్యానుపలబ్ధిత్వం తదానుమతమనుపపన్నం తత్ర ప్రత్యక్షం ఇంద్రియం వినా అభావాకారవృత్త్యా
అపి కరణాంతరం ఇంద్రియాన్వయవ్యతిరేకానువిధానాదితి చేన్న । ప్రతియోగ్యనుపలబ్ధేరభావానుగ్రాహకత్వ

వేదాం

౨౨ తుత్వేఽస్వత్వేఽకారణత్వమాత్రస్య కల్ప్యత్వాత్। ఇంద్రియసంబంధాభావేనమంసంనికర్షాభావే। అభావప్రత్య
క్షంతుత్వాత్। ఇంద్రియాన్వయవ్యతిరేకయోరధికరణజ్ఞానాద్యపేక్షణాత్వేఽన్యథాసిద్ధేః। అభూంతత్ర
ఘటోఽస్తీత్యాద్యభావానుభవస్థలే ఘటాభావాంశే ప్రత్యక్షత్వముభయసిద్ధమితి తద్వ్యాప్తిః। గ్రామః స్వర్ణాద
స్వీకర్తవ్యభూతలాదవభిన్నచైతన్యవర్తిఘటాభావావభిన్నస్యాపి ప్రమాత్రాభిన్నత్వం ఘటాభావస్య ప్రత్య
క్షత్వైవనిర్ధారితమితిచేత్। సత్యం। అభావప్రతీతేః ప్రత్యక్షత్వేఽపి తత్కరణస్యానుపలబ్ధేర్మానాంతరత్వాత్। ఫలీభూత
ప్రతీతౌ తజ్జ్ఞానే ప్రత్యక్షత్వేఽపి తత్కరణస్యాప్రత్యక్షప్రమాణతాయుతత్వమస్తి। దశమస్త్వమసీత్యాదివాక్యజ
న్యజ్ఞానస్య ప్రత్యక్షత్వేఽపి తత్కరణవాక్యస్య ప్రత్యక్షప్రమాణభిన్నప్రమాణత్వాభ్యుపగమాత్। ఫలవైజా
త్యం వినా కథం ప్రమాణభేద ఇతి చేన్న। వృత్తివైజాత్యమాత్రేణ ప్రమాణవైజాత్యోపపత్తేః। తథాహి ఘటాభావాకా
రవృత్తిరింద్రియజన్యా ఇంద్రియస్య విషయేణాసన్నికర్షాత్। కింతు ఘటానుపలబ్ధిరూపమానాంతరజ
న్యేతి అభ్యుపగమ్యతే। అనుపలబ్ధేర్మానాంతరత్వం। అనుపలబ్ధేర్మానాంతరత్వపక్షే ఘటాభావప్రతీతేః ప్రత్యక్షత్వేఽపి
తద్ఘటాభావస్య ప్రమేయస్యాపి ప్రత్యక్షతాపత్తౌ తత్రాప్యేవం వచనీయం ఘటాభావాంశే అభ్యుపగమ్యతే। అనుపలబ్ధిః।

తస్య మాయోపాదానత్వాత్ | అథవా తత్కార్యప్రవృత్తేః | మాయోపాదానత్వాభావే మాయాయా ఘటకాలకార్యోపాదాన
త్వాపత్తి ప్రవృత్తిరితి చేన్న | ఘటపటాదిషు పాంచభౌతికత్వానుభవాత్ తత్ప్రపంచే పాంచభౌతికత్వ విషయకః | కింతు ఘటాదిరూపేణ
వివర్తమానానాం సత్త్వాదీనాం పాంచభౌతికానాం తథాత్వమేవేతి తత్కార్యత్వాదితి భావః | అతో ప్రపంచస్య కార్యత్వేన
త్రిగుణాత్మకత్వేన ప్రపంచస్యాపి సాత్ | అస్తు వా ప్రతీతియోగి మతి తదభావ భ్రమస్తత తదభావ సాధారణ్యత్వం
తథాపి తదుపాదానం మాయైవ | సమ్యగుపాదానయోః ఏకత్వం తత్సాజాత్యం | తం తు ఘటయోః అవి
తథాపి తదుపాదానం మాయైవ | యత్కించిత్సాజాత్యస్య మాయాయా అవిద్యాయా అవిశేషాత్ పంచభూతాదిస్వ
తంతుత్వ పటత్వాదినా తథాత్వాత్ | యత్కించిత్సాజాత్యస్య మాయాయా ప్రతీకర్షం మాయోపాదాన
స్యచ మిథ్యాత్వ ధర్మస్య దృశ్యమానత్వాత్ | అత్ర తావత్ పరికల్పితం ప్రతికల్పం మాయోపాదానస్య
త్వమితి కథం శంకాః | అవిద్యాత్మకయోః ప్రపంచోపాదానయోః ఏకత్వ ప్రసక్తౌ ఉపాదానత్వస్య
చితి వాచ్యం | ప్రపంచ విభ్రమం ప్రాప్తం స్వీకృతం ప్రపంచస్య త్వాత్ | పరిణామిత్వరూపస్య ఉపాదానత్వస్య
చిత్యప్రసక్త్యా ప్రవృత్తేః | తథా చ ప్రపంచస్య పరిణామ్యుపాదానం మాయైవ ప్రస్తుతా ఇత్యలమతి ప్రసంగేన |
న చాభావ వస్తు విధః | ప్రాగభావః ప్రధ్వంసాభావ ఏకత్వం తావదేవోపాదానకత్వ | వృత్తిం దర్శ

సోత్పాద్యస్య ఘటాదేరుత్పత్తేః పూర్వం యో ఽభావః స ప్రాగభావః। ఇహ భవిష్యతీతి ప్రతీతివిషయః। తత్ర
ఘటస్య ముద్గరపాతానంతరం యో ఽభావః స ధ్వంసాభావః। ధ్వంసస్యాపి స్వాధికరణకపాలనాశే నాశస్వీ।
కారే ఘటస్యోన్మజ్జనాపత్తిః। ధ్వంసధ్వంసస్య ఘటప్రతియోగికధ్వంసత్వాత్। అన్యథా ప్రాగభావధ్వంసాత్మకఘ
టస్య వినాశే ప్రాగభావస్యోన్మజ్జనాపత్తిః। కిఞ్చైవమపి యత్ర ధ్వంసాధికరణం నిత్యం తత్ర కథం ధ్వంసనాశ ఇతి వాచ్యం
తాదృశమధికరణం యది చైతన్యవ్యతిరిక్తం తదా తస్యానిత్యత్వమభీష్టం ప్రపఞ్చవ్యతిరిక్తస్య నవస్య ప్రపఞ్చాన్తర్భావ
త్వాత్తథా యావద్ధ్వంసమానానాపత్తేః। యది చ ధ్వంసాధికరణం చైతన్యం తదా ధ్వంసనాశస్యాభీష్టః తథాపి చ ప్ర
తియోగికధ్వంసస్యాధిష్ఠానే ప్రతియోగ్యమానస్య అధిష్ఠానమాత్రత్వాత్। తదుక్తం అధిష్ఠానావశేషో హి నాశః
కల్పితవస్తునః ఇతి। ఏవం శుక్తిరూప్యవినాశో ఽపి ఇదమవచ్ఛిన్నచైతన్యమేవ। యత్రాధికరణే యస్య కాలత్రయే
ప్యభావః సో ఽత్యన్తాభావః। యథా వాయౌ రూపాత్యన్తాభావః। సో ఽపి వియదాదివత్ ధ్వంసప్రతియోగ్యే
వ। ఇదమిదం నేతి ప్రతీతివిషయో ఽన్యోన్యాభావః। అయమేవ విభాగో భేదః పృథక్త్వం చేతి వ్యవహ్రియతే।

భేదాతిరిక్తపృథక్త్వాదౌ ప్రమాణాభావాత్। అయం చాన్యోన్యాభావో ఽధికరణస్య సాదిత్వే సాదిః। యథా ఘటే పటభేదః। అధికరణస్యానాదిత్వే ఽనాదిరేవ। యథా జీవే బ్రహ్మభేదః। బ్రహ్మణి జీవభేదః। ద్వివిధో ఽప్యయం ధ్వంసప్రతియోగ్యేవ। అవిద్యానివృత్తౌ తత్పరతంత్రాణాం నివృత్త్యవశ్యంభావాత్। పునరపి భేదో ద్వివిధః। సోపాధికో నిరుపాధికశ్చేతి। తత్రోపాధిసత్తావ్యాప్యసత్తాకత్వం సోపాధికత్వం। తదభావవత్త్వం నిరుపాధికత్వం। తత్రాద్యో యథా ఏకస్యైవాకాశస్య ఘటాద్యుపాధిభేదాద్భేదః। యథా వా ఏకస్య సూర్యస్య జలభాజనభేదాద్భేదః। యథాత్మైకస్యైవ బ్రహ్మణః అంతఃకరణభేదాద్భేదః। నిరుపాధికభేదో యథా। ఘటే పటభేదః। బ్రహ్మణ్యపి ప్రపంచభేదాభ్యుపగమే ఽద్వైతవిరోధః। తాత్త్వికభేదానభ్యుపగమే వియదాదివదద్వైతావ్యాఘాతాత్। తదుక్తం సురేశ్వరాచార్యైః। అత్ర మాం భవతః కేయం సాధకత్వప్రకల్పనా। కిం న పశ్యసి సంసారం తత్రైవాజ్ఞానకల్పితమితి। అత ఏవ వివరణే ఽవిద్యాయాం ప్రాగభావవ్యతిరిక్తత్వం విశేషణం తత్త్వప్రదీపికాయాం అవిద్యాలక్షణే భావేతి విశేషణం సంగచ్ఛతే। ఏవం చతుర్విధానామభావానాం యోగ్యానుపలబ్ధ్యా ప్రతీతిః। తత్రానుపలబ్ధిర్మానాంతరం।

వేదాం
౭౪

ఏవముక్తానాం ప్రమాణానాం ప్రామాణ్యం స్వత ఏవోత్పద్యతే జ్ఞాయతే చ। తథా హి స్మృత్యనుభవసాధారణం
సంవాదిప్రవృత్త్యనుకూలం తద్వతి తత్ప్రకారకజ్ఞానత్వం ప్రామాణ్యం। తచ్చ జ్ఞానసామాన్యసామగ్రీప్రయోజ్యం।
నత్వధికం గుణమపేక్షతే ప్రమామాత్రే అనుగతగుణాభావాత్। నాపి ప్రత్యక్షప్రమాయాం భూయోవయ
వేంద్రియసన్నికర్షః రూపాదిప్రత్యక్షే ఆత్మప్రత్యక్షే చ తదభావాత్। సత్యపి తస్మిన్ పీతః శంఖ ఇతి ప్రత్యక్షస్య భ్రమ
౪ త్వాత్। అత ఏవ సల్లింగపరామర్శాదికమనుమిత్యాదిప్రమాయాం గుణః। అసల్లింగపరామర్శాదిస్థ స
లేపి విషయాబాధే అనుమిత్యాదేః ప్రమాత్వాత్। న చైవమప్రమాపి ప్రమా స్యాత్। జ్ఞానసామాన్యసామ
గ్రీవిశేషాదితి వాచ్యం దోషాభావస్యాపి హేతుత్వాంగీకారాత్। న చైవం పరతస్త్వం। ఆగంతుకభావకార
ణాపేక్షాయామేవ పరతస్త్వాత్। జ్ఞాయతే చ ప్రామాణ్యం స్వతః। స్వతో గ్రాహ్యత్వం చ దోషాభావే సతి యావ
త్స్వాశ్రయగ్రాహకసామగ్రీగ్రాహ్యత్వం। స్వాశ్రయో వృత్తిజ్ఞానం తద్గ్రాహకం సాక్షిజ్ఞానం తేనాపి వృత్తిజ్ఞా
నే గృహ్యమాణే తద్గతం ప్రామాణ్యం గృహ్యతే। న చైవం ప్రామాణ్యసంశయానుపపత్తిః తత్ర సంధిగతం ప్రమా

నాజ్ఞానం। స్వప్రాగభావవ్యతిరిక్తవిషయావరణస్వనివర్త్యస్వదేశగతవస్త్వంతరపూర్వకం భవితుమర్హతి అప్రకాశి
తార్థప్రకాశకత్వాత్ అంధకారే ప్రథమోత్పన్నప్రదీపప్రభావత్। అనాదిభావరూపం యద్విజ్ఞానేన విలీయతే
తదజ్ఞానమితి ప్రాజ్ఞా లక్షణం సంప్రచక్షతే॥ సంశయానురోధేన దోషస్యాపి సత్త్వేన దోషాభావఘటితస్వాశ్ర
యగ్రాహకాభావేన తత్ర ప్రామాణ్యస్యైవాగ్రహాత్। యద్వా స్వాశ్రయగ్రాహకగ్రాహ్యత్వయోగ్యత్వం స్వతస్త్వం। సంశయ
స్థలే ప్రామాణ్యస్య గ్రహణయోగ్యత్వేఽపి దోషవశేనాగ్రహాన్న సంశయానుపపత్తిః। అప్రామాణ్యం తు న జ్ఞా
నసామాన్యసామగ్రీప్రయోజ్యం। ప్రమాయామప్యప్రామాణ్యాపత్తేః। కింతు దోషప్రయోజ్యం। నాప్యప్రా
మాణ్యం స్వాశ్రయగ్రాహకగ్రాహ్యత్వం। అప్రామాణ్యఘటకతదభావవత్త్వాదేర్వృత్తిజ్ఞానాను
పస్థితత్వేన సాక్షిణా గ్రహీతుమశక్యత్వాత్। కింతు విసంవాదిప్రవృత్త్యాదిలింగకానుమిత్యాదివిషయ ఇతి ప
రత ఏవాప్రామాణ్యముత్పద్యతే జ్ఞాయతే చేతి॥ ॥ఇతి వేదాంతపరిభాషాయామనుపలబ్ధిపరిచ్ఛేదః॥
ఏవం నిరూపితానాం ప్రమాణానాం ప్రామాణ్యం ద్వివిధం। వ్యావహారికతత్త్వావేదకత్వం పారమార్థికతత్త్వా

వేదాం
౨౨

వేదకత్వం చేతి। తత్ర ప్రత్యక్షం స్వరూపావగాహి ప్రమాణవ్యతిరిక్తానాం సర్వప్రమాణానాముపజీవ్యం ప్రమాణానాం। తద్విషయాణాం వ్యవహారదశాయాం బాధాభావాత్। ద్వితీయస్య జీవబ్రహ్మైక్యపరాణాం వేదవాక్య జన్యత్వ ఆసీదిత్యాదీనాం తత్త్వమసీత్యాదీనాం తద్విషయస్య జీవపరైక్యస్య కాలత్రయాబాధ్యత్వాత్తత్త్వావేదక తత్త్వం। పదార్థజ్ఞానాధీనజ్ఞానమితి ప్రథమం తత్పదార్థయోర్లక్షణప్రమాణాభ్యాం నిరూప్యతే। తత్ర లక్షణం ద్వివిధం। స్వరూపలక్షణం తటస్థలక్షణం చేతి। తత్ర స్వరూపమేవ లక్షణం స్వరూపలక్షణం। యథా సత్యం జ్ఞానమనంతం బ్రహ్మేత్యత్ర సత్యాదికం స్వరూపలక్షణం।। నను స్వస్య స్వవృత్తిత్వాభావేన కథం లక్షణత్వమితి చేన్న। స్వస్యైవ స్వాపేక్షయా ధర్మిధర్మభావకల్పనయా లక్షణత్వసంభవాత్। తదుక్తం ఆనందో విషయానుభవో నిత్యత్వం చేతి సంతి ధర్మాః అపృథక్త్వేఽపి చైతన్యాత్పృథగివావభాసంత ఇతి। తటస్థలక్షణం నామ యావల్లక్ష్యకాలమనవస్థితత్వే సతి యద్వ్యావర్తకం తదేవ। యథా గంధవత్త్వం పృథివీలక్షణం। మహాప్రళయే

పరమాణుషూత్పత్తికాలేషు ఘటాదిషు గంధాభావాత్। ప్రకృతే చ జగజ్జన్మాదికారణత్వం। అత్ర జగత్పదేన కా-
ర్యజాతం వివక్షితం। కారణత్వం చ కర్తృత్వం। అతో నావిద్యాదావతివ్యాప్తిః। కర్తృత్వం చ తత్తదుపాదానగోచ-
రాపరోక్షజ్ఞానచికీర్షాకృతిమత్త్వం। ఈశ్వరస్య తావదుపాదానగోచరాపరోక్షజ్ఞానసద్భావే చ యః సర్వ-
జ్ఞః సర్వవిద్యస్య జ్ఞానమయం తపః తస్మాదేతద్బ్రహ్మ నామ రూపమన్నం చ జాయతే ఇత్యాదిశ్రుతిమాన-
కం। తాదృశచికీర్షాసద్భావే సోఽకామయత బహు స్యాం ప్రజాయేయేతి ఇత్యాదిశ్రుతిమానకం। తాదృశకృతౌ చ
తత్సోఽకురుతేత్యాది వాక్యం। జ్ఞానేచ్ఛాకృత్యన్యతమగర్భం లక్షణత్రితయమిష్టం వివక్షితం। అన్యథా వ్యర్థవి-
శేషణత్వాపత్తేః। అత ఏవ జన్మస్థితిధ్వంసానామన్యతమస్యైవ లక్షణే ప్రవేశః। ఏవం చ లక్షణనవకం సంపద్యతే।
బ్రహ్మణో జగజ్జన్మాదికారణత్వే చ యతో వా ఇమాని భూతాని జాయంతే। యేన జాతాని జీవంతి। యత్ప్ర-
యంత్యభిసంవిశంతీత్యాదిశ్రుతిమానం। యద్వాఽఖిలజగదుపాదానత్వం బ్రహ్మణో లక్షణం। ఉపాదా-
నత్వం చ జగదుపాదానాధిష్ఠానత్వం। జగదాకారేణ పరిణమమానమాయాధిష్ఠానత్వం వా। ఏతాదృశమేవో-

వేదాం

౧౨

రవానపానః। పాయ్వాదిస్థానవర్తీ। విష్వగ్గమనవాన్వాయుర్వ్యానః। అఖిలశరీరవర్తీ। ఊర్ధ్వగమనవా
నుత్క్రమణవాన్వాయురుదానః। కంఠస్థానవర్తీ। అశితపీతాన్నాదిసమీకరణః సమానో నాభిస్థానవర్తీ।
తైరేవ తమోగుణాంశైరపంచీకృతభూతైః పంచీకృతభూతాని జాయంతే। తాసాం త్రివృతం త్రివృతమే
కైకాం కరవాణీతి శ్రుతేః పంచీకరణోపలక్షణార్థత్వాత్। పంచీకరణప్రకారశ్చేత్థం। ఆకాశమంశాం ద్విధా
విభజ్య తయోరేకం భాగం పురస్కృత్య తుర్ధా విభజ్య తేషాం చతుర్ణామంశానాం వాయ్వాదిషు చతుర్షు భూ
తేషు సంయోజకం। ఏవం వాయుం ద్వేధా విభజ్య తయోరేకం భాగం పురస్కృత్య తుర్ధా విభజ్య ఏషాం చతుర్ణా
మంశానామాకాశాదిషు యోజకం। ఏవం తేజోంబుభువామపి। తదేవమేకైకభూతస్యార్ధం స్వాంశాత్మక
మర్ధాంతరం చతుర్విధభూతమయమితి। పృథివ్యాదీనాం సర్వేషామాధిక్యాత్పృథివ్యాదివ్యపదేశః। తదుక్తం
వైశేష్యాత్తు తద్వాదస్తద్వాద ఇతి। పూర్వోక్తైరపంచీకృతభూతైర్లింగశరీరం పరలోకయాత్రానిర్వా
హకం మోక్షపర్యంతస్థాయి మనోబుద్ధిభ్యాముపేతం జ్ఞానేంద్రియపంచకకర్మేంద్రియపంచక

ప్రాణాదిపంచకసంయుక్తం జాయతే। తదుక్తం। పంచప్రాణమనోబుద్ధిదశేంద్రియసమన్వితం। అపంచీకృ
తభూతోత్థం సూక్ష్మాంగం భోగసాధనమితి। తచ్చ ద్వివిధం। పరమపరంచ। పరం హిరణ్యగర్భలింగశ
రీరం। అపరమస్మదాదిలింగశరీరం। తత్ర హిరణ్యగర్భలింగశరీరం మహత్తత్త్వం। అస్మదాదిలింగశరీరం
అహంకార ఇత్యాఖ్యాయతే। ఏవం తమోగుణయుక్తేభ్యః పంచీకృతభూతేభ్యో భూమ్యంతరిక్షస్వ
ర్గమహర్జనస్తపఃసత్యాత్మకస్యోర్ధ్వలోకసప్తకస్య అతలపాతాలవితలసుతలతలాతలరసాతల
మహాతలాఖ్యాధోలోకసప్తకస్య బ్రహ్మాండస్య జరాయుజాండజస్వేదజోద్భిజ్జాఖ్యచతుర్విధ
స్థూలశరీరాణాముత్పత్తిః। తత్ర జరాయుజా నామ జరాయుభ్యో జాతాః మనుష్యపశ్వాదిశరీరా
ణి। అండజా అండేభ్యో జాతాః పక్షిపన్నగాదిశరీరాణి। స్వేదజాః స్వేదాజ్జాతాః యూకామశకా
దిః। ఉద్భిజ్జాః భూమిముద్భిద్య జాతాః వృక్షాదిః। తృణాదీనామపి పాపఫలభోగాయతనత్వేన శరీ
రత్వం। తత్ర పరమేశ్వరస్య పంచతన్మాత్రాద్యుత్పత్తౌ సప్తదశావయవోపేతలింగశరీరోత్పత్తౌ చ హిం

౧౬ తాదాత్మ్యమభిప్రేత్యేదం సర్వం యదయమాత్మా సచ్చ త్యచ్చాభవత్। బహు స్యాం ప్రజాయేయేత్యాదిశ్రుతి
షు బ్రహ్మప్రపంచయోస్తాదాత్మ్యవ్యపదేశః। ఘటః సన్ ఘటో భాతి ఘట ఇష్ట ఇత్యాదితాదృశవ్యవహారేష్వపి సచ్చి
దానందరూపబ్రహ్మతాదాత్మ్యాధ్యాసాత్। నన్వేవం కథం చిదధ్యాసాదన్యాదేరిష్టత్వవ్యవహారే దుఃఖస్యాపి తత్రాధ్యా
సాత్ తత్రాపీష్టత్వవ్యవహారాపత్తిరితి చేన్న। ఆరోపే సతి నిమిత్తానుసరణం న తు నిమిత్తమస్తీత్యారోపః ఇత్యభ్యు
పగమేన దుఃఖాంశే సచ్చిదంశాధ్యాసేప్యానందాంశాధ్యాసాభావాత్। జగతి నామరూపాంశద్వయవ్యవహార
స్తు అవిద్యాపరిణామాత్మకనామరూపసంబంధాత్। తదుక్తం। అస్తి భాతి ప్రియం రూపం నామ చేత్యంశపంచ
కం। ఆద్యత్రయం బ్రహ్మరూపం మాయారూపం తతో ద్వయమితి॥ ॥ఇతి లక్షణవిభాగః॥ ॥అథ
జగతో జన్మక్రమో నిరూప్యతే॥ తత్ర సర్గాద్యకాలే పరమేశ్వరః సృజ్యమానప్రపంచవైచిత్ర్యహేతుప్రా
ణికర్మసహకృతోఽపరిమితనిరూపితశక్తివిశిష్టమాయాసహితః సన్నామరూపాత్మకనిఖిలప్రపం
చం బుద్ధావాకలయ్యేదం కరిష్యామీతి సంకల్పయతి। తదైక్షత బహు స్యాం ప్రజాయేయేతి శ్రుతేః। తతః

ఆకాశాదీని పంచభూతాని | పంచీకృతాని తస్మాత్ప్రతిపాదితాన్యుత్పద్యంతే | తత్రాకాశస్య శబ్దో గుణః | వాయో
స్తు శబ్దస్పర్శౌ | తేజసస్తు శబ్దస్పర్శరూపాణి | అపాం తు శబ్దస్పర్శరూపరసాః | పృథివ్యాస్తు శబ్దస్పర్శరూప
రసగంధాః | కింతు శబ్దస్యాకాశమాత్రగుణత్వం | వాయ్వాదావపి తదుపలంభాత్ | నాస్వాశ్రయః | బాధకా
భావాత్ | ఇమాని భూతాని త్రిగుణాని | యాని కారణాని త్రిగుణాని | ఏతైః సత్త్వగుణోపేతైః పంచభూ
తైః శ్రోత్రత్వక్చక్షుర్జిహ్వాఘ్రాణాని పంచేంద్రియాణి మనోబుద్ధ్యహంకారచిత్తాని జాయంతే | శ్రోత్రాదీ
నాం పంచానాం క్రమేణ దిగ్వాతార్కవరుణాశ్వినావధిష్ఠాతృదేవతాః | మనఆదీనాం చతుర్ణాం క్రమేణ
చంద్రాచ్యుతచతుర్ముఖశంకరాః అధిష్ఠాతృదేవతాః | ఏతైరేవ రజోగుణోపేతైః పంచభూతైర్యథా
క్రమం వాక్పాణిపాదపాయూపస్థాఖ్యకర్మేంద్రియాణి జాయంతే | తేషాం చ క్రమేణ వహ్నీంద్రోపేం
ద్రమృత్యుప్రజాపతయోఽధిష్ఠాతృదేవతాః | రజోగుణోపేతపంచభూతైరేవ పంచప్రాణాః ప్రాణాపానవ్యా
నోదానసమానాఖ్యా జాయంతే | తత్ర ప్రాగ్గమనవాన్వాయుః ప్రాణః నాసాదిస్థానవర్తీ | అవాగ్గమ

వేదాం ౧౮

రణ్యగర్భ స్థూలశరీరం త్వృత్త్వా పసాక్షాత్కర్తృత్వం। ఇతరశరీరప్రపంచం త్వృత్తౌ చ హిరణ్యగర్భాద్ విద్వాంరాం। హితాభిమానం త్రిస్రో దేవతాః। అనేన జీవేనాత్మనానుప్రవిశ్య నామరూపే వ్యాకరవాణీతి శ్రుతేః। హిరణ్యగర్భో నామ మూర్తిత్రయాదన్యః ప్రథమో జీవః। స వై శరీరీ ప్రథమః స వై పురుష ఉచ్యతే। ఆదికర్తా స భూతానాం బ్రహ్మాగ్రే సమవర్తత। హిరణ్యగర్భః సమవర్తతాగ్రే భూతస్య జాతః పతిరేక ఆసీదిత్యాది శ్రుతేః। ఏవంభూతస్యోత్పత్తిః స్పష్టీకృతా। ఇదానీం ప్రళయో నిరూప్యతే। ప్రళయో నామ త్రైలోక్యవినాశః। స చ చతుర్విధః। నిత్యః ప్రాకృతో నైమిత్తిక ఆత్యంతికశ్చేతి। తత్ర నిత్యప్రళయః సుషుప్తిః। తస్యాః సకలకార్యప్రళయరూపత్వాత్। ధర్మాధర్మపూర్వసంస్కారాణాం చ తదా కారణాత్మనావస్థానం। తేన సుప్తోత్థితస్య న సుఖదుఃఖాద్యనుపపత్తిః। న చ సుషుప్తావంతఃకరణస్య వినాశే తదధీనప్రాణాదిక్రియానుపపత్తిః। వస్తుతః శ్వాసాద్యభావేఽపి తదుపలబ్ధేః పురుషాంతరవిభ్రమమాత్రత్వాత్ సుప్తశరీరోపలంభవత్ భవతి। న చైవం సుప్తస్య పరేతాద్విశేషః। సుప్తస్య హి అంగశరీరసంస్కారాత్మనా అత్రైవ వర్తతే। పరేతస్య

తు యోఽన్యాంతరేణ ఇతి స్థైలక్షణ్యోక్తి| యద్వా అంతఃకరణస్య ద్విగుణశక్తిర్జ్ఞానశక్తిః క్రియాశక్తిశ్చేతి| తత్ర జ్ఞానశక్తివి
శిష్టాంతఃకరణస్య సుషుప్తౌ వినాశః క్రియాశక్తివిశిష్టస్యేతి ప్రాణస్యావస్థానమవిరుద్ధం| యథాహుః స్పష్టి
ర్నాం బలవిశ్వతి అ ... ప్రాణా ఏవైకధా ... భవతి అథైనం వాక్ సర్వైర్నామభిః సహాప్యేతి సత్తా సాంప్రసన్నం
పం లోకం భవతి స్వమపితో భవతి ఇత్యాదిశ్రుతిరుక్తసుషుప్తౌ మాలం| ప్రాకృతప్రళయ యన్న హాయ్యన్య బ్ర
హ్మావ్యాకాశే విత్వతః ... కలహాయ్యనాశః| యదా తు ప్రాగేవోత్పన్నబ్రహ్మసాక్షాత్కారస్య హాయ్యన్య బ్రహ్మ
ణోఽంతం బ్రహ్మాండ ... కాలలక్షణ ప్రారబ్ధకర్మణః సమాప్తౌ విదేహకైవల్యాపత్తి ... పరమముక్తిః త
దాన్యలోకవాసినాముత్పన్నబ్రహ్మసాక్షాత్కారాణాం బ్రహ్మణా సహ విదేహకైవల్యం| బ్రహ్మణా
సహ తే సర్వే సంప్రాప్తే ప్రతిసంచరే| పరస్యాంతే కృతాత్మానః ప్రవిశంతి పరం పదమితి శ్రుతేః| ఏవం స్వ
లోకవాసిభిః సహ కార్యబ్రహ్మణో ముక్త్యనంతరం తదధిగతబ్రహ్మాండస్య తదంతర్వర్తినాం ...
లోకతదంతర్వర్తినాం ... వరాదీనాం శాంతికారణం ప్రకృతౌ మాయాయాం ప్రళయో బ్రహ్మణా|

వేదాం౧
౨౯

బాధరూపవినాశస్యైవ బ్రహ్మణ్యపి స్థితత్వాదతః ప్రాకృతస్తత్ప్రవృత్తేః। కాల్యో బ్రహ్మణోహో దివసావసానని
మిత్తకః త్రైలోక్యమాత్రప్రళయః నైమిత్తికప్రళయః। బ్రహ్మదివసశ్చతుర్యుగసహస్ర
పరిమితః కాలః। చతుర్యుగసహస్రాణి బ్రహ్మణోహో దినముచ్యత ఇతి వచనాత్। ప్రళయకాలో
దివసకాలపరిమితః। రాత్రికాలస్య దివసతుల్యత్వాత్। ప్రాకృతప్రళయశ్చ నైమిత్తికప్రళయశ్చ
పురాణవచనాని। ద్విపరార్ధే త్వతిక్రాంతే బ్రహ్మణః పరమేష్ఠినః। తదా ప్రకృతయః సప్త కల్పంతే ప్ర
ళయాయ హి। ఏష ప్రాకృతికో రాజన్ ప్రళయో యత్ర లీయతే ఇతి వచనం ప్రాకృతప్రళయే
మానం। ఏష నైమిత్తికః ప్రోక్తః ప్రళయో యత్ర విశ్వసృక్। శేతేనంతాసనే నిత్యమాత్మసాత్కృత్య చా
ఖిలం। ఇతి వచనం నైమిత్తికప్రళయే మానం। తురీయప్రళయస్తు బ్రహ్మసాక్షాత్కారనిమిత్తకః స
ర్వమోక్షః। స చ ఏకజీవవాదే యుగపదేవ। నానాజీవవాదే క్రమేణ। సర్వ ఏకీభవంతీత్యాది శ్రుతేః।
తత్రాద్యాస్త్రయో ప్రళయాః కర్మోపరతినిమిత్తాః। తురీయస్తు జ్ఞానోదయనిమిత్తః। అజ్ఞా

౯(సహం వృత్తివిశేషః॥ ఏవం చతుర్విధప్రళయో నిరూపితః॥ తస్యేదానీం క్రమో నిరూప్యతే। భూతా
నాం భౌతికానాం చ క్రమేణ లయః। కారణలయమకృత్వా కార్యస్య లయాయోగాత్ తదంతరాభావేఽత్ర యే
పస్థాయాం ఉపపత్తేః। కింతు సృష్టిక్రమవిపరీతక్రమేణ। తత్రాయం క్రమః తజ్జన్యానాం పృథివ్యాదీనాం స్వస్వ
ప్రళయోంతరేతయోంపానాం ప్రళయాసంభవాత్ ప్రళయోఽస్తి తావత్। అన్యథా గౌణ మతే మహాప్రళయేఽపి పృ
థివీపరమాణుగతరూపరసాదివినాశాపత్తేః। తథా చ పృథివ్యాః అప్సు అపాం తేజసి తేజ
సో వాయౌ వాయోరాకాశే ఆకాశస్యాహంకారే ఏతస్య హిరణ్యగర్భాఖ్యం కారణ తస్య
చావిద్యాయామిత్యేవం రూపః ప్రళయః। తదుక్తం విష్ణుపురాణే। జగత్ప్రతిష్ఠా దేవర్షే పృథి
వ్యప్సు ప్రలీయతే। తేజస్యాపః ప్రలీయంతే తేజో వాయౌ ప్రలీయతే। వాయుశ్చ లీయతే
వ్యోమ్ని తచ్చావ్యక్తే ప్రలీయతే। అవ్యక్తం పురుషే బ్రహ్మన్ నిష్కలే సంప్రలీయతే। ఇతి। ఏవంవిధం
కారణత్వం తత్పదార్థస్య బ్రహ్మణః తటస్థలక్షణం। ఉపవేదాంతబ్రహ్మణో జగత్కారణత్వే ప్రతి

వేదాం
౨౦

పాంక్యమాం। న ప్రపంచం బ్రహ్మ స్యాత్ అన్యథా సృష్టివాక్యానాం ప్రామాణ్యం స్యాదితి చేన్న। కిం సృష్టివాక్యానాం
సృష్టిపరత్వ యుగం కింత్వద్వితీయబ్రహ్మణ్యేవ। తత్ప్రతిపత్త్యాకథం సృష్టిరుపయోగః। ఇత్థం। యదిసృష్టిమ
గుపన్యస్య ప్రపంచ। శేషధూద్బ్రహ్మణి ప్రతిపాద్యతే తదా బ్రహ్మణి ప్రతిషిద్ధప్రపంచస్యవాంఛితా ప్రతిషిద్ధరూ
పస్యైవ బ్రహ్మణః అద్వైతావస్థానాశంకాయాం। విగచి శేత్స్వమద్వితీయస్యైవ ప్రతిపాదితం స్యాత్। తతః
సృష్టివాక్యాత్ బ్రహ్మోపాదేయత జ్ఞానే నత్వుపాదానం విగానాం యస్య అద్వైతసద్భావశంకాయాం। రజ్జ్వతయా
ఇతి నేతి తాన్ప్రదీనాం బ్రహ్మణ్యేవిత స్య అసతో ప్యపాద। ప్రపంచస్య తుచ్ఛత్వావగమే। రజ్జ్వాల ద్వైత తత్త్వము ఖం
పంసన్నిధానం క్రైకరణం బ్రహ్మణి ధ్రువతి విపరంపరయా సృష్టివాక్యానామప్యద్వితీయబ్రహ్మణ్యేవ తాత్పర్యం
రూపాణాం ప్రకరణాపతితసగుణబ్రహ్మవాక్యానాం। శేషవాక్యాపేక్షితశేషధ్వనం పాదకత్వేనవి। యోంగ
ఇతి నేశించిదపి వాక్యం అద్వితీయబ్రహ్మప్రతిపాదకే విరుధ్యతే। తదేవం స్వరూపతటస్థలక్షణాలక్షి
తం తత్పదవాచ్యమీశ్వరచైతన్యం మాయాప్రతిబింబితమితి కేచిత్। తేషామయమాశయః। జీవపర

మేశ్వర సాధారణం చైతన్యమాత్రం బింబం తస్యైవ బింబస్యావిద్యాశక్తికాయాం మాయాయాం ప్రతిబింబమీ
శ్వరచైతన్యం అంతఃకరణేషు ప్రతిబింబం జీవచైతన్యం। కార్యోపాధిరయం జీవః కారణోపాధిరీశ్వ
ర ఇతి శ్రుతేః। ఏతదుక్తే జలాశయగతశరావగతసూర్యప్రతిబింబయోరివ జీవపరమేశ్వరయోర్భే
దః। అవిద్యాకృతోపాధేః వ్యాపకత్వాత్తదుపాధికేశ్వరస్యాపి వ్యాపకత్వం। అంతఃకరణస్య పరిచ్ఛిన్న
తయా తదుపాధికజీవస్యాపి పరిచ్ఛిన్నత్వం। ఏతదుక్తే అవిద్యాకృతదోషాత్ జీవపరమేశ్వరయోర్భిన్నః
కపాధిః। ప్రతిబింబపక్షపాతినాం ద్వైతస్య సంతత్ బింబాత్మకమీశ్వరచైతన్యమపరే। తేషామయమాశయః॥
ఏకమేవ చైతన్యం బింబత్వాక్రాంతమీశ్వరచైతన్యం। ప్రతిబింబత్వాక్రాంతం జీవచైతన్యం। బింబప్రతిబిం
బకల్పకోపాధిశ్చ ఏకజీవవాదే అవిద్యా। అనేకజీవవాదే అంతఃకరణాన్యేవ అవిద్యాంతఃకరణరూపో
పాధిప్రయుక్తో జీవపరభేదః। ఉపాధికృతదోషాశ్చ ప్రతిబింబజీవ ఏవ వర్తంతే। నతు బింబపర
మేశ్వరే। ఉపాధేః ప్రతిబింబపక్షపాతిత్వాత్। ఏతదుక్తే గగనసూర్యస్య జలాభాసమానప్రతిబిం
బసూర్యస్యేవ జీవపరయోర్భేదః। కసుగ్రీవాఖ్యముఖస్య దర్పణాప్రదేశకృత బింబచైతన్యస్య పరమ

తైత్తి॰
౨౧

శ్వేతస్యాపి ప్రదేశే అభావాత్తస్య నహ్యంతర్యామిత్వం కస్యచిదితి చేన్న। సాంద్రక్షేత్రస్య జలాదౌ ప్రతి
బింబితత్వే బింబభూతమహాకాశస్యాపి జలాదిప్రదేశసంబంధదర్శనాత్ పరిచ్ఛిన్నబింబస్య ప్రతిబిం
బదేశాసంబంధిత్వేప్యపరిచ్ఛిన్నప్రత్యగ్బింబదేశసంబంధాపి రూపాభావాత్। అరూపవతో బ్రహ్మణో న
ప్రతిబింబసంభవః। రూపవత ఏవ తథాత్వదర్శనాదితి వాచ్యం। నీరూపస్యాపి రూపస్య ప్రతిబింబదర్శ
నాత్। ఖరూపవత్స్వప్రత్యక్షప్రతిబింబాభావనియమః। ఆత్మనోపి ప్రకాశరూపసూర్యతుల్యత్వాత్। ఏక
ధా బహుధా చైవ దృశ్యతే జలచంద్రవత్। యథా హ్యయం జ్యోతిరాత్మా వివస్వానపో భిన్నా బహుధై
కోనుగచ్ఛన్నిత్యాదిశ్రుతేః బ్రహ్మప్రతిబింబభావాంశుమాంశ్చ వ్యూహితతాత్పర్యః॥ తదేవం తత్త్వదాధూర్త
రూపవత్తే॥ ఏకజీవవాదే అవిద్యాప్రతిబింబో జీవః॥ అనేకజీవవాదే అం
తఃకరణప్రతిబింబః॥ స చ జాగ్రత్స్వప్నసుషుప్తిరూపావస్థాత్రయవాన్। తత్ర జాగ్రద్దశాయామింద్రియజన్యజ్ఞా
నావస్థా। అవస్థాంతరే ఇంద్రియాజన్యవిషయాకారాంతఃకరణవృత్తిః। స్వప్నావస్థా

రసాకారాదితాపత్తేః| సాభాసాంతఃకరణవృత్తికావరణాభంగాంశేత్యేకంమతం| తథాహి అవిద్యోపహితచైతన్యస్య
జీవత్వపక్షే ఘటాద్యధిష్ఠానచైతన్యస్య జీవరూపతయా జీవస్యవ ఘటాదిభానప్రసక్తౌ ఘటాద్యవచ్ఛిన్న
చైతన్యావరకాజ్ఞానం మూలావిద్యావరకం తత్ర మవస్థారూపాభ్యుపగంతవ్యం| ఏవం సతి ఘటాదిర్ఘటాకారప్ర
సంగః| అనావృతచైతన్యసంబంధస్యావభాసప్రయోజకత్వాత్| తస్యావరణస్య నాశకత్వేన చ వృత్తేః ఘటాదివిషు
పాదిభానే సాధ్యాదితి తన్మతం గె వక్ష్యత్వంగజీవకం చైతన్యమాత్రం తన్మాన కస్యత జీవకర్తాపరిః నావి
వృత్తస్య వహింత చైతన్యం విశేష్యతావచ్ఛిన్న వృత్త్యా వచ్ఛేదనీతి విశేష్యవృత్తిర్వా స్వవృత్తవృత్తి విశేషస్య తదుపహిత
చైతన్యస్యావరణాభంగజనకత్వమిత్యావరణాభిభవా ధా వృత్తిరిత్యభ్యుపగతా| సంబంధార్థా వృత్తిరి
త్యపరం మతం| తత్రా విద్యోపాధికోఽపరిచ్ఛిన్నోజీవః స చ ఘటాదిప్రదేశే విద్యమానోఽపి ఘటాద్యా
కారాదివిశేష్యవృత్తివిరహదశాయాం ఘటాదికమవభాసయతి| ఘటాదినా తస్య సంబంధాభా
వాత్| తత్త దాకారవృత్తిదశాయాం తు భాసయతి| తదా సంబంధసత్త్వాత్| అవిద్యోపాధికస్య

పెజిం

౨౨ స్వవిశిష్టస్య జీవస్య స్వత ఏవ సమస్తవస్తుసంబంధస్య వృత్తివిరహదశాయాం సంబంధాభావాభిధానే వృత్తిసంగ
తం అసంగతత్వప్రసక్త్యా చ సంబంధాభావాభిధానే వృత్త్యంతరమపి సంబంధాయ సాధనమితి చేదుచ్యతే। వృత్తివి
రహదశాయాం జీవస్య ఘటాదినా సహ సంబంధసామాన్యం విశిష్యతామ్। కింతర్హి ఘటాద్యాకారప్రయో
జకసంబంధవిశేషః। స చ సంబంధవిశేషః విషయస్య జీవచైతన్యస్య చ వ్యంగ్యవ్యంజకభావలక్షణః। సా చాభివ్యక్తిః
తత్తదాకారవృత్తినిబంధనః। తథాహి తైజసమంతఃకరణం స్వచ్ఛద్రవ్యత్వాత్। స్వత ఏవ జీవచైతన్యాభివ్యం
జకసమర్థం ఘటాదికం తు న తథా। అస్వచ్ఛద్రవ్యత్వాత్। సాకారవృత్తిసంయోగదశాయాం తు వృత్త్య
భిభూతజాడ్యధర్మకతయా వృత్త్యుపాదితచైతన్యాభివ్యంజకయోగ్యతాశ్రయతయా చ వృత్త్యవచ్ఛి
న్నాంతరం చైతన్యమభివ్యక్తిః। తదుక్తం వివరణే। అంతఃకరణం హి స్వస్మిన్నివ స్వసంసర్గిణ్యపి ఘటాదౌ
చైతన్యాభివ్యక్తియోగ్యతామాపాదయతి। దృష్టం చాస్వచ్ఛద్రవ్యస్యాపి స్వచ్ఛద్రవ్యసంబంధదశాయాం
ప్రతిబింబగ్రాహిత్వం। యథా కుడ్యాదేర్జలాదిసంయోగదశాయాం ముఖాదిప్రతిబింబగ్రాహిత్వం।

షుప్తౌ [redacted] చిదభివ్యంజకత్వం చ తత్ప్రతిబింబగ్రాహిత్వం। చైతన్యస్యాభివ్యంగ్యత్వం చ తత్ర ప్రతిబింబత్వం। ఏవం
చిదాభివ్యంజకత్వాది ధర్మకమపి వృత్తేరపరోక్షస్థలే బహిర్గతమంతర్గతాకారః। అపరోక్షస్థలేతు చక్ష్వాదివృత్తి
సంయోగాభావేఽపి చైతన్యాభివ్యంజకతయా అపరోక్షత్వం। ఏతత్కృతే విషయాణామపరోక్షత్వం చైత
న్యాభివ్యంజకత్వమితి ద్రష్టవ్యం। ఏవం జీవస్యాపరిచ్ఛిన్నత్వేఽపి వృత్తేః సంబంధార్థత్వాదిరూపితం। ఇదానీం చ
రిచ్ఛిన్నత్వపక్షే సంబంధార్థకత్వం నిరూప్యతే। తథాహి అంతఃకరణోపాధికో జీవః తస్య చ సుషు
ప్త్యవస్థాయాం సుషుప్తౌ దేహేనాసంబంధాత్। కింతు ప్రత్యైవ సుషుప్త్యుపాకారం। తస్య వాయోరుపహిత
స్య సకలసుషుప్త్యయిత్వాత్। అత ఏవ బ్రహ్మణః సర్వజ్ఞతా। తథా చ జీవస్య సుషుప్త్యాది షాడ్గుణ్య ప్రత్యంచై
తన్యాభేదమంతరేణ సుషుప్త్యవభాసాసంభవే ప్రత్యక్చైతన్యదవభాసాయ చ సుషుప్త్యాది షాడ్గుణ్య ప్రత్యంచై
తన్యాభేదబోధకం సుషుప్త్యాకారవృత్తిరిష్యతే। ఇదం వృత్త్యాదికథనం ప్రమాతృచైతన్యవిషయచైతన్య
యోరభేదః సంపాద్యతే సుషుప్తౌ అంతఃకరణరూపోపాధిభేదేన తదవచ్ఛిన్నచైతన్యయోరభేదాసంభ

వి.బా.

౨౨ వాడితి చేన్న। వృత్తేర్బహిర్దేశే గమనాంగీకారేణ వృత్త్యంతఃకరణవిషయాణామేకదేశస్థత్వేన సుష
ధియంభియాంభావపన్నా కృతాపేక్షా। ఏవమపరోక్షస్థలే వృత్తేర్నిర్గమనేఽపి యోగ్యతాపేక్షితః। ఇంద్రియా
జన్యవిషయగోచరాంతఃకరణావస్థాంతఃకరణావృత్త్యవస్థా స్వప్నావస్థా। జాగ్రదవస్థా స్వప్నవృత్త్యర్థం ఇంద్రి
యాజన్యేతి। అవిద్యావృత్తిమత్త్వం సుషుప్త్యావస్థా వ్యావృత్త్యర్థం కరణయోరంతఃకరణేతి। సుషుప్తిర్నామా
విద్యాగోచరావిద్యావృత్త్యవస్థా। జాగ్రత్స్వప్నయోరవిద్యాకారవృత్తేరంతఃకరణవృత్తిత్వాన్న తత్రాతివ్యా
ప్తిః। అత్ర కేచిత్కరణానాముపరమయోరవస్థాంతరత్వమాహుః। అపరే తు సుషుప్తావేవ తయోరంతర్భావ
మాహుః। తత్ర తయోరవస్థాత్రయాంతర్భావే మూర్ఛామరణయోః త్వం విదార్థనిరూపణేన యోగ
గాయావాక్యతత్త్వప్రయుజ్యతే। తస్య మాయయా పాదవిక్షేపయా ఏకత్వం అంతఃకరణోపాధివిక్షేపయా
బహుత్వం ప్రవర్త్యతే। తేన జీవస్య ఆగుణత్వం ప్రసృష్టం। బుద్ధిగుణేనేత్యగుణేనాత్మనైవ పరో త్ర
మాత్రో హ్యపరోఽపి దృష్ట ఇత్యాదౌ జీవస్య బుద్ధిశబ్దవాచ్యాంతఃకరణావిశిష్టత్వే మోపాధికపరి

సేవయాంత్రయన్నపి | స చ జీవః స్వయం ప్రకాశః | స్వప్నావస్థా ముపక్రమ్య అత్రాయం పురుషః స్వయం జ్యో
తి రితి శ్రుతేః | అరూపవదేవ ప్రత్యక్షైకవదితి శ్రుతేః | అరూపవాన్ మాయాత్ స్వపరకస్తు వృత్తి ప్రతిబిం
బిత చైతన్యమాదాయాకారవత్ప్రతి || ఏవం త్వం పదార్థో నిరూపితః || అథ తత్త్వం పదార్థయోరై
క్యం మహావాక్య ప్రతిపాద్యమభిధీయతే | తత్త్వమసీత్యత్ర తత్ప్రత్యక్షాదివిశిష్టత్వస్య వర్ణితత్వ
విరుద్ధ ధర్మాశ్రయత్వాదిదం గవ్యాను వర్ణిత త్వాదిశ్రుత్యాదిభ్యో విషయ పురుషాకారాంశ స్వాంశ
ర ఏవ పరోక్షత్వః స ఏవ విశిష్ట తాదృశాంశస్యాపి కర రూపత ఇత్యాదిష్వ త్వా చ జీవపర [redacted] స్వ అపగ యోగ్యతా
తత్త్వేన తత్త్వమస్యాది వాక్యమాదితో యో పృథగయం యజమానః ప్రస్తర ఇత్యాది వాక్యవదుపచ
రితార్థమితి చేన్న | ఉపచరితస్య సంభావిత కల్పనా స్యాత్ అసంభావిత మానవిదఫలస్య కల్పనా
న్యాయాత్ తాదృశ | అన్యథా వంధ్యాగత అధికారి నాస్త్యేవ శాస్త్రస్య చ ప్రవృత్తి శాస్త్ర
ప్రవృత్తేర్యాథార్థ్యాత్ | పాకరక్షకా ధరత్వాయంకర్మ ఇతి వచనవిశేషణ కవిత్వాయ జీవపర

వేదాం.

౩౪ భేదస్యాపి ప్రత్యక్షస్య విశేషణీభూతధర్మిభేదవిషయత్వాచ్చ। అత ఏవ పరానుమానమప్రమాణం
నం। ఆగమబాధాత్। మేరుః పాషాణమయత్వానుమానవత్। నాప్యాగమాంతరవిరోధః। తత్పరాత
త్పరవాక్యయోః తత్పరవాక్యస్య బలవత్త్వాత్। తథాచ నిర్గుణాదివాక్యాపేక్షయా సగుణాదివాక్యాపేక్షయా
ఉపక్రమోపసంహార[illegible]రాద్యవగత అద్వైతతాత్పర్యవిశిష్టస్య తత్త్వమస్యాదివాక్యస్య బలవత్త్వాచ్చ
ఉపజీవ్యప్రత్యక్షవిరుద్ధార్థకత్వేన అప్రామాణ్యాపత్తిః। శీతస్పర్శవజ్జలస్యౌపాధికోష్ణస్పర్శాశ్రయవదస్యాప
ఖండిగర్భాన్నైవ జీవస్య అంతఃకరణస్యౌపాధికకర్తృత్వాశ్రయత్వప్రతిభాసోపపత్తేః। యది చ బాంధా
ఔపాధికమారోపితం వా దాంత్రకృత్వమపతుల్యం। యది దృష్టాంతేన సర్వత్వస్య కృతిజన్యాభావాత్ ఆరోపస్య ప్రమా
మింద్రియసంస్కారాభావే కథమారోప ఇతి వాచ్యం। లోకవేదారోపవిషయధంసాం రసమైవతస్యాహంతు
తాదృశ। అపస్త్రాం ధర్మికారోపే కా గతిః। కర్తృత్వస్య దృష్టాంతప్రమాణసాదిత్వాత్। తత్త్వంపదవాచ్యయో
శ్చైతన్యయోగబలక్షణస్య రూపయోరైక్యముపపాదితం। అత ఏవ తత్త్వప్రతిపాదకతత్త్వమస్యాదివా

క్యానామఖండార్థత్వం। సోయమిత్యాదివాక్యవత్। లక్షణాయ్యవిరోధమేవప్రామాణ్యం। చైత్రత్వత్ర
స్త్రైవాంతఇత్యాదౌనిక్షిప్తసంగతిగ్రహాత్। ఏవంసర్వప్రమాణావిరుద్ధం శ్రుతిస్మృతిపురాణేతిహాసప్రతిపా
ద్యం జీవబ్రహ్మైక్యం వేదాంతశాస్త్రస్యవిషయ ఇతి సిద్ధం॥ ॥వేదాంతపరిభాషాయాం విషయపరి
చ్ఛేదః॥ ॥ఇదానీం ప్రయోజనం నిరూప్యతే॥ యదవగతం సత్ స్వవృత్తితయేష్యతే తత్ప్రయోజనం
తచ్చద్వివిధం। ముఖ్యం గౌణం చేతి। తత్ర సుఖదుఃఖాభావౌ ముఖ్యం ప్రయోజనం। తదన్యతర
సాధనం గౌణం ప్రయోజనం। సుఖం ద్వివిధం। సాతిశయం నిరతిశయం చేతి। తత్ర సాతిశయం
సుఖం విషయానుషంగజనితాంతఃకరణవృత్తితారతమ్యకృతానందలేశావిర్భావవిశేషః।
ఏతస్యైవానందస్యాన్యాని భూతాని మాత్రాముపజీవంతీతిశ్రుతేః। నిరతిశయసుఖం బ్రహ్మైవ।
ఆనందో బ్రహ్మేతి వ్యజానాదిత్యాదిశ్రుతేః। ఆనందాత్మకబ్రహ్మావాప్తిశ్చ మోక్షః। శోకనివృత్తిశ్చ।
బ్రహ్మవిద్బ్రహ్మైవభవతి। తరతి శోకమాత్మవిదిత్యాదిశ్రుతేః। నతు లోకాంతరావాప్తిః తజ్జన్యసై

॥ सहकारिसाधनांतरनिरपेक्षपुरुषार्थसाधनेति॥१॥ ॥७॥

॥ मन्नेति। उत्तरमाह योगेति। अथ हेत्या
द्यवतारयति नेत्यादिना। अत्रोत्तरत्वेनेति शेषः पूर्वत्रेति कर्मकांडोक्तिः। नन्वग्निहोत्रप्रकरणे कामप्रश्नो वरो दत्तश्चे
त्किमिति तत्रैवात्मयाथात्म्यप्रश्नप्रतिवचनेनासुविषातो तत्राह तत्रैवेति। कर्मनिरपेक्षाया ब्रह्मविद्याया मोक्षहेतु
त्वादपि कर्मप्रकरणे तदनुक्तिरित्याह विद्यायाश्चेति। सर्वापेक्षाधिकरणन्यायान्न तस्याः स्वातंत्र्यमित्याशंक्या
ह स्वतंत्रा हीति। सा हि स्वोत्पत्तौ स्वफले वा कर्माण्यपेक्षते नाद्योऽभ्युपगमान्न द्वितीयोऽत एवाग्नीन्धनाद्यनपेक्षेति
न्यायविरोधादित्यभिप्रेत्याह सहकारीति। इत्यस्माच्च हेतोस्तत्रैवानुक्तिरिति संबंधः ॥७॥ ॥७॥

याज्ञवल्क्यस्यव्रतभंगेहेतुमुक्त्वाजनकस्यप्रश्नमुत्थापयतिहेयाज्ञवल्क्येति।अक्षरार्थमुक्त्वाप्रश्नवाक्य
विवक्षितमर्थमाह किमयमित्यादिना।स्वशब्दोयथोक्तपुरुषविषयःज्योतिःकार्यमित्यासनादिव्यवहारो
क्तिःइत्येतदितिविकल्पद्वयंपरामृश्यतेपक्षद्वयेपिफलंपृच्छतिकिंचातइति।सप्तम्यर्थेतस्मिन्नुत्तरमाहशृण्विति।
तत्रेतिपक्षद्वयोक्तिः।कारणंफलमितियावत्।प्रथमपक्षमनूद्यस्वपक्षसिद्धिफलमाहयदीत्यादिनाषष्ठी

हेयाज्ञवल्क्येत्येवंसंबोध्याभिमुखीकरणायकिंज्योतिरयंपुरुषइतिकिमस्यपुरुषस्यज्योतिर्येनज्योतिषाव्य
वहरति।सोयंकिंज्योतिरयंव्याकृतःकार्यकरणसंघातरूपःशिरःपाण्यादिमान्पुरुषःपृच्छ्यते।किमयंस्वा
वयवसंघातबाह्येनज्योतिरंतरेणव्यवहरत्याहोस्वित्स्वावयवसंघातमध्यपातिनाज्योतिषाज्योतिःकार्य
मयंपुरुषोनिर्वर्त्तयतीत्येतदभिप्रेत्यपृच्छति।किंचातःयदिव्यतिरिक्तेनयदिवाव्यतिरिक्तेनज्योतिषाज्यो

याज्ञवल्क्यकिंज्योतिरयंपुरुषइति

तिःकार्यंनिर्वर्त्तयति।शृणुतत्रकारणं।यदिव्यतिरिक्तेनज्योतिःकार्यनिर्वर्त्तकत्वमस्यस्वभावोनिर्द्धारितो
भवति।ततोऽदृष्टज्योतिःकार्यविषयेप्यनुमास्यामहेव्यतिरिक्तज्योतिर्निमित्तमेवेदंकार्यमिति।अथा
व्यतिरिक्तेनैवस्वात्मनाज्योतिषा व्यवहरति।ततोप्रत्यक्षेपिज्योतिषिज्योतिःकार्यदर्शनेऽव्यतिरिक्तमे
वज्योतिरनुमेयं॥ ॥७॥ ॥

पुरुषमधिकरोतियत्रकारणभूतंज्योतिर्नदृश्यतेतत्कार्यंत्वासनाद्युपलभ्यतेतत्रापिविषयेस्वप्नाद्ा
विितियावत्।अनुमानमेवाभिनयतिव्यतिरिक्तेति।विमतमतिरिक्तज्योतिरधीनंव्यवहारत्वात्संमत
वदित्यर्थः।पक्षांतरमनूद्यलोकायतपक्षसिद्धिफलमाह।अथेत्यादिना।अप्रत्यक्षेपीत्यव्यतिरिक्त
मेवेतिच्छेदः॥ ॥७॥ ॥

कल्पांतरमाहाथेति। अनियमं व्याकरोति व्यतिरिक्तमिति। तस्मिन् पक्षे व्यवहारहेतोर्ज्योतिषो निश्च यात्तद्विकारो व्यवहारोऽपि न स्थैर्यमालंबेतेत्याह ततइति। व्याख्यातं प्रश्नमुपसंहरतीत्येवमिति। प्रश्नमाक्षिपति नन्विति। व्यतिरिक्तज्योतिर्बुभुत्सया प्रश्नो भविष्यतीति चेत्तत्राह स्वयमेवेति। राज्ञोऽनुमानकौशलमंगीकरोति सत्यमिति। किमिति तर्हि पृच्छतीत्याशंक्याह तथापीति। व्याप्यव्यापकयोस्तत्संबंधस्य चातिसूक्ष्मत्वादेकेन दुर्ज्ञानत्वात्तत्तज्ज्ञाने याज्ञवल्क्यापेक्षितेत्यर्थः। कथं तेषामतिसूक्ष्मत्वं तत्राह बहूनामपीति लिंगादिष्वनेकेषामपि विवेकिनां दुर्बोधतास्ति किमुतैकस्येतेषु दुर्बोध

अथानियम एव व्यतिरिक्तमव्यतिरिक्तं वा ज्योतिः पुरुषस्य व्यवहारहेतुः ततोऽनध्यवसाय एव ज्योतिर्विषय इत्येवं मन्वानः पृच्छति जनको याज्ञवल्क्यं किं ज्योतिरयं पुरुष इति। नन्वेवमनुमानकौशले जनकस्य किं प्रश्नेन स्वयमेव कस्मान्न प्रतिपद्यत इति। सत्यमेवमेतत्। तथापि लिंगलिं
तू गिसंबंधविशेषाणामत्यंतसौक्ष्म्याद्दुरवबोध्यतो मन्यते बहूनामपि पंडितानां किमुतैकस्य॥ अत एव हि धर्मसूक्ष्मनिर्णये परिषद्व्यापार इष्यते। पुरुषविशेषश्चापेक्ष्यते दशावरा परिषत्त्रयो वैको वेति॥ ७॥

तावाच्येत्यर्थः। तेषामत्यंतसौक्ष्म्ये मानवीं स्मृतिं प्रमाणयत्यत एवेति। कुशलस्यापि सूक्ष्मार्थनिर्णये पुरुषांतरापेक्षायाः सत्वादेवेति यावत्। पुरुषविशेषो वेदविदध्यात्मविदित्यादिनोक्ते स्मृत्यर्थं संक्षिपति दशेति। उक्तं हि धर्मेणाधिगतो येस्तु वेदः सपरिबृंहणः। ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः॥ दशावरा वा परिषद्यं धर्मं परिचक्षते। त्र्यवरा वापि वृत्तस्था तं धर्मं न विचारयेत्। त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपाठकः। त्रयश्चाश्रमिणः पूर्वे पर्षदेषा दशावरा। ऋग्वेदविद्यजुर्विच्च सामवेदविदेव च। त्र्यवरा परिषज्ज्ञेया धर्मसंशयनिर्णय इति। एको वेत्यध्यात्मविदुच्यते॥ ॥७॥ ॥७॥ १०

कुशलस्यापि राज्ञो याज्ञवल्क्यं प्रति प्रश्नोपपत्तिमुपसंहरति तस्मादिति। सूक्ष्मार्थनिर्णयो पु
रुषांतरापेक्षाया वृद्धसंमतत्वादिति यावत्। तत्रैव हेत्वंतरमाह विज्ञानेति राज्ञो याज्ञवल्क्यापेक्षा
मुपपाद्य पक्षांतरमहाथवेति तथा चात्र राज्ञो मुनेर्वा विवक्षितत्वाभावात् किमिति राजा मुनिमनु
सरतीति चोद्यं निरवकाशमिति शेषः। प्रश्नोपपत्तौ प्रतिवचनमुपपन्नमेवेति मन्वानस्तदुक्त्वा

तस्माद्यद्यप्यनुमानकौशलं राज्ञस्तथापि तु युक्तो याज्ञवल्क्यः प्रष्टुं विज्ञानकौशलतारतम्योपप
त्तेः पुरुषाणां अथवा श्रुतिः स्वयमेवाख्यायिकाव्याजेनानुमानमार्गमुपन्यस्यास्मान् बोधय

१ आदित्यज्योतिः सम्राळिति होवाच

ति पुरुषमतिमनुसरंती। याज्ञवल्क्योपि जनकाभिप्रायाभिज्ञतया व्यतिरिक्तमात्मज्योति
र्बोधयिष्यन् जनकं प्रति व्यतिरिक्तप्रतिपादकमेव लिंगं प्रतिपेदे। यथाप्रसिद्धमादित्यज्योतिः

पयति। याज्ञवल्क्योपीति। अतिरिक्तज्योतिषि प्रष्टुः राज्ञोभिप्रायस्तदभिज्ञतया तथाविधं ज्यो
ती राजानं बोधयिष्यन् यथातिरिक्तज्योतिरावेदकं वक्ष्यमाणं लिंगं गृहीतव्याप्तिकं प्रसिद्धं भ
वति न तथा तद्व्याप्तिग्रहणस्थलमादित्यज्योतिरित्यादिना मुनिरपि प्रतिपन्नवानित्यर्थः॥ ७॥

सम्राळिति होवाच

व्याप्तिं बुभुत्समानः पृच्छति कथमिति। यो व्यवहारः सोतिरिक्तज्योतिरधीनो यथा सवित्रधीनो जाग्रद्व्यवहा
र इति व्याप्तिं व्याकरोत्यादित्येनेति। एवकारं व्याचष्टे स्वावयवेति। आदित्यापेक्षामंतरेण चक्षुर्वन्नादेवा
यं व्यवहारः सेत्स्यतीत्याशंक्याह चक्षुष इति। आसनाद्यन्यतमव्यापारव्यपदेशो व्याप्तिसिद्धेर्यथा विशे
षणबहुत्वमित्याशंक्याहात्यंतेति। आसनादीनामेकैकव्यभिचारे देहस्यान्यथाभावेपि नानुग्राहकं
ज्योतिरन्यथाभवत्यतस्तदनुग्राह्याद्देहादत्यंतविलक्षणमिति विवक्षित्वा व्यापारचतुष्टयमुपदिष्टमित्य

व कथमादित्येनैव स्वावयवसंघातव्यतिरिक्तेन चक्षुषोनुग्राहकेण ज्योतिषायं प्राकृतः। पुरुष आस्त
उपविशति। पल्ययते पर्येति क्षेत्रमरण्यं वा तत्र गत्वा वा कर्म कुरुते विपल्येति विपर्येति च यथागत
मित्येतद्व्यतिरिक्तज्योतिष्ट्वप्रसिद्धताप्रदर्शनार्थमनेकविशेषणे बाह्यानेकज्योतिःप्रदर्शनं च लिंग

आदित्येनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य ॥२॥ अ
स्तमित आदित्ये याज्ञवल्क्य किं ज्योतिरेवायं पुरुष इति चंद्रमा एवास्य ज्योतिर्भवतीति चंद्र
मसैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य ॥३॥ अस्तमित
आदित्ये याज्ञवल्क्य चंद्रमस्यस्तमिते किं ज्योतिरेवायं पुरुष इत्यग्निरेवास्य ज्योतिर्भवतीत्य
ग्निनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य ॥४॥ ॥७॥ ॥

स्याव्यभिचारित्वप्रदर्शनार्थमेवमेवैतद्याज्ञवल्क्य ॥२॥ तथास्तमित आदित्ये याज्ञवल्क्य किं ज्योति
रेवायं पुरुष इति। चंद्रमा एवास्य ज्योतिरस्तमित आदित्ये चंद्रमस्यस्तमितेग्निर्ज्योतिः शांतेग्नौ वा
ग्ज्योतिः॥ वागिति शब्दः परिगृह्यते शब्देन विषयेण श्रोत्रमिंद्रियं दीप्यते श्रोत्रेंद्रिये संदीप्ते मनसि
विवेक उपजायते तेन मनसा बाह्यां चेष्टां प्रतिपद्यते॥ मनसा ह्येव पश्यति मनसा शृणोतीति ब्राह्मणं॥
र्थः। तथापि किमर्थमादित्याद्यनेकपर्यायोपादानमेकेनैव व्याप्तिग्रहसंभवादित्याशंक्याह बाह्येति।
देहेंद्रियमनोव्यापाररूपं कर्म लिंगं तस्य व्यतिरिक्तज्योतिरव्यभिचारसाधनार्थमनेकपर्यायोपन्या
सो बहवो हि दृष्टांता व्याप्तिं दृढयंतीत्यर्थः। इंद्रियं व्यावर्त्तयति वागितीति। शब्दस्य ज्योतिष्ट्वं स्पष्टयितुं
पातनिकां करोति शब्देनेति। तद्दीपनकार्यमाह श्रोत्रेति। मनसि विषयाकारपरिणामे सति किं स्यात्

एवंपातनिकांकृत्वावाचोज्योतिष्ट्वसाधनार्थंपृच्छतिकथमिति।कापुनरत्रानुपपत्तिस्तत्राहवाचइति।त
त्रानंतरवाक्यमुत्तरत्वेनोत्थाप्यव्याकरोत्यतआहेत्यादिना।प्रसिद्धिमेवाकांक्षापूर्वकंस्फुटयतिकथमि
त्यादिना।उपैवेत्यादिव्याचष्टेतेनशब्देनेति।ज्योतिःकार्यत्वंतज्जन्यव्यवहाररूपकार्यवत्त्वमितियाव
कथं।पुनर्वाक्ज्योतिरितिवाचोज्योतिष्ट्वमप्रसिद्धमित्यतआह॥तस्माद्वैसम्राट्यस्माद्वाचाज्यो
तिषानुगृहीतोयंपुरुषोव्यवहरतितस्मात्प्रसिद्धमेतत्वाचोज्योतिष्ट्वंकथमपियत्रयस्मिन्
कालेप्रावृषिप्रायेणमेघांधकारेसर्वज्योतिःप्रत्यस्तमयेस्वोपिपाणिर्हस्तोनविस्पष्टंनिर्ज्ञायते
थतस्मिन्कालेसर्वचेष्टानिरोधप्राप्तेर्बाह्यज्योतिषोभावात्यत्रवागुच्चरतिश्वावाभषतिगर्द
भोवारौतिउपैवतत्रन्येति।तेनशब्देनज्योतिषाश्रोत्रमनसोःनैरंतर्यंभवति।तेनज्योतिःकार्य

अस्तमितआदित्येयाज्ञवल्क्यचंद्रमस्यस्तमितेशांतेग्नौकिंज्योतिरेवायंपुरुषइतिवागे
वास्यज्योतिर्भवतीतिवाचैवायंज्योतिषास्तेपल्ययतेकर्मकुरुतेविपल्येतीतितस्माद्वैस तौ२
म्राडपियत्रस्वःपाणिर्नविनिर्ज्ञायतेथयत्रवागुच्चरत्युपैवतत्रन्येतीत्येवमेवैतद्याज्ञव
ल्क्य॥५॥ ॥

त्वंवाक्प्रतिपद्यतेतेनवाचाज्योतिषाउपन्येतीत्येवतत्रचकर्मकुरुतेविपल्येतितत्र
वाक्ज्योतिषोग्रहणंगंधादीनामुपलक्षणार्थं।गंधादिभिरपिहिघ्राणादिष्वनुगृहीतेषुप्रवृत्तिनि
वृत्त्यादयोभवंति॥तेनतैरप्यनुग्रहोभवतिकार्यकरणसंघातस्यएवमेवैतद्याज्ञवल्क्य॥शांतायां
पुनर्वाचिगंधादिष्वपिचशांतेषुबाह्येष्वनुग्राहकेषुसर्वप्रवृत्तिनिरोधःप्राप्तोस्यपुरुषस्य॥७॥ ॥

तु।तत्रवाक्ज्योतिषइत्यत्रचतुर्थपर्यायःसप्तम्यर्थं।किमितिगंधादयःशब्देनोपलक्ष्यंतेतत्राहगंधा
दिभिरिति।प्रश्नांतरमुत्थापयत्येवमेवेति।तथापिस्वप्नादौतस्यप्रवृत्तिदर्शनात्तत्कारणीभूतंज्यो
तिर्वक्त [illegible] व्यमितिशेषः॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥

कथंपुनरत्रपृच्छ्यतेज्योतिरंतरमित्याशंक्यप्रष्टुरभिप्रायमाहेतदुक्तंभवतीति। योव्यवहारःसोतिरिक्तज्योति
र्निमित्तोयथादित्यादिनिमित्तोजाग्रद्व्यवहारइतिव्याप्तिमुक्तांनिगमयतिएवंतावदितिव्याप्तिज्ञानकार्य
मनुमानमाहतस्मादिति। तादृगवस्थायांसर्वज्योतिःप्रत्यस्तमयदशायामितियावत्। विमतोव्यवहा
रोतिरिक्तज्योतिरधीनोव्यवहारत्वात्संप्रतिपन्नवदित्यधस्तादेवानुमानमावेदितमितिभावः। हेतोराश्र
यासिद्धिमाशंक्यपरिहरतिदृश्यतेचेति। आदिशब्देनदेशांतरादौकर्मकरणंगृह्यतेआश्रयैकदेशासिद्धि
माशंक्याहसुषुप्ताश्चेति। ध्यानदशायामिष्टदेवतादर्शनंचकारार्थः। अनुमानफलंनिगमयतितस्मा
एतदुक्तंभवतिजाग्रद्विषयेबहिर्मुखानिकरणानिचक्षुरादीन्यादित्यादिज्योतिर्भिरनुगृह्यमाणानि
यदातदास्फुटतरःसंव्यवहारोस्यपुरुषस्यभवति। एवंतावज्जागरितेस्वावयवसंघातव्यतिरिक्तेनैव
ज्योतिषाज्योतिःकार्यसिद्धिरस्यपुरुषस्यदृष्टातस्मात्तेवयंमन्यामहेसर्वबाह्यज्योतिःप्रत्यस्तमयेपि
स्वप्नसुषुप्तकालेजागरितेचतादृगवस्थायांस्वावयवसंघातव्यतिरिक्तेनैवज्योतिषाज्योतिःकार्यसिद्धि
रस्येति। दृश्यतेचस्वप्नेज्योतिःकार्यसिद्धिर्बंधुसंगमनयोगदर्शनंदेशांतरगमनादिच। सुषुप्ताच्चोत्थि
ते॥सुखमहमस्वाप्संनकिंचिदवेदिषंतस्मादस्तिव्यतिरिक्तंकिमपिज्योतिःकिंपुनस्तच्छांतायांवाचिज्यो
तिर्भवतीतिउच्यते। आत्मैवास्यज्योतिर्भवतिइत्यात्मेतिकार्यकरणस्वावयवसंघातव्यतिरिक्तंकार्यक
रणावभासकंआदित्यादिबाह्यज्योतिर्वत्। स्वयमन्येनानवभास्यमानम् अभिधीयतेज्योतिरंतरस्थंचत
त्सारिशेष्यात्कार्यकरणव्यतिरिक्तंनदितितावत्सिद्धं। यच्चकार्यकरणसंघातव्यतिरिक्तंकार्यकरणसंघा
तानुग्राहकंचज्योतिस्तद्बाह्येश्चक्षुरादिकरणैरुपलभ्यमानंदृष्टंनतुतथातच्चक्षुरादिभिरुपलभ्यतआदित्या
दिज्योतिःषूपरतेषु। कार्यंतुज्योतिषादृश्यते। यस्मादात्मनैवायंज्योतिषास्तेपल्ययतेकर्मकुरुतेविपल्येतीति
तस्मात्तन्नूनमंतःस्थंज्योतिरवगम्यते। किंचादित्यादिज्योतिर्विलक्षणंतदभौतिकंचसएवहेतुर्यच्चक्षुराद्य
दिति। यथोक्तादनुमानाज्ज्योतिःसिद्धंचेत्किंप्रश्नेनेत्याशंक्याहकिंपुनरिति। सर्वज्योतिरुपशमेदृश्यमानस्यव्यव
हारस्यकारणतयानुमानतोज्योतिर्मात्रसिद्धावपितद्विशेषबुभुत्सयाप्रश्नोपपत्तिरित्यर्थः। प्रतिवचनमवतार्यव्या
करोत्यच्यतइत्यादिना। अवभासकत्वेदृष्टांतमाहादित्यादीति। तत्रव्यतिरिक्तत्वंसाधयतिकार्येति। अनुग्राहकत्वा
दादित्यादिवदितिशेषः। तच्चांतस्थं पारिशेष्यादित्युक्तमुपपादयतितच्चेति। उपरतेष्वात्मज्योतिरितिशेषः। तदे

संप्रतिलोकायतश्चोदयतिनेत्यादिना। तत्रनअर्थंव्याचष्टेयदिति। उक्तंहेतुंप्रश्नपूर्वकंविभजतेकस्मादित्यादिना।
त्यादि यद्यपिदेहादेरुपकार्यादुपकारकमादित्सजातीयंदृष्टंतथापिनात्मज्योतिरुपकार्यसजातीयमनुमेयमित्याशं
क्याहयथादृष्टंचेति। तदेवस्पष्टयतियदिनामेति। विमतमंतःस्थमतिरिक्तंचातींद्रियत्वादादित्यवदितिपरोक्तं
व्यतिरेक्यनुमानमनूद्यदूषयतियत्पुनरित्यादिना। अनैकांतिकत्वंव्यनक्तियतइतिअंतस्थान्यतिरिक्तानि
चसंघातादितिद्रष्टव्यं। व्यभिचारफलमाहतस्मादिति। विलक्षणमंतस्थंचेतिमंतव्यं। किंचचैतन्यंशारीरधर्म

नसमानजातीयेनैवोपकारदर्शनादादित्यादिविलक्षणंज्योतिरांतरंसिद्धमित्येतदसत्। कस्मादुप
क्रियमाणसमानजातीयेनैवादित्यादिज्योतिषाकार्यकरणसंघातस्यभौतिकस्यभौतिकेनैवोपकारः
क्रियमाणोदृश्यते। यथादृष्टंचेदनुमेयंयदिनामकार्यकरणादर्थांतरंतदुपकारकमादित्यादिवज्ज्यो
तिस्तथापिकार्यकरणसंघातसमानजातीयमेवानुमेयंकार्यकरणसंघातोपकारकत्वात्आदित्या क
दिज्योतिर्वत्। यत्पुनरंतरस्थत्वादप्रत्यक्षत्वाच्चवैलक्षण्यमुच्यते। तच्चक्षुरादिज्योतिर्भिरनैकांति
कं॥ यतोप्रत्यक्षाण्यंतस्थानिचचक्षुरादिज्योतींषिभौतिकान्येव॥ तस्मात्तवमनोरथमात्रंविल
क्षणमात्मज्योतिःसिद्धमिति। कार्यकरणसंघातभावभावित्वाच्चसंघातधर्मत्वमनुमीयतेज्यो
तिषःसामान्यतोदृष्टस्यचानुमानस्यव्यभिचारित्वादप्रामाण्यं। सामान्यतोदृष्टबलेनहिभवाना
दित्यादिवत्व्यतिरिक्तंज्योतिःसाधयतिकार्यकरणाभ्यांनचप्रत्यक्षमनुमानेनबाधितुंशक्यते।
अयमेवतुकार्यकारणसंघातःप्रत्यक्षंपश्यतिशृणोतिमनुतेविजानातिच॥ ॥७॥ ॥

स्तद्भावभावित्वाद्रूपादिवदित्याहकार्यकरणेति। विमतंसंघाताद्भिन्नंतद्भासकत्वादादित्यवदित्यनुमा
नान्नसंघातधर्मत्वंचैतन्यस्येत्याशंक्याहसामान्यतोदृष्टस्येतिलोकायतस्यहिदेहावभासकमपिच
क्षुस्ततोनभिद्यतेतथाचव्यभिचारान्नतदनुमानप्रामाण्यमित्यर्थः। मनुष्योहंजानामीतिप्रत्यक्षविरोधाच्च
म तदनुमानंमानमित्याहसामान्यतोदृष्टेति। ननुतेनप्रत्यक्षमुत्सार्यतामितिचेत्नेत्याहनचेति। इतश्चदेहस्ये
वचैतन्यमित्याहायमेवेति॥ ॥७॥ ॥७॥ ॥७॥ ॥

बृ॰भा॰श्रा॰ ज्योतिषा देहव्यतिरेकमंगीकृत्यो [illegible] दूषयति यदि नामेति। विमतं ज्योतिरनात्मा देहोपकारकत्वादादित्यव टी॰अ॰४
३१२ दित्यर्थः। आत्मत्वं तर्हि कस्येत्याशंक्याह एवं त्विति। अनुमानादात्मनो देहव्यतिरिक्तत्वमुक्तमित्याशंक्या
ह प्रत्यक्षेति। नान्य आत्मेति पूर्वेण संबंधः। देहस्यात्मत्वे कादाचित्कं द्रष्टृत्वश्रोतृत्वाद्ययुक्तमिति शंक
ते नन्विति। स्वभाववादी परिहरति। नैष दोष इति कादाचित्के दर्शनादर्शने संभवतो देहस्वाभाव्यादित्य
त्र दृष्टांतमाह नहीति विमतं कारणांतरपूर्वकं कादाचित्कत्वात् घटवदित्यनुमानं दृष्टांते भविष्यतीत्या

यदि नाम ज्योतिरंतरमस्योपकारकं स्यादादित्यादिवत् नासावात्मा स्यात्। ज्योतिरंतरमादित्या
दिवदेव। य एव तु प्रत्यक्षं दर्शनादिक्रियो [illegible] करोति स एवात्मा स्यात्कार्य
करणसंघातो नान्यः॥ प्रत्यक्षविरोधेनुमानस्याप्रामाण्यात्। नन्वयमेव चेद्दर्शनादिक्रियायां
कर्त्तात्मा संघातः कथमविकलस्यैवास्य दर्शनादिक्रियाकर्तृत्वं कदाचिद्भवति कदाचिन्नेति। नै
ष दोषः दृष्टत्वात्। नहि दृष्टेनुपपन्नं नाम। नहि खद्योते प्रकाशाप्रकाशकत्वेन दृश्यमानेकार
णांतरमनुमेयं॥ अनुमेयत्वे च केन चित्तो [illegible] मान्यात्सर्वं सर्वत्रानुमेयं स्यात् तच्चानिष्टं। न च
पदार्थस्वभावो नास्ति॥ नह्यग्नेरुष्णस्वाभाव्यमन्यनिमित्तमुदकस्य शैत्यं॥ प्राणिधर्माधर्मा
द्यपेक्षमिति चेत्॥ धर्माधर्मादेर्निमित्तांतरापेक्षस्वभावप्रसंगः॥ अस्त्विति चेत् न॥ तदनवस्था
प्रसंगः॥ स चानिष्टः॥ न॥ स्वप्नस्मृत्योर्दृष्टस्यैव दर्शनात्॥ यदुक्तं स्वभाववादिना देहस्यैव दर्शनादि

शंक्याग्निरुष्ण इतिवदुष्णमुदकमित्यपि द्रव्यत्वादिनानुमीयेतेत्यतिप्रसंगमाह। अनुमेयत्वे चेति। ननु यद्भ
वति तत्सनिमित्तमेव न स्वभावाद्भवेत् किंचिदस्माकं प्रसिद्धं तत्राह न चेति। अग्नेरौष्ण्यमुदकस्य शैत्यमि
त्याद्यपि न निर्निमित्तं किंतु प्राण्यदृष्टापेक्षमिति शंकते प्राणीति। आदिशब्देनेश्वरादिर्गृह्यते गूढाभिसं
धिः स्वभाववाद्याह धर्मेति। प्रसंगस्येष्टत्वं शंकित्वा स्वाभिप्रायमाहास्त्वित्यादिना सिद्धांती स्वप्नादिसिद्ध्य
नुपपत्या देहादतिरिक्तमात्मानमभ्युपगमयन्नुत्तरमाह नेत्यादिना॥ तत्र न अर्थं विभजते यदुक्तमिति॥ १२

स्वप्नेदृष्टस्यैवदर्शनादितिहेतुभागंव्यतिरेकद्वाराविवृणोतियदिहीति।जाग्रद्देहस्यद्रष्टुःस्वप्नेनष्टत्वादतीन्द्रि
यस्यसंस्कारस्यचानिष्टत्वादन्यदृष्टेवान्यस्यस्वप्नायोगान्नस्वप्नदृष्टस्यैवदर्शनंदेहात्मवादेसंभवतीत्यर्थः।
माभूद्दृष्टस्यैवस्वप्नेदृष्टिरेवंधस्यापिस्वप्नदृष्टेरित्याशंक्याहांधइति।अपिशब्दोध्याहर्तव्यःपूर्वंदृष्टस्यैवस्वप्ने
दृष्टत्वेपिकुतोदेहव्यतिरिक्तोद्रष्टासिद्ध्यतीत्याशंक्याहततश्चेति।अतएवयत्रदेहस्यैवद्रष्टृत्वेकाहानिरिति
चेदतआहदेहश्चेदिति।तत्रसहकारिचक्षुरभावाच्चक्षुरंतरस्यचोत्पत्तौदेहांतरस्यापिसमुत्पत्तिसंभवा
दन्यदृष्टेन्यस्यनस्वप्नःस्यादित्यर्थः।माभूत्पूर्वदृष्टेस्वप्नोहेत्वभावादित्याशंक्याहास्तिचेति।कथंतेजा
यदिहिदेहस्यैवदर्शनादिक्रियास्वप्नेदृष्टस्यैवदर्शनंनस्यादंधःस्वप्नेपश्यन्नदृष्टमेवपश्यतिनशाकद्वीपा
दिगतमदृष्टरूपंतंतश्चैतत्सिद्धंभवतियःस्वप्नेपश्यतिदृष्टपूर्वंवस्तुसएवपूर्वंविद्यमानेचक्षुषिअद्राक्षी
न्नदेहदेहश्चेद्द्रष्टासयेनाद्राक्षीत्तस्मिन्नुद्धृतेचक्षुषिस्वप्नेतदेवदृष्टपूर्वंनपश्येत्।अस्तिचलोकेप्रसि
द्धिःपूर्वंदृष्टमयाहिमवतःशृंगमद्याहंस्वप्नेद्राक्षमित्युद्धृतचक्षुषामेधानामपितस्मादनुद्धृतेपिच
क्षुषियःस्वप्नद्रष्टासएवद्रष्टानदेहइत्येवगम्यते॥तथास्मृतोद्रष्टृस्मर्त्रैरिकत्वेसतियएवद्रष्टासए
वस्मर्त्ता॥यदाचैवंतदानिमीलिताक्षोपिस्मरन्नदृष्टपूर्वंयद्रूपंतद्दृष्टवदेवपश्यतीति।तस्माद्यन्नि
मीलितेतन्नद्रष्टृयन्निमीलितेचक्षुषिस्मरद्रूपंपश्यतितदेवानिमीलितेचक्षुषिद्रष्टासीदित्यव
गम्यते॥मृतेचदेहेविकलस्यैवचरूपादिदर्शनाभावात्।देहस्यैवद्रष्टृत्वेमृतेपिदर्शनादिक्रियास्या
त्येधानामीदृग्दर्शनमितिचेज्जन्मांतरानुभववशादितिब्रूमः।अंधस्यदेहस्याद्रष्टृत्वेपिचक्षुष्मतस्त
स्यस्याद्देवद्रष्टृत्वमित्याशंक्याहतस्मादिति।स्वप्नेदृष्टस्यैवदर्शनादितिहेतुंव्याख्यायस्मृतोदृष्टस्यैव
दर्शनादितिहेतुंव्याचष्टेतथेति।द्रष्टृस्मर्त्रैरिकत्वेपिकुतोदेहातिरिक्तोद्रष्टेत्याशंक्याहयदाचेति।दे
हातिरिक्तस्यस्मर्तृत्वेपिकुतोद्रष्टृत्वमित्याशंक्याहतस्मादिति।द्रष्टृस्मर्त्रैरिकत्वस्योक्तत्वाद्देहातिरि
क्तःस्मर्त्ताचेत्तद्द्रष्टापितथासिद्ध्यतीतिभावः।देहस्याद्रष्टृत्वेहेत्वंतरमाहमृतेचेति।नतस्यद्रष्टृतेतिशे
षःतदेवोपपादयतिदेहस्यैवेति॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

वृ॰भा॰आ॰ देहातिरिक्तमात्मानमुपपादितमुपसंहरतितस्मादिति। चैतन्यंयत्तदोरर्थः। माभूद्देहस्यात्मत्वमिन्द्रिया टी॰अ॰४
३१४ णांतुस्यादितिशंकतेचक्षुरादीनीति। अन्यदृष्टस्येतरेणाप्रत्यभिज्ञानादितिन्यायैर्परिहरतिनेत्यादिना न
आत्मप्रतिपत्तिहेतूनांमनसिसंभवादितिन्यायेनशंकतेमनइति। ज्ञातुर्ज्ञानसाधनोपपत्तेःसंज्ञाभेदमा
त्रमितिन्यायेनपरिहरतिनमनसोपीति। देहादेरनात्मत्वेफलितमाह। तस्मादिति। आत्मज्योतिःसंघाता

तस्माद्यदपायेदेहदर्शनंनभवतियद्भावेचभवति। तद्दर्शनक्रियादिकर्तृनदेहइत्यवगम्यते। चक्षुरा
दीन्येवदर्शनादिक्रियाकर्तॄणीतिचेत्। नयदहमद्राक्षंतत्स्पृशामीतिभिन्नकर्तृकत्वेप्रतिसंधानानु
पपत्तेः। मनस्तर्हीतिचेत्। नमनसोपिविषयत्वाद्रूपादिवत्द्रष्टृत्वानुपपत्तेः॥ तस्मादंतरस्थंव्यतिरि
क्तमादित्यादिवदितिसिद्धं। यदुक्तंकार्यकरणसंघातसमानजातीयमेवज्योतिरंतरमनुमेयं। आ
दित्यादिभिस्तत्समानजातीयैरेवोपक्रियमाणत्वादिति। तदसदुपकार्योपकारकभावस्यानिय
मदर्शनात्॥ कथंपार्थिवैरिंधनैःपार्थिवत्वसमानजातीयैस्तृणोलपादिभिरग्नेःप्रज्वलनोपका
रःक्रियमाणोदृश्यते। नचतावतातत्समानजातीयैरेवाग्नेःप्रज्वलनोपकारःसर्वत्रानुमेयःस्यात्।
येनोदकेनापिप्रज्वलनोपकारोभिन्नजातीयेनवैद्युतस्याग्नेर्जाठरस्यचक्रियमाणोदृश्यते॥ ॥

दितिशेषः। परोक्तमनुवदतियदुक्तमिति। अनुग्राह्यसजातीयमनुग्राहकमित्यत्रहेतुमाह। आदित्या
दिभिरिति। उपकार्योपकारकभावस्यसाजात्यनियमंदूषयतितदसदिति। अनियमदर्शनमा
कांक्षापूर्वकमुदाहरतिपार्थिवैरिति। उलपंबालतृणंपार्थिवस्यैवाग्निंप्रत्युपकारकत्वनियमंवा
रयतिनचेति। तावतापार्थिवेनाग्नेरुपक्रियमाणत्वदर्शनेनेतियावत्। तत्समानजातीयैरितितच्छ
ब्दःपार्थिवत्वविषयः। तत्रहेतुमाह। येनेति॥ ॥७॥ ॥७॥ ॥७॥ १४

दर्शनफलत्वेन निगमयति तस्मादिति। उपकार्योपकारकभावे साजात्यानियमवदुपकार्योपकारकभावेपि वैजात्यनियमो नास्तीत्यर्थः। तत्रोपकार्योपकारकत्वे साजात्यनियमाभावमुदाहरणांतरेण दर्शयति कदाचिदिति। अभसाग्निनावाग्नेरुपशांत्युपलंभादुपकार्योपकारकत्वे वैजात्यनियमोपि नास्तीति मत्वोपसंहरति तस्मादिति। उक्तानियमदर्शनं तच्छब्दार्थः। अहेतुरात्मज्योतिषः संघातेन समानजातीयतामिति शेषः। अनुग्राहकमनुग्राह्यसजातीयमनुग्राहकत्वादादित्यवदित्यपास्तं प्रत्यतीन्द्रियत्वहेतोरनैकांत्यं परोक्तमनुभाष्य दूषयति यस्तु नरित्यादिना। विमतं ज्योतिः संघातधर्मस्तद्भावभावित्वाद्रूपादिवदित्युक्तमनूद्य निराकरोति कार्येति। अनुमान

तस्मादुपकार्योपकारकभावे समानजातीयासमानजातीयनियमो नास्ति॥ कदाचित्समानजातीया मनुष्या मनुष्यैरेवोपक्रियंते कदाचित्स्थावरपश्वादिभिश्च भिन्नजातीयैः॥ तस्माददहेतुः कार्यकरणसंघातसमानजातीयैरेवादित्यादिज्योतिर्भिरुपक्रियमाणत्वादि॥ यस्तु नरात्मचक्षुरादिभिरादित्यादिज्योतिर्वदव्ययत्वादिसयं हेतुर्ज्योतिरंतरस्यांतःस्थत्वे वैलक्षण्यं च न साधयति चक्षुरादिभिरनैकांतिकत्वात् इति। न दृसञ्चक्षुरादिकरणेभ्योऽन्यत्वे सतीति हेतोर्विशेषणत्वोपपत्तेः। कार्यकरणसंघातधर्मत्वं ज्योतिष इति। यदुक्तं तन्नानुमानविरोधात्। आदित्यादिज्योतिर्वत्कार्यकरणसंघातादर्थांतरं ज्योतिरिति ह्यनुमानमुक्तं तेन विरुध्यते ऽयं प्रतिज्ञा कार्यकरणसंघातधर्मत्वं ज्योतिष इति तद्भावभावित्वं त्वसिद्धं मृतेदेहे ज्योतिषो ऽदर्शनात्। सामान्यतो दृष्टस्यानुमानस्याप्रामाण्ये पानभोजनादि सर्वव्यवहारलोपप्रसंगः। स चानिष्टः पानभोजनादिषु हि क्षुत्पिपासानिवृत्तिमुपलभ्य वतस्तत्सामान्यात् पानभोजनाद्युपादाने दृश्यमाने लोके न प्राप्नोति॥ दृश्यंते ह्युपलब्धपानभोजनाः सामान्यतः पुनः पानभोजनांतरैः क्षुत्पिपासादिनिवृत्तिमनुमिन्वंतः तादर्थ्येन प्रवर्त्तमानाः॥ ॥७॥ ॥

त्य विरोधमेव साधयति आदित्यादीति कालात्ययापदेशमुक्त्वा हेत्वसिद्धिं दोषांतरमाह तद्भावेति। अदर्शनादिति छेदः। यस्तु नर्विशेषेनुगमाभावः सामान्ये सिद्धसाध्यतेत्यनुमानदूषणमभिप्रेत्य सामान्यतो दृष्टस्य चेत्याद्युक्तं तद्दूषयति सामान्यतो दृष्टस्येति। विशेषतो दृष्टस्येत्यपि द्रष्टव्यं किमित्यनुमानाप्रामाण्ये सर्वव्यवहारहानिरित्याशंक्याह पानेति। तत्सामान्यात् पानत्वभोजनत्वादिसादृश्यादिति यावत्। पानभोजनाद्यु

पादाने दृश्यमानमित्युक्तं विवादयति दृश्यंते हीति। तादर्थ्येन क्षुत्पिपासादिनिवृत्त्युपायभोजनपानाद्यर्थत्वेनेति यावत्॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥

देहस्यैवद्रष्टृत्वमित्युक्तमनूद्य पूर्वोक्तं परिहारं स्मारयति यदुक्तमित्यादिना। ज्योतिरंतरमादित्यादिवदना
त्मेत्युक्तं प्रत्याहानेनेति। संघातादेर्द्रष्टृत्वनिराकरणेनेतियावत्। देहस्य कदाचित्कं दर्शनादिमत्त्वं स्वाभाविक
मित्यत्र परोक्तदृष्टांतमनुभाष्य निराचष्टे यत्पुनरित्यादिना सिद्धांतिनापि स्वभाववादस्य क्वचिदेष्टव्यत्वमुप
दिश्य मनूद्य दूषयति यत्पुनरिति। धर्मादेर्यदि हेत्वंतराधीनं फलदातृत्वं तदा हेत्वंतरस्यापि हेत्वंतराधीनं फ
लदातृत्वमित्यनवस्थेत्युक्तं प्रत्याहैतेनेति। सिद्धांतविरोधप्रसंजनेनेतियावत्। लोकायतमतासंभवे स्वप

यदुक्तमयमेव तु देहो दर्शनादिक्रियाकर्तेति तत्प्रथममेव परिहृतं। स्वप्नस्मृत्योर्देहादर्थांतरभूतोद्र
ष्टेति। अनेनैव ज्योतिरंतरस्यानात्मत्वमपि प्रत्युक्तं। यत्पुनः खद्योतादेः कादाचित्कं प्रकाशाप्रका
शकत्वं। नदसत्पक्षाद्यवयवसंकोचविकाशनिमित्तत्वात् प्रकाशाप्रकाशकत्वस्य। यत्पुनरुक्तं धर्माध
र्मयोरवश्यं फलदातृत्वं स्वभावोऽभ्युपगंतव्य इति तदभ्युपगमे भवतः सिद्धांतहानात्। एतेनानव
स्थादोषः प्रत्युक्तः तस्मात् अस्ति व्यतिरिक्तमंतरस्थं च ज्योतिरात्मेति॥ यद्यपि व्यतिरिक्तत्वादि सि
द्धं॥ तथापि समानजातीयानुग्राहकत्वदर्शननिमित्तभ्रांत्याकरणानामेवान्यतमो व्यतिरिक्तो
वेत्यविवेकतः पृच्छति कतम इति॥ न्यायसूक्ष्मतया दुर्विज्ञेयत्वादुपपद्यते भ्रांतिः। अथवा शरी ॥७॥
रव्यतिरिक्ते सिद्धेपि करणानि सर्वाणि विज्ञानवंतीव विवेकत आत्मनोनुपलब्धत्वात्॥१४।१५।१६॥

क्षमुपसंहरति तस्मादिति। नत्वात्मज्योतिः संघाताद्व्यतिरिक्तमंतस्थं चेति साधितं तथा च कथं कतम आ
त्मेति पृच्छ्यते तत्राह यद्यपीति। अनुग्राह्येन देहादिना समानजातीयस्यादित्यादेरनुग्राहकत्वदर्शनान्नि
मित्तादनुग्राहकत्वाविशेषादात्मज्योतिरपि समानजातीयं देहादिनेति भ्रांतिर्भवति तयेतियावत्। अ
विवेकिनो निःकृष्टदृष्ट्यभावादित्यर्थः। व्यतिरेकसाधकस्य न्यायस्य दर्शितत्वात् कुतो भ्रांतिरित्याशंक्याह
न्यायेति। भ्रांतिनिमित्ताविवेककृतं प्रश्नमुक्त्वा प्रकारांतरेण प्रश्नमुत्थापयति अथवेति॥ ॥७॥ ॥

प्रश्नाक्षराणिव्याचष्टेकतमोसाविति। ननुज्योतिर्निमित्तोव्यवहारोमयोक्तोनत्वात्मेत्याशंक्याहयेनेति। आ
त्मनैवायंज्योतिषेत्युक्तत्वादासनादिनिमित्तंज्योतिरात्मेत्यर्थः। प्रकारांतरेणप्रश्नंव्याकरोत्यथवेति। स
प्तम्यर्थंकथयतिसर्वेइति। योयंत्वयाभिप्रेतोविज्ञानमयःसप्राणेषुमध्येकतमःस्यात्तेषुहिविज्ञान

अतोहंपृच्छामि। कतमआत्मेति। कतमोसौदेहेंद्रियप्राणमनःसुयस्त्वयोक्तआत्मायेनज्योतिषास्तइ
त्युक्तं॥ अथवायोयमात्मात्वयाभिप्रेतोविज्ञानमयः। सर्वइमेप्राणाःविज्ञानमयाइवैषुप्राणेषुकत
मःयथासमुदितेषुब्राह्मणेषुसर्वइमेतेजस्विनःकतमएषुषडंगविदितिपूर्वस्मिन्व्याख्यानेकतम
आत्मेत्येतावदेवप्रश्नवाक्यंयोयंविज्ञानमयइतिप्रतिवचनंद्वितीयेतुव्याख्यानेप्राणेष्वित्येवमंतं

कतमआत्मेतियोयंविज्ञानमयः॥

प्रश्नवाक्यंअथवासर्वमेवप्रश्नवाक्यं। विज्ञानमयोहृद्यंतर्ज्योतिःपुरुषःकतमइत्येतदंतंयो
यंविज्ञानमयइत्येतस्यशब्दस्यनिर्द्धारितार्थविशेषविषयत्वे॥ कतमआत्मेतीतिशब्दस्यप्र
श्नवाक्यपरिसमाप्त्यर्थत्वंव्यवहितसंबंधमंतरेणायुक्तमितिकृत्वाकतमआत्मेत्येवमंतंप्र
श्नवाक्यंयोयमित्यादिपरंसर्वमेवप्रतिवचनमितिनिश्चीयते॥ ॥७॥ ॥

मयाइवभांतीतियोजना। उक्तमर्थंदृष्टांतेनबुद्धावारोपयतियथेति। व्याख्यानयोरवांतरविभागमाह।
पूर्वस्मिन्नित्यादिना। हृदीत्यादिप्रतिवचनमितिशेषः। पक्षांतरमाहाथवेति। सर्वस्यप्रश्नत्वेवाक्ययो
जयतिविज्ञानेति। ससमानःसन्नित्यादिप्रतिवचनमितिशेषः॥ ॥७॥ ॥७॥

द्वितीयतृतीयपक्षयोररुचिं सूचयन्नाद्यं पक्षमंगीकरोति योयमिति यस्त्वया पृष्टः। सोयमित्यात्म
नश्चिद्रूपत्वेन प्रत्यक्षत्वादयमिति निर्देशाद् इति पदद्वयस्यार्थः। देहव्यवच्छेदार्थं विशिनष्टि विज्ञान
मय इति। विज्ञानशब्दार्थमा चक्षाणस्तत्प्रायत्वं प्रकटयति बुद्धीति। बुद्धिरेव विज्ञानं विज्ञायतेनेने
ति व्युत्पत्तेस्तेनोपाधिना संपर्कएवाविवेकस्तस्मादिति यावत्। तत्संपर्के प्रमाणमाह बुद्धिविज्ञाने
ति। तस्माद्विज्ञानमय इति शेषः। ननु चक्षुर्मयः श्रोत्रमय इत्यादि हित्वा विज्ञानमय इत्येव कस्मादुपदिश्यते तत्राह बु
द्धिहीति। तस्याः साधारणकरणत्वे प्रमाणमाह मनसा हीति। मनसः सर्वार्थत्वं समर्थयते बुद्धीति। किमर्थानि
योयमित्यात्मनः प्रत्यक्षत्वान्निर्देशः विज्ञानमयशब्दस्य निर्द्धारितार्थविशेषविषयत्वं युक्तं। विज्ञानमयो वि
ज्ञानप्रायो बुद्धिविज्ञानोपाधिसंपर्काविवेकाद्विज्ञानमय इत्युच्यते। बुद्धिविज्ञानं युक्त एव हि यस्मादुपलभ्यते = सं
राहुवच्चंद्रादित्यसंपृक्तो बुद्धिर्हि सर्वार्थकरणे तमसीव प्रदीपः पुरोवस्थितः मनसा ह्येव पश्यति मनसा शृणो
तीत्युक्तं बुद्धिविज्ञानालोकविशिष्टमेव हि सर्वविषयजातमुपलभ्यते॥ पुरोवस्थितप्रदीपालोकवद्विशिष्टमि
व तमसि। द्वारमात्राणि त्वन्यानि करणानि बुद्धेः तस्मात्तेनैव विशेष्यते विज्ञानमय इति॥ येषां परमात्मविज्ञ
ान विकार इति व्याख्यानं तेषां विज्ञानमयो मनोमय इत्यादौ विज्ञानमयशब्दस्यान्यार्थदर्शनादश्रौतार्थो
नावसीयते संदिग्धश्च पदार्थोन्यत्र निश्चितप्रयोगदर्शनान्निर्द्धारितुं शक्यो वाक्यविशेषात् निश्चितन्या
तर्हि चक्षुरादीनि करणानीत्याशंक्याह द्वारमात्राणीति। बुद्धेः सति प्राधान्ये फलितमाह तस्मादिति॥ विज्ञाने
परं ब्रह्म तत्प्रकृतिको जीवो विज्ञानमय इति भर्तृप्रपंचैरुक्तमनुवदति येषामिति। विज्ञानमयादिग्रंथे मयटो न
विकारार्थता तिसैरेवोच्यते तत्र मनः समभिव्याहाराद्विज्ञानं बुद्धिर्न चात्मा तद्विकारस्तस्मादस्मिन्प्रयोगे मयटो
विकारार्थत्वं वदतां स्वोक्तिविरोधः स्यादिति दूषयति तेषामिति। कथं विज्ञानमयपदार्थनिर्णयार्थं प्रयोगांतर
मनुश्रियते तत्राह संदिग्धश्चेति यथा पुरोडाशं चतुर्द्धा कृत्वा बर्हिषदं करोतीति पुरोडाशमात्रचतुर्द्धाकरणवा
क्यमेकार्थसंबंधिना शाखांतरीयेणाग्नेयं चतुर्द्धा करोतीत्यनेन विशेषविषयतया निश्चितार्थेनाग्नेय एव पु
रोडाशोवच्छिद्यते यथा वाक्याः शर्करा उपदधातीत्यत्र केनाक्तेत्यपेक्षायां तेजो वै घृतमिति शेषान्निर्णय
स्तथेहापीत्यर्थः। आत्मविकारत्वे मोक्षानुपपत्त्याद्यबाधितन्यायाद्वा विज्ञानमयपदार्थनिश्चय इत्याह।
निश्चितेति॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

यदुक्तंनिर्णयोवाक्यश.....ध्यनक्तिसधीरितिचेति।आधाराद्यर्थेसप्तमीदृष्टासाकथंव्यतिरेकप्रद
र्शनार्थेस्यादाशंक्याहयथेति।भवतुत्रापिसामीप्यलक्षणासप्तमीतथापिकथंव्यतिरेकप्रदर्शनमित्याशंक्या
हप्राणेषुहीति।फलितंसप्तम्यर्थमभिनयतिप्राणेष्विति।तेषुसमीपस्थोपिकथंतेभ्योव्यतिरिच्यतेतत्राहयोही
२ ति।विशेषणांतरमादायव्यावर्त्याशंकामुक्त्वापुनर्वैतार्थ्यंकरोतिहृदीत्यादिना।विशेषणांतरस्यतात्पर्यमा
हांतरितीति।ज्योतिःशब्दार्थमाहज्योतिरिति।तस्यज्योतिष्ट्वंस्पष्टयतितेनेति।आत्मज्योतिषाव्याप्तस्यका
सधीरितिचोत्तरत्रपाठात्।हृद्यंतरितिचवचनाद्युक्तंविज्ञानप्रायत्वमेव।प्राणेष्वितिव्यतिरेकप्रदर्शना
र्थसप्तमी।।यथावृक्षेषुपाषाणइतिसामीप्यलक्षणा।।प्राणेषुहिव्यतिरेकाव्यतिरेकतासंदिह्यतआत्म
नःप्राणेषुप्राणेभ्योव्यतिरिक्तइत्यर्थः।योहियेषुभवतिसतद्व्यतिरिक्तोभवत्येव।यथापाषाणेषुवृक्षः
हृदितत्रैवतस्यात्सालेषुप्राणजातीयैवबुद्धिःस्यादित्यतआह।।हृद्यंतरितिहृच्छब्देनपुंडरीकाकारोमांस

प्राणेषुहृद्यंतर्ज्योतिः।।७।।

पिंडःतत्स्थाबुद्धिर्हृत्तत्स्थाहृदिबुद्धावंतरितिबुद्धिवृत्तिव्यतिरेकप्रदर्शनार्थं।।ज्योतिरवभासात्मकत्वं
दात्मोच्यते।तेनह्यवभासकेनात्मनाज्योतिषास्तेपल्ययतेकर्मकुरुतेचेतनावानिवह्ययंकार्यकरणपिं
डःयथादित्यप्रकाशस्थोघटःयथावामर्कतादिर्मणिःक्षीरादिद्रव्येप्रक्षिप्तःपरीक्षणायात्मच्छाय
मेवतत्क्षीरादिद्रव्यंकरोतितादृगेतदात्मज्योतिःबुद्धेरपिहृदयात्सूक्ष्मत्वात्हृद्यंतस्थमपिहृद
यादिकंकार्यकरणसंघातंचैकीकृत्यात्मज्योतिःछायंकरोतिपारंपर्येणसूक्ष्मस्थूलतारतम्यात्कां
र्यकरणसंघातस्यव्यवहारक्षमत्वेदृष्टांतमाहयथेति।चेतनावानिवेत्युक्तंदृष्टांतेनोपपादयतियथाचे
तिहृदयंबुद्धिःततोपिसूक्ष्मत्वादात्मज्योतिस्तदंतस्थमपिहृदयादिसंघातंचसर्वमेकीकृत्यस्वच्छायंक
रोतीतिकृत्वायथोक्तमणिसादृश्यमुचितमितिदार्ष्टांतिकेयोजना।कथमिदंआत्मज्योतिःसर्वमात्मच्छायं
करोतितत्राहपारंपर्येणेति।विषयादिषुप्रत्यगात्मांतेषूत्तरोत्तरंसूक्ष्मतातारतम्यात्तेष्ववात्मादिविषयांते
षुस्थूलतातारतम्याच्चप्रतीचःसर्वस्मादंतरतमत्वात्तत्रतत्रस्वाकारहेतुत्वमस्तीत्यर्थः।। ।।७।। ।।

वृ·भा·आ· ३१७

बुद्धेरात्मच्छायत्वंसमर्थयतेबुद्धिस्तावदिति।लौकिकपरीक्षकाणांबुद्धावात्माभिमानभ्रांतिमुक्तेर्थेप्रमा
णायतितेनहीति।बुद्धेःपश्चान्मनस्यपिचिच्छायतेत्यत्रहेतुमाहबुद्धीति।आत्मनःसर्वावभासकत्वमुक्त
मुपसंहरत्येवमिति।आत्मनःसर्वावभासकत्वेकिमितिकस्यचित्क्वचिदेवात्मधीरित्याशंक्याहतेनही
ति।बुद्ध्यादेरुक्तक्रमेणात्मच्छायत्वंतच्छब्दार्थः।आत्मज्योतिषःसर्वावभासकत्वेलोकप्रसिद्धिरेवनप्र
माणंकिंतुभगवद्वाक्यमपीत्याहतथाचेति।नाशिनामयमनाशीचेतनश्चेतयितारोब्रह्मादयस्तेषा

बुद्धिस्तावत्स्वच्छत्वादानंतर्याच्चात्मचैतन्यज्योतिःप्रतिच्छायाभवति।तेनहिविवेकिनामपितत्रात्मा
भिमानबुद्धिःप्रथमाततोथानंतर्यात्तुमनसिचैतन्यावभासताबुद्धिसंपर्कात्ततइंद्रियेषुमनःसंयो
गात्ततोनंतरंशारीरेंद्रियसंपर्कात् ॥एवंपारंप
र्येणकृत्स्नंकार्यकरणसंघातमात्माचैतन्यस्वरूपज्योतिषावभासयति।तेनहिसर्वस्यलोकस्य
कार्यकरणसंघातेतद्वृत्तिषुवानियतात्माभिमानबुद्धिर्यथाविवेकंजायते।तथाचभगवतोक्तं

पुरुषः

गीतासु।यथाप्रकाशयत्येकःकृत्स्नंलोकमिमंरविः।क्षेत्रंक्षेत्रीतथाकृत्स्नंप्रकाशयतिभारत॥यदा
दित्यगतंतेजइत्यादिच।नित्योनित्यानांचेतनश्चेतनानामितिचकाठके।तमेवभांतमनुभातिसर्वंत
स्यभासासर्वमिदंविभातीतिचयेनसूर्यस्तपतितेजसेद्धइतिचमंत्रवर्णः।तेनायंहृद्यंतर्ज्योतिःपुरुषः
आकाशवत्सर्वगतत्वात्पूर्णइतिपुरुषःनिरतिशयंचास्यस्वयंज्योतिष्ट्वं।सर्वावभासात्मकत्वात्स्वय
मन्यानवभास्यत्वाच्च।सएषपुरुषःस्वयमेवज्योतिःस्वभावोयंत्वंपृच्छसि।कतमआत्मेति॥ ॥७॥

मयमेवचेतनोयथोदकादीनामनग्नीनामग्निनिमित्तंदाहकत्वंतथात्मचैतन्यनिमित्तमेवचेतयितृत्वम
न्येषामित्याहनित्यइति।अनुगमनवदनुभानंस्वगतयाभासास्यादितिशंकांप्रत्याहतस्येति।येनेति
तत्रनावेदविन्मनुतेतंबृहंतमित्युत्तरत्रसंबंधः।ज्योतिःशब्दव्याख्यानमुपसंहरति।तेनेति।हृद्यंतःस्थितो
यमात्मासर्वावभासकत्वेनज्योतिर्भवतीतियोजनांपदांतरमादायव्याचष्टेपुरुषइति।आदित्यादिज्योति

वृःसकाशादात्मज्योतिषिविशेषमाहनिरतिशयंचेतिप्रतिवचनवाक्यार्थमुपसंहरतिस एषइति॥ ॥

ससमानःसन्नित्याद्यवतारयितुंवृत्तंकीर्तयतिबाह्यानामितितर्हिबाह्यज्योतिःसद्भावावस्थायामकिंचित्करमात्म
ज्योतिरित्याशंक्याह यद्यपीति।व्यतिरेकमुखेनोक्तमर्थमन्वयमुखेनकथयत्यात्मज्योतिरिति।आत्मज्योतिषःस
र्वानुग्राहकत्वेमानमाह।यदेतदिति।सर्वमंतःकरणादिप्रज्ञानेत्रमितिश्रुतेरैतरेयकेश्रवणादुक्तं।आत्मज्योतिषः
सर्वानुग्राहकत्वमित्यर्थः।किंचाचेतनानांकार्यकारणानांचेतनत्वप्रसिद्ध्यनुपपत्त्यासदाचिदात्मव्याप्तिरेष्टव्ये
त्याहसाभिमानोहीति।कथमसंगस्यप्रतीचःसर्वत्रबुध्यादावहंमानइत्याशंक्याहाभिमानेति।वृत्तमनूद्योत्त

बाह्यानांज्योतिषांसर्वकरणानुग्राहकाणांप्रत्यस्तमयेंतःकरणद्वारेणहृद्यंतर्ज्योतिःपुरुषआत्मानुग्राहकःक
रणानामित्युक्तं।।यद्यपिबाह्यकरणानुग्राहकाणामादित्यादिज्योतिषांसद्भावस्तदापिआदित्यादिज्यो
तिषांपरार्थत्वात्कार्यकरणसंघातस्याचैतन्येस्वार्थानुपपत्तेःस्वार्थज्योतिषआत्मनोनुग्रहाभावेअयंकार्य
करणसंघातोनव्यवहारायकल्पते।आत्मज्योतिरनुग्रहेणैवसर्वदासर्वःसंव्यवहारः।यदेतत्हृदयंमनश्चै
तत्संज्ञानमित्यादिश्रुत्यंतरात्।।साभिमानोहिसर्वप्राणिसंव्यवहारः।अभिमानहेतुंचमरकतदृष्टांते

ससमानःसन्नुभौलोकावनुसंचरति॥७॥

नावोचाम।यद्यप्येवमेतत्तथापिजाग्रद्विषयेसर्वकरणगोचरत्वात्आत्मज्योतिषोबुद्ध्यादिबाह्याभ्यंतरका
र्यकरणव्यवहारसन्निपातव्याकुलत्वान्नशक्यतेतज्ज्योतिरात्माख्यंमुंजेषीकावन्निःकृष्यदर्शयितुमित्यतःस्व
प्नेदिदर्शयिषुःप्रक्रमते।ससमानःसन्नुभौलोकावनुसंचरतियःसपुरुषःस्वयमेवज्योतिरात्मासमानःसदृ
शःसन्।।केनप्रकृतत्वात्सन्निहितत्वाच्चहृदयेनहृदीतिहृच्छब्दवाच्याबुद्धिःप्रकृतासंनिहिताच॥ ॥७॥

रवाक्यमवतारयतियद्यपीति।यथोक्तमपिप्रत्यक्ज्योतिर्जागरितेदर्शयितुमशक्यमितिश्रुतिःस्वप्नेप्रस्तौ
तीत्यर्थः।अशक्यत्वेहेतुद्वयमाहसर्वेति।स्वप्नेनिष्कृष्टंज्योतिरितिशेषः।सदृशःसन्ननुसंचरतीतिसंबंधः।
सादृश्यस्यप्रतियोगिसापेक्षत्वमपेक्ष्यपृच्छति।केनेति।उत्तरंप्रकृतत्वादिति।प्राणानामपितुल्यंतदिति
चेत्तत्राहसंनिहितत्वाच्चेति।हेतुद्वयंसाधयतिहृदीत्यादिना॥ ॥७॥ ॥७॥ ॥

बृ·भा·श्रा प्रकृतत्वादिफलमाह तस्मादिति। सामान्यं प्रश्नपूर्वकं विशदयति किं पुनरित्यादिना॥ विवेकतोनुपलब्धि टी·अ·४
३१८ यर्को कर्त्तुबुद्धिज्योतिषोः स्वरूपमाह। अवभास्येति। अवभासकत्वे दृष्टांतमाह। लोकवदिति। तथापि क
थं विवेकतोनुपलब्धिस्तत्राह। अवभास्येति प्रसिद्धमेव प्रकटयति विशुद्धत्वाद्धीति। उक्तमर्थं दृष्टांतेन बुद्धा
वारोपयति यथेत्यादिना। दृष्टांतगतमर्थं दार्ष्टांतिके योजयति तथेति। पुनरुक्तिं परिहरति। (उक्त)मिति। सर्वावभास
कत्वे कथं बुध्यैव सामान्यमित्याशंक्याह तेनेति। सर्वावभासकत्वं तच्छब्दार्थः। किमर्थं तर्हि बुध्या सामान्यमुक्तं
तस्मात्तयैव सामान्यं किं पुनः सामान्यमस्य महिषवद्विवेकतोनुपलब्धिः॥ अवभास्या बुद्धिरवभासकं तदा
त्मज्योतिरालोकवत्॥ अवभास्यावभासकयोर्विवेकतोनुपलब्धिः प्रसिद्धा विशुद्धत्वाद्धालोकोवभास्ये
न सदृशो भवति। यथा रक्तं अवभासयन् रक्तसदृशो रक्ताकारो भवति यथा हरितं लोहितं नीलं चावभा
सयन्नालोकस्तत्सदृशस्तत्समानो भवति। तथा बुद्धिमवभासयन् बुद्धिद्वारेण कृत्स्नं क्षेत्रमवभास
तं यतीत्युक्तं मरकतमणिनिदर्शनेन। तेन सर्वेण समानः॥ बुद्धिसामान्यद्वारेण सर्वमय इति चात एव व
क्ष्यति। तेनासौ कुतश्चित्प्रविभज्य मुंजेषीकावत् स्वेन ज्योतीरूपेण दर्शयितुं न शक्यत इति सर्वव्या
पारे तत्राध्यारोपनामरूपगतं ज्योतिरिदं मं च नामरूपयोः नामरूपे चात्मज्योतिषि सर्वो लोको मो
मुह्यतेऽयमात्मा नायमात्मा एवंधर्मा नैवंधर्मा कर्त्ताऽकर्त्ता शुद्धोऽशुद्धो बद्धो मुक्तः स्थितो गतः आ
गतोस्ति नास्तीत्यादिविकल्पैः अतः समानः सन्नुभौ लोको प्रतिपन्नप्रतिपत्तव्याविहलोकपर
लोकावुपात्तदेहेंद्रियादिसंघातत्यागान्योपादानप्रबंधशतसन्निपातैरनुक्रमेण संचरति॥
धीसादृश्यमेवोभयलोकसंचरणहेतुर्न स्वत इति॥ ॥७॥ ॥

मित्याशंक्य द्वारत्वेनेत्याह। बुद्धीति। आत्मनः सर्वेण समानत्वे वाक्यशेषमनुकूलयति। सर्वमय इति चे
ति वाक्यशेषसिद्धेर्थे लोकशब्दा तेर्गमकत्वमाह तेनेति। सर्वमयत्वेनेति यावत्। आत्मानात्मनोर्विवेकदर्श
नस्यावाक्यत्वे परस्पराध्यासस्तद्धर्माध्यासश्च स्यात् ततश्च लोकानां मोहो भवेदित्याह इति सर्वेति। ध
र्मिविषयं मोहमभिनयत्ययमिति। धर्मविषयं मोहं दर्शयत्येवं धर्मेति। तदेव स्फुटयति कर्त्तेत्यादिना।
विकल्पैः सर्वो लोको मोमुह्यत इति संबंधः। स समानः सन्नित्यस्यार्थमुक्त्वावशिष्टभागं व्याकरोत्यत १८

आत्मनःस्वाभाविकमुभयलोकसंचरणमित्याशंक्यानंतरवाक्यमादत्ते तत्रेति। प्रत्यगात्मा सन्नित्यर्थः। यतःशा
ब्दो वक्ष्यमाणात्ःशब्देन संबध्यते। अक्षरार्थमुक्त्वा वाक्यार्थमाह ध्यानेति। ध्यानवतीं बुद्धिं व्याप्नोति तदात्मा
ध्यायतीवेत्यत्र दृष्टांतमाह लोकवदिति। यथा खल्वालोको नीलं पीतं वा विषयं व्याप्नुवानस्तदाकारो दृश्यते
तथायमपि ध्यानवतीं बुद्धिं भासयन् ध्यानवानिव भवतीत्यर्थः। यथोक्तबुद्ध्यवभासकत्वमुक्तं हेतुमनूद्य फ
नत्रता[illegible]वन्नामरूपोपाधिसादृश्यं भ्रांतिनिमित्तं यत्तदेव च हेतुर्न स्वत इत्येतदुच्यते यस्मात्स समा
नः सन्नुभौ लोकावनुक्रमेण संचरतीति तदेतत् प्रत्यक्षमिति एतद्दर्शयति। यतो ध्यायतीव ध्यानव्या
पारं करोतीव चिंतयतीव ध्यानव्यापारवतीं बुद्धिं स तत्स्थेन चित्स्वभावज्योतीरूपेणावभासयं
स्तत्सदृशस्तत्समानः सन् ध्यायतीवालोकवदेवातो भवति चिंतयतीति भ्रांतिर्लोकस्य न तु
परमार्थतो ध्यायति तथा लेलायतीव अत्यर्थं चलतीव तेष्वेव करणेषु बुद्ध्यादिषु वायुषु च चलत्सु त च
दवभासकत्वात्तत्सदृशत्वादिति लेलायतीव न तु परमार्थतश्चलनधर्मकं तदात्मज्योतिः। कथं पुन

ध्यायतीव लेलायतीव स हि स्वप्नो भूत्वेमं लोकमतिक्रामति मृत्यो रूपाणि॥७॥ ॥

रेतदवगम्यते। तत्समानत्वभ्रांतिरेवोभयलोकसंचरणादिहेतुर्न स्वत इत्यस्यार्थस्य प्रदर्शनाय
हेतुरुपदिश्यते॥ स आत्मा हि यस्मात् स्वप्नो भूत्वा॥ स यया धिया समानः सा धीर्यद्यद्भवति तत्तद
सावपि भवतीव तस्माद्यदासौ स्वप्नो भवति स्वापवृत्तिं प्रतिपद्यते धीस्तदासोपि स्वप्नवृत्तिं प्रतिप
द्यते॥ यदा धीर्जिजागरिषति तदासावपि तथात आह॥ स्वप्नो भूत्वा स्वप्नवृत्तिमवभासयन् धियः स्वापवृ व
त्त्याकारो भूत्वा इमं लोकं जागरितव्यवहारलक्षणं कार्यकरणसंघातात्मकं लौकिकशास्त्रीयव्य
वहारास्पदमतिक्रामति व्यतिक्रामति विविक्तेन स्वेनात्मज्योतिषा स्वप्रात्मिकां धीवृत्तिमवभासय
न्नवतिष्ठते॥ यस्मात्तस्मात्स्वयंज्योतिःस्वभाव एवासौ विशुद्धः सकर्तृक्रियाकारकफलशून्यः पर
मार्थतो धीसादृश्यमेव तूभयलोकसंचारादिसंव्यवहारभ्रांतिहेतुः। मृत्यो रूपाणि मृत्युः कर्माविद्या
दिर्न तस्यान्यद्रूपं स्वतः कार्यकरणान्येवास्य रूपाण्यतस्तानि मृत्यो रूपाण्यतिक्रामति क्रियाफला
श्रितमाहात इति। एवशब्दार्थं कथयति नत्विति। बुद्धिधर्माणामात्मन्यौपाधिकत्वेन मिथ्यात्वमुक्त्वा प्राणधर्मा
णामपि तत्र तथात्वं कथयति तथेति। आत्मनि चलनस्यौपाधिकत्वं साधयति तेष्विति। एवशब्दसामर्थ्यसिद्धमर्थमा

हनत्विति।सहीत्याद्यनंतरवाक्यमाकांक्षाद्वारोत्थापयतिकथमित्यादिना।तच्छब्दोबुद्धिविषयःसंचरणादित्या
दिशब्दोध्यानादिव्यापारसंग्रहार्थःस्वप्नोभूत्वालोकमतिक्रामतीतिसंबंधः।कथमात्मास्वप्नोभवतितत्राहस
क्येतिउक्तेर्थेवाक्यमवतार्यव्याकरोत्ययमस्माहेतिउक्तहेतुमनूद्यफलितमाहयस्मादित्यादिना।कार्यकरणाती
तत्वाच्चप्रत्यगात्मनोनस्वतःसंसारित्वमित्याहमृत्योरिति।रूपाण्यतिक्रामतीतिपूर्वेणसंबंधः।क्रियास्तत्फला
निचाश्रयोयेषांयानिचाक्रियाणांतत्फलानांचाश्रयःतानीतियावत्॥ ॥७॥ ॥बुध्यवभासकंज्योतिरात्मे
त्युक्तंश्रुत्वावाक्यःशंकतेनन्विति।प्रमाणादतिरिक्तात्मोपलब्धिरित्याशंक्यप्रत्यक्षमनुमानंचेतिप्रमाण
ननुनास्त्यवधियासमानमन्यतूधियोवभासकमात्मज्योतिःधीव्यतिरेकेणप्रत्यक्षेणवानुमानेनवा
नुपलंभात्॥यथान्यात्काल एवद्वितीयाधीः॥यत्ववभास्यावभासकयोरन्यत्वेपिविवेकानुपलं
भात्सादृश्यमितिघटाद्यालोकयोः॥तत्रभवत्वन्यत्वेनालोकस्योपलंभात्घटादेःसंश्लिष्टयोः
सादृश्येभिन्नयोरेवनतथेहघटादेरिवधियोवभासकंज्योतिरंतरंप्रत्यक्षेणवानुमानेनवोपलंभा
महे।धीरेवहिचित्स्वरूपावभासकत्वेनस्वाकाराविषयाकाराचतस्मान्नानुमानतोनापिप्रत्यक्षतो
धियोवभासकंज्योतिःशक्यतेप्रतिपादयितुंव्यतिरिक्तं।यदपिदृष्टांतरूपमभिहितमवभास्या
वभासकयोर्भिन्नयोरेवघटाद्यालोकयोःसंयुक्तयोःसादृश्यमिति।तत्राभ्युपगममात्रमस्मा
भिरुक्तं।ननुतत्रघटाद्यवभास्यावभासकौभिन्नौ॥ ॥७॥ ॥७॥ ॥

द्वैविध्यनियममभिप्रेत्यताभ्यामतिरिक्तात्मानुपलंभान्नासावस्तीत्याहधीव्यतिरेकेणेति।तत्रदृष्टांतमा
हयथेति।घटादिरालोकश्चेत्युभयोर्मिथःसंस्पृष्टयोर्विवेकेनानुपलंभवदवभास्यावभासकयोर्बुध्या
त्मनोर्भेदेपिपृथगनुपलंभादैक्यमवभासतेवस्तुतस्तुतयोरन्यत्वमेवेतिशंकामनुवदतियत्विति।वैष
म्यप्रदर्शनेनोत्तरमाहतत्रेति।दृष्टांतःसप्तम्यर्थः।घटादेरन्यत्वेनेतिसंबंधः।ज्योतिरंतरंनास्तिचेत्कुतोग्रा
ह्यग्राहकसंवित्तिरित्याशंक्याहधीरेवेति।बाह्यार्थवादिनोःसौत्रांतिकवैभाषिकयोरभिप्रायमुपसंह
रतितस्मान्नेतिइदानींविज्ञानवादीबाह्यार्थवादिभ्यामभ्युपगतेदृष्टांतार्थमनुवदतियद्यपीति।बाह्यार्थ
वादप्रक्रियानसुगताभिप्रेतेतिदूषयतितत्रेति।उभयत्रदृष्टांतरूपेसप्तम्यर्थः॥ ॥७॥ ॥७॥

ननुघटादेरवभास्यादालोकोवभासकोभिन्नोलक्ष्यतेनेत्याहपरमार्थतस्त्विति।तस्यस्वायित्वंव्यावर्त्तयति
अन्योन्यइति।प्रतीतंविषयप्राधान्यंव्यावर्त्तयन्नुक्तमेवव्यनक्तिविज्ञानमात्रमिति।विज्ञानवादेयथोक्तदृ
ष्टान्तराहित्यंफलतीत्याहयदेतिविशेषबुध्यनुसारेणत्रिविधंबुद्धाभिप्रायमुपसंहरत्येवमित्यादिना।परिक
ल्पितत्वंतेनबाह्यार्थवादमुपसंहृत्यतस्यैवेत्यादिनाविज्ञानवादमुपसंहरति।तत्रविज्ञानवादोपसंहारेविशेषणो
तितद्ग्राह्येति।शून्यवादिमतमाहतस्यापीति।तदेवस्फुटयतितदपीति।पक्षत्रयेपिदोषंसंभावयतिसर्वाइ
परमार्थतस्तुघटादिरेवाभासात्मकःसालोकोन्योन्याहिघटादिर्लक्ष्यते।विज्ञानमात्रमेवसालोकघ
टादिविषयाकारमवभासतेयदेवंतदानबाह्योदृष्टान्तोस्तिविज्ञानलक्षणमात्रत्वात्सर्वस्य॥एवंतस्यैव
विज्ञानस्यग्राह्यग्राहकाकारतामलंपरिकल्प्यतस्यैवपुनर्विशुद्धिंपरिकल्पयन्ति।तद्ग्राह्यग्राहकविवि
निर्मुक्तेविज्ञानेस्वच्छीभूतंक्षणिकंव्यवतिष्ठतइतिकेचित्॥तस्यापिशान्तिंकेचिदिच्छन्तितदपिविज्ञे
नमनारूढं।ग्राह्यग्राहकोभयविनिर्मुक्तंशून्यमेवघटादिबाह्यवस्तुवदित्यपरेमाध्यमिकाश्चाचक्षते
॥सर्वाएताःकल्पनाबुद्धिविज्ञानावभासकस्यव्यतिरिक्तस्यात्मज्योतिषोपह्नववादस्यश्रेयोमार्ग
स्यप्रतिपक्षभूतावैदिकस्य।तत्रयेषांबाह्यार्थोस्तितान्प्रत्युच्यते॥नतावत्स्वात्मानवभासकत्वात्
घटादेस्तमस्यवस्थितोघटादिस्तावन्नकदाचिदपिस्वात्मनावभास्यतेप्रदीपाद्यालोकसंयोगेतु
नियमेनैवावभास्यमानोदृष्टःसालोकोघटइति।संश्लिष्टयोरपिघटालोकयोरन्यत्वमेवपुनःसंश्ले
विश्लेषेच षविश्लेषदर्शनाद्रज्जुघटयोरिवान्यत्वेचव्यतिरिक्तावभासकत्वंनस्वात्मनैवस्वमात्मानमवभा
सयति॥ ॥७॥ ॥ति।कथममूषांकल्पनानांदूषणमित्याशंक्यप्रथमेबाह्यार्थवादिनंप्रत्याहतत्रेति
निर्द्धारणेसप्तमीयन्नुधीरेवाभासकत्वेनस्वाकारेतितत्राहनेतियदवभास्यंतत्स्वातिरिक्तावभास्यंय
थाघटादिरवभास्याचेयंबुद्धिरित्यनुमानात्बुद्धिव्यतिरिक्तःसाक्षीसिध्यतीत्यर्थः।दृष्टान्तंसाधयति
तमसीति।तस्यावभासकापेक्षांदर्शयितुंविशेषणंसालोकोघटइतिसंश्लेषावगमान्नास्तिघटस्यव्यतिरि
क्तावभास्यत्वं [illegible] मित्याशंक्याहसंश्लिष्टयोरपीतिभवत्वन्यत्वंकिंतावतेत्याशंक्याहा
न्यत्वे [illegible] तिव्यतिरिक्तावभासकत्वेनादृष्टावभासकसाहित्यमितियावत्।अवभासयतिघटादिरितिशे

दृष्टांतस्यसाध्यविकलत्वेपरिहृतेव्यभिचारंशंकतेनन्विति।तदेवव्यतिरेकमुखेनाहनहीति।अनैकांति
कत्वेनिगमयति।तस्मादिति।प्रदीपस्यपक्षतुल्यत्वान्नव्यभिचारोस्तीतिपरिहरतिनावभास्यत्वे।अथा ति
न्यावभासकत्वात्तस्यनान्यावभास्यत्वमितिचेत्तत्राहयद्यपीति।अवभास्यत्वहेतोरव्यभिचारेफलितमा
हयदाचेति।व्यतिरिक्तावभास्यत्वंबुद्धेरितिशेषः।अवभास्यत्वेसत्यपिप्रदीपेस्वातिरिक्तेनैवावभास्यत्वमि
तिनियमासिद्धेर्व्यभिचारस्तादवस्थ्यमितिशंकतेनन्विति।यदिप्रदीपस्यस्वावभासनात्पूर्वमसन्विशेषः
समनंतरकालेस्यात्तदास्वात्मानंभासयतीतिवक्तुंयुक्तंनचसोस्तीतिदूषयतिनेत्यादिनातदेवविवृणो ॥
ननुप्रदीपःस्वात्मानमेवावभासयन्दृश्यते॥नहिघटादिवत्प्रदीपदर्शनायप्रकाशांतरमुपाददते ॥७॥
लौकिकाः॥तस्मात्प्रदीपःस्वात्मानंप्रकाशयतीति॥नावभास्यत्वाविशेषत्वात्।यद्यपिप्रदीपोन्यस्या ॥
वभासकःस्वयमवभासात्मकत्वात्तथापिव्यतिरिक्तचैतन्यावभास्यत्वंनव्यभिचरति॥घटादि
वदेवयदाचैवंतदाव्यतिरिक्तावभास्यत्वंतावदवश्यंभावि॥ननुयथाघटश्चैतन्यस्यावभास्यत्वे
पिव्यतिरिक्तमालोकांतरमपेक्ष्यतेनत्वेवंप्रदीपोन्यमालोकांतरमपेक्षते।तस्मात्प्रदीपोन्यावभा
स्योपिसन्नात्मानंघटंचावभासयति॥नस्वतःपरतोवाविशेषाभावात्।यथाचैतन्यावभास्यत्वंघ
टस्यतथाप्रदीपस्यापिचैतन्यावभास्यत्वमविशिष्टं॥यत्तूच्यतेप्रदीपआत्मानंघटंचावभासयती
ति॥तदसत्कस्माद्यदात्मानंनावभासयति।तदाकीदृशःस्यात्।नहितदाप्रदीपस्यस्वतोवाविशे परतोवा
षःकश्चिदुपलभ्यते॥सह्यवभास्योभवति।यस्यावभासकसंनिधावसंनिधौचविशेषउपल^
भ्येत।नहिप्रदीपस्यस्वात्मनःसंनिधिर्वाशक्यःकल्पयितुं।असतिचकादाचित्केविशेषआत्मा
नंप्रदीपःप्रकाशयतीतिमृषैवोच्यते।चैतन्यग्राह्यत्वंतुघटादिभिर्विशिष्टंप्रदीपस्य॥ ॥७॥ ॥ र
तियथेति।अवभास्यत्वाविशेषादित्यर्थः।प्रदीपेपरोक्तंविशेषमनुभाष्यदूषयतिनेत्यादिना।यदाप्रदीपोनस्वा पति
त्मानंभासयतितदानवभासमानःस्यादित्याशंक्याहनहीति।विशेषाभावेपिप्रदीपस्यस्वेनैवावभास्यत्वंकिं
नस्यादितिचेत्तत्राहसहीतिप्रदीपस्यविशेषांतराभावेपिस्वात्मसंनिध्यसंनिधीविशेषावित्याशंक्याहनही
तिप्रदीपस्यस्वेनान्येनवास्वस्मिन्विशेषाभावेफलितमाहासतीति।व्यभिचारनिरासपूर्वकंभास्यत्वानुमा
नमुपपाद्यानुमानांतरमाह॥चैतन्येति।यद्व्यंजकंतत्स्वविजातीयव्यंग्यंयथासूर्यादिव्यंजकंचविज्ञानंतस्मा २०

हसंनिधि

द्विज्ञानव्यतिरिक्तश्चिदात्मासिद्ध्यतीत्यर्थः॥ ॥७॥ ॥

प्रदीपस्य न स्वावभासत्वं किंतु विजातीयचैतन्यावभास्यत्वमिति स्थिते फलितमाह तस्मादिति। यत् ग्राह्यं तत् तु ग्रा
हकांतरग्राह्यं यथा दीपो ग्राह्यं चेदं विज्ञानमित्यनुमानांतरमाह। चैतन्येति। तथापि कथं त्वदिष्टग्राहकसिद्धिरित्या
शंक्य विमृशति चैतन्यग्राह्यत्वे चेति। कथं तर्हि निर्णयस्तत्राह। इति संदिह्यमान इति। अस्तु लोकानुसारी निश्च
यो लोकस्तु कथमित्याशंक्याह तथा चेति। तथापि कुतो विवक्षितात्मज्योतिः तत्राह यश्चेति विज्ञानस्य ग्राहकां
तरग्राह्यत्वे तस्यापि ग्राहकांतरापेक्षायामनवस्थाप्रसक्तिरिति शंकते तदानवस्थेति चेदिति कूटस्थबोधस्य

क तस्माद्विज्ञानस्यात्मग्राह्यग्राहकत्वेन प्रदीपो दृष्टांतः चैतन्यग्राह्यत्वे च विज्ञानस्य बाह्यविषयैरविशिष्टे
॥ चैतन्यग्राह्यत्वे च विज्ञानस्य किं ग्राह्यविज्ञानग्राह्यतेव किं वा ग्राहकविज्ञानग्राह्यतेति॥ तत्र संदिह्य
माने वस्तुनि यथान्यत्र दृष्टो न्यायः स कल्पयितुं युक्तो न तु दृष्टविपरीतः॥ तथा च सति यथा व्यतिरि
क्तेनैव ग्राहकेण बाह्यानां प्रदीपानां ग्राह्यत्वं दृष्टं तथा विज्ञानस्यापि चैतन्यग्राह्यत्वात् प्रकाशकत्वे स
त्यपि प्रदीपवद्व्यतिरिक्तचैतन्यग्राह्यत्वं युक्तं कल्पयितुं न त्वनन्यग्राह्यत्वं॥ यश्चान्यो विज्ञानस्य ग्र
हीता स आत्मा ज्योतिरंतरं विज्ञानात् तदानवस्थेति चेत्॥ न ग्राह्यत्वमात्रं हि तत् ग्राहकस्य वस्त्वं
तरत्वे लिंगमुक्तं न्यायतः॥ न त्वेकांतग्राहकत्वे तद्ग्राहकांतरास्तित्वे वा कदाचिदपि लिंगं भव
ति॥ तस्मान्न तदनवस्थाप्रसंगः॥ ॥७॥ ॥७॥ ॥७॥ ॥

विज्ञानसाक्षिणो विषयत्वान्नानवस्थेति परिहरति। नेति। यत् ग्राह्यं तत् तस्मात् अतिरिक्तग्राह्यं यथा घटादीति ग्रा
ह्यत्वमात्रं बुद्धिग्राहकस्य ततो वस्त्वंतरत्वे प्रदीपस्य स्वानवभास्यत्वन्यायेन लिंगमुक्तं न च बुद्धिसाक्षिणो ग्रा
ह्यत्वमस्ति कूटस्थदृष्टिस्वाभाव्यात् न तु कुतोनवस्थेत्युपपादयति ग्राह्यत्वमात्रं हीति साक्षी स्वातिरिक्त
ग्राह्यो ग्राहकत्वाद्बुद्धिवदित्याशंक्याह न त्विति। ग्राहकत्वं हि ग्रहणकर्तृत्वं वा तत्साक्षित्वं वा आद्ये बुद्धिसा
क्षिणो मुख्यवृत्त्या ग्रहणकर्तृत्वेन किंचिल्लिंगं संभवति द्वितीये तस्य ग्राहकांतरास्तित्वे न कदाचिदपि प्र
माणमस्ति न कुतोनवस्थेत्यर्थः॥ ॥७॥ ॥७॥ ॥७॥

 ग्राहकानवस्थांपरिहृत्यकरणानवस्थामाशंकते विज्ञानस्येति। तस्यहिग्राह्यत्वेचक्षुरादिस्थानीयेनक
रणेनभवितव्यंतस्यापिग्राह्यत्वेन्यकरणमित्यनवस्थांदूषयतिननियमाभावादिति। नियमाभावंसाध
यतिनहीत्यादिना॥ वैचित्र्यदर्शनमाकांक्षापूर्वकंस्फुरयतिकथमित्यादिना। उभयव्यतिरेकेविज्ञादय

विज्ञानस्यव्यतिरिक्तग्राह्यत्वेकरणांतरापेक्षायामनवस्थेतिचेत्॥ ननियमाभावात्॥ नहिसर्व
त्रायंनियमोभवति। यत्रवस्त्वंतरेणगृह्यतेवस्त्वंतरंतत्रग्राह्यग्राहकव्यतिरिक्तंकारणांतरंस्या
दितिनैकांतेननियंतुंशक्यते॥ वैचित्र्यदर्शनात्॥ कथंघटस्तावत्स्वात्मव्यतिरिक्तेनात्मनागृह्यते ना
तत्रप्रदीपादिरालोकोग्राह्यग्राहकव्यतिरिक्तंकरणं। नहिप्रदीपाद्यालोकोघटोंशश्चक्षुरेवा।
वा॥ घटवच्चक्षुर्ग्राह्यत्वेपिप्रदीपस्यचक्षुःप्रदीपव्यतिरेकेणनबाह्यालोकस्थानीयंकिंचित्क
रणांतरमपेक्षतेतस्मान्नैवनियंतुंशक्यतेयत्रयत्रव्यतिरिक्तग्राह्यत्वंतत्रकरणांतरंस्यादेवे तत्र
ति। तस्माद्विज्ञानस्यव्यतिरिक्तग्राहकग्राह्यत्वेनकरणद्वारानवस्थानापिग्राहकद्वाराकदा
चिदप्युपपादयितुंशक्यते। तस्मात्सिद्धंविज्ञानव्यतिरिक्तमात्मज्योतिरंतरमिति॥ ॥७॥

तिनहीति। तथापिकथंवैचित्र्यंतत्राहघटस्त्वदिति। नियमाभावमुपसंहरति। तस्मादिति। अनवस्थाद्वयनिरा
करणंनिगमयतितस्मात्। विज्ञानस्येति। बाह्यार्थवादिमतनिराकरणमुपसंहरतितस्मात्सिद्धमिति॥७॥

बाह्यार्थवादिनि ध्वस्ते विज्ञानवादी चोदयति। नन्विति। बाह्यार्थो विज्ञानातिरिक्तो नास्तीत्यत्र प्रमाणमाह। य
द्वीति नोपलभ्यते चेज्जाग्रद्वस्तु जाग्रद्विज्ञानव्यतिरेकेणेति शेषः। दृष्टांतं समर्थयते स्वप्नेति। दार्ष्टांतिकं वि
वृणोति। तथेति। उक्तमनुमानमुपसंहरति तस्मादिति। सर्वं विज्ञानमात्रमिति। स्थितं फलितमाह तत्रेति।
किमिति तस्य मिथ्यात्वं तत्राह। सर्वस्येति बाह्यार्थापलापवादिनं दूषयति नेत्यादिना। हेतुं विशदयति न

ननु नास्त्येव बाह्यार्थो घटादिः प्रदीपो वा विज्ञानव्यतिरिक्तो यद्धि यद्व्यतिरेकेण नोपलभ्यते॥ तत्ता
वन्मात्रं वस्तु दृष्टं यथा स्वप्नविज्ञानग्राह्यं घटपटादि वस्तु स्वप्नविज्ञानव्यतिरेकेणानुपलंभात् स्व
प्नघटप्रदीपादेः स्वप्नविज्ञानमात्रतावगम्यते। तथा जागरितेपि घटप्रदीपादेर्जाग्रद्विज्ञानमात्र
तैव युक्ता भवितुं॥ तस्मान्नास्ति बाह्योर्थो घटप्रदीपादिर्विज्ञानमात्रमेव तु सर्वं। तत्र यदुक्तं विज्ञा
नस्य व्यतिरिक्तावभासत्वात् विज्ञानव्यतिरिक्तमस्ति ज्योतिरंतरं घटादेरिवेति तन्मिथ्या स
र्वस्य विज्ञानमात्रत्वे दृष्टांताभावात्। न यावत्तावदभ्युपगमान्न तु बाह्योर्थो भवतैकांतेनैव ना
भ्युपगम्यते। ननु मया नाभ्युपगम्यत एव॥ न विज्ञाने घटः प्रदीप इति च शब्दार्थपृथक्त्वात् या
वत्तावदपि बाह्यार्थांतरं अवश्यमभ्युपगंतव्यं विज्ञानादर्थांतरं वस्तु न चेदभ्युपगम्यते विज्ञा
नं घटः पट इत्येवमादीनां शब्दानामेकार्थत्वे पर्यायशब्दत्वं प्राप्नोति तथा साधनानां फलस्य
चैकत्वे साध्यसाधनभेदोपदेशशास्त्रानर्थक्यप्रसंगः॥ तत्कर्तुरज्ञानप्रसंगो वा॥ ॥७॥

त्विति। विज्ञानमात्रवादित्वादेकांतेन बाह्यार्थानभ्युपगतिरिति शंकते नन्विति बाह्यार्थं दृढमंगीका
रयति नेत्यादिना। अन्वयमुखेनोक्तमर्थं व्यतिरेकमुखेन विशदयति विज्ञानादिति। ज्ञानज्ञेययोरैक्ये
दोषांतरमाह। तथेति। अनर्थकं शास्त्रमुपदिशतो बुद्धस्य सर्वज्ञत्वं न स्यादित्याह तत्कर्तुरिति। वाश
ब्दश्चार्थः॥ ॥७॥

वृ·भा·स्वा· इतश्चसर्वस्यनास्तिविज्ञानमात्रत्वमित्याह किंचान्यदिति। नकेवलंपूर्वोक्तोपपत्तिवशादेवबाह्योर्थो टी·स्व·४
३२२ भ्युपेयः किंतुतत्रैवान्यदपिकारणमुच्यतइतियावत्। तदेवस्फुटयतिविज्ञानेति। यावत्ग्राह्यंतत्सर्वव्य
तिरिक्तग्राह्यंयथाप्रतिवाद्यादिजाग्रद्वस्तुचेदंग्राह्यमित्यनुमानान्नबाह्यार्थापलापसिद्धिरित्यर्थः। इत्थं
तविप्रतिपत्तिंप्रत्याह नहीतिनिराकर्त्तव्यत्वेपितेषांज्ञानमात्रत्वंकिंनस्यादित्याशंक्यात्मीयज्ञानत्व
मात्मज्ञानत्वंवातेषामितिविकल्प्यक्रमेणदूषयति। नहीत्यादिना। स्वकीयनिषेधेस्वनिषेधेचानि

किंचान्यद्विज्ञानव्यतिरेकेणवादिप्रतिवादिवाददोषाभ्युपगमात्। नह्यात्मविज्ञानमात्र
मेववादिप्रतिवादिवादस्तद्दोषोवाभ्युपगम्यतेनिराकर्त्तव्यत्वात्प्रतिवाद्यादीनां। नह्या
त्मीयंविज्ञानंनिराकर्त्तव्यमभ्युपगम्यतेस्वयंवात्माकस्यचित्। तथाचसतिसर्वसंव्यव
हारलोपप्रसंगः। नचप्रतिवाद्यादयःस्वात्मनैवग्राह्यंतइत्यभ्युपगमःव्यतिरिक्तग्राह्याहि
तेभ्युपगम्यंते। तस्मात्तद्वत्सर्वमेवव्यतिरिक्तग्राह्यमस्तुजाग्रद्विषयत्वाज्जाग्रद्वस्तुप्रतिवा
द्यादिवदितिसुलभोदृष्टांतः। संतत्यंतरवद्विज्ञानांतरवच्चेति॥ ॥७॥ ॥

द्यापत्तिमाचष्टेतथाचेति। इदंगीकारालोचनायामपिप्रतिवाद्यादीनांविज्ञानातिरेकःसेत्स्यतीत्या
ह। नचेति। अन्यथाविवादाभावापातादितिभावः। कथंतर्हितेषामंगीकारस्तत्राह व्यतिरिक्तेति। सि
द्धदृष्टांतेफलितमनुमानेननिगमयति। तस्मादिति। किंचचैत्रसंतानेनमैत्रसंतानोव्यवहारादनुमी
यतेसर्वज्ञज्ञानेनचासर्वज्ञज्ञानानिज्ञायंतेतत्रभेदस्यसिद्धस्तद्दृष्टांतान्नीलादेस्तद्धी(यश्चभेदःशा
क्यानुमातुमित्याहसंतत्यंतरवदिति। इतिनबाह्यार्थापलापसिद्धिरितिशेषः॥ ॥७॥ ॥ २२

तदपलापासंभवेफलितमाह तस्मादिति। विज्ञानादर्थभेदोत्तयाप्रत्यगात्माज्ञानातिरिक्तउक्तः सं
मतंज्ञानाभिन्नेग्राह्यत्वात्स्वप्रग्राह्यवदित्युक्तमनुवदतिस्वप्नइति। अयुक्तंविज्ञानातिरिक्तत्वमर्थस्
षः दृष्टांतस्यसाध्यविकलतामभिप्रेत्यपरिहरति नाभावादपीतिसंग्रहवाक्यंविवृणोति भवतैवेति
र्थवादिभ्योविशेषमाहतदभ्युपगम्येति। तथापिकथंदृष्टांतस्यसाध्यविकलतेत्याशंक्याह सइति।
विज्ञानस्यभावभूतस्याभ्युपगतस्यघटादेर्भावादभावाद्वाविषयादर्थांतरत्वाद्यस्यकस्यचिद्व्याख्य...

तस्माद्विज्ञानवादिनापिनशक्यंविज्ञानव्यतिरिक्तंज्ञ्योतिरंतरंनिराकर्तुं॥ स्वप्नेविज्ञानव्यतिरेका
भावात् अयुक्तमितिचेत्॥ नाभावादपिभावस्यवस्त्वंतरत्वोपपत्तेर्भवतैवतावत्स्वप्नेघटादिवि
ज्ञानस्यभावत्वमभ्युपगतंतदभ्युपगम्यतद्व्यतिरेकेणघटाद्यभावउच्यते। सविज्ञानविषयोघ
टादिघ्यभावोयदिवाभावःस्यादुभयथापिघटादिविज्ञानस्यभावभूतत्वमभ्युपगतमेवनतु
तन्निवर्तयितुंशक्यतेतन्निवर्तकन्यायाभावात्। एतेनसर्वस्यशून्यताप्रत्युक्ता॥ प्रत्यगात्मग्रा
ह्यताचात्मनोहमितिमीमांसकपक्षः प्रत्युक्तः यत्तूक्तंसालोकोन्यश्चान्यश्चघटोजायतइति।
तदसत्। क्षणांतरेपिसएवायंघटइतिप्रत्यभिज्ञानात्॥ ॥७॥ ॥७॥

गमात् दृष्टांतस्यसाध्यविकलतासुप्रसिद्धेत्यर्थः। माध्यमिकमतमतिदेशेननिराकरोत्येतेनेति। ज्ञानज्ञे
ययोर्निराकर्तुमशक्यत्ववचनेनेतियावत्। आत्मनोग्राह्यस्याहमितिप्रत्यगात्मनैवग्राह्यतेतिमी
मांसकमतमपिप्रत्युक्तं एकस्यैवग्राह्यग्राहकतायानिरस्तत्वादित्याहप्रत्यगात्मेति। क्षणभंगवादि
नोक्तमनूद्यप्रत्यभिज्ञाविरोधेननिराकरोतियत्तूक्तमित्यादिना॥ ॥७॥ ॥७॥ ॥

स्वपक्षेपिप्रत्यभिज्ञोपपत्तिंशाक्यः शंकतेसादृश्यादिति। दृष्टांतं विघटयन्नुत्तरमाहनतत्रापीति। तथापि कथंतत्रप्रत्यभिज्ञेत्याशंक्याहजातीति। तन्निमित्तातेप्रत्यभिज्ञेतिशेषः। तदेवप्रपंचयति। लूनेष्विति। अभ्रांतइतिच्छेदः। किमितिजातिनिमित्तेषाधीर्व्यक्तिनिमित्ताकिंनस्यादतआहनहीति। ननुसादृश्यवशाद्व्यक्तिमेवविषयीकृत्यप्रत्यभिज्ञानंकेशादिषुकिंनस्यात्तत्राहकस्यचिदिति। अभ्रांतस्येतियावत्। दार्ष्टांतिके

सादृश्यात्प्रत्यभिज्ञानंलूनोल्लितकेशनखादिष्विवेतिचेत्॥ नतत्रापिक्षणिकस्यासिद्धत्वात्॥ जात्येकत्वाच्चलूनेषुपुनर[illegible]ल्लितेषुचकेशनखादिषुकेशनखत्वजातेरेकत्वात्केशनखप्रत्ययस्तन्निमित्तोऽभ्रांतएवनहिदृश्यमानलूनोल्लितकेशनखादिषुव्यक्तिनिमित्तःसएवेतिप्रत्ययोभवतिकस्यचिद्दीर्घकालव्यवहितदृष्टेषुतुल्यपरिमाणेषुतत्कालीनबालादिषुतुल्याइमेकेशनखाइतिप्रत्ययोभवति। ननुतएवेति। घटादिषुपुनर्भवतिसएवेतिप्रत्ययः॥ तस्मान्नसमोदृष्टांतः॥ प्रत्यक्षेणहिप्रत्यभिज्ञायमानेवस्तुनितदेवेतिनचान्यत्वमनुमातुंयुक्तं॥ प्रत्यक्षविरोधिलिंगस्याभासत्वोपपत्तेः॥ सादृश्यप्रत्ययानुपपत्तेश्च॥ ॥७॥ ॥

वैषम्यमाहघटादिष्विति। वैषम्यमुपसंहरति। तस्मादिति यत्सत्तत्क्षणिकंयथाप्रदीपादिसंतश्चामीभावाइत्यनुमानविरोधाद्भ्रांतंप्रत्यभिज्ञानमित्याशंक्याहप्रत्यक्षेणेति अनुद्भूतानुमानवत्प्रत्यक्षविरोधेक्षणिकत्वानुमानंनोदेत्यबाधितविषयत्वस्याप्यनुमित्यंगत्वादितिभावः। इतश्चप्रत्यभिज्ञानंसादृश्यनिबंधनंभ्रमोनभवतीत्याहसादृश्येति॥ ॥७॥ ॥७॥ ॥

तदनुपपत्तौ हेतुमाह ज्ञानस्येति। तस्य क्षणिकत्वेपि किमिति सादृश्यप्रत्ययो न सिध्यतीत्याशंक्याह एक
स्येति। अस्तु तर्हि वस्तुद्वयदर्शित्वमेकस्येति चेन्नेत्याह न त्विति। उक्तमेवार्थं प्रपंचयति। तेनेत्यादिना॥ भ
वतु किं तावतेति तत्राह तेनेति। दृष्टमिति अवतिष्ठेत यदीति शेषः। क्षणिकत्वहानिपरिहारं शंकित्वा परिह
रत्यथेत्यादिना। तत्र हेतुमाह। नैकेति। परपक्षदोषांतरमाह व्यपदेशेति। तदेव विवृणोति इदमिति व्य
पदेशाक्षणेऽनवस्थानासिद्धिं शंकित्वा दूषयत्यथेत्यादिना॥ अन्योद्दृष्टान्यश्च व्यपदेष्टेत्याशंक्य
ज्ञानस्य क्षणिकत्वादेकस्य वस्तुदर्शिनो वस्त्वंतरदर्शने सादृश्यप्रत्ययः स्यात्॥ ननु वस्तुदर्शये
को वस्त्वंतरदर्शनाय क्षणांतरमवतिष्ठते विज्ञानस्य क्षणिकत्वात्॥ सकृद्वस्तुदर्शनेनैव क्षयो
पपत्तेस्तेनेदं सदृशमिति हि सादृश्यप्रत्ययो भवति। तेनेति दृष्टस्मरणमिदमिति॥ वर्त्तमान
प्रत्ययस्तेनेति दृष्टं स्मृत्वा यावदिदमिति वर्त्तमानक्षणकालमवतिष्ठेन ततः क्षणवादहानिः
॥ अथ तेनेत्येवोपक्षीणः स्मार्त्तः प्रत्यय इदमिति चान्य एव वार्त्तमानिकः प्रत्ययः क्षीयते ततः
सादृश्यप्रत्ययानुपपत्तिस्तेनेदं सदृशमिति अनेकदर्शिन एकस्याभावात्॥ व्यपदेशानुप
पत्तिश्च दृष्टव्यदर्शिनेनैवोपक्षयाद्विज्ञानस्येदं पश्याम्यदोद्राक्षमिति व्यपदेशानुपपत्तिर्दृष्ट
वतो व्यपदेशाक्षणानवस्थानात्। अथावतिष्ठेत क्षणवादहानिरथादृष्टवतो व्यपदेशः
सादृश्यप्रत्ययश्च तदानीं जात्यंधस्येव रूपविशेषव्यपदेशः तत्सादृश्यप्रत्ययश्च स
र्वमंधपरंपरेति प्रसज्येत सर्वज्ञशास्त्रप्रणयनादि। न च तदिष्यते। कृताभ्यागमकृतप्रणाश
दोषानुप्रसिद्ध तरो क्षणवादे दृष्टव्यपदेशहेतुः पूर्वोत्तरसहित एक एव हि अंखलावत्प्रत्ययो जा
यत इति चेत् तेनेदं सदृशमिति च। न वर्त्तमानातीतयोर्भिन्नकालत्वात्तत्र वर्त्तमानप्रत्यय एकः शृं
खलावयवस्थानीयोतीतश्चापरः तौ प्रत्ययौ भिन्नकालौ तदुभयप्रत्ययोर्विषयस्थः कश्चिदेकः श्रृंख
परिहरत्यथेत्यादिना शास्त्रप्रणयनादीत्यादिशब्देन शास्त्रीयं साध्यसाधनादि गृह्यते क्षणिकत्वपक्षे
दूषणांतरमाह कृतेति व्यपदेशानुपपत्तिमुक्त्वा समादधानः शंकते दृष्टेति। सादृश्यप्रत्ययश्च शृंखला

आप्रत्ययस्ततः क्षणद्वयस्यापि सादेकस्य विज्ञानस्य ॥ ७ ॥ पुनः क्षणवादहानिः ॥

स्थानीयेनप्रत्ययेनैवसेत्स्यतीत्याह तेनेदमिति। अपसिद्धांतप्रसक्त्याप्रत्याचष्टे नेत्यादिना तावेवोभौ
यौप्रत्ययौविषयौतदवगाहीचेन्मध्यवर्ती। अंशखलावयवस्थानीयःप्रत्ययइतियावत्॥ ॥छ॥ ॥छ॥
क्षणानांमिथःसंबंधस्तर्हिमाभूदितिचेत्तत्राह ममेति। व्यपदेशासाद्दृश्यप्रत्ययानुपपत्तिस्तुस्थितैवेतितु
त कारार्थः। यत्तुविज्ञानस्यदुःखाद्युपप्लुतत्वंदूषयतिसर्वस्यचेति। शुद्धत्वात्तत्संसर्गिद्रष्टृभावाच्चनज्ञान

ममत्ववतादिविशेषानुपपत्तेश्चसर्वसंसंहारलोपप्रसंगः॥ सर्वस्यचस्वसंवेद्यविज्ञानमात्रत्वेवि
ज्ञानस्यचस्वच्छावबोधावभासमात्रस्वाभाव्याभ्युपगमात्तद्दर्शिनश्चान्यस्याभावेऽनित्य
दुःखशून्यानात्मत्वाद्यनेनकल्पनानुपपत्तिः॥ नचदाडिमादेरिवविरुद्धानेकांशवत्त्वंविज्ञा
नस्यस्वच्छावभासस्वाभाव्याद्विज्ञानस्यानित्यदुःखादीनांविज्ञानांशत्वेचसत्यनुभूयमा
नत्वात्तद्व्यतिरिक्तविषयत्वप्रसंगः॥ अथानित्यदुःखाद्यात्मैकत्वमेवविज्ञानस्यतदातद्वि
योगाद्विशुद्धिकल्पनानुपपत्तिः। संयोगिमलवियोगाद्विशुद्धिर्भवति॥ यथादर्शप्रभृती
नांनतुस्वाभाविकेनधर्मेणकस्यचिद्वियोगोदृष्टो नह्यग्नेःस्वाभाविकेनप्रकाशेनौष्ण्येन
वावियोगोदृष्टः॥ ॥छ॥

स्यदुःखादिसंप्लवःस्वसंवेद्यत्वांगीकारादित्यर्थः। ज्ञानस्यशुद्धबोधैकस्वाभाव्यमसिद्धंदाडिमादिव
न्नानाविधदुःखाद्यंशवत्त्वाश्रयणादित्याशंक्याह नचेति तत्रैवहेत्वंतरमाह अनित्येति तेषांतद्धर्मत्वे
सत्यनुभूयमानत्वात्ततोतिरिक्तत्वंस्याद्धर्मिणोधर्मिमात्रत्वाभावान्मेयानांचमानादर्थांतरत्वादंता
यन्मेयेनततज्ज्ञानांशोयथाघटादिदुःखादिधर्मोनभवतिकिंतुस्वरूपमेवेतिशंकामनुभाष्यदोषमा
हाथेत्यादिना। अनुपपत्तिमेवप्रकटयतिसंयोगीत्यादिना॥ ॥छ॥ ॥छ॥

स्वाभाविकस्यापिवियोगोऽस्तिपुष्परक्तत्वादीनांतथोपलंभादित्याशंक्याहयदपीति।द्रव्यांतरशब्देनपु
ष्पसंबंधिनोवयवास्तद्गतरक्तत्वाद्यारंभकाविवक्षिताः।विमतंसंयोगपूर्वकंविभागवत्वान्मेषादिव
दित्यनुमानान्नस्वाभाविकस्यसतिवस्तुनिनाशोऽस्तीत्यर्थः।अनुमानानुगुणंप्रत्यक्षंदर्शयतिबीजेति।
कार्पासादिबीजेद्रव्यविशेषसंपर्काद्रक्तादिवासनयातत्पुष्पादीनांरक्तादिगुणादयोपलंभात्तत्संयोगि

यदपिपुष्पगुणानांरक्तत्वादीनांद्रव्यांतरयोगेनवियोजनंदृश्यते।।तत्रापिसंयोगपूर्वत्वमनु
मीयते।।बीजभावनयापुष्पफलादीनांगुणांतरोत्पत्तिदर्शनात्।अतोविज्ञानस्यविशुद्धिक
ल्पनानुपपत्तिः।।विषयविषय्यसत्वेचयन्मलंपरिकल्प्यतेविज्ञानस्यतदथान्यसंसर्गाभावाद
नुपपन्नं।।नह्यविद्यमानेनविद्यमानस्यसंसर्गःस्यात्।असतिचान्यसंसर्गेयोधर्मोयस्यदृष्टः
सतत्स्वभावत्वात्नतेनवियोगमर्हतियथाग्नेरौष्ण्यंसवितुर्वाप्रभा।।तस्मादनित्यसंसर्गेण
मलिनत्वेतद्विशुद्धिश्चविज्ञानस्येतीयंकल्पनाधपरंपरैवप्रमाणशून्येत्यवगम्यते।यदपि
तस्यविज्ञानस्यनिर्वाणंपुरुषार्थंकल्पयंतितत्रापिफलाश्रयानुपपत्तिः।। ।।७।। ।।

द्रव्यापगमाद्देवतत्पुष्पादिषुरक्तत्वाद्यपगतिरित्यर्थः।विशुद्ध्यनुपपत्तिमुपसंहरत्यतइति।कल्पनां
तरमनूद्यदूषयतिविषयविषयीति।कथंपुनर्ज्ञानस्यान्येनसंसर्गाभावस्तस्यविषयेणसंसर्गादि
त्याशंक्याह।नहीति।अथान्यसंसर्गमंतरेणापिज्ञानस्यविषयविषय्यभावत्वमलंस्यादितिचेत्तत्रा
हसतिचेतिकल्पनाद्वयमप्रामाणिकमनादेयमित्युपसंहरतितस्मादिति।कल्पनांतरमुत्थापय
तियदपीति।उपशांतिर्निर्वाणशब्दार्थःदूषयतितत्रापीति।। ।।७।। ।।७।।

फलाभावेपिफलंस्यादितिचेन्नेत्याहकंटकेति।दार्ष्टांतिकेविवृणोतियस्यहीति।ननुत्वन्मतेपिवस्तु
नोद्वयत्वात्तस्यासंगस्यकेनचिदपिसंयोगवियोगयोरयोगात्फलितासंभवेमोक्षासंभवादितितु
ल्यमित्याशंक्याहअस्यपुनरितियद्यपिपूर्णवस्तुवस्तुतोऽसंगमंगीक्रियतेतथापिक्रियाकारकफ
लभेदस्याविद्यामात्रकृतत्वादस्म न्मतेसर्वव्यवहारसंभवान्नसाम्यमितिभावः।ननुबाह्यार्थवादोवि
ज्ञानवादश्चनिराकृतौशून्यवादोनिराकर्तव्योपिकस्मान्ननिराक्रियतेतत्राह।शून्यवादीति।समस्त

कंटकविद्धस्यहिकंटकवेधजनितदुःखनिवृत्तिःफलंनतुकंटकविद्धमरणेतत्दुःखनिवृत्ति
फलस्याश्रयउपपद्यते।।तद्वत्सर्वेनिर्वाणेसतिचफलाश्रयेपुरुषार्थकल्पनाव्यर्थैवयस्य
हिपुरुषशब्दवाच्यस्यसर्वस्यात्मनोविज्ञानस्यवार्थःपरिकल्प्यते।तस्यपुनःपुरुषस्यनिर्वा
णेकस्यार्थःपुरुषार्थइतिस्यात्।।यस्यपुनरस्त्यनेकार्थदर्शीविज्ञानव्यतिरिक्तआत्मातस्य
दृष्टस्मरणदुःखसंयोगवियोगादिसर्वमेवोपपन्नमन्यसंयोगनिमित्तंकालुष्यंतद्वियोगनि
मित्ताचविशुद्धिरिति।।शून्यवादिपक्षस्तुसर्वप्रमाणविप्रतिषिद्धइतितन्निराकरणायनाद
रःक्रियते।।७।। ।।७।। ।।७।। ।।७।। ।।

स्यवस्तुनःसत्वेनमानान्मानानांचसर्वेषांसद्विषयत्वाच्छून्यस्यचाविषयतयाप्राप्त्यभावेननिराकरणानर्हत्वात्त
द्विषयत्वेचशून्यवादिनैवविषयनिराकरणोऽस्याशून्यस्यापन्नत्वात्तस्यचस्फुरणास्फुरणयोःसर्वशून्यत्वा
योगात्तद्वादिनश्चसत्वासत्वयोस्तदनुपपत्तेःसंवृत्तेश्चाश्रयाभावादसंभवात्तदाश्रयत्वेचशून्यस्यस्वरूपहा
नान्निराश्रयत्वेचासंवृत्तित्वान्नास्माभिस्तद्वादनिरासायादरःक्रियतेतत्सिद्धंबुध्याद्यतिरिक्तंनित्यसिद्ध
मत्यंतशुद्धंकूटस्थमद्वयमात्मज्योतिरितिभावः।। ।।७।। ।।७।। ।।

प्रसंगागतंपरपक्षंनिराकृत्यश्रुतिव्याख्यानमेवानुवर्त्तयन्नुत्तरवाक्यतात्पर्यमाहयथेति।एवमात्मादेहभेदे
ऽपिवर्त्तमानंजन्मत्यजन्नुजन्मांतरंचोपाददानःकार्यकरणान्यतिक्रामतीतिशेषः।अतःस्वप्नजागरितसंचारा
देहाद्यतिरेकवदिहलोकपरलोकसंचारोऽप्यपितदतिरेकस्तस्योच्यतेनेनतरवाक्येनेत्यर्थः।संप्रत्युत्तरवाक्यं
गृहीत्वाव्याकरोतिसवाइत्यादिना।पाप्मशब्दस्यलक्षणयातत्कार्यविषयत्वंदर्शयतिपाप्मसमवायिभिरि

यथैवेहैकस्मिन्देहेस्वप्नोभूत्वामृत्योरूपाणिकार्यकरणान्यतिक्रम्यस्वप्नेस्वआत्मज्योतिष्यास्ते
एवंसवैप्रकृतःपुरुषोऽयंजायमानःकथंजायमानइत्युच्यते॥शरीरंदेहेंद्रियसंघातमभिसंपद्यमानः
शरीरात्मभावमापद्यमानइत्यर्थःपाप्मभिःपाप्मसमवायिभिःधर्माधर्माश्रयैःकार्यकरणैरित्य
र्थः॥संसृज्यतेसंयुज्यते॥सएवउत्क्रामन्शरीरांतरमूर्द्ध्वंक्रामन्गच्छन्म्रियमाणइत्येतस्यव्याख्या
नमुत्क्रामन्निति।तानेवसंसृष्टान्पाप्मरूपान्कार्यकरणलक्षणान्विजहातितैर्वियुज्यतेतान्परित्य
जतियथायंस्वप्नजाग्रद्वृत्त्योर्वर्त्तमानएकस्मिन्देहेपाप्मरूपकार्यकरणोपादानपरित्यागाभ्याम

सवाअयंपुरुषोजायमानःशरीरमभिसंपद्यमानःपाप्मभिःसꣳसृज्यतेस
उत्क्रामन्म्रियमाणःपाप्मनोविजहाति॥ ॥८॥ ॥७॥ ॥

नवरतंसंचरतिधियासमानःसन्तथासोऽयंपुरुषःउभाविहलोकपरलोकौजन्ममरणाभ्यांकार्य
करणोपादानपरित्यागादनवरतंप्रतिपद्यमानःआसंसारमोक्षात्संचरतितस्मात्सिद्धमस्या
त्मज्योतिषोऽन्यत्वंकार्यकरणरूपेभ्यःपाप्मभ्यःसंयोगवियोगाभ्यां॥नहितद्धर्मत्वेसतितैरेवसंयो
गोवियोगोवायुक्तः॥ ॥७॥ ॥ति।पाप्मशब्दस्यपापवाचित्वेऽपिकार्यसाम्याद्धर्मेऽपिवृत्तिंसूचय
तिधर्माधर्मेति।उक्तमर्थंदृष्टांतत्वेनानुवदतियथेति।अवस्थाद्वयसंचारस्यलोकद्वयसंचारेदार्ष्टांतिकमा
हतथेति।इहलोकपरलोकावनवरतंसंचरतीतिसंबंधः।संचरणप्रकारंप्रकटयतिजन्मेति।जन्मनाकार्य
करणयोरुपादानंमरणेनचतयोस्त्यागमविच्छेदेनलभमानोमोक्षादर्वागनवरतंसंचरन्दुःखीभवती
त्यर्थः।सवाइत्यादिवाक्यतात्पर्यमुपसंहरतितस्मादिति।तच्छब्दार्थमेवस्फुटयतिसंयोगेति।कथमेता
वतातेभ्योऽन्यत्वंतत्राहनहीति।स्वाभाविकस्यहिधर्मस्यसतिस्वभावेकुतःसंयोगविभागौवह्न्यौष्ण्यादिव

…कार्यकरणयोःसंयोगविभागावस्वाभाविक[illegible]॥

तस्येत्यादिवाक्यस्य व्यावर्त्यां शंकामाह नन्विति। अवस्थाद्वयवल्लोकद्वयसिद्धिरित्याशंक्याह स्वप्नेति। कथं त
र्हि लोकद्वयप्रसिद्धिरत आह तस्मादिति। तत्रोत्तरत्वेनोत्तरं वाक्यमुत्थाप्य व्याकरोत्युच्यत इति। स्थानद्वयप्र
सिद्धिद्योतनार्थो वैशब्दः। अवधारणं विवृणोति नेतीति। वेदनासुखदुःखादिलक्षणा। आगमस्य परलोकसा
धकत्वमभिप्रेत्याह तच्चेति। अवधारणमाक्षिपति। नन्विति। तस्य स्थानान्तरत्वं दूषयति नेति। स्वप्नस्य लोकद्व

ननु न स्तो स्थो भौ लोकौ यौ जन्ममरणाभ्यामनुक्रमेण संचरति स्वप्नजागरिते तु प्रत्यक्षमवग इव स्वप्नजागरिते
म्येते। न त्विहलोकपरलोकौ केनचिद्दृश्यमानौ॥ तस्मादेते एव स्वप्नजागरिते इहलोकपरलो
काविति॥ न। तस्यैतस्य पुरुषस्य द्वे एव स्थाने भवतः न तृतीयं चतुर्थं वा के ते इदं च यत्प्रतिपन्नं वर्त्त
माने जन्मशरीरेंद्रियविषयवेदनाविशिष्टं स्थानं प्रत्यक्षतोऽनुभूयमाने॥ परलोक एव स्थानं पर

तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवत इदं च परलोकस्थानं च संध्यं तृतीयं
स्वप्नस्थानं॥ ॥९॥

लोकस्थानं॥ तच्च शरीरादिवियोगोत्तरकालानुभाव्यं॥ ननु स्वप्नोऽपि परलोक
स्तथा च सति द्वे एवेत्यवधारणमयुक्तं॥ न। कथं तर्हि संध्यं तदिहलोकपरलोकयोर्यः संधिस्तस्मि
न्भवं संध्यं यत्तृतीयं तत्स्वप्नस्थानं। तेन स्थानद्वित्वावधारणं न हि ग्रामयोः संधिस्तावेव ग्रामाव
पेक्ष्य तृतीयत्वपरिगणनमर्हति॥ ॥९॥ ॥

यातिरिक्तस्थानत्वाभावे कथं तृतीयत्वप्रसिद्धिरित्याह कथमिति। तस्य संध्यत्वान्न स्थानान्तरत्वमित्यु
त्तरमाह संध्यं तदिति। संध्यत्वं व्युत्पादयति इहेति। यत्तु स्वप्नस्थानं तृतीयमन्यसे तदिहलोकपरलोकयोः ह
संध्यमिति संबंधः। तस्य संध्यत्वफलितमाह तेनेति। पूरणप्रत्ययश्रुत्या स्थानान्तरत्वमेव स्वप्नस्य किं न
स्यादित्याशंक्य प्रथमश्रुतसंध्यशब्दविरोधान्नैवमित्याह नहीति॥ ॥९॥ ॥९॥

परलोकास्तित्वे प्रमाणांतरजिज्ञासया पृच्छति कथमिति। प्रत्यक्षं प्रमाणमित्युत्तरमाह यत इत्यादिना॥ स्वप्नप्रत्यक्षं
परलोकास्तित्वे प्रमाणमित्युक्तं तदेवोत्तरवाक्येन स्फुरयितुं पृच्छति कथमिति। कथंशब्दार्थमेव प्रकटयति कि
मित्यादिना। उत्तरवाक्यमुत्तरत्वेनोत्थापयत्युच्यत इति। तत्राथशब्दमुक्तप्रश्नार्थतया व्याकरोत्यथेति। उक्त
कथं पुनस्तस्य परलोकस्थानस्यास्तित्वमवगम्यते॥ यदपेक्ष्य स्वप्नस्थानं संध्यं भवेत्॥ यतस्तस्मिन्सं
ध्ये स्वप्नस्थाने तिष्ठन्भवन्वर्तमान एव ते उभे स्थाने पश्यति के ते उभे इदं च परलोकस्थानं च तस्मात्तेः
स्वप्नजागरितव्यतिरेकेणोभौ लोकौ यो धिया समानः सन्ननुसंचरति जन्ममरणसंतानप्रबंधने कथं
पुनः स्वप्ने स्थितः सन्नुभौ लोकौ पश्यति किमाश्रयः केन विधिनेत्युच्यते। अथ कथं पश्यतीति शृणु
॥ यथाक्रमं आक्रमत्यनेनेत्याक्रमः आश्रयोऽवष्टंभ इत्यर्थः॥ यादृगाक्रमोऽस्य सोऽयं यथाक्रमः
अयं पुरुषः परलोकस्थाने प्रतिपत्तव्ये निमित्ते यथाक्रमो भवति॥ यादृशेन परलोकप्रतिपत्तिसाध
नेन विद्याकर्मपूर्वप्रज्ञालक्षणेन युक्तो भवतीत्यर्थः॥ तमाक्रमं परलोकस्थानायोन्मुखीभूतं प्रा

तस्मिन्संध्ये स्थाने तिष्ठन्नेते उभे स्थाने पश्यतीदं च परलोकस्थानं च। अथ यथाक्रमोऽयं पर
लोकस्थाने भवति तमाक्रममाक्रम्योभयान्पाप्मन आनंदांश्च पश्यति॥ ॥९॥

प्तांकुरीभावबीजं तमाक्रममाक्रम्यावष्टभ्याश्रित्योभयान्पश्यति॥ बहुवचनेन धर्माधर्मफलानेक
त्वादुभयानुभयप्रकारानित्यर्थः॥ कांस्तान्पाप्मनः पापफलानि न तु पुनः साक्षादेव पाप्मनो दर्श
नं संभवति तस्मात्पापफलानि दुःखानीत्यर्थः॥ आनंदांश्च धर्मफलानि सुखानीत्येतत्तानुभया
न्पाप्मनः आनंदांश्चेति। जन्मांतरदृष्टवासनामयान्। यानि च प्रतिपत्तव्यजन्मविषयाणि क्षुद्रधर्मा
धर्मफलानि धर्माधर्मप्रयुक्तो देवतानुग्रहाद्वा पश्यति तत्कथमवगम्यते। परलोकस्थानं भावि
नो पाप्मनो दर्शने स्वप्न इत्युच्यते॥ यस्मादिह जन्मन्यननुभाव्यमपि पश्यति बहु॥ न च स्वप्नो ना
माऽपूर्वदर्शनं पूर्वदृष्टस्मृतिर्हि स्वप्नः प्रायेण तेन स्वप्नजागरितस्थानव्यतिरेकेणास्तेः उभौ लोकौ॥
रभागमुत्तरत्वेन व्याचष्टे शृण्विति। यदुक्तं किमाश्रय इति तत्राह यथाक्रम इति। यदुक्तं केन विधिनेति तत्रा
ह तमाक्रममिति पाप्मशब्दस्य यथाश्रुतार्थत्वे संभवति। किमिति फलविषयत्वे तत्राह न त्विति साक्षादा

×षाव्यवहरतीत्युक्तं तदेव नास्ति यदादित्यादिज्योतिषामभावगमनं यत्रेदं विविक्तं स्वयंज्योतिः

 गमादृते प्रत्यक्षेणेति यावत्। पाप्मनामेव साक्षाद्दर्शनासंभवस्तच्छब्दार्थः। कथं पुनराद्ये वयसि पाप्मना
मानेदानीं च स्वप्ने दर्शनेनेत्राह जन्मांतरेति। यद्यपि मध्यमे वयसि करणपाटवाद्दैहिकवासनया स्वप्नो दृश्यते
तथापि कथमंतिमे वयसि स्वप्नदर्शनं तदाह ध्यानेति चेति। फलानां क्षुद्रत्वमत्र लेशतो भुक्तत्वं यानीत्युपक्रमा
त्तानीत्युपसंख्यातव्यं ऐहिकवासनावशाद्दैहिकानामेव पाप्मनामानेदानां च स्वप्ने दर्शनसंभवान्न स्वप्नप्र
त्यक्षं परलोकसाधकमिति शंकते तत्कथमिति। परिहरत्युच्यत इति। यद्यपि स्वप्ने मनुष्याणामिंद्रादिभा
वोऽननुभूतोऽपि भाति तथापि तदपूर्वमेव दर्शनमित्याशंक्याह न चेति। भाविजन्मभाविनोऽपि स्वप्ने दर्शना
त् प्रायेणेत्युक्तं न च तदपूर्वदर्शनमपि सम्यक्ज्ञानमुत्थानप्रत्ययबाधान्नैवं स्वप्नधिया भाविजन्मा
सिद्धिर्यथा ज्ञानमर्थांगीकारादिति भावः। प्रमाणफलमुपसंहरति। तेनेति॥ ॥७॥ ॥स यत्रेत्यादि
यदादित्यादिबाह्यज्योतिषामभावेऽयं कार्यकरणसंघातः पुरुषो येन व्यतिरिक्तेनात्मनार्ज्ये
तिरुपलभ्येत। येन संदेवायं कार्यकरणसंघातः संसृष्ट एवोपलभ्यते॥ तस्मादसत्समोऽसन्नेव
वास्तेन विविक्तस्वभावेन ज्योतीरूपेणात्मनेति॥ अथ क्वचिद्विविक्तः स्वेन ज्योतीरूपेणोपलभ्ये

स यत्र प्रस्वपिति॥

त बाह्याध्यात्मिकभूतभौतिकसंसर्गशून्यस्ततो यथोक्तं सर्वं भविष्यतीत्येतदर्थमाह॥ स यः
प्र प्रकृत आत्मा यत्र यस्मिन्काले स्वपिति प्रकर्षेण स्वापमनुभवति तदा किमुपादानः केन विधि
नास्वपिति संधुस्थाने प्रतिपद्यत इत्युच्यते॥ ॥७॥ ॥ वाक्यस्य व्यवहितेन संबंधं वक्तुं वृत्तमनूद्या
दा क्षिपति यदित्यादिना। बाह्यज्योतिरभावेऽस्त्ययं पुरुषः कार्यकरणसंघातो येन संघातो येन संघातानाति
रिक्तेनात्मज्योतिषागमनागमनादि निर्वर्त्तयति तदात्मज्योतिरस्तीति यदुक्तमित्यनुवादार्थः। विशि
ष्टस्थानाभावं वक्तुं विशेषणाभावं तावद्दर्शयति तदेवेति। आदित्यादिज्योतिरभावविशिष्टस्थाने यत्रे
त्युक्तं तदेवस्थानं नास्ति विशेषणाभावादिति शेषः। यथोक्तस्थानाभावे हेतुमाह। येनेति। संसृष्टो बाह्यै
र्ज्योतिर्भिरिति शेषः। व्यवहारभूमौ बाह्यज्योतिरभावाभावे फलितमाह तस्मादिति। उत्तरग्रंथमुत्तरत्वे
नावतारयत्यथेत्यादिना। यथोक्तं सर्वव्यतिरिक्तत्वं स्वयंज्योतिष्ट्वमित्यादि आह स्वप्ने प्रस्तौतीति यावत्।
उपादानशब्दः परिग्रहविषयः॥ ॥७॥ ॥ ॥७॥ ॥७॥

कथमस्यसर्वावत्त्वंतदाहसर्वावत्त्वमिति।संसर्गकारणभूताःसहाध्यात्मादिविभागेनेतिशेषः।किमुपादा
नइत्यस्योत्तरमुक्त्वाकेनविधिनेत्यस्योत्तरमाहस्वयमित्यादिना॥आदायप्रस्वपितीत्युक्तंतत्रसंबंधः।क
अस्यदृष्टस्यलोकस्यजागरितलक्षणस्यसर्वावतःसर्वमवतीतिसर्वावानयंलोकःकार्यकरणसंघा
तोविषयवेदनासंयुक्तःसर्वावत्त्वमस्यव्याख्यातमन्नत्रयप्रकरणेअथोऽयंवाआत्मेत्यादिनास
र्वावतःसर्वावाभूतभौतिकमात्राअस्यसंसर्गकारणभूताविद्यंतइतिसर्ववान्सर्ववानेवसर्वावा
न्तस्यसर्वावतोमात्रामेकदेशमवयवमपादायापच्छिद्यादायगृहीत्वादृष्टजन्मवासनावासि
तःसन्नित्यर्थः॥स्वयमात्मनैवविहत्यदेहंपातयित्वानिःसंबोधमापाद्यजागरितेह्यादित्यादी
नांचक्षुरादिष्वनुग्रहोदेहव्यवहारार्थः॥देहव्यवहारश्चात्मनोधर्माधर्मफलोपभोगप्रयुक्त
स्तद्धर्माधर्मफलोपभोगपरमणमस्मिन्देहआत्मकर्मोपरमकृतमिति॥आत्मास्यविहंते

अस्यलोकस्यसर्वावतोमात्रामपादायस्वयंविहत्यस्वयंनिर्मायस्वेनभासास्वेनज्यो
तिषाप्रस्वपित्यत्रायंपुरुषःस्वयंज्योतिर्भवति॥९॥ ॥७॥ ॥७॥ ॥

त्युच्यते॥स्वयंनिर्मायनिर्माणंकृत्वावासनामयंस्वप्नदेहंमायामयमिवनिर्माणमपितत्क
र्मसापेक्षत्वात्स्वयंकर्तृकमुच्यतेस्वेनात्मीयेनभासास्वेनात्मीयेनमात्रोपादानलक्षणेनभासा
दीप्त्याप्रकाशेनसर्ववासनात्मकेनांतःकरणवृत्तेःप्रकाशेनेत्यर्थः॥साहितत्रविषयभूतासर्ववास
नामयीप्रकाशते॥सातत्रस्वयंभाउच्यते।तेनस्वेनभासाविषयभूतेनस्वेनचज्योतिषातद्विषयिणा
विविक्तरूपेणालुप्तदृक्स्वभावेनतद्भासंरूपंवासनात्मकंविषयीकुर्वन्स्वपिति॥यदेवंवर्त्तनंत
त्स्वपितीत्युच्यते॥अत्रैतस्यामवस्थायामेतस्मिन्कालेऽयंपुरुषआत्मास्वयमेवविविक्तज्योति
र्भवति॥बाह्याध्यात्मिकभूतभौतिकसंसर्गरहितंज्योतिर्भवति॥ ॥७॥ ॥७॥ ॥
थंपुनरात्मनोदेहविहंतृत्वंजाग्रद्धेतुकर्मफलोपभोगोपरमणाद्धिसविहंत्येतेतत्राहजागरितेही
त्यादिना॥निर्म्माणंविषयंदर्शयतिवासनामयमिति।यथामायावीमायामयंदेहंनिर्मिमीते।तद्वदि
त्याहमायामयमिवेति।कथंपुनरात्मनोयथोक्तदेहनिर्माणकर्तृत्वंकर्म्मकृतत्वात्तन्निर्माणस्य

त्याशंक्याह निर्माणमपीति। स्वेन भासेत्यत्रेत्थंभावे तृतीया करणे तृतीयां व्यावर्तयति साहीति। त
त्रेति स्वप्नोक्तिः यथोक्तांतःकरणवृत्तेर्विषयत्वेन प्रकाशमानत्वेपि स्वभासो भवतु करणत्वमित्या
शंक्याह सा तत्रेति। स्वेन ज्योतिषेति कर्त्तरि तृतीया स्वशब्दोत्रात्मविषयः। कोयं प्रस्वापो नाम तत्रा
ह यदेवमिति। विविक्तविशेषणे विवृणोति बाह्येति॥ ॥७॥ ॥स्वप्ने स्वयंज्योतिरात्मेत्युक्तमा
क्षिपति नन्वस्येति। वासनापरिग्रहस्य मनोवृत्तिरूपस्य विषयतया विषयित्वाभावादविरुद्धमा

वभा नन्वस्य लोकस्य मात्रोपादाने कृते कथं तस्मिन्स्वप्नेत्रायं पुरुषः स्वयंज्योतिर्भवतीत्युच्यते। नै
षदोषो विषयभूतमेव हि वेत्तृ। तेनैव चात्रायं पुरुषः स्वयंज्योतिर्दर्शयितुं शक्यः। नत्वन्यथाऽस
तिविषये कस्मिंश्चित्सुषुप्तकाल इव॥ यदा पुनः सोऽस्य वासनात्मिका विषयभूता उपलभ्यमा
ना भवति॥ तदाऽसिः कोशादिव निःकृष्टः सर्वसंसर्गरहितश्चक्षुरादिकार्यकरणव्यावृत्तस्वरूप
मलुप्तदृगात्मज्योतिः स्वेन रूपेणावभासयद्गृह्यते। तेनात्रायं पुरुषः स्वयंज्योतिर्भवतीति सिद्धं
॥७॥ ॥

त्मनः स्वप्ने स्वयंज्योतिष्ट्वमिति समाधत्ते नैष दोष इति। कुतो वासनोपादानस्य विषयत्वमित्याशं
क्य स्वयंज्योतिष्ट्वमिति श्रुतिसामर्थ्यादित्याह। तेनेति। मात्रादानस्य विषयत्वेनेति यावत्। तदे
व व्यतिरेकमुखेनाह न त्विति। यथा सुषुप्तिकाले व्यक्तस्य विषयस्याभावे स्वयंज्योतिरात्मा न द
र्शयितुं शक्यते तथा स्वप्नेपि तस्मात्तत्र स्वयंज्योतिष्ट्वश्रुत्या मात्रादानस्य विषयत्वं प्रकाशितमि
त्यर्थः भवतु स्वप्ने वासनादानस्य विषयत्वं तथापि कथं स्वयंज्योतिरात्मा शक्यते विविच्य दर्शयि
तुमित्याशंक्याह यदा पुनरिति। अवभासयदवभास्यं वासनात्मकमंतःकरणमिति शेषः। स्वप्ना

वस्थायामाभासकोनतमाभावकल्पितमाहसेति॥

+ प्रदर्शनस्य जागरिते हीन्द्रियबुद्धिमनआलोकादिव्यापारसंकीर्णमात्मज्योतिरिह तु स्वप्न इंद्रियाभावात्तदनुग्रा ५

यदुक्तं स्वप्ने स्वयंज्योतिरात्मेति तत्प्रकारांतरेणाक्षिपति नन्विति। अवस्थाद्वये विशेषाभावं कृत्वा चोद्ये दूषयत्यु
च्यत इति। वैलक्षण्यं स्फुटयति जागरिते हीति। मनस्तु स्वप्नेसदपि विषयत्वान्न स्वयंज्योतिष्ट्वं विघातीति भावः
नन्वत्र कथं पुरुषः स्वयंज्योतिर्येन जागरितेऽवा ग्राह्यग्राहकादिलक्षणः सर्वो व्यवहारो दृश्यते चक्षुरा
द्यनुग्राहकाश्चादित्याद्यालोकास्तथैव दृश्यंते यथा जागरिते तत्र कथं विशेषावधारणं क्रियते अ
यं पुरुषः स्वयंज्योतिर्भवतीत्युच्यते वैलक्षण्यात्त्वेहकादित्याद्यालोकाभावाच्च विविक्तं केवलं भ
वति॥ तस्माद्विलक्षणं॥ १॥ ननु तथैव विषया उपलभ्यंते स्वप्नेपि यथा जागरिते तत्र कथमिंद्रिया
भावाद्वैलक्षण्यमुच्यत इति शृणु। न तत्र विषयाः स्वप्ने रथादिलक्षणास्तथा न रथयोगाः रथेयुज्यं
त इति रथयोगा अश्वादयस्तत्र न विद्यंते न च पंथानो रथमार्गा भवंत्यथ रथान्रथयोगान्पथश्च सृज
ते स्वयं॥ कथं पुनः सृजते रथादिसाधनानां वृक्षादीनामभावे। उच्यते। ननूक्तमस्य लोकस्य वास
र्ववतो मात्रामपादाय स्वयं विहत्य स्वयं निर्मायेत्यंतःकरणवृत्तिरस्य लोकस्य वासनामात्रा तामपा

न तत्र रथा न रथयोगा न पंथानो भवंत्यथ रथान्रथयोगान्पथः सृजते न तत्रानंदा मुदः प्रमुदो
भवंत्यथानंदान्मुदः प्रमुदः सृजते॥ दाय रथादिवासनारूपांतःकरणवृत्तिः तदुपलब्धिनिमित्ते
न कर्मणा चोद्यमानादृश्यत्वेन व्यवतिष्ठते तदुच्यते स्वयं निर्मायेति तदेवाह रथादीन्सृजत इति॥ न
तु तत्र करणं वा करणानुग्राहकाणि आदित्यादिज्योतींषि तदवभास्या वा रथादयो विषया विद्यं
ते तद्वासनामात्रं तु केवलं तदुपलब्धिनिमित्तकर्मचोदितोद्भूतांतःकरणवृत्त्याश्रयं दृश्यते। तद्य
स्य ज्योतिषो दृश्यते तदुपद्रष्टा तदात्मज्योतिरत्र केवलं॥ असिरिव कोशाद्विविक्तं तथा न तत्रानंदाः
सुखविशेषाः मुदो हर्षोत्कर्षाः पुत्रादिलाभनिमित्ताः॥ प्रमुदस्त एव प्रकर्षोपेताः॥ अथ चानंदादीन्

उक्तं वैलक्षण्यं प्रतीतिमाश्रित्याक्षिपति नन्विति। न तत्रेत्यादिवाक्यं व्याकुर्वन्नुत्तरमाह शृण्विति। प्रती
तिं घटयत्यथेति रथादिसृष्टिमाक्षिपति कथं पुनरिति। वासनामयी सृष्टिः श्लिष्टेत्युत्तरमाहोच्यत इति।
तदुपलब्धिनिमित्तेत्यत्र तच्छब्देन वासनात्मिका मनोवृत्तिरेवोक्ता उक्तमेव प्रपंचयति न त्वित्यादिना तदुपल
ब्धिर्वासनोपलब्धिस्तत्र यत्कर्म निमित्तं तेन चोदितायोद्भूतांतःकरणवृत्तिः ग्राहकावस्था तदाश्रयं वा तदा

त्मके तद्वासनारूपं दृश्यत इति योजना। तथापि कथमात्मज्योतिः स्वप्ने केवलं सिध्यति तत्राह तद्यस्येति। य
थाकोशादसिर्विविक्तो भवति तथा दृश्याया बुद्धेर्विविक्तमात्मज्योतिरिति केवलत्वं साधयत्यसिरिवेति। त
था रथाद्यभाववदिति यावत्। मुखान्येव विविशिष्यन्त इति विशेषः। सुखसामान्यानीत्यर्थः॥ ॥१०॥ ॥
तथेत्यानन्दाद्यभावो दृश्यते। ततः अल्पा यासि सरांसि पल्वलशब्देनोच्यते स हि कर्तेत्यत्र हि शब्दार्थो यस्मादित्यु
क्तः तस्मात्सृजतीति शेषः। कुतोऽस्य कर्तृत्वं सहकार्यभावादित्याशङ्क्याह तद्वासनेति। तच्छब्देन वेशान्तादि
ग्रहणं। तदीयवासनाधारश्चित्तपरिणामस्तेनोद्भवति यत्कर्म तस्य सृज्यमाननिदानत्वेनेति यावत्। मुख्य
तथा न तत्र वेशान्ताः पल्वलाः पुष्करिण्यस्तडागाः स्रवन्त्यो नद्यो भवन्ति॥ अथ वेशान्तादीन्सृजते वासनामा
त्ररूपान्यस्मात्स हि कर्ता तद्वासनाश्रयचित्तवृत्त्युद्भवनिमित्तकर्महेतुत्वेनेत्ययमुपचारो मतः स्य कर्तृत्वं॥
ननु साक्षादेव तत्र क्रिया संभवति साधनाभावात्। नहि कारकमन्तरेण क्रिया संभवति॥ न च तत्र हस्त
पादादीनि क्रियाकारकाणि संभवन्ति। यत्र तु तानि विद्यन्ते जागरिते तत्रात्मज्योतिरवभासितैः कार्यक
रणैः रथादिवासनाश्रयान्तःकरणवृत्त्युद्भवनिवृत्तं कर्म निर्वर्त्यते तेनोच्यते स हि कर्तेति॥ तदुक्तमा
न तत्र वेशान्ताः पुष्करिण्यः स्रवन्त्यो भवन्त्यथ वेशान्तान्पुष्करिण्यः स्रवन्त्यः सृजते स हि कर्ता॥१०॥
त्मनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुत इति॥ तत्रापि न परमार्थतः स्वतः कर्तृत्वं चैतन्यज्योतिषा
क वभासकत्वव्यतिरेकेण। यच्चैतन्यात्मज्योतिषान्तःकरणद्वारेणावभासयति कार्यकरणानि तदवभासि
तानि कर्मसु व्याप्रियन्ते कार्यकरणानि तत्र कर्तृत्वमुपचर्यत आत्मनः॥ यदुक्तं ध्यायतीव लेलायतीवे ले
ति तदेवानूद्यते स हि कर्तेति हि हेत्वर्थं॥ ॥१०॥ ॥ कर्तृत्वं वारयति न त्विति। तत्रेति स्वप्नोक्तिः। साधका
भावेऽपि स्वप्ने क्रिया किं न स्यादित्याशङ्क्याह नहीति। तर्हि स्वप्ने कारकाण्यपि भविष्यन्तीनेत्याह न चेति। तर्हि
पूर्वोक्तमपि कर्तृत्वं कथमिति चेत्तत्राह यत्र त्विति। उक्तेऽर्थे वाक्योपक्रममनुकूलयति तदुक्तमिति। उपक्र
मे मुख्यं कर्तृत्वमिह त्वौपचारिकमिति विशेषमाशङ्क्याह तत्रापीति। परमार्थतश्चैतन्यज्योतिषो व्यापार
वदुपाध्यवभासकत्वव्यतिरेकेण स्वतो न कर्तृत्वं वाक्योपक्रमेऽपि विवक्षितमित्यर्थः। आत्मनो वाक्योपक्र
मे कर्तृत्वमौपचारिकमित्युपसंहरति यदिति। स हि कर्तेत्यौपचारिके कर्तृत्वमुच्यते चेत्तस्य ध्यायतीवेत्या
दिना कथं खलु न पुनरुक्तिरित्याशङ्क्याह यदुक्तमिति। अनुवादे प्रयोजनमाह हेत्वर्थमिति। स्वप्ने रथादिसृष्टा

तदेतस्मिन्नुक्तेऽर्थे एते श्लोका मंत्रा भवंति। स्वप्नेन स्वप्नभावेन शारीरं शरीरमभिप्रहत्य निश्चेष्टमापाद्यासु
प्तः स्वयमलुप्तदृगादिशक्तिस्वाभाव्यात्॥ सुप्तान्वासनाकारोद्भूतानंतःकरणवृत्त्याश्रयान्बाह्याध्या
त्मिकान्सर्वानेव भावान्स्वेन रूपेण प्रत्यस्तमितान्सुप्तानभिचाकशीति। अलुप्तया दृष्ट्या पश्यत्यव
भासयतीत्यर्थः। शुक्रं शुद्धं ज्योतिष्मदिंद्रियमात्रारूपमादाय गृहीत्वा पुनः कर्मणे जागरितस्थान
मेत्यागच्छति हिरण्मयो हिरण्मय इव चैतन्यज्योतिःस्वभावः पुरुष एकहंसः एक एव हंतीत्येकहं
सः। एको जाग्रत्स्वप्नेहलोकपरलोकादीन्गच्छतीत्येकहंसः॥११॥ तथा प्राणेन पंचवृत्तिना रक्षन्प
रिपालयन्नन्यथा मृतभ्रांतिः स्यादवरं निकृष्टमनेकाशुचिसंघातत्वादत्यंतबीभत्सं कुलायं नी
डं शारीरं स्वयं तु बहिस्तस्मात्कुलायाच्चरित्वा॥ यद्यपि शारीरस्थ एव स्वप्नं पश्यति तथापि तत्संबं

तदेते श्लोका भवंति स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीति। शुक्रमादाय पु
नरैति स्थानꣳ हिरण्मयः पुरुष एकहꣳसः॥११॥ प्राणेन रक्षन्नवरं कुलायं बहिः कुलायाद
मृतश्चरित्वा॥ स ईयतेऽमृतो यत्र कामꣳ हिरण्मयः पुरुष एकहंसः॥१२॥ स्वप्नांत उच्चावचमी
यमानो रूपाणि देवः कुरुते बहूनि॥ उतेव स्त्रीभिः सह मोदमानो जक्षदुतेवापि भयानि पश्यन्
॥१३॥

धाभावात्तत्स्थ इव आकाश इव बहिश्चरित्वेत्युच्यते। अमृतः स्वयममरणधर्मा ईयते गच्छति॥
यत्र कामं यत्र यत्र कामो विषयेषूद्भूतवृत्तिर्भवति तं कामं वासनारूपेणोद्भूतं गच्छति॥१२॥ किं च स्वप्नां
ते स्वप्नस्थाने उच्चावचं उच्चं देवादिभावमवचं तिर्यगादिभावं निकृष्टं तदुच्चावचमीयमानः गम्यमानः
प्राप्नुवन्रूपाणि देवो द्योतनवान्कुरुते निर्वर्तयति वासनारूपाणि बहून्यसंख्येयानि उत अपि
स्त्रीभिः सह मोदमान इव जक्षदिव हसन्निव वयस्यैः उत इव अपि भयानि बिभेत्येभ्यः इति भयानि सिं
पाल्यतितत्राहान्यथेति। बहिश्चरित्वेत्ययुक्तं शारीरस्थस्य स्वप्नोपलंभादित्याशंक्याह यद्यपीति। तत्संबंधा
भावाद्बहिश्चरित्वेत्युच्यत इति संबंधः। देहस्यस्यैव तत्संबंधे दृष्टांतमाह तत्स्थ इवेति स्वप्नस्थे विशेषांतरमाह किं चेति

आरामं विवृणोति। आराममित्यादिना। न तमित्यादेः तात्पर्यमाह कष्टमिति। दृष्टिगोचरापन्नमपि न पश्यतीति सं
बंधः। कष्टमित्यादिनोक्तं प्रपंचयत्यहो इति। श्लोकांतो तात्पर्यमुपसंहरत्येवेति। वाक्यांतरमादाय तात्पर्यमुक्त्वा
आकांक्षापूर्वकमक्षराणि व्याकरोति। तेनेत्यादिना। तेषामभिप्रायमाह। नूनमिति। इंद्रियाण्येव द्वाराण्य
स्येति इंद्रियद्वारो जाग्रद्देहस्तस्मादिति यावत्। तथापि सहसा सो बोध्यतां का हानिरित्याशंक्याह तत्रेति।
सहसा बोध्यमानत्वे सप्तम्यर्थः। किमत्र प्रमाणमित्याशंक्यानंतरवाक्यमवतार्य व्याचष्टे तदेतदाहेत्यादि
आराममारममाणमाक्रीडमनेन निर्मितो वासनारूपा मस्यात्मनः पश्यंति सर्वे जनाः ग्रामं नगरं
स्त्रियमन्नाद्यमित्यादि वासनानिर्मितमाक्रीडनरूपं न तं पश्यति कश्चन कष्टं भो वर्तते अत्यंतवि
विक्तं दृष्टिगोचरापन्नमथ हो भाग्यहीनता लोकस्य यच्छक्यदर्शनमप्यात्मानं न पश्यतीति लोके
प्रत्यनुक्रोशं दर्शयति श्रुतिरत्यंतविविक्तः स्वयंज्योतिरात्मा स्वप्ने भवतीत्यभिप्रायस्तं नायतं बो
धयेदित्याहुः प्रसिद्धिरपि लोके विद्यते स्वप्न आत्म ज्योतिषो व्यतिरिक्तत्वे कोसौ तमात्मानं सुप्त
मायतं सहसा भृशं न बोधयेदित्याहुरेवं कथयंति चिकित्सकादयो जनाः लोके नूनं ते पश्यंति

आराममस्य पश्यंति न तं पश्यति कश्चनेति तं नायतं बोधयेदित्याहुर्दुर्भिषज्यं हास्मै
भवति यमेष न प्रतिपद्यते ॥ जाग्रद्देहादिंद्रियद्वारतोपसृत्य केवलो बहिर्वर्तत इति। यत आ त
हुस्तं नायतं बोधयेदिति तत्र च दोषं पश्यंति। भृशं ह्यसौ बोध्यमानस्तानींद्रियद्वाराणि सहसा प्रति
बोध्यमानो न प्रतिपद्यत इति तदेतदाह दुर्भिषज्यं हास्मै भवति यमेष न प्रतिपद्यते। यमिंद्रियद्वा
रदेशं यस्माद्देशाच्छुक्रमादायोपसृतस्तमिंद्रियदेशमेष आत्मा पुनर्न प्रतिपद्यते। कदाचिद्व्यत्या
सेनेंद्रियमात्राः प्रवेशयति। ततश्चांध्यबाधिर्यादिदोषप्राप्तौ दुर्भिषज्यं दुःखभिषज्यता हास्मै देहा
य भवति। दुःखेन चिकित्सनीयोसौ देहो भवतीत्यर्थः॥ ॥ना। पुनरप्रतिपत्तौ दोषप्रसंगं दर्शयति कदाचिदिति।
व्यत्यासप्रवेशस्य कार्यं दर्शयन् दुर्भिषज्यमित्यादि व्याचष्टे तत इति॥ ॥७॥ ॥७॥ ॥७॥
॥श्रीरामजयराम जयजयराम॥ ॥श्रीगोपालकृष्णायनमः॥ ॥श्रीरामचंद्रायनमः॥ ॥७॥
॥७॥ आ७॥

उक्तांप्रसिद्धिमुपसंहरति।तस्मादिति।वृत्तमनूद्यमतांतरमुत्थापयति।स्वप्नोभूत्वेत्यादिना।इतिशब्दोयस्मादर्थेत
देवमतांतरंस्फारयति।नेत्यादिना।उक्तमंगीकृत्यफलंपृच्छतियद्येवमिति।स्वप्नोजागरितदेशइत्येवंयदीष्टमतश्च
किंस्यादितिप्रश्नार्थः।फलंप्रतिज्ञायप्रकटयति।अपित्वित्यादिना।मतांतरोपन्यासस्यस्वमतविरोधित्वमाहइत्यत
तस्मात्प्रसिद्ध्यापिस्वप्नेस्वयंज्योतिष्ट्वमस्यगम्यतेयस्मात्स्वप्नोभूत्वातिक्रांतोमृत्योरूपाणीति।तस्मात्स्वप्ने
यः स्वयंज्योतिरात्माअथोअपिखल्वन्यआहुर्जागरितदेशएवास्यैषःस्वप्नोनसंध्यस्थानांतरमिहलोकाभ्यांव्य लोकपर
तिरिक्तं।किंतर्हिइहलोकएवजागरितदेशो।यद्येवंकिंचातःश्रृणुअतोयद्भवतियदाजागरितदेशएवायंस्वप्नस्त
तो दायमात्माकार्यकरणेभ्योनव्यावृत्तस्तैर्मिश्रीभूतोनस्वयंज्योतिरात्मेत्यतःस्वयंज्योतिष्ट्वबाधनायान्यआ
हुर्जागरितदेशएवास्यैषइतितत्रचहेतुमाचक्षते।जागरितदेशत्वेयानिहियस्माद्धस्त्यादीनिपदार्थजातानि
जाग्रज्जागरितदेशेपश्यतिलौकिकस्तान्येवसुप्तोपिपश्यतीति।तदसदिंद्रियोपरमादुपरतेष्विंद्रियेषुस्वप्ना
न्पश्यतितस्मान्नान्यस्यज्योतिषस्तत्रसंभवोस्तितदुक्तंनतत्ररथानरथयोगाइत्यादितस्मादत्रायंपुरुषःस्व
अथोखल्वाहुर्जागरितदेशएवास्यैषइतियानिह्येवजाग्रत्पश्यतितानिसुप्तइत्यत्रायंपुरुषःस्वयं
ज्योतिर्भवतिसोहंभगवतेसहस्रंददाम्यतऊर्ध्वंविमोक्षायब्रूहीति॥१४॥ ॥७॥ ॥
यंज्योतिर्भवत्येवस्वयंज्योतिरात्मास्तीतिस्वप्नदर्शनेनप्रदर्शितमतिक्रामतिमृत्योरूपाणीतिचक्रमेण
संचरन्निहलोकपरलोकादीनिहलोकपरलोकादिव्यतिरिक्तस्तथाजाग्रत्स्वप्नकुलायाभ्यांव्यतिरिक्तस्तत्र य
रा चक्रमसंचारित्वयश्चेत्येतत्प्रतिपादितंयाज्ञवल्क्येन।अतोविद्यानिःक्रयार्थंसहस्रंददामीत्याहजनकः
सोहमेवंबोधितस्त्वयाभगवतेतुभ्यंसहस्रंददामिमोक्षश्चकामप्रश्नोमयाभिप्रेतस्तदुपयोग्ययंतादर्थ्ये
तदेकदेशएवात्वांनियोक्ष्यामिसमस्तकर्मप्रश्ननिर्णयश्रवणेनविमोक्षायातऊर्ध्वंब्रूहि।येनसंसारा
इतिस्वप्नस्यजाग्रद्देशत्वंदूषयति।तदसदिति।तस्यजागरितदेशत्वाभावेफलितमाहतस्मादितिस्वप्नेबाह्यज्यो
तिषःसंभवोनास्तीत्यत्रप्रमाणमाह।तदुक्तमिति।बाह्यज्योतिरभावेपिस्वप्नेव्यवहारदर्शनात्तत्रस्वयंज्योतिष्ट्व
माक्षेप्तुमशक्यमित्युपसंहरति।तस्मादिति।कथंपुनर्विद्यायामनुक्तायांसहस्रदानवचनमित्याशंक्याहवृत्तं
कीर्तयतिस्वयंज्योतिरिति।मृत्योरूपाण्यतिक्रामतीत्यत्रचकार्यकरणव्यतिरिक्तत्वमात्मनोदर्शितमित्या
हातिक्रामतीति।लोकद्वयसंचारवशादुक्तमर्थमनुद्रवतिक्रमेणेति।आदिशब्दस्तत्रदेहादिविषयःस्थानद्व
यसंचारवशादुक्तमनुभाषतेतथेति।इहलोकपरलोकाभ्यामिवेतियावत्।लोकद्वयेस्थानद्वयेचक्रमसंचार

प्रयुक्तमर्थान्तरमाह। तत्र चेति। आत्मनः स्वयंज्योतिषो देहादिव्यतिरिक्तस्य नित्यस्य ज्ञापितत्वादित्यथातःशब्दा
र्थः। कामप्रश्नस्य निर्णीतत्वान्निराकांक्षत्वमिति शंकां वारयति। विमोक्षश्चेति। सम्यक्बोधस्तद्धेतुरिति या
वत्। ननु स एव प्रागुक्तो नासौ वक्तव्योऽस्ति तत्राह तदुपयोगीति। अयमित्युक्तात्मप्रत्ययोक्तिः तादर्थ्यात्पदा
र्थज्ञानस्य वाक्यार्थज्ञानशेषत्वादिति यावत्। पदार्थस्य वाक्यार्थबहिर्भावं दूषयति तदेकदेश एवेति। कामप्र
श्नो नाद्यापि निर्णीतस्तस्य त्वत्रोत्तरवाक्यं गमकमित्याहान्तरेति। कामप्रश्नस्यानिर्णीतत्वादिति यावत्। तेनापे
क्षितेन हेतुनेत्यर्थः। विमोक्षशब्दस्य सम्यक्ज्ञानविषयत्वं सूचयति। येनेति॥ ॥७॥ ॥सम्यक्ज्ञानप्रा
प्तौ गुरुप्रसादस्य प्राधान्यं दर्शयति। त्वत्प्रसादादिति। ननु विमोक्षपदार्थो निर्णीतोऽन्यथा सहस्रदानस्या

त्वत्प्रसादाद्विमोक्षपदार्थैकदेशनिर्णयहेतोः सहस्रदानं यत्प्रस्तुतमात्मनैवायं ज्योतिषास्त इत्ये
तत्प्रत्यक्षतः प्रतिपादितमत्रायं पुरुषः स्वयंज्योतिर्भवतीति स्वप्ने। यत्तूक्तं स्वप्नो भूत्वेमं लोकमति
क्रामति मृत्यो रूपाणीति तत्रैतदाशंक्यते। मृत्यो रूपाण्येवातिक्रामति न मृत्युं प्रत्यक्षं हि तत्स्व
प्ने कार्यकरणव्यापारस्तस्यापि मोहत्रासादिदर्शनेन तस्मान्नूनं नैवायं मृत्युमतिक्रामति। कर्मणो
हि मृत्योः कार्यं मोहत्रासादि दृश्यते। यदि च मृत्युना बद्ध एवायं स्वभावतस्ततो विमोक्षो नोपपद्य
ते। न हि स्वभावात्कश्चिद्विमुच्यतेऽथ स्वभावो न भवति मृत्युः ततस्तस्मान्मोक्ष उपपत्स्यते॥ ॥

कस्मिन्कल्पप्रसंगादत आह विमोक्षेति। उत्तरकंडिकामवतारयितुं वृत्तं कीर्तयति यत्प्रस्तुतमिति। आत्मनैवेत्या
दिना यदात्मनः स्वयंज्योतिष्ट्वं ब्राह्मणादौ प्रस्तुतं तदत्रायमित्यादिना प्रत्यक्षतः स्वप्ने प्रतिपादितमिति संबंधः
। वृत्तमर्थान्तरमनूद्य चोद्यमुत्थापयति यत्तूक्तमिति मृत्युं नातिक्रामतीत्यत्र हेतुमाह प्रत्यक्षं हीति। इच्छाद्वेषा
दिरादिशब्दार्थः। तथापि कुतो मृत्युं नातिक्रामति तत्राह। तस्मादिति। कार्यस्य कारणादन्यत्र प्रवृत्त्ययोगादि
ति यावत्। उक्तमुपपादयति कर्मणो हीति। अतः स्वप्नगतो मृत्युं कर्माख्यं नातिक्रामतीति शेषः। मा तर्हि मृत्यो
रतिक्रमो भूत्को दोषस्तत्राह। यदि चेति। स्वभावादपि मृत्योर्विमुक्तिमाशंक्याह न हीति। उक्तं हि न हि स्वभा
वो भाववन्तं व्यावर्त्तत औष्ण्यवद्वह्नेरिति मोक्षोपपत्तिरित्याशंक्याहाथेति॥ ॥७॥ ॥७॥

एषाशोकाप्रागेवराज्ञाकृतेतिदर्शयन्नुत्तरमुत्थापयतियथेत्यादिना।तद्विदर्शीयिषयेत्यत्रतच्छब्देनमृत्योरति
क्रमणंगृह्यतेवैशब्दस्यप्रसिद्धार्थत्वमुपेत्यसशब्दार्थमाहप्रकृतइति।एषशब्दमनूद्यव्याकरोत्येषइति।सं
प्रसादेस्थित्वामृत्युमतिक्रामतीतिशेषः।सुषुप्तस्यसंप्रसादत्वंसाधयति।जागरितइत्यादिना।तत्रवाक्यशे
षमनुकूलयतितीर्णोहीति।।अस्तुसंप्रसादःसुषुप्तस्थानंतथापिकिमायातमित्यत्राह।सवाइति।पूर्वोक्ते
यथासोमृत्युरात्माऽयोधर्मोनभवतितथाप्रदर्शनायातऊर्द्धंविमोक्षायब्रूहीत्येवंजनकेनपर्यनुयुक्तोया
ज्ञवल्क्यस्तद्विदर्शीयिषयाप्रवृत्तेसवैप्रकृतःस्वयंज्योतिःपुरुषःएषयःस्वप्नप्रदर्शितःएतस्मिन्संप्रसा
देसंम्यक्प्रसीदत्यस्मिन्नितिसंप्रसादोजागरितदेहेंद्रियव्यापारशतसंनिपातजंहित्वाकालुष्यंते
भ्योविप्रमुक्तईषत्प्रसीदतिस्वप्ने।।१४।।इहतुसुषुप्तेसम्यक्प्रसीदत्यतःसुषुप्तःसंप्रसादउच्यते।।तीर्णो
हितदासर्वाञ्छोकानितिसलिलएकोद्रष्टेतिहिवक्ष्यति।सुषुप्तस्यमात्मानं।स वाएषएतस्मिन्संप्र
सादेक्रमेणसंप्रसन्नःसन्सुषुप्तेस्थित्वाकथंसंप्रसन्नःस्वप्नात्सुषुप्तंप्रविविक्षुःस्वप्नावस्थएवरत्वा
सवाएषएतस्मिन्संप्रसादेरत्वाचरित्वादृष्ट्वैवपुण्यंचपापंच।। ।।७।। ।।७।। ।।
रतिमनुभूयमित्रबंधुजनदर्शनादिनाचरित्वाविहृत्यानेकधाचरणफलंश्रममुपलभ्येत्यर्थः।।दृ
ष्ट्वैवनकृत्वेत्यर्थः।पुण्यंचपुण्यफलंपापंचपापफलंनतुपुण्यपापयोःसाक्षाद्दर्शनमस्तीत्यवोचा
मतस्मान्नपुण्यपापानुबद्धोयोहिकरोतिपुण्यपापेसताभ्यामनुबध्यते।नहिदर्शनमात्रेणतद
नुबंधःस्यात्तस्मात्स्वप्नोभूत्वामृत्युमतिक्रामत्येवनमृत्योरूपाण्येवकेवलमतोनमृत्योरात्म
स्वभावत्वाशंकामृत्युश्चेत्स्वभावोऽस्यस्वप्नेपिकुर्यान्नतुकरोति स्वभावश्चेत्क्रियास्यादनिर्मोक्ष
तैवस्यान्नतुस्वभावःस्वप्नेभावादतोविमोक्षोस्योपपद्यते।।मृत्योःपुण्यपापाभ्यां।। ।।७।। ।।
नक्रमेणसंप्रसादेसुषुप्तेस्थित्वासंप्रसन्नःसन्मृत्युमतिक्रामतीत्यर्थः।उक्तमर्थमुपपादयितुमाकांक्षामा
हकथमिति।रत्वेत्यादिव्याकुर्वन्परिहरति।स्वप्नादिति।पुण्यपापशब्दयोर्यथाश्रुतार्थत्वमाशंक्याह।न
त्विति।अवोचामोभयानुपाश्मनआनंदांश्चपश्यतीत्यत्रेति शेषः।पुण्यपापयोर्दर्शनमेवनकरणमित्यत्र
फलितमाहतस्मादितिननुद्रष्टुरपितदनुबंधःस्यादित्याशंक्यातिप्रसंगान्मैवमित्याह।योहीत्यादिना।पु

बृ·भा·व्या· एवपापाभ्यामात्मनोऽसंस्पर्शफलितमाहतस्मादितिमृत्योरतिक्रमणेकिंस्यादित्याशंक्याहातोने टी·अ·४
३३२ ति।मृत्योरस्वभावत्वमुपपादयति।मृत्युश्चेदिति।इष्टापत्तिमाशंक्याह।नत्विति।अनन्वागतवाक्या
[illegible]दसंगवाक्याच्चेत्यर्थः।मोक्षशास्त्रप्रामाण्यादपिमृत्योरस्वभावत्वमित्याहस्वभावश्चेदि
ति।इतश्चमृत्युःस्वभावोनभवतीत्याह।नत्विति।अभावादितिच्छेदः।तस्यास्वभावत्वेलब्धमर्थंकथय
५॥ ॥७॥ ॥ तिअतइति।मृत्युमेवव्याचष्टे।पुण्यपापाभ्यामिति।स्वप्नेमृत्योःस्वभावत्वाभावेपिजाग्रदवस्थायांकर्तृ
त्वमात्मनःस्वभावस्तथाचनियमेनतस्यमृत्योरतिक्रमोनसिध्यतीतिशंकतेनन्विति।औपाधिकत्वात्क
र्तृत्वस्यस्वाभाविकत्वाभावादात्मनोमृत्योरतिक्रमःसंभवतीतिपरिहरतिनेतिकथमौपाधिकत्वंक

ननुजागरितेस्यस्वभावएव।नबुद्ध्याद्युपाधिकृतंहितत्।तच्चप्रतिपादितंसादृश्यात्।ध्यायतीवले
लायतीवेतितस्मादेकांतेनैवस्वप्नेमृत्युरूपातिक्रमणान्नस्वाभाविकत्वाशंकाःनिर्मोक्षतावा।त
त्रचरित्वेतिचरणफलंश्रममुपलभ्येत्यर्थः।ततःसंप्रसादानुभवोत्तरकालंपुनःप्रतिन्यायंयथान्य
यंयथागतंनिश्चायोन्यायःअयनमायोनिर्गमनंपुनःपूर्वगमनवैपरीत्येनयदागमनंसप्रतिन्य

॥पुनःप्रतिन्यायंप्रतियोन्याद्रवति स्वप्ना[illegible]येव॥

योयथागतंपुनरागच्छतीत्यर्थः॥प्रतियोनियथास्थानंस्वप्नस्थानंस्वप्नस्थानाद्धिसुषुप्तंप्रतिपन्नः
सयथास्थानमेवपुनरागच्छतिप्रतियोन्याद्रवतिस्वप्नायैवस्वप्नस्थानायैव॥ ॥७॥ ॥

र्तृत्वस्यसिद्धवदुच्यतेतत्राह।तच्चेति।ध्यायतीवेत्यादौसादृश्यवाचकादिवशब्दादौपाधिकत्वंकर्तृत्वस्यप्रा
गेवदर्शितमित्यर्थः।जागरेपिकर्तृत्वस्यस्वाभाविकत्वाभावेफलितमाह।तस्मादिति।मृत्योःस्वाभावि
न कत्वशंकाभावकृतंफलमाह।निर्मोक्षतावेति।वाशब्दोऽनुकर्षणार्थः।पुण्यंचपापंचेत्येतदंतंवाक्यंव्या
ख्यायपुनरित्यादिव्याचष्टे।तत्रेति।स्वप्नाद्व्युत्थायसुषुप्तिमनुभूयोत्तरकालमितियावत्।स्थानात्स्थानांतर
प्राप्ताववभ्यासंवक्तुंपुनःशब्दः।प्रतिन्यायमित्यस्यावयवार्थमुक्त्वाविवक्षितमर्थमाहपुनरितिसंप्रसादा
दूर्ध्वमितियावत्।जागरितात्स्वप्नंततःसुषुप्तंगच्छतीतिपूर्वगमनंततोवैपरीत्येनसुषुप्तात्स्वप्नंजागरितंचा
गच्छतीतियदागमनंसंप्रतिन्यायःतमेवसंक्षिपतियथेति।यथास्थान[illegible]माद्रवतीत्येतद्विव
णोतिस्वप्नस्थानादिति।उक्तेर्थेवाक्यंपातयति।प्रतियोनीति।किमर्थंयथास्थानमागमनंतदाह।स्वप्नायेति॥

सयदित्यादिवाक्यस्यव्याख्यामात्रोक्तामाहनन्विति।तत्रवाक्यमुत्तरत्वेनावतार्यव्याकरोत्यतआहेति।
अनानुबद्धइत्यस्यार्थंस्फुटयति।नैवेति।सयदित्यादिवाक्यस्याक्षरार्थमुक्त्वातात्पर्यार्थमाहयद्धीति।
तेनात्मनेतियावत्स्वप्नेकृतेकर्मणिपुनस्तेनेत्युक्तेः।अनुबंधेदोषमाहस्यादिति।इष्टापत्तिमाशंक्याहान
चेति।स्वप्नकृतेनकर्मणाजाग्रदवस्थस्यपुरुषस्यान्वागतत्वप्रसिद्धिरितियदुच्यतेतन्नव्यवहारभूमौ

ननुस्वप्नेनकरोतिपुण्यपापेतयोःफलमेवपश्यतीति कथमवगम्यते।यथाजागरितेतथाक
रोत्येवस्वप्नेपितुल्यत्वाद्दर्शनस्येति॥अतआह।सआत्मायत्किंचित्तत्रस्वप्नेपश्यतिपुण्यपा
पफलमनन्वागतोऽननुगतोऽननुबद्धस्तेनदृष्टेनभवति॥नैवबद्धोभवति॥यद्धिहिस्वप्नेकृतमेव

सयत्तत्रकिंचित्पश्यँनन्वागतस्तेनभवति॥७॥
त्य

तेनस्यात्तेनानुबद्धोतस्वप्नादुत्थितोपिसमन्वागतःस्यात्॥नचतत्लोकेस्वप्नकृतकर्मणा
न्वागतत्वप्रसिद्धिःनहिस्वप्नकृतेनागस्कारिणमात्मानंमन्यतेकश्चित्॥नस्वैवप्नदृशाःश्रुत्वे
लोकस्तंगर्हतिपरिहरतिवाततोनन्वागतएवतेनभवति।तस्मात्स्वप्नेकुर्वन्निवोपलभ्यतेन
तुक्रियास्तिपरमार्थतःउतेवस्त्रीभिःसहमोदमानइतिहिश्लोकउक्तः॥ ॥७॥ ॥

संप्रतिपन्नमित्यर्थः।स्वप्नदृष्टेनजाग्रत्गतस्यनसंगतिरित्यत्रस्वानुभवंदर्शयतिनहीति।यथोक्ते
नुभवेलोकस्यापिसंमतिंदर्शयतिनचेति।तत्रफलितमाह।तेइति।कथंतर्हिस्वप्नेकर्तृत्वप्रतीतिस्त त
त्राह।तस्मादिति।स्वप्नस्याभासत्वात्नतत्रवस्तुतोस्तिक्रियेत्याहउतेवेति॥ ॥७॥ ॥

तदाभासत्वेलोकप्रसिद्धिमनुकूलयत्याख्यातारश्चेति।स्वप्नस्याभासत्वेकल्पितमाहान्तरेति।अनन्वागत
वाक्यंप्रतिज्ञारूपंव्याख्यायअसंगवाक्यंहेतुरूपमवतारयितुमाकांक्षामाहकथमितिमूर्त्तस्यमूर्त्तान्तरे
णसंयोगेक्रियोपलंभादमूर्त्तस्यतदभावादात्मनश्चामूर्त्तत्वेनासंयोगात्क्रियायोगादकर्तृत्वसिद्धिरि
त्युत्तरंहेतुवाक्यार्थकथनपूर्वकंकथयतिकार्यकरणैरित्यादिना।आत्मनोसंगत्वेनाकर्तृत्वमुक्तंसमर्थ
यते।अतएवेति।अतःशब्दार्थंविशदयति।कार्येति।क्रियावत्वाभावेजन्ममरणादिराहित्येकौटस्थ्यं
आख्यातारश्चस्वप्नस्यसहेवशब्देनाचक्षते।हस्तिनोघघटीकृताधावंतीवमयादृष्टाइति।अतोनतस्यकर्तृ
त्वं।कथंपुनरस्याकर्तृत्वमितिकार्यकरणैर्मूर्त्तैःसंश्लेषोयोमूर्त्तस्यसतुक्रियाहेतुर्दृष्टोनह्यमूर्त्तःकश्चि
क्रियावानुपलभ्यतेऽमूर्त्तश्चात्मातोसंगःयस्माच्चासंगोयंपुरुषस्तस्मादनन्वागतस्तेनस्वप्नदृष्टेनभव
त्यतएवनक्रियाकर्तृत्वमस्यकथंचिदुपपद्यते।कार्यकरणसंश्लेषकर्तृत्वंस्यात्सचसंश्लेषःसंगो।

असंगोह्ययंपुरुषइत्येवमेवैतद्याज्ञवल्क्यसोहंभगवतेसहस्रंददाम्यतऊर्ध्वंविमोक्षायै
वब्रूहीति॥१५॥ ॥ स्यनास्तियतोसंगोह्ययंपुरुषस्तस्मादमृतएवमेवैतद्याज्ञवल्क्यसोहंभ
गवतेसहस्रंददाम्यतऊर्ध्वंविमोक्षायैवब्रूहिमोक्षपदार्थैकदेशस्यकर्मविवेकस्यसम्यगुद
र्शितत्वादतऊर्ध्वंविमोक्षायैवब्रूहीति।तत्रासंगोह्ययंपुरुषइत्यसंगताऽकर्तृत्वेहेतुरुक्तःउक्तंच
पूर्वंकर्मवशात्सर्ईयतेयत्रकाममितिकामश्चसंगःअतोऽसिद्धोहेतुरुक्तोऽसंगोह्ययंपुरुषइति॥
नत्वेतदस्ति॥१५॥

फलतीत्याह।तस्मादिति।कर्मविवेकमुक्तमंगीकरोत्येवमिति।तत्रविविक्ता
त्मज्ञानेदार्ढ्यंसूचयति।सोहमिति।नैराकांक्ष्यंव्यावर्त्तयत्यतइति।कथंतर्हिसहस्रदानमित्याशं
क्याह।मोक्षेतिकामप्रश्नविवेकविषयनियोगमभिप्रेत्यपुनरनुक्रामत्यतऊर्ध्वमिति।उत्तरकंडि
काव्यावर्त्यांशंकामाहतत्रेतिपूर्वकंडिकासस्यर्थः।भवत्वकर्तृत्वहेतुरसंगत्वंकिंतावतेत्याशंक्या
ह।उक्तंचेति।पूर्वश्लोकोपन्यासदशायामितियावत्।कर्मवशात्स्वप्नहेतुसामर्थ्यादित्यर्थः।आत्म
नःस्वप्नकामकर्मसंबंधेपिकिमितिनासंगत्वंतत्राहकामश्चेति।हेत्वसिद्धिंपरिहरतिनत्विति॥ ॥

नचेद्धेतोरसिद्धत्वं तर्हि कथं तत्सिद्धिरिति पृच्छति कथमिति। हेतुसमर्थनार्थमुत्तरग्रंथमुत्थापयत्यसंग इति।
प्रतियोन्याद्रवतीत्येतदंतं सर्वमित्युक्तं स्वप्ने कर्तृत्वाभावस्तच्छब्दार्थः। उक्तमसंगत्वं व्यतिरेकमुखेन विश
दयति यद्धीति। संगवानित्यस्य व्याख्यानं कामीति। तत्संगजैस्तत्र स्वप्नविषयविशेषेषु कामाख्यसंगवशादु
त्पन्नैरपराधैरिति यावत्। ननु लिप्यते प्रायश्चित्तविधानस्यापि स्वप्नसूचिताशुभाशंकानिबर्हणार्थत्वा
त् कथं तर्ह्यसंग एवेत्येतदुच्यते। स वा एष एतस्मिन्स्वप्ने स वै एष पुरुषः संप्रसादात्प्रत्यागतः स्वप्ने रत्वा। च
रित्वा यथाकामं दृष्ट्वैव पुण्यं च पापं चेति सर्वं पूर्ववत्। बुद्धान्तायैव जागरितस्थानाय तस्मादसंग एवा
यं पुरुषः यदि स्वप्ने संगवान्स्यात् कामी ततस्तत्संयोगजैर्दोषैर्बुद्धान्ताय प्रत्यागतो लिप्येत यथासौ
स्वप्नेऽसंगत्वात्स्वप्नसंगजैर्दोषैर्जागरिते प्रत्यागतो न लिप्यते एवं जागरितसंगजैर्दोषैर्न लिप्यत एव
बुद्धान्ते॥१६॥ तदेतदुच्यते॥ स वा एष एतस्मिन्बुद्धान्ते जागरिते रत्वा चरित्वेत्यादि पूर्ववत्॥ स यत्त

स वा एष एतस्मिन्स्वप्ने रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धा
न्तायैव स यत्तत्र किंचित्पश्यत्यनन्वागतस्तेन भवत्यसंगो ह्ययं पुरुष इत्येवमेवैतद्याज्ञवल्क्य
सोऽहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति॥१६॥ स वा एष एतस्मिन्बुद्धान्ते रत्वा चरित्वा॥

त्र बुद्धान्ते किंचित्पश्यत्यनन्वागतस्तेन भवत्यसंगो ह्ययं पुरुष इति॥ ननु दृष्ट्वैवेति कथमवधार्य
ते करोति च तत्र पुण्यपापे तत्फलं च पश्यति। न कारकावभासकत्वेन कर्तृत्वोपपत्तेः। आत्मनैवायं ज्यो
तिषास्त इत्यादिनात्मज्योतिषावभासितः कार्यकरणसंघातो व्यवहरति तेनास्य कर्तृत्वमु
पचर्यते। न स्वतः कर्तृत्वं॥ तथा चोक्तं ध्यायतीव लेलायतीवेति बुद्ध्याद्युपाधिकृतमेव न स्वतः इह
तु परमार्थापेक्षयोपाधिनिरपेक्षमुच्यते॥ ॥१७॥ ॥ ह्यस्तु रत्तानुसारित्वाभावादिति शेषः। उक्तम
र्थं दृष्टान्तीकृत्य जागरितेऽपि निर्लेपत्वमात्मनो दर्शयति। यथेत्यादिना। तत्र प्रमाणमाह तदेतदिति। जाग्रद
वस्थायामुक्तमकर्तृत्वमाक्षिपति नन्विति। तत्र कल्पितं कर्तृत्वमित्युत्तरमाह नेत्यादिना। तदेव विवृणोत्या
त्मनैवेति। स्वतोऽकर्तृत्वे वाक्योपक्रमं संवादयति तथा चेति। वाक्यार्थं संगृह्णाति बुद्ध्यादीति कर्तृत्वमिति शे

 षः नन्वौपाधिके कर्तृत्वे पूर्वमुक्ते इदानीं तन्निराकरणे पूर्वापरविरोधः स्यादिति। आह। इहत्विति उपाधिनि
रपेक्षः कर्तृत्वाभाव इति शेषः॥ ॥७॥ ॥तेनेत्यपक्तं हेतुं स्फुरयति यस्मादिति आत्मनो लेपाभावे भगवद्वाक्यम
पि प्रमाणमित्याह तथा चेति। अवस्थात्रयेष्वसंगत्वमनन्वागतत्वं चात्मनः सिद्धं चेद्धि मोक्षपदार्थस्य निर्णीत
त्वाज्जनकस्य नैराकांक्षमित्याशंक्याह तथेति यथा मोक्षैकदेशस्य कर्मविवेकस्य दर्शितत्वात् पूर्वत्र सहस्रदान
मुक्तं तथात्रापि तदेकदेशस्य कामविवेकस्य दर्शितत्वात्तद्दानेन तु कामप्रश्नस्य निर्णीतत्वादित्यर्थः। द्वितीय
तृतीयकंडिकयोस्तात्पर्यं संगृह्णाति यथेत्यादिना। यथा प्रथमकंडिकया कर्मविवेकः प्रतिपादितस्तथेति
दृष्ट्वैव पुण्यं च पापं च न कृत्वेति तेन न पूर्वापरव्याघाताशंका तस्मान्निरुपाधिकः परमार्थतो न करोति न
लिप्यते क्रियाफलेन तथा च व्यासेन भगवतोक्तं॥ अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः शरीर
स्थोपि कौंतेय न करोति न लिप्यत इति। तथा सहस्रदाने तु कामप्रविवेकस्य दर्शितत्वात्॥ तथा स वा ए
ष एतस्मिन्स्वप्ने स वा एष एतस्मिन्बुद्धांत इत्येताभ्यां कंडिकाभ्यामसंगतैव प्रतिपादिता यस्मात्

दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति स्वप्नांतायैव॥१७॥७॥ ॥७॥

बुद्धांते कृतेन स्वप्नांतं गतः संप्रसन्नो संबद्धो भवति स्त्रेन्यादिकार्यादर्शनात् तस्मात्त्रिष्वपि स्थानेषु स्व
तोसंग एवायमतोमृतः स्थानत्रय धर्मविलक्षणः प्रतियोन्याद्रवति स्वप्नांतायैव संप्रसादायेत्य
र्थः दर्शनवृत्तेः स्वप्नस्य स्वप्नशब्देनाभिधानदर्शनादेतच्छब्देन च विशेषणोपपत्तेः एतस्मात्प्रताय
धावतीति च सुषुप्तं दर्शयिष्यति॥ ॥७॥ ॥यावत् कंडिकात्रितयार्थं संक्षिप्योपसंहरति यस्मादिति।
अवस्थात्रये यथसंगत्वे किं सिद्ध्यति तदाह। अत इति। प्रतीकमादाय स्वप्नांतशब्दार्थमाह प्रतियोनीति। कथं पु
नस्तस्य सुषुप्तविषयत्वमत आह। दर्शनवृत्तेरिति। दर्शनं वासनामयं तस्य वृत्तिर्यस्मिन्निति व्युत्पत्तेः स्वप्नो
दर्शनवृत्तिस्तस्य स्वप्नशब्देनैव सिद्धत्वादेतच्छब्दवैयर्थ्यात्तस्यांतो लयो यस्मिन्निति व्युत्पत्त्या स्वप्नांतश
ब्देन सुषुप्तग्रहे सत्येतच्छब्देन स्वप्नस्य व्यावृत्त्युपपत्तेरत्र सुषुप्तस्थानमेव स्वप्नांतशब्दितमित्यर्थः तत्रै
व वाक्यशेषानुगुण्यमाहैतस्मादिति॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

स्वप्नांतशब्दस्यस्वप्नप्रयोगदर्शनादिहापितस्यैवतेनग्रहणमितिपक्षांतरमुक्त्वार्थांगीकरोतियदीत्यादिना।सि
साधयिषितार्थसिद्धौहेतुमाह।यस्मादिति।कंडिकात्रयेणसिद्धमर्थमनुवदत्येवमिति।आत्मनःस्थानत्रयसं
चारादसिद्धोऽसंगत्वहेतुरितिशंकते।तत्रेतिप्रतिज्ञाहेत्वोर्निर्द्धारणेसप्तम्यर्थः।सप्रयोजकाद्देहद्वयाद्विलक्ष
णत्वंतुदूरनिरस्तमित्येवशब्दार्थः।एवंचोदितेहेतुसमर्थनार्थंमहामत्स्यवाक्यमिति।संगतिमभिप्रेत्यसं
यदिपुनरेवमुच्यते॥स्वप्नांतेरत्वाचरित्वाएतावुभावंतावनुसंचरतिस्वप्नांतंबुद्धांतंचेतिदर्शनात्स्वप्नांतायैवेत्य
त्रापिदर्शनवृत्तिरेवस्वप्नउच्यतइति।तथापिनकिंचिद्दुष्यत्यसंगताहिसिसाधयिषितासिध्यत्येवयस्मा
ज्जाग्रजागरितेदृष्ट्वैवपुण्यंचपापंचरत्वाचरित्वाचस्वप्नांतमागतोनजागरितदोषेणानुगतोभवति।एवमयं
पुरुषःआत्मास्वयंज्योतिःकार्यकरणतत्प्रयोजकाभ्यांकामकर्मभ्यांविलक्षणोयस्मादसंगोह्ययंपु
रुषोऽसंगत्वादित्ययमर्थःसवाएषएतस्मिन्संप्रसादइत्याद्याभिस्तिसृभिःप्रतिपादितः।तत्रासंगत्वे
वात्मनःकुतोयस्माज्जागरितात्स्वप्नंस्वप्नाच्चसंप्रसादंसंप्रसादात्पुनःस्वप्नक्रमेणबुद्धांतंजागरितंबु

तद्यथामहामत्स्यउभेकूलेअनुसंचरतिपूर्वंचापरंचैवमेवायंपुरुषएतावुभावंतावनुसंच
रतिस्वप्नांतंचबुद्धांतंच॥१८॥ ॥ द्धांतंचपुनःस्वप्नांतमित्येवमनुक्रमसंचारेणस्थानत्रयस्यव्य
तिरेकःसाधितः॥१७॥पूर्वंचोपन्यस्तोयमर्थः।स्वप्नोभूत्वेमंलोकमतिक्रामतिमृत्यो रूपाणीतितं
विस्तरेणप्रतिपाद्यकेवलंदृष्टांतमात्रमवशिष्टंतद्वक्ष्यामीत्यारभ्यते।तत्तत्रैतस्मिन्यथाप्रदर्शितेर्थे
दृष्टांतोयमुपादीयते।यथालोकेमहामत्स्योमहांश्चासौमत्स्यश्चनादेयेनस्रोतसाऽहार्यइत्यर्थः॥
स्रोतश्चविष्टंभयति।स्वच्छंदचारीउभेकूलेनद्याःपूर्वंचापरंचानुक्रमेणसंचरतिसंचरन्नपिकूलद्व
वमे येतन्मध्यवर्त्तिनोदकस्रोतोवेगेननपरवशीक्रियते।एवायंपुरुषःएतौउभौअंतौअनुसंचरतिकौ
तौस्वप्नांतंबुद्धांतंच।दृष्टांतप्रदर्शनफलंतुमृत्युरूपःकार्यकरणसंघातःसहतत्प्रयोजकाभ्यांकाम
कर्मभ्यामनात्मधर्मोयंचात्मैतस्माद्विलक्षणइतिविस्तरतोव्याख्यातं॥ ॥१८॥ ॥१८॥ ॥
गत्यंतरमाहपूर्वमपीति।यथाप्रदर्शितोर्थोसंगत्वंकार्यकरणविनिर्मुक्तत्वंचआहार्यत्वमप्रकंप्यत्वंस्व
च्छंदचारित्वंप्रकटयतिसंचरन्नपीति।किंपुनर्दृष्टांतेनदार्ष्टांतिकेलभ्यतेतदाहदृष्टांतेति॥ ॥१८॥ ॥

न्येन वाक्यमवतारयितुं वृत्तं कीर्त्तयत्यत्र चेति। पूर्वसंदर्भः सप्तम्यर्थः। देहद्वयेन सप्रयोजकेन वक्तृतो संबंधे
फलितमाह स्वन्तइति। कथं तर्हि तत्र संसारित्वधीरित्याशंक्याह पाधीति। औपाधिकस्यापि वस्तुत्वमा
शंक्याह। विद्येति। वृत्तमनूद्योत्तरग्रंथमवतारयन्नूभूमिकामाह। तत्र चेति। स्थानत्रयसंबंधित्वेन विप्र
कीर्णं विशिष्टरूपं अस्यैत्यात्मा तथा पुंजीकृत्य विवक्षितं सर्वं विशेषणमादायेति यावत्। एकत्रेति वा
क्योक्तिः। तत्र हेतुं वदन् जाग्रद्वाक्ये न विवक्षितात्मोक्तिरित्याह। यस्मादिति। ससंगत्वाद्दृश्यमानरू
पस्य मिथ्यात्वं सूचयति अविद्ययेति। स्वप्नवाक्ये विवक्षितात्मसिद्धिमाशंक्याह। स्वप्ने त्विति। त
त्राप्यविद्यानिर्मोकोन प्रतिभातीति भावः। एवं
हि सुषुप्तिवाक्यं तत्सिद्धिरित्याह सुषुप्ते पुनरिति। तत्राप्यविद्यानिर्मोको न प्रतिभातीति भावः। एवं
अत्र च स्थानत्रयानुसंचारेण स्वयंज्योतिषः आत्मनः कार्यकरणसंघातव्यतिरिक्तस्य काम
कर्मभ्यो विविक्तता का स्वतो नायं संसारधर्मवानुपाधिनिमित्तमेव त्वस्य संसारित्वमवि
द्यारोपितमिति एष समुदायार्थ उक्तः। तत्र च जाग्रत्स्वप्नसुषुप्तस्थानानां त्रयाणां विप्रकीर्ण
रूप उक्तः न पुंजीकृत्यैकत्र प्रदर्शितो यस्माज्जागरिते ससंगः समृत्युः कार्यकरणसंघातरू
प उपलक्ष्यते अविद्यया॥ स्वप्ने तु कामसंयुक्तो मृत्युरूपविनिर्मुक्त उपलक्ष्यते। पुनर्बुद्धांतमा
गतो बुद्धांताद्य॥१८॥ सुषुप्ते पुनः संप्रसन्नोऽसंगो भवतीत्यसंगतापि दृश्यते। एकवाक्यत
यो पसंह्रियमाणं फलं नित्यमुक्तबुद्धशुद्धस्वभावतास्यनैकत्र पुंजीकृत्य प्रदर्शितेति तस्य
दर्शनाय कंडिका आरभ्यते। सुषुप्ते ह्येवंरूपतास्य वक्ष्यमाणा तद्वा अस्यैतदिति छंदा अपह
तपाप्मा अभयंरूपमिति यस्मादेवंरूपं भयाद्विलक्षणं सुषुप्ते प्रविविक्षति। तत्कथमित्याह। दृष्टांते
पातनिकां कृत्वान्वयेन वाक्यमादत्ते एकवाक्यतयेति। पूर्ववाक्यानामिति शेषः। कुत्र तर्हि यथोक्तमात्मरूपं
पुंजीकृत्य प्रदर्श्यते तत्राह सुषुप्ते हीति तत्राभयमित्यविद्याराहित्यमुच्यते सा च सुषुप्ते स्वरूपेण सत्यपि ना
भिव्यक्तास्तीति द्रष्टव्यं। यस्मात्सुषुप्ते यथोक्तमात्मरूपं वक्ष्यते तस्मादिति यावत्। एवंरूपमित्येतदेव प्रक
टयति विलक्षणमिति। कार्यकरणविनिर्मुक्तं कामकर्माविद्यारहितमित्यर्थः। स्वप्नान्तद्वयं हित्वा कथं सुषु
प्तं प्रवेष्टुमिच्छतीति पृच्छति तत्कथमिति। स्वप्नादौ दुःखानुभवात्तत्त्यागेन सुषुप्तं प्राप्नोतीत्याह हेति। अथो

नास्यार्थस्य प्रकटीभावो भवतीति॥
तराश्रुतिः स्वप्नान्तरप्राप्तिमभिधत्ते तथापि किं दृष्टान्तवचनेनेत्याशंक्याह दृष्टान्तेनेति।
अस्यार्थस्य सुषुप्तिप्राप्तिरूपस्यैक्येन तु॥ ॥७॥ ॥७॥ ॥

स एवार्थस्तत्रेति सम्बन्धार्थः। परमात्माकाशाद्व्यावर्तयितुं भौतिकविशेषणं महाकायो मंदवेगः श्येनः सु
पर्णस्तु वेगः वा नल्पविग्रह इति भेदः। धारणे सौकर्यं वक्तुं स्वयमेवेत्युक्तं। स्वप्नजागरितयोरवसानं मं
तमज्ञातं ब्रह्म तथा न कंचन स्वप्नमिति स्वप्नजागरितयोरविशेषेण सर्वदर्शनं निषिद्ध्यत इति शेषः स्वप्न

तत्र दृष्टान्त उपादीयते। तद्यथाऽस्मिन्नाकाशे भौतिके श्येनो वा सुपर्णो वा सुपर्णशब्देन क्षिप्रः श्ये
न उच्यते। यथाकाशेऽस्मिन्निहत्य विपरिपत्य श्रान्तो नानापरिपतनलक्षणेन कर्मणा परिखिन्नः से रि
हत्य पक्षौ संगमय्य संप्रसार्य पक्षौ सम्यग्लीयतेऽस्मिन्निति सल्लयो नीडो नीडायैव ध्रियते। स्वा
त्मनैव धार्यते स्वयमेव यथायं दृष्टान्त एवमेवायं पुरुषः एतस्मा एतस्मै अन्ताय धावति। अन्त

परि तद्यथास्मिन्नाकाशे श्येनो वा सुपर्णो वा विपत्य श्रान्तः संहत्य पक्षौ सल्लयायैव ध्रिय
त एवमेवायं पुरुष एतस्मा अन्ताय धावति यत्र सुप्तो न कंचन कामं कामयते न कंचन
स्वप्नं पश्यति॥१९॥

शब्दवाच्यस्य विशेषणं यत्राय अस्मिन्नन्ते सुप्तो न कंचन कंचिदपि कामं कामयते तथा न कंचन
स्वप्नं पश्यति न कंचन काममिति स्वप्नबुद्धान्तयोरविशेषेण सर्वः कामः प्रतिषिध्यते कंचनेत्य
विशेषिताभिधानात्। तथा न कंचन स्वप्नमिति। जागरितेऽपि यद्दर्शनं तदपि स्वप्नं मन्यते श्रु
तिरतश्चाह॥ न कंचन स्वप्नं पश्यतीति॥१९॥ ॥७॥ ॥

विशेषणात्स्वप्ने दर्शननिषेधेऽपि कुतो जाग्रद्दर्शनं निषिद्ध्यते तत्राह। जागरितेऽपीति। कथमयम
भिप्रायः श्रुतेरवगत इत्याशंक्य विशेषणसामर्थ्यादित्याह। तस्माहेति॥ ॥७॥ ॥

जागरितस्यापिस्वप्नत्वेश्रुत्यंतरंसंवादयतितथाचेति। दृष्टांतदार्ष्टांतिकयोर्विवक्षितमंशंदर्शयति।
यथेत्यादिना। संयुज्यमानस्यक्षेत्रज्ञस्येतिविशेषः। सर्वसंसारधर्मविलक्षणमितिविशेषणंव्याचष्टे।
सर्वेतिश्येनवाक्येनात्मनःसौषुप्तंरूपमुक्तंइदानींनाडीखंडस्यसंबंधंवक्तुंचोदयति। यद्यस्येति। प
रःसन्नुपाधिर्बुध्यादिः। असंभवतःस्वतोबुध्यादिसंबंधासंभवमुपेत्याहयन्निमित्तंचेति। सिद्धांता

तथाचश्रुत्यंतरंतस्यत्रयआवसथास्त्रयःस्वप्नाइति॥ यथाचदृष्टांतेपक्षिणःपरिपतनजश्रमा
पनुत्तयेस्वनीडोपसर्पणमेवंजाग्रत्स्वप्नयोःकार्यकरणसंयोगजक्रियाफलैःसंयुज्यमानस्य
पक्षिणःपरिपतनजइवश्रमोभवति। तच्छ्रमापनुत्तयेस्वात्मनोनीडमायतनेसर्वसंसारधर्मवि
लक्षणंसर्वक्रियाकारकफलायासशून्यंस्वमात्मानंप्रविशति। यद्यस्यायंस्वभावःसंसारध
र्मशून्यतापरोपाधिनिमित्तंचास्यसंसारधर्मित्वंयन्निमित्तंचास्यपरोपाधिकृतसंसारधर्मि

ता वा अस्यैता हिता नाम नाड्यः॥ ७॥

त्वं · · · साचाविद्या॥ तस्या अविद्यायाः। किंस्वाभावि
कत्वमाहोस्वित्कामकर्मादिवदागंतुकत्वं॥ यद्यागंतुकत्वंततोविमोक्षउपपद्यते। तस्याश्चागंतु
कत्वेकोपपत्तिःकथंवानात्मधर्मोविद्येतिसर्वानर्थबीजभूतायाःअविद्यायाःसतत्वावधारणार्थं ता
पराकंडिकाःरभ्यते। ता वा अस्यशिरःपाण्यादिलक्षणस्यपुरुषस्यैता हिता नाम नाड्यः॥ ॥

भिप्रायमनूद्यपूर्ववादीविकल्पयतितस्याइति। आगंतुकत्वमस्वाभाविकत्वमाद्येमोक्षानुपपत्तिंवि
वक्षित्वाहयद्विचेति। अस्तुतर्हिद्वितीयेमोक्षोपपत्तिरित्याशंक्याहतस्याश्चेति। माभूदविद्यात्मस्व
भावस्तद्धर्मस्तस्याद्धर्म्यंतराभावादित्याहकथंवेति। तत्रोत्तरत्वेनोत्तरग्रंथमुत्थापयतिसर्वानर्थेति॥ ३६

तासोपरमसूक्ष्मत्वं दृष्टांतेन दर्शयति यथेति। कथमन्नरसस्य वर्णविशेषप्राप्तिरित्याशंक्याह वातेति। भुक्तस्या
न्नस्य परिणामविशेषो वातबाहुल्येन नीलो भवति पित्ताधिके पिंगलो जायते श्लेष्मातिशये शुक्लो भवति पित्ताल्पत्वे
हरितः साम्ये च धातूनां लोहितः इति तेषां मिथः संयोगवैषम्यात् तत्साम्याच्च विचित्रा बहवश्चान्नरसा भवंति तत्
यथा केशाः सहस्रधा भिन्नास्तावत्परिमाणेनाणिम्ना एकत्वेन तिष्ठंति ताश्च शुक्लस्य रसस्य नीलस्य पिंगलस्य
हरितस्य लोहितस्य पूर्णा एतैः शुक्लत्वादिभी रसविशेषैः पूर्णा इत्यर्थः। एते च रसानां वर्णविशेषा वातपित्त
श्लेष्मणामितरेतरसंयोगवैषम्यविशेषाद्विचित्रा बहवश्च भवंति॥ तास्त्वेवंविधासु नाडीषु सूक्ष्मासु वालाग्र वि
सहस्रभेदपरिमाणासु शुक्लादिरसपूर्णासु सकलदेहव्यापिनीषु सप्तदशकं लिंगं वर्त्तते॥ तदाश्रिताः सर्वाः
वासना उच्चावचसंसारधर्मानुभवजनिताः॥ तल्लिंगं वासनाश्रयं सूक्ष्मत्वात् स्वच्छस्फटिकमणिकल्पं
नाडीगतरसोपाधिसंसर्गवशात् धर्माधर्मप्रेरितोद्भूतवृत्तिविशेषं स्त्रीरथहस्त्याद्याकारविशेषैर्वासना

यथा केशः सहस्रधा भिन्नस्तावताणिम्ना तिष्ठंति शुक्लस्य नीलस्य पिंगलस्य हरितस्य लोहितस्य
पूर्णा॥ अथ यत्रैनं घ्नंतीव जिनंतीव हस्तीव विच्छाययति गर्त्तमिव पतति यदेव जाग्रद्भयं पश्यति
तदत्राविद्यया मन्यते॥ ॥७॥ ॥

भिः प्रत्यवभासते॥ अथैवं सति यत्र यस्मिन्काले केचन शत्रवो
न्ये वा तस्करा मामागत्य घ्नंतीति मृषैव वासनानिमित्तः प्रत्ययोऽविद्याख्यो जायते॥ तदेतदुच्यते॥ एनं
व स्वप्नद्रष्टारं घ्नंतीवेति तथा जिनंतीव वशीकुर्वंतीव न केचन घ्नंति नापि वशीकुर्वंति केवलं तु विद्यावासनोद्भव
निमित्तभ्रांतिमात्रं तथा हस्तीवैनं विच्छाययति। विद्रावयति धावयतीत्यर्थः॥ गर्त्तमिव पतति गर्त्तं जीर्णकू वे
पादिकमिव पतंतमात्मानमुपलक्षयति॥ तावद्ध्यस्य मृषा वासनोद्भवति अत्यंतनिकृष्टाधर्मोद्भा
सितांतःकरणवृत्त्याश्रयात् दुःखरूपत्वात् किं बहुना यदेव जाग्रद्भयं पश्यति हस्त्यादिलक्षणं तदेव भयरूप
मत्रास्मिन्स्वप्नेऽपि तथैव हस्त्यादिरूपं भयमविद्यावासनया मृषैवोद्भूतया मन्यते॥ ॥७॥ ॥

यासानां नाडीनामपि तादृशो वर्णो जायते। अरुणाः शिरा वातवहा नीलाः पित्तवहाः शिराः असृग्वहास्तु रोहि
ण्यो गौर्यः श्लेष्मवहाः शिरा इति सुश्रुतदर्शनादित्यर्थः। नाडीस्वरूपं निरूप्यात्र जागरिते लिंगशरीरस्य वृत्तिं द न
र्शयति तास्विति एवंविधास्वित्यस्यैव विवरणं सूक्ष्मास्वित्यादि पंचभूतानि दशेंद्रियाणि प्राणांतःकरणमिति सप्तद
शकं जागरिते लिंगशरीरस्य स्थितिमुक्त्वा स्वप्ने तत्स्थितिमाह तल्लिंगमिति।

विवक्षितोस्वप्रस्थितिमुक्त्वाश्रुत्यक्षराणि योजयत्यथेत्यादिना। स्वप्नेधर्मादिनिमित्तवशान्मिथ्यैव खिंगंनानाकारमव
भासते तन्मिथ्याज्ञानेलिंगानुगतमूलाविद्याकार्यत्वादविद्येतिस्थितेसति। अथशब्दार्थमाह। एवंसतीति। तस्मिन्नुक्ता
लेस्वप्रदर्शनेविज्ञेयमितिशेषः। इवशब्दार्थमाहनेत्यादिना। उक्तोदाहरणेनसमुच्चित्योदाहरणान्तरमाह तथेतिगर्ता
दिपतनप्रतीतौहेतुमाहतादृशीहीति। तादृशत्वेविशदयत्युक्तेतियथोक्तवासनाप्रभवत्वे कथंगर्तपतनादरवगतमि
त्याशंक्याह दुःखेतियदेवेत्यादिश्रुतेरर्थमाहकिंबहुनेति। भयमित्यस्यभयरूपमिति व्याख्यानंभयंरूपयतेयेनत्का
रणंतथा। हस्त्यादिनास्तिचेत्कथंस्वप्नेभातीत्याशंक्याहाविद्येति॥ ॥७॥ ॥अथयत्रदेवइवेत्यादेस्तात्पर्यमाहाथेति।

अथपुनर्यत्रअविद्यापकृष्यमाणाविद्याचोत्कृष्यमाणा किंविषया किंलक्षणाचेत्युच्यते॥ अथपुनर्यत्रय
स्मिन्कालेदेवइवस्वयंभवतिदेवताविषयाविद्यायदोद्भूताजागरितकालेतदोद्भूतयावासनयादेवमिवात्मा
नंमन्यतेस्वप्नेपितदुच्यते। देवइवराजेवराज्यस्थोभिषिक्तःस्वप्नेपिराजाहमितिमन्यतेराजवासनावासितएव
मत्यंतप्रक्षीयमाणाऽविद्योद्भूताचविद्यायदासर्वात्मविषयातदास्वप्नेपितद्भावभावितोहमेवसर्वोस्मीतिमन्य

अथयत्रदेवइवराजेवाहमेवेदंसर्वोस्मीतिमन्यतेसोस्यपरमोलोकः॥२०॥ ॥७॥ ॥

तेसयःसर्वात्मभावःसोस्यात्मनःपरमोलोकःपरमश्चात्मभावःस्वाभाविकः॥ यत्तुसर्वात्मभावादर्वाग्बाला
ग्रमात्रमप्यन्यत्वेनदृश्यतेनाहमस्मीतितदवस्थाऽविद्यातयाऽविद्ययाप्रत्युपस्थापिताअनात्मभावालोकास्ते
ऽपरमाःस्थावरांतास्तान्संव्यवहारविषयानूलोकानपेक्ष्यायंसर्वात्मभावःसमस्तोनंतरोबाह्यःसोस्यपरमो

तत्रतस्याःफलमुच्यतइतिशेषः। तात्पर्योक्त्याअथशब्दार्थमुक्त्वाविद्यायाविषयस्वरूपेप्रश्नपूर्वकवदन्यत्रेत्या
देरर्थमाहकिंविषयेति। इवशब्दप्रयोगात्स्वप्नएवोक्तइतिशंकांवारयतिदेवतेति। विद्येत्युपास्तिरुक्ताअभिषिक्तो
राज्यस्थोनायदवस्थायामितिशेषः। अहमेवेदमित्याद्यवतारयत्येवमिति। यथाऽविद्यायामपकृष्यमाणायांकार्य
मुक्तंतद्वदित्यर्थः। यदेतिजागरितोक्तिः इदंचैतन्यमहमेवचिन्मात्रेनतुमदतिरेकेणास्तितस्मादहंसर्वःपूर्णोस्मी
तिजानातीत्यर्थः। सर्वात्मभावस्यपरमत्वमुपपादयतियत्रेत्यादिना तत्रतेनाकारेणविद्यावस्थितेत्याह। तद
वस्थेति। तस्याःकार्यमाहतयेति। समस्तत्वंपूर्णत्वमनंतरत्वमेकरसत्वमबाह्यत्वंप्रत्यक्त्वंयोयं यथो
क्तोलोकःसोस्यात्मनोलोकानूपूर्वोक्तानपेक्ष्यपरमइतिसंबंधः॥ ॥७॥ ॥७॥ ॥

वाक्यार्थमुपसंहरति। तस्मादिति। मोक्षो विद्याफलमित्युक्तं तत्र संबंधः। तस्य प्रत्यक्षत्वं दर्शयंस्तेन स्पष्टयति यथेति। विद्याफलवदविद्याफलमपि स्वप्ने प्रत्यक्षमित्युक्तमनुवदति। तथेति विद्याफलमविद्याफलं चेत्युक्तमुपसंहरति तेन एतेइति। उक्तं फलद्वयं विभजते विद्ययेति असर्वो भवतीत्येतत्प्रकटयति अन्यत इति। प्रविभागफलमाह। यत इति। विरोधफलं कथयति। विरुद्धत्वादिति। अविद्याकार्यं निगमयति असर्वेति। अविद्यायाश्चेत्सपरिच्छिन्नफ

तस्मादपकृष्यमाणायामविद्यायां विद्यायां च काष्ठां गतायां सर्वात्मभावो मोक्षो यथा स्वयंज्योतिष्ट्वं स्व =
रिवोऽस्याप्रकाशयोः तस्मात्तस्य मोक्ष उपपद्यते ॥
प्ने प्रत्यक्षत उपलभ्यते। तद्वद्विद्याफलमुपलभ्यत इत्यर्थः। तथाऽविद्यायामप्युत्कृष्यमाणायां तिरोधी
यमानायां च विद्यायामविद्यायाः फलं प्रत्यक्षत उपलभ्यते अथ यत्रैनं घ्नंतीव जिनंतीवेति ते एते वि
द्याविद्याकार्ये सर्वात्मभावः परिच्छिन्नात्मभावश्च विद्ययाऽभ्युदयात् सर्वात्मा भवत्यविद्यया चासर्वो
भवत्यन्यतः कुतश्चित् प्रविभक्तो भवति यतो विभक्तो भवति   ते न विरुध्यते विरुद्धत्वाद्धन्यते
जीयते विच्छिद्यते वाऽसर्वविषयत्वे च भिन्नत्वादेतद्भवति॥ समस्तस्तु सन्कुतो भिद्यते येन विरुध्ये
त विरोधाभावे केन हन्यते जीयते विच्छिद्यते च॥ अतोऽविद्यायाः सतत्त्वमुक्तं भवति सर्वात्मानं संत
मसर्वात्मत्वेन ग्राहयति आत्मनोऽन्यद्वस्त्वंतरमविद्यमानं प्रत्युपस्थापयत्यात्मानमसर्वविदमापा
दयति ततस्तद्विषयः कामो भवति यतो भिद्यते कामतः क्रियामुपादत्ते ततः फलं एतदुक्तं भवति वक्ष्य
माणं च यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्यादि। इदमविद्यायाः सतत्त्वं सह कार्येण प्रदर्शि
तं विद्यायाश्च कार्यं सर्वात्मभावः प्रदर्शितोऽविद्याया विपर्ययेण सा चाविद्या नात्मनः स्वाभाविको ध
र्मो यस्माद्विद्यायामुत्कृष्यमाणायां स्वयमपचीयमाना सती काष्ठां गतायां विद्यायां परिनिष्ठिते सर्वा
त्मभावे सर्वात्मना निवर्तते रज्ज्वामिव सर्पज्ञानं रज्जुनिश्चये तच्चोक्तं यत्र त्वस्य सर्वमात्मैवाभूत्तत्के
न कं पश्येदित्यादि। तस्मान्नात्मधर्मोऽविद्या न हि स्वाभाविकस्योच्छित्तिः कदाचिदुपपद्यते सवितु

रुष्णत्वं तदा तस्य भिन्नत्वादेव यथोक्तं विरोधादिदुर्वारमित्यर्थः। विद्याफलं निगमयति समस्तस्त्विति॥ नन्ववि
द्यायाः सतत्त्वं निरूपयितुमारब्धं न च तदद्यापि दर्शितं तथा च किं कृतं स्यादत आह। अत इति॥ कार्यवशादि
तियावत्। इदं शब्दार्थमेव स्फुटयति सर्वात्मानमिति। ग्राहकत्वमेव व्यनक्त्यात्मन इति। वस्त्वंतरोपस्थि

तिफलमाह।ततइति।कामस्यकार्यमाहततइतिक्रियातःफलंलभतेतद्भोगकालेचरागादिनाक्रिया
मादधातीत्यविछिन्नःसंसारस्तद्यावत्सम्यक्ज्ञानंतावन्मिथ्याज्ञाननिदानमविद्यादुर्वारेत्याहतत
इति।भेददर्शननिदानमविद्येति।अविद्यासूत्रेवृत्तमित्याहतदेतदिति।तत्रैववाक्यशेषमनुकूलय
तिवक्ष्यमाणंचेति।अविद्यात्मनःस्वभावोनवेतिविचारेकिंनिर्णीतंभवतीत्याशंक्यवृत्तंकीर्तय
तीदमिति।अविद्यायाःपरिछिन्नफलत्वमस्तिनतोवैपरीत्येनविद्यायाःकार्यमुक्तंसचसर्वात्मभा
वोदर्शितइतियोजना।संप्रतिनिर्णीतमर्थंदर्शयतिसाचेतिज्ञानेसत्यविद्यानिवृत्तिरित्यत्रवाक्यशे
षंप्रमाणयतितच्चेति।अविद्यानात्मनःस्वभावोनिवर्त्यत्वाद्रज्जुसर्पवदित्याह।तस्मादिति।निव
र्त्यत्वेप्यात्मस्वभावत्वेकाहानिरित्याशंक्याह।नहीति।अविद्यायाःस्वाभाविकत्वाभावेफलि
तमाहतस्मादिति॥ ॥७॥ ॥ ॥७॥ ॥७॥ ॥७॥ ॥

तद्वाअस्यैतदित्यनंतरवाक्यतात्पर्यमाहेदानीमिति।विद्याविद्ययोस्तत्फलयोश्चप्रदर्शनानंतरमिति
यावत्।मोक्षमेवविशिनष्टियत्रेति।पदद्वयस्यान्वयंदर्शयन्विवक्षितमर्थमाहतदेतदिति।यत्रेत्यंतत्रा
ब्दितंब्रह्मोच्यतेव्याख्यातंपदद्वयमनूद्यवैशब्दस्यप्रसिद्धार्थत्वं मन्वानोरूपशब्देनषष्ठ्याःसं
बंधंदर्शयतितदिति।अतिछंदमितिप्रयोगेहेतुमाहरूपपरत्वादिति।कथमतिछंदमित्यात्मरूपंविव
क्ष्यतेतत्राहछंदइति।छंदःशब्दस्यगायत्र्यादिछंदोविषयस्यकथंकामविषयत्वमित्याशंक्याहान्यो

इदानींयोसौसर्वभावोमोक्षोविद्याफलंक्रियाकारकफलशून्यंसप्रत्यक्षतोनिर्दिश्यते।यत्रावि
द्याकामकर्माणिनसंति॥तदेतत्प्रस्तुतंयत्रसुप्तोनकंचनकामंकामयतेनकंचनस्वप्नंपश्यतीति
॥२०॥तदेतद्वैअस्यरूपंयःसर्वात्मभावःसोस्यपरमोलोकइत्युक्तःतदतिछंदाअतिछंदमित्यर्थःरू
पपरत्वात्छंदःकामोऽतिगतःछंदोऽस्मिन्रूपेतदतिछंदंरूपमन्योसौसांतःछंदःशब्दोगायत्र्या

तद्वाअस्यैतदतिछंदा॥

दिछंदोवाचीअयंतुकामवचनोतःस्वरांतएवतथाथतिछंदाइतिपाठःस्वाध्यायधर्मोद्रष्टव्योऽस्ति
चलोकेकामवचनेप्रयुक्तःछंदःशब्दःस्वछंदःपरछंदइत्यादावतोतिछंदमित्येवमुपनेयंकामव
र्जितमेतद्रूपमित्यस्मिन्नर्थे॥ ॥७॥ ॥

साविति।गायत्र्यादिविषयत्वंत्यक्त्वाछंदःशब्दस्यकामविषयत्वमतःशब्दार्थःयद्यात्मरूपंकामव
र्जितंइत्येतदत्रविवक्षितंकिमितितर्हिदैर्घ्यंप्रयुज्यतेतत्राहतथापीति।स्वाध्यायधर्मत्वंछांदसत्वंव
द्व्यवहारमंतरेणकामवाचित्वंछंदःशब्दस्यकथमित्याशंक्याहास्तिचेति।तस्यकामवचनत्वेसति
सिद्धंपदरूपमनूद्यतस्यार्थमुपसंहरत्यतइति॥ ॥७॥ ॥७॥ ॥७॥

तथाकामवर्जितत्ववदित्येतत्। नन्वत्राधर्मवर्जितत्वमेव प्रतीयते न धर्मवर्जितत्वं पाप्मशब्दस्याधर्ममात्र
वचनत्वादत आह पाप्मशब्देनेति। उपक्रमानुसारेण पाप्मशब्दस्योभयविषयत्वे विशेषणमनूद्य विवक्षि
तमर्थं कथयत्यपहतेति। तर्हि कार्यमेवाविद्याया निषिद्धं तेनेत्याह तत्कार्येति। तस्मादर्थे तच्छब्दः वाक्यार्थमु
पसंहरति यदेतदिति। कूर्चब्राह्मणे तेपीदं रूपमुक्तमित्याह इदं चेति। आगमवशात्तत्रोक्तं चेत् किमित्यत्र
तथाऽपहतपाप्मा पाप्मशब्देन धर्माधर्मावुच्येते पाप्मभिः संसृज्यते पाप्मनो विजहातीत्युक्तत्वात्॥
अपहतपाप्मा धर्माधर्मवर्जितमित्येतत्। किंचाभयं भयं हि नामाविद्याकार्यमविद्ययाभयं मन्य
कारण तरतीत्युक्तं॥ तत्कार्यद्वारेण प्रतिषेधोऽयमभयं रूपमिति अविद्यावर्जितमित्येतत्॥ यदेतद्विद्याफ
लं सर्वात्मभावस्तदेतदिति छंदोऽपहतपाप्माभयं रूपं सर्वसंसारधर्मवर्जितमतोऽभयं रूपमेतदिदं च पू
र्वमेवोपन्यस्तमतीतानंतरब्राह्मणसमाप्तावभयं वै जनक प्राप्तोसीति आगमतः॥ इह तु तर्कतः प्रपंचिते

अपहतपाप्माभयं रूपं॥

दर्शितागमार्थप्रत्ययदार्ढ्याय अयमात्मा स्वयं चैतन्यज्योतिःस्वभावः सर्वं स्वेन चैतन्यज्योतिषावभा
सयति। स यत्तत्र किंचित्पश्यति रमते चरति जानाति चेत्युक्तं। अतः स्थितं चैतन्यात्मनो नित्यस्वरू
न पचैतन्यज्योतिष्ट्वमात्मनः। स यद्यात्मात्राविष्टः सुषुप्तावस्थायां स्वेनैव रूपेण वर्तते कस्मादयमहम
स्मीत्यात्मानं वा बहिर्वेमानि भूतानीति जाग्रत्स्वप्नयोरिव न जानातीति॥ ॥छ॥ ॥

पुनरुच्यते तत्राहेहत्विति। सविशेषत्वं चेदात्मत्वानुपपत्तिरित्यादिस्तर्कः। आगमसिद्धे किं तर्कोपन्यासे
नेत्याशंक्याह दर्शितेति। स्त्रीवाक्यस्य संगतिं वक्तुं वृत्तमनुद्रवत्ययमिति। अनन्वागतवाक्ये चात्मनश्चै
तन्यत्वमुक्तमित्याह स यदिति। आत्मनः सदा चैतन्यज्योतिष्ट्वस्वरूपेण केवलमुक्तादागमादेव सिद्धं किं
तु पूर्वोक्तादनुमानाच्चावस्थितमित्याह न्योंतरति। वृत्तमनूद्य संबंधं वक्तुकामश्चोदयति स यदीति॥

अत्रेति सुषुप्तिरुक्ता चैतन्यस्वभावस्यैव सुषुप्ते विशेषविज्ञानाभावं साधयति अथ्यत इति। सुषुप्तिः
सप्तम्यर्थः। अज्ञानं विशेषज्ञानाभावः कोसावज्ञानहेतुस्तमाह एकत्वमिति। जीवस्य परेणात्मनाय देक
त्वं तत्कथं सुषुप्ते विशेषज्ञानाभावे कारणं तस्मिन् सत्यपि चैतन्यस्वभावानिवृत्तेरिति शंकते। ननु कथमि
ति। ततः स्त्रीवाक्यमुत्तरत्वेनोत्थापयति अथ्यत इति। तत्र दृष्टांतभागमादत्ते दृष्टांतेनेति। एकत्वकृतो विशे
षज्ञानाभावो विवक्षितोर्थः। परिष्वंगप्रयुक्तसुखाभिनिवेशादज्ञानं किमिति कल्प्यते स्वाभाविकमेवत
त्किं न स्यादित्याशंक्याह अपरिष्वक्तस्त्विति तर्हि परिष्वंगवतोपि स्वभावविपरिलोपासंभवाद्विशेष
अत्रोच्यते भ्रएवत्राज्ञानहेतुमेकत्वमेवाज्ञानहेतुः तत्कथमित्युच्यते॥ दृष्टांतेन हि प्रत्यक्षीभवतीति विव
क्षितोर्थ इत्याह। तत्तत्र यथा लोके प्रियये ष्टया स्त्रिया संपरिष्वक्तः सम्यक्परिष्वक्तः कामयंत्याका
मुकः स बाह्यमात्मनः किंचन किंचिदपि न वेद मत्तोन्यद्वस्त्विति न चांतरमयमहमस्मि सुखी दुःखी
चेति॥ अपरिष्वक्तस्तु तया प्रविभक्तो जानाति सर्वमेव बाह्यमांतरं च परिष्वंगोत्तरकालं त्वेकत्वाप

तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किंचन वेद नांतरमेवमेवायं पुरुषः प्राज्ञेना
त्मना संपरिष्वक्तो न बाह्यं किंचन वेद नांतरं॥ ॥७॥ ॥७॥ ॥

त्तेर्न जानाति॥ एवमेव यथा दृष्टांतोयं पुरुषः क्षेत्रज्ञो भूतमात्रासंसर्गतः सैंधवखिल्यवत्प्रविभ
क्तो जलादौ चंद्रादिप्रतिबिंबवत्कार्यकरण इह प्रविष्टः सोयं पुरुषः प्राज्ञेन परमार्थस्वाभाविकेन
स्वेनात्मना परेण ज्योतिषा संपरिष्वक्तः एकीभूतोऽनिंतरः सर्वात्मा न बाह्यं किंचन वस्त्वंतरं नाप्यां
तरमात्मन्ययमहमस्मि सुखी दुःखी चेति वेद॥ ॥७॥ विज्ञाने स्यादिति चेन्नेत्याह परिष्वंगेति।
स्त्रीपुंलक्षणयोर्व्यामिश्रत्वं परिष्वंगस्तदुत्तरकालं संभोगफलप्राप्तिरेकत्वापत्तिस्तद्वशाद्विशेषाज्ञा
नमित्यर्थः। दार्ष्टांतिकं व्याकरोत्येवमेवेति। भूतमात्राः शरीरेंद्रियलक्षणास्ताभिर्भिदात्मनस्तादा
त्म्याध्यासात्तत्प्रतिबिंबो जातस्ततो विभक्तवज्जाती त्यत्र दृष्टांतमाह। सैंधवेति। तस्य देहादौ प्रवेशं
दृष्टांतेन दर्शयति। जलादाविति। उपसर्गबललब्धमर्थं कथयत्येकीभूत इति। तादात्म्यं व्यावर्तयितुं
निरंतर इत्युक्तपरमात्मात्माभेदप्रयुक्तमनवच्छिन्नत्वमाह। सर्वात्मेति॥ ॥७॥ ॥

 एवं स्त्रीवाक्याक्षराणि व्याख्याय चोद्यपरिहारं प्रकटयति तत्रेति। प्रत्यगात्मनीति यावत्। इहेति सुषुप्ति
रुच्यते। यथा परिष्वक्तयोः स्त्रीपुंसयोरेकत्वं पुंसो विशेषविज्ञानाभावे कारणं तथा परेणात्मना सुषुप्ते जी
वस्यैकत्वं विशेषविज्ञानाभावे तस्य तत्र कारणमुक्तमित्यर्थः स्त्रीवाक्यश्रौतमर्थमभिधायार्थिकमर्थ
माह तत्रेति। किं पुनर्नानात्वे कारणमिति तदाह नानात्वे चेति उक्तमथयोन्यामित्यादावित्यर्थः॥ किमे

तत्रैतन्यज्योतिःस्वभावत्वे कस्मादिह न जानातीति यदप्राक्षीस्तत्रायं हेतुर्मयोक्तः एकत्वं॥ यथा स्त्री
पुंसयोः परिष्वक्तयोस्तत्रार्थान्नानात्वं विशेषविज्ञानहेतुरित्युक्तं भवति नानात्वे च कारणमात्मनो
वस्त्वंतरप्रत्युपस्थापिकाविद्येत्युक्तं। तत्र चाविद्यायाः यदा प्रविविक्तो भवति तदा सर्वेणैकत्वमेवा
स्य भवति॥ ततश्च ज्ञानज्ञेयादिकारकविभागेऽसति कुतो विशेषविज्ञानप्रादुर्भावः कामो वा संभव

तद्वा अस्यैतदाप्तकामं

ति स्वाभाविके स्वरूपस्य आत्मज्योतिषि। यस्मादेवं सर्वैकत्वमेवास्य रूपमतस्तद्वै अस्यात्मनः
स्वयंज्योतिःस्वभावस्यैतद्रूपमाप्तकामं यस्मात्समस्तमेतत्तस्मादाप्ताः कामा अस्मिन्रूपे तदि
दमाप्तकामं यस्य ह्यन्यत्वेन प्रविभक्तः कामस्तदनात्मकामं भवति॥ यथा जागरितावस्थायां दे
वदत्तादिरूपेण त्विदं तथा कुतश्चित्प्रविभज्यते॥ ततस्तदाप्तकामं भवति॥ ॥७॥ ॥

तावता सुषुप्ते विशेषविज्ञानाभावस्यायाते तत्राह तत्रेति। विशेषविज्ञाने नानात्वे तत्र चाविद्या कारणमि
ति स्थिते सतीति यावत्। यदा तदेति सुषुप्तिर्विवक्षिता प्रविभक्तत्वे कार्यकरणाविद्याविरहितत्वे सर्वेणप्र
र्णेन परमात्मना सहेत्यर्थः। विज्ञानात्मा षष्ठ्योच्यते एकत्वफलमाह ततश्चेति। उक्तमुपजीव्याप्तकाम
वाक्यमवतार्य व्याचष्टे यस्मादिति। आप्तकामत्वं समर्थयते यस्मात्समस्तमिति तदेव व्यतिरेकमुखे
न विशदयति यस्य हीत्यादिना॥ ॥७॥ ॥

विशेषणांतरमाकांक्षापूर्वकमादाय व्याचष्टे किमन्यस्मादित्यादिना सुषुप्तेरन्यत्रात्मनः सकाशादन्यत्वेन
प्रविभक्ता इव काम्यमानाः सुषुप्तावात्मैव कामस्तस्मादात्मकाममात्मैमित्येतद्दृष्टांतेनाह यथेति। अव रूप
स्थाद्वये खल्वात्मनः सकाशादन्यत्वेन प्रविभक्ता इव कामाः काम्यंते इति कामान चैवं सुषुप्त्यवस्थायामात्म
किमन्यस्माद्वस्त्वंतरात्प्रविभज्यत आहोस्विदात्मैव तद्वस्त्वंतरमत आह नान्यद्वस्त्वात्मनः कथं यत आ
त्मकाममात्मैव कामो ऽस्मिन्रूपे यत्र प्रविभक्ता इवान्यत्वेन काम्यमाना यथा जाग्रत्स्वप्नयोस्तस्यात्मैवै
त्म न्यत्वप्रत्युपस्थापकहेतोरविद्याया अभावादाकामम् अत एवाकाममेतद्रूपं काम्यविषयाभावादतः शो
कांतरं शोकशून्यमित्येतच्छोकमध्यमिति वा सर्वथाप्यशोकमेतद्रूपं शोकवर्जितमित्यर्थः॥२१॥ चै
तन्यस्वभावत्वे सत्यप्येकीभावान्न जानाति स्त्रीपुंसयोरिव संपरिष्वक्तयोरित्युक्तं। तत्र प्रासंगिक
मेतदुक्तं कामकर्मादिवत्स्वयंज्योतिष्ट्वमप्यस्यात्मनो न स्वभावो यस्मात्संप्रसादे नोपलभ्यत इत्या

रूपं आत्मकाममकामं शोकांतरं॥२१॥ अत्र पिता पिता भवति॥ ॥७॥ ॥

शंकायां प्राप्तायां तन्निराकरणाय एवं स्त्रीपुंसयोर्दृष्टांतोपादानेन विद्यमानस्यैव स्वयंज्योतिष्ट्व
स्य सुषुप्ते ऽग्रहणमेकीभावाद्धेतोर्न तु कामकर्मादिवदागंतुकमित्येतत्प्रासंगिकमभिधाय य
त्प्रकृतं तदेवानुप्रवर्तयति। अत्र चैतत्प्रकृतमविद्याकामकर्मभिर्विनिर्मुक्तमेव तद्रूपं यत्सुषु
प्त आत्मनो गृह्यते प्रत्यक्षत इति। न द्वैतद्यथाभूतमेवाभिहितं सर्वसंबंधातीतमेतद्रूपमिति य
स्मादत्रास्मिन्सुषुप्तस्थाने तिच्छंदापहतपाप्माभयमेतद्रूपं तस्मादत्र पिता जनकस्तस्य च जन
यितृत्वात्पितृत्वं पुत्रं प्रति तत्कर्मनिमित्तं तेन च कर्मणायमसंबद्धो ऽस्मिन्काले तस्मात्पिता
पुत्रसंबंधनिमित्तस्य कर्मणो विनिर्मुक्तत्वात्पिता अपि पिता भवति तथा पुत्रोपि पितुरपुत्रो भव
नस्तेभिधीयते किंतु सुषुप्तस्यात्मैव काम इत्यात्मकामस्तद्रूपमित्यर्थः। तस्यात्मैवेत्यत्र हेतुमाहान्यत्वे
ति। यद्यपि सुषुप्ते विद्या विद्यते तथापि न साभिव्यक्तास्तीत्यनर्थपरिहारोपपत्तिरित्यर्थः। कामानामात्मा
श्रयत्वपक्षं प्रतिक्षेप्तुं तृतीयं विशेषणं शोकमध्यं शोकस्यांतरं प्रत्यक्भूतमिति यावत्। तर्हि शोकव
त्वं प्राप्तमित्याह सर्वथेति। पक्षद्वयेपि शोकशून्यमात्मरूपं न हि शोको येनात्मवांस्तस्य शोकवत्त्वं शोक

स्यात्माधीनसत्तास्फूर्तेरात्मातिरेकेणाभावादित्यर्थः। अत्र पितेत्यादिवाक्यमवतारयितुं वृत्तमनुद्रवति प्रक
तस्तेति। अविद्यादिनिर्मोकहेतुद्वयमाहासंगत्वादिति। यद्यपि नागंतुकत्वमविद्याया युक्तं तथापि अभिव्यक्त्यास्वा
नर्थहेतुरागंतुकीति द्रष्टव्या। स्त्रीवाक्यनिरस्यां शंकामनुवदति तत्रेति। कामादिविमोके दर्शिते सतीति यावत्।
स्वभावस्यापायो न संभवतीत्यभिप्रेत्य हेतुमाह यस्मादिति। शंकोत्तरत्वेन स्त्रीवाक्यमवतार्य तत्तात्पर्यं पूर्वोक्त
मनुकीर्तयत्येवमिति। वृत्तमनूद्योत्तरग्रंथमुत्थापयति। इत्येनदिति। स्वयंज्योतिष्ट्वस्य स्वाभाविकत्वमे
तच्छब्दार्थः। प्रासंगिकं कामादेरागंतुकत्वोक्तिप्रसंगादागतमिति यावत्। प्रकृतमेव दर्शयत्यत्रेति।
अतिच्छंदादिवाक्यं सप्तम्यर्थः। प्रत्यक्षतः स्वरूपचैतन्यवशाद्यथोक्तात्मस्वरूपस्य सुषुप्ते गृह्यमाण
त्वमुत्थितस्य परामर्शादवधेयं। कामादिसंबंधवदात्मनस्तद्रहितमपि रूपं कल्पितमेवेत्याशंक्या
हा वदेतदिति। प्रकृतमर्थमुक्त्वोत्तरवाक्यस्य सप्तम्यर्थमाहैतस्मिन्निति। जनको यं पिता भवतीति
संबंधः। पिताथत्रापिता भवतीत्येतदुपपादयति तस्येत्यादिना। यथास्मिन्काले पिता पुत्र
स्यापिता भवति तद्वदित्याह तथेति। नास्यार्थस्य प्रतिपादकः शब्दोस्तीत्याशंक्याह सामर्थ्यादि
ति॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

नदेवसामर्थ्यं दर्शयतितउभयोरिति।सुषुप्सेकामातिक्रमेप्रमाणमाह।पहर्त्तेतिपुनर्लौकिकदेवशब्दावनुवा
दार्थौवाक्यांतरमादायव्याचष्टेवथेत्यादिना।साध्यसाधनसंबंधाभिधायकाब्राह्मणलक्षणाइतिशेषः।अभि
धायकत्वेनप्रमाणत्वेनप्रमेयत्वेनचेत्यर्थः॥अत्रस्तेनोस्तेनोभवतीत्यादेस्तात्पर्यमाहनकेवलमिति।स्तेनशब्दोत्र
उभयोर्हिसंबंधनिमित्तंकर्मतदयमतिक्रांतोवर्त्ततेअपहतपाप्मेतिफक्कं॥तथामाताअमातालोकाः
कर्मणाजेतव्याजिताश्चतत्कर्मसंबंधाभावाल्लोकाअलोकास्तथादेवाःकर्मांगभूतास्तत्कर्मसंबंधाभ
याद्देवाअदेवास्तथावेदाःसाध्यसाधनसंबंधविधायकाःमंत्रब्राह्मणलक्षणाश्चाभिधायकत्वेनकर्मां
गभूताःअधीताअध्येतव्याश्चकर्मनिमित्तमेवसंबध्यतेपुरुषेणतत्कर्मातिक्रमणादेतस्मिन्का
लेवेदाअथवेदाःसंबध्यंते॥नकेवलंशुभकर्मबंधातीतःकिंतर्ह्यशुभैरथत्यंतघोरैःकर्मभिरसं
माताँमातालोकाअलोकादेवाअदेवावेदाअवेदा अत्रस्तेनोंस्तेनोभवतिभ्रूणहाभ्रूण
हाचांडालोचांडालःपौल्कसोपौल्कसः॥ ॥७॥ ॥ बद्धएवायंवर्त्ततइत्येतमर्थमाह।अत्रस्ते
नोब्राह्मणसुवर्णहर्त्ताभ्रूणहसहपाठादवगम्यतेसतेनघोरेणकर्मणातस्मिन्कालेविनिर्मुक्तो
भवति॥येनायंकर्मणामहापातकीस्तेनउच्यते॥तथाभ्रूणहाअभ्रूणहा॥तथाचांडालोनकेव
लंप्रत्युत्पन्नेनैवकर्मणाविनिर्मुक्तःकिंतर्हिसहजेनात्यंतनिकृष्टजातिप्रापकेणापिविनि
र्मुक्तएवायंचांडालोनामशूद्रेणब्राह्मण्यामुत्पन्नश्चंडालएवचांडालःसजातिनिमित्तेनकर्मणा
असंबद्धत्वादचांडालोभवति॥पौल्कसःपुल्कसएवायंपौल्कसः॥शूद्रेणैवक्षत्रियायामुत्पन्नः
सोथपुल्कसोभवति॥ ॥१॥ ॥ चोरमात्रेभातिकथंविशेषणमित्याशंक्याहभ्रूणहेति।भ्रूण
हाचवरिष्ठब्रह्महंतोच्यतेतदेवघोरंकर्मविशिनष्टियेनेति।महत्पातकमस्येतिव्युत्पत्त्यामहापातकी
स्तेनःस्तेनादिवाक्यंनचंडालादिवाक्यस्यगतार्थत्वमाशंक्याहनेत्यादिनाप्रत्युत्पन्नमागंतुकंब्राह्मण्यां
क्षत्रियात्सूतोवैश्याद्वैदेहिकस्तथाशूद्रजातस्तुचंडालःसर्वधर्मबहिष्कृतइतिस्मृतिमाश्रित्याहचंडा
लोनामेति।जातोनिषादाच्छूद्रायांजात्याभवतिपुल्कसइतिस्मृतेःशूद्रायांब्राह्मणाज्जातोनिषादःस
:।

श्रमणादिवाक्यस्य तात्पर्यमाह। तथेति। तथा चंडालवदिति यावत्। परिव्राट्तापसयोरेव ग्रहणे तत्कर्म्मायोगे
पि सौषुप्तस्य वर्णाश्रमांतरकर्मयोगं शंकित्वाह सर्वेषामिति॥ आदिशब्देन वयोवस्थादि गृह्यते सौषुप्ते पुरुषे
प्रकृते कथमनन्वागतमिति नपुंसकप्रयोगस्तत्राह रूपपरत्वादिति। तत्परत्वे हेतुमनुषंगं दर्शयति अभयमिति। हेतु
वाक्यमाकांक्षापूर्वकमुत्थाप्य व्याचष्टे किंपुनरित्यादिना। यस्मा इति छेदः दिवाक्योक्तस्वभावोयमात्मा सुषुप्ति
तथा श्रमलक्षणेन स्वकर्मभिरसंबद्धो भवतीत्युच्यते। श्रमणः परिव्राट् यत्कर्मनिमित्तो भवति स तेन वि
निर्मुक्तत्वादश्रमणं तथा तापसो वानप्रस्थोऽतापसः सर्वेषां वर्णाश्रमादीनामुपलक्षणार्थमुभयोर्ग्रह
णं किंबहुनानन्वागतेनानन्वागतमसंबद्धमित्येतत्पुण्येन शास्त्रविहितेन कर्मणा तथा पापेन विहि
ताकरणप्रतिषिद्धक्रियालक्षणेन रूपपरत्वान्नपुंसकलिंगमभयं रूपमिति ह्यनुवर्त्तते। किंपुनरसं
बद्धत्वे कारणमिति तद्धेतुरुच्यते॥ तीर्णोतिक्रांतो हि यस्मादेवं रूपः तदा तस्मिन्काले सर्वान् शोकं

श्रमणोऽश्रमणस्तापसोऽतापसोऽनन्वागतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वाञ्छोकान्॥

न् शोकाः कामाः दृष्टविषयप्रार्थना हि तद्विषयवियोगे शोकत्वमापद्यंते इष्टं हि विषयमप्राप्तं वि
प्रयुक्तं चोद्दिश्य चिंतयानस्तद्गुणानुस्मरन् तप्यते पुरुषोऽतः शोकोऽरतिः काम इति पर्यायाः यस्मात्सर्व
कामातीतो ह्यत्रायं भवति न कंचन कामं कामयते निछंदा इति श्रुतेः तस्मात्क्रियापतितायं शोकश
ब्दः कामवचन एव भवितुमर्हति कामश्च कर्महेतुर्वक्ष्यति हि स यथाकामो भवति तत्क्रतुर्भवति
यत्क्रतुर्भवति तत्कर्म कुरुत इति। अतः सर्वकामातीर्णत्वात्तदुक्तमनन्वागतं पुण्येनेत्यादि
काले हृदयनिष्ठान्सर्वान्शोकानतिक्रामति तस्मादेतदात्मरूपं पुण्यपापाभ्यामनन्वागतं युक्तमित्य
र्थः। शोकशब्दस्य कामविषयत्वं साधयति इष्टेति कथं तस्याः शोकत्वापत्तिरित्याशंक्याह इष्टं हीति। तेषां प
र्यायत्वेपि प्रकृते किमायातं तदाह यस्मादिति। अत्रेति सुषुप्तिरुच्यते अतः सर्वकामातितीर्णत्वादि
त्युत्तरत्र संबंधः। न केवलं शोकस्यैव शब्दे कामविषयत्वमुपपन्नमेव किंतु सन्निधेरपि सिद्धमित्या
ह। न कंचनेति। शोकशब्दस्य कामविषयत्वेपि तदत्ययमात्रात्कथं कर्मात्ययः स्यादित्याशंक्याह का
मश्चेति। तत्र वाक्यशेषं प्रमाणयति वक्ष्यति हीति। कामस्य कर्महेतुत्वे सिद्धे फलितमाह अत इति॥ ॥

हृदयस्यशोकानतिक्रामतीत्यत्रहृदयशब्दार्थमाहहृदयमितीति।मांसपिंडविशेषविषयंहृदयपदंकथंबुद्धिमाहे
त्याशंक्याहतात्स्थ्यादिति।यथामंचाःक्रोशंतीतिमंचक्रोशनमुच्यमानेमंचस्थान्पुरुषानुपचारादाहतथाहृदय
स्थत्वाद्बुद्धेरुपचाराद्बुद्धिंहृदयशब्दादर्शयतीत्यर्थः।हृदयशब्दार्थमुक्त्वातस्यसंबंधंदर्शयति।हृदयस्येति।तानति
हृदयस्य हृदयमितिपुंडरीकाकारोमांसपिंडःतत्स्थमंतःकरणंबुद्धिर्हृदयमित्युच्यते।तात्स्थ्यात्मंचाक्रोशनवत्
हृदयस्यबुद्धेर्यशोकाबुद्धिसंश्रयाहितेकामःसंकल्पोविचिकित्सेत्यादि।सर्वंमन एवेत्युक्तत्वाद्ध स्यति
चकामायेस्यहृदिश्रिताइति।आत्मसंश्रयभ्रांत्यपनोदाययदीदंवचनेहृदिश्रिताहृदयस्यशोकाइतिचहृद
यकरणसंबंधातीतश्चायमस्मिन्कालेऽतिक्रामतिमृत्योरूपाणीतिचोक्तं।हृदयकरणसंबंधातीतत्वात्तत्सं
श्रयकामसंबंधातीतोभवतीइतियुक्ततरंवचः।येतुवादिनःहृदिश्रिताःकामाःवासनाश्चहृदयसंबंधिन
मात्मानमुपसर्प्योपश्लिष्यंते।हृदयवियोगेपिचात्मन्यवतिष्ठंतेपुटतैलस्थइवपुष्पादिगंधइत्याचक्षते।
तेषांकामःसंकल्पोहृदयेह्येवरूपाणिहृदयस्यशोकाइत्यादीनांवचनानामानर्थक्यमेव।हृदयकरण

हृदयस्यभवति॥२२॥

स्याद्यत्वादितिचेत्।नहृदिश्रिताइतिविशेषणात्।नहिहृदयस्यकरणमात्रत्वेहृदिश्रिताइतिवचनेसमं
ये जसं॥हृदयेह्येवरूपाणिप्रतिष्ठितानीतिचाऽत्मविभुत्वेश्चविवक्षितात्वात्।हृच्छ्रयणवचनंयथार्थमेवयुक्तं
।ध्यायतीवलेलायतीवेतिश्रुतेरन्यार्थासंभवात्।येकामाअस्यहृदिश्रिताइतिविशेषणादात्माश्रया
अपिसंतीतिचेत्। नाश्रितापेक्षत्वात्।नात्राश्रयांतरमपेक्ष्ययेहृदीतिविशेषणं।किंतर्हिहृद्यनाश्रि ये
ताःकामास्तानपेक्ष्यविशेषणंयेत्वप्ररूढाभविष्याभूताश्चप्रतिपक्षतोनिवृत्तास्तेनैवहृदिश्रिताःसं
भाव्यंतेचतेऽ तोयुक्तं।तानपेक्ष्यविशेषणंयेप्ररूढावर्त्तमानाविषयेतेसर्वेप्रमुच्यंतइति॥ ॥७॥

क्तोभवतीतिशेषः।आत्माश्रयास्तेनबुद्धिमाश्रयंतीत्याशंक्याहबुद्धीति।कथंतर्हिकेचिदात्माश्रयत्वंतेषां
वदंतीत्याशंक्यभ्रांतिवशादित्याह।आत्मेतिभवतुकामानांहृदयाश्रितत्वंतथापितत्संबंधद्वारातदाश्रयत्व
संभवात्कथमात्मामुमुक्षुःकामानतिवर्ततेतत्राहहृदयेति।तत्संबंधातीतत्वेश्रुतिसिद्धंफलितमाहहृद
यकरणेति।भर्तृप्रपंचप्रस्थानमुत्थापयतियेत्विति।सत्येवहृदयेतन्निष्ठानांकामादीनामात्मन्युपश्लेषा
नतन्निवृत्तावित्याशंक्याहहृदयवियोगेपीति।तन्मतेश्रुतिविरोधमाहतेषामितिहृदयेनकरणेनोसा

घत्वादात्मविकाराणामपिकामादीनांहृदयसंबंधसंभवान्नानर्थक्यंश्रुतीनामितिशंकतेहृदयेति।नका
मादिसंबंधमात्रंहृदयस्यश्रुत्यर्थः।किंत्वाश्रयाश्रयित्वंनतच्चकरणत्वेनस्यान्नहिचक्षुराद्याश्रयंरूपादिज्ञानं
दृष्टमितिपरिहरतिनहृदीति।चकाराद्वचनेननसमंजसमितिसंबध्यतेप्रदीपाद्यत्तंघटज्ञानमितिवदंतःकरणा
यत्तमात्माश्रितंकामादीतितस्यतदाश्रयत्ववचनमौपचारिकमित्याशंक्याहात्मविशुद्धेश्चेति।इतश्चेदंय
थार्थमेवेत्याहध्यायतीवेति।अन्यार्थासंभवाद्बुध्याश्रयत्ववचनस्येतिशेषः।दक्षिणेनाक्ष्णापश्यतीत्यै
क्षेवामेननपश्यतीतिवत्समुच्यतेहृदिस्थिताइतिविशेषणमाश्रित्यशंकतेकामायइतिप्रकारांतरेणवि
शेषणस्यार्थवत्त्वंदर्शयतिनेत्यादिना।अत्रेतिप्रकृतश्रुत्युक्तिः।आश्रयांतरंबुद्धिव्यतिरिक्तमात्माख्यं
बुद्धिमनाश्रिताःकामाएवनसंतियदपेक्षयाहृदयाश्रयत्वविशेषणमित्याशंक्याह।येत्विति।प्रतिप
क्षतोविषयदोषदर्शनादितियावत्।कामानांवर्त्तमानत्वनियमाभावाद्भूतभविष्यतामितिसंभवेफ
लितमाहातइति॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

हृदयानाश्रितभूतभविष्यत्कामसंभवेपिसर्वकामनिवृत्तेर्विवक्षितत्वाद्वर्तमानविशेषणमनर्थकमि
तिशंकनेतथापीति।अतीतानागतकामाभावःसंभवतिस्वतःसिद्धोनतन्निवृत्तौयत्नोपेक्षतेशुद्धात्म
दिदृक्षुणामुमुक्षुणावर्तमानकामनिरासेयत्नाधिक्यमाधेयमितिज्ञापयितुंवर्तमानग्रहणमिति
परिहरतिनन्वेवमिति।यदियथोक्तंव्याख्यानमनादृत्यात्माश्रयत्वमेवकामानामाश्रीयतेतदाश्रुतमो
क्षासंभवेनानिष्टंकल्पितंस्यादित्याहइतरथेति।अश्रुतत्वमसिद्धमितिशंकतेनकेवलेनेति।अर्थादा
त्माश्रयत्वंश्रुतमेवकामानामित्येतद्दूषयतिनेत्यादिनानिषेधोहिप्राप्तिमपेक्षतेनवास्तवंकामानामा
तथापिविशेषणानर्थक्यमितिचेत्।नतेषुयत्नाधिक्याधानार्थत्वात्॥इतरथाऽश्रुतमनिष्टंचक
च ल्पितंस्यात्।आत्माश्रयत्वंकामानांनकंनकामंकामयतइतिप्राप्तप्रतिषेधादात्माश्रयत्वंकामानांश्रु
तमेवेतिचेत्।नसधीःस्वप्नोभूत्वेतिपरनिमित्तत्वात्कामाश्रयप्राप्तेरसंगवचनाच्चनहिकामाश्र
यत्वेसंगवचनमुपपद्यते।संगश्चकामइत्यवोचाम॥आत्मकामइतिश्रुतेरात्मविषयोस्यकामो
भवतीतिचेत्॥नव्यतिरिक्तकामाभावार्थत्वात्तस्याः।वैशेषिकादितंत्रन्यायोपपन्नमात्मनः
कामाद्याश्रयत्वमितिचेत्।नहृदिश्रिताइत्यादिविशेषश्रुतिविरोधादनपेक्षास्तावैशेषिकादि
तंत्रोपपत्तयःश्रुतिविरोधेन्यायाभासत्वोपगमात्॥स्वयंज्योतिष्ट्वबाधनाच्च॥ ॥७॥॥

त्मधर्मत्वप्राप्तिस्तुभ्रांत्यापिसंभवतितस्मादात्मनोवस्तुतोनकामाद्याश्रयत्वमित्यर्थः।इतश्चा
त्मनोनकामाद्याश्रयत्वमित्याहासंगेति।नन्वसंगवचनमात्मनःसंगाभावंसाधयत्तस्यकामि
त्वेनविरुध्यतेतत्राहसंगश्चेति।कामश्चसंगस्ततोऽसिद्धोहेतुरत्रेतिशेषः।वाक्यांतरमाश्रित्या
त्मनिकामाश्रयत्वंशंकित्वादूषयत्यात्मेत्यादिना।इच्छादयःक्वचिदाश्रिताःगुणत्वाद्रूपादिव
दित्यनुमानात्परिशेषात्कामाश्रयत्वमात्मनःसेत्स्यतीत्याशंकतेवैशेषिकादीति।श्रुत्यवष्टंभेन
निराचष्टेनेत्यादिना।स्वयंज्योतिष्ट्वबाधनाच्चनात्माश्रयत्वंकामादीनामितिशेषः॥ ॥७॥

बृ॰भा॰स्था॰ तदेवविवृणोतिकामादीनामितिस्थितेचानुमानादितिशेषः।यद्यत्रसमवेतंतत्तेननदृश्यतेयथाचक्षु टी॰अ॰४

३४४ गतकार्ष्ण्यतिनैवचक्षुषानदृश्यतेतथाकामादीनामात्मसमवायित्वेतन्नदृश्यत्वंनस्यात्दृश्यत्वबलेन

स्वयंज्योतिष्ट्वंसाधितंतथाचतद्बाधेपूर्वोक्तमनुमानमपिबाध्येत्यर्थः।कथंकामादीनामात्मदृश्यत्वमा

श्रित्यस्वप्नेस्वयंज्योतिष्ट्वस्योपदिश्यत्वेतत्राहद्रष्टुरिति।तथापितेषामात्माश्रयत्वेकानुपपत्तिस्तत्राहत

द्बाधितमिति।यत्तुपरमात्मैकदेशंजीवमाश्रित्यतदाश्रितेकामादीतितत्राहसर्वशास्त्रेति।तदेवस्फु

टयतिपरस्येतिशास्त्रार्थजातंनिरवयवत्वप्रत्यगेकत्वादितस्यकथंकोपस्यादित्याशंक्याहेतश्चेति।

३ कामादीनांस्वप्नेकेवलदृष्टमात्रविषयत्वात्स्वयंज्योतिष्ट्वंसिद्धंस्थितेचबाध्येतआत्मसमवायित्वेदृ

श्यत्वानुपपत्तेः।चक्षुर्गतविशेषणवत्द्रष्टुर्हिदृश्यमर्थांतरभूतमितिद्रष्टुःस्वयंज्योतिष्ट्वंसिद्धंत

त्बाधितंस्याद्यदिकामाद्याश्रयत्वंपरिकल्प्यते।सर्वशास्त्रविप्रतिषेधाच्चपरस्यैकदेशकल्पना

यांकामाद्याश्रयत्वेचसर्वशास्त्रार्थजातंकुप्येत।एतच्चविस्तरेणचतुर्थेवोचाममहतेताहियत्नेन।

कामाद्याश्रयत्वकल्पनाःप्रतिषेधव्याआत्मनःपरेणैकत्वशास्त्रार्थसिद्धेः॥तत्कल्पनायांपुनः

क्रियमाणायांशास्त्रार्थएवबाधितःस्यात्॥यथेच्छादीनामात्मधर्मत्वंकल्पयंतोवैशेषिका

नैयायिकाश्चोपनिषच्छास्त्रार्थेननसंगच्छंतेतथेयमपिकल्पनोपनिषच्छास्त्रार्थबाधनान्ना

दरणीयास्त्रीपुंसयोरिवैकत्वान्नपश्यतीत्युक्तंस्वयंज्योतिरितिच।स्वयंज्योतिष्ट्वंनामचेत

न्यात्मस्वभावनायदिह्यग्न्युष्णत्वादिवच्चैतन्यात्मस्वभावआत्मासकथमेकत्वेपिहि स्वभां

चतुर्थेचेद्भर्तृप्रपंचमतंनिरस्तंतर्हिपुनर्निराकरणमकिंकरमित्याशंक्याहमहतेति।परेणसहप्र

त्यगात्मनःयदेकत्वंतस्यशास्त्रार्थस्यसिद्ध्यर्थमिति यावत्।अंशत्वादिकल्पनायामपिशास्त्रार्थसि

द्धिमाशंक्याहतत्कल्पनायामिति।भर्तृप्रपंचकल्पनायाहेयत्वमुपसंहरतियथेत्यादिना।यद्वेतन्न

पश्यतीत्यादेःसंबंधंवकुंवृत्तंकीर्तयतिस्त्रीपुंसयोरिति चकारादुक्तंस्वयंज्योतिष्ट्वमितिसंबध्यते।कि

मिदंस्वयंज्योतिष्ट्वमिति तत्राहस्वयंज्योतिष्ट्वंनामेति।एवंवृत्तमनूद्योत्तरवाक्यव्यावर्त्यंशंकामाहयदीत्या ४४

ति

तत्यागाभावेसुषुप्तेविशेषविज्ञानराहित्यमयुक्तमित्याह।अथेत्यादिना।आत्माचिद्रूपोपिसुषुप्तेविशे
चेत् षंनजानातिकिंदुष्टतीत्याशंक्याहविप्रतिषिद्धमिति।परिहरतिनेति।उभयंचैतन्यस्वभावत्वंविशेषविज्ञा
नराहित्यंचेत्यर्थः।उभयस्वीकारेशंकितंविप्रतिषेधमाकांक्षापूर्वकंश्रुत्यानिराकरोतिकथमित्यादि
ना।यद्वैतदित्यादिवाक्यंचोदितार्थानुवादः।तत्परिहारस्तुपश्यन्नित्यादिवाक्यमितिविभजतेयत्त

अथनजहातिकथमिहसुषुप्तेनपश्यतिविप्रतिषिद्धमेतच्चैतन्यमात्मस्वभावोनजानातिचेति।
नतद्धिप्रतिषिद्धमुभयमप्येतदुपपद्यतएवकथंयद्वैसुषुप्तेतन्नपश्यतिपश्यन्वैतत्तत्रपश्यन्नेव
नपश्यति।यत्तत्रसुषुप्तेनपश्यतीतिजानीषेतन्नतथागृह्णीथाः।कस्मात्पश्यन्नेवभवतितत्र।न
न्वेवंनपश्यतीतिसुषुप्तेजानीमोयतोनचक्षुर्वामनोवादर्शनकरणेव्यापृतमस्ति।व्यापृतेषुहि

यद्वैतन्नपश्यतिपश्यन्वैतन्नपश्यति॥

दर्शनश्रवणादिषुपश्यतीतिव्यवहारोभवतिशृणोतीतिवा।नचव्यापृतानिकरणानिपश्या
मः।तस्मान्नपश्यत्येवायंनहि।किंतर्हिपश्यन्नेवभवति॥ ॥७॥ ॥

त्रेति।नहीत्यादिवाक्यनिरस्यामाशंकामाहनन्विति।चक्षुरादिव्यापाराभावेपिचसुषुप्तेदर्शना
दिकिंनस्यादित्याशंक्याहव्यापृतेष्विति।अस्तुतर्हितत्रापिकरणव्यापारोनेत्याहनचेति।अयमि
तिसुषुप्तपुरुषोक्तिः।नपश्यत्येवेतिनियमंनिषेधतिनेति।तत्रहेतुंवक्तुंप्रश्नपूर्वकंप्रतिज्ञांप्रस्तौ
तिकिंतर्हीति॥ ॥ ॥७॥ ॥ ॥७॥ ॥ ॥७॥

तत्राकांक्षापूर्वकं हेतुवाक्यमुत्थाप्य व्याचष्टे कथमित्यादिना। अविनाशित्वादित्येतद्व्याकुर्वन् दृष्टे
र्विनाशाभावं स्पष्टयति यथेत्यादिना। द्रष्टुर्दृष्टिर्न नश्यतीत्यत्र विरोधं चोदयति नन्विति विप्रतिषेध
मेव साधयति दृष्टिश्चेति। कार्यस्यापि वचनादविनाशः स्यादिति शंकते नन्विति। तस्याकारकत्वान्नै
वमिति परिहरति न वचनस्येति। तदेव स्फुटयति नहीति। यत्कृतं तदनित्यमिति व्याप्त्यनुगृहीतानु त
कथं नहि यस्माद् द्रष्टुर्दृशिस्तस्या दृष्टेर्विपरिलोपो विनाशः स न विद्यते। यथाग्नेरोष्ण्यं यावदग्निभावित
था। यं चात्मा द्रष्टा। विनाश्यतो विनाशित्वादात्मनो दृष्टिरप्यविनाशिनी यावद् द्रष्टृभाविनी हि सा॥ न
नु विप्रतिषिद्धमिदमभिधीयते। द्रष्टुः सा दृष्टिर्न विपरिलुप्यत इति च। दृश्यते द्रष्टा क्रियते दृष्टिक
र्तृत्वाद्धि द्रष्टेत्युच्यते क्रियमाणा च द्रष्टुर्दृष्टिर्न विपरिलुप्यत इति चाशक्यं वक्तुं। ननु न विपरिलुप्य
त इति वचनादविनाशिनी स्यात्। न वचनस्य ज्ञापकत्वात्। नहि न्यायप्राप्तो विनाशः कृतकस्य वच

नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते विनाशित्वात्॥

न शातेनापि वारयितुं शक्यते वचनस्य यथाप्राप्तार्थज्ञापकत्वात्। नैष दोषः। आदित्यादिप्र
काशवत् दर्शनोपपत्तेः। यथादित्यादयो नित्यप्रकाशस्वभावा एव संतः स्वाभाविकेन नित्ये
नैव प्रकाशेन प्रकाशयंति॥ न ह्यप्रकाशात्मानः संतः प्रकाशं कुर्वंतः प्रकाशयंतीत्युच्यते। किं
हिं स्वाभाविकेनैव नित्येन प्रकाशेन। तथायमप्यात्माऽपरिलुप्तस्वभावया दृष्ट्यानित्यया द्रष्टे
त्युच्यते॥ गौणं तर्हि द्रष्टृत्वं। नैवमेव मुख्यत्वोपपत्तेः॥ ॥७॥ ॥७॥ ॥

मानविरोधाद्वचो न कार्यं त्यैनित्वबोधकमित्यर्थः। कूटस्थदृष्टिरेवात्र द्रष्टृशब्दार्थो न दृष्टिकर्त्ता। तत्र
विप्रतिषेधोस्तीति सिद्धांतयति नैष दोष इति। आदित्यादिप्रकाशवदित्युक्तं दृष्टांतं व्याचष्टे यथेति। दृष्टां
तेपि विप्रतिपन्नं प्रत्याह न हीति। दर्शनोपपत्तेरित्युक्तं दार्ष्टांतिकं विभजते तथेति। आत्मनो नित्यदृष्टित्वे
दोषमाशंकते गौणमिति। गौणस्य मुख्यापेक्षत्वान्मुख्यस्य चान्यस्य द्रष्टृत्वस्याभावान्नैवमित्युत्तर

स्मादपरिलुप्तस्वभावत्वात्मना।दृष्टिः।अनन्तत्वा।ऽत्वपरिलुप्तयादृष्ट्यास्वयंज्योतिःस्वभावयापश्यन्ने
वभवतिसुषुप्ते।कथंतर्हिनपश्यतीत्युच्यते।नतुतदस्तिकिंतद्द्वितीयंविषयभूतंकिंविशिष्टंततो
द्रष्टुरन्यत्अन्यत्वेनविभक्तंयत्पश्येद्यदुपलभेत॥२३॥ ॥७॥वैषम्यमाशंकतेभवत्विति।आदित्या
दिषुस्वाभाविकप्रकाशेनप्रकाशयितृत्व. मस्तुकादाचित्कप्रकाशेनप्रकाशयितृत्वस्यतेष्वसंभवात्न
चात्मनिनित्यादृष्टिरस्तितन्मानाभावात्तथाचकादाचित्कदृष्ट्यैवतस्यद्रष्टृतेत्यर्थः।प्रतीचश्चिद्रूपत्वस्य
श्रौतत्वात्कर्तृत्वंविनाप्रकाशयितृत्वमविशिष्टमित्युत्तरमाह।नद्रष्टीतिकूटस्थदृष्टिरात्मेत्युक्तेप्रत्य
क्षविरोधंशंकतेपश्यामीति।द्विविधोनुभवस्तस्यकूटस्थदृष्टित्वमनुगृण्हातिचक्षुरादिव्यापारादि

८ नकरणव्यापारविशेषापेक्षत्वात् ×

भावापेक्षया पश्यामि न पश्यामीति धियोरात्मसाक्षिकत्वादित्युत्तरमाह नकरणेति। आत्मदृष्टेर्नित्य
त्वे हेत्वंतरमाहाद्वैतेति। आत्मदृष्टेर्नित्यत्वमुपसंहरति तस्मादिति। नन्वित्योक्तिफलमाहात इति वाक्यां
तरमाकांक्षापूर्वकमुत्थाप्य व्याचष्टे कथमित्यादिना॥ ॥द्वितीयादिपदानां पौनरुक्त्यमाशंक्यार्थभेदं
दर्शयति यद्वीत्यादिना। साभासमंतःकरणं यत्पश्येदिति विशेषदर्शने कारणं प्रमातुर्द्वितीयं तस्मादन्यच्च
क्षुरादिप्रमाणं रूपादि च प्रमेयं विभक्तं तत्सर्वं जाग्रत्स्वप्नयोरविद्याप्रतिपन्नं सुषुप्तिकाले कारणमात्रतां
गतमभिव्यक्तं नास्तीत्यर्थः। सुषुप्ते द्वितीयं प्रमातृरूपं नास्तीत्येतदुपपादयति आत्मन इति। प्रमातृ
रूपं पृथक् नास्तीति शेषः। तथापि करणव्यापारकृतं विषयदर्शनमात्मनः स्यादित्याशंक्याह इष्टु

यद्धि तद्विशेषदर्शनकारणमंतःकरणं चक्षुरूपं च तदविद्ययान्यत्वेन प्रत्युपस्थापितमासी
त्तदेतस्मिन्काल एकीभूतमात्मनः परेण परिष्वंगात्। द्रष्टुर्हि परिच्छिन्नस्य विशेषदर्शनाय
करणमन्यत्वेन व्यवतिष्ठते॥ अयं तु स्वेन सर्वात्मना संपरिष्वक्तः स्वेन परेण प्राज्ञेनात्मना प्रिय
येव पुरुषः तेन न पृथक्त्वेन व्यवस्थितानि करणानि विषयाश्च। तदभावाद्विशेषदर्शनं नास्ति।
करणानि कृतं हि तन्नात्मकृतमात्मकृतमिव प्रत्यवभासते। तस्मात्तत्कृतेयं भ्रांतिरात्मनो दृ
ष्टिः परिलुप्यत इति॥ ॥

रिति। सुषुप्तस्यापि परिच्छिन्नत्वमाशंक्याहायं त्विति। तस्य परेणैकीभावफलमाह तेनेति। विषयेंद्रि
याभावकृतं फलमाह तदभावादिति। किमिति विषयाद्यभावाद्विशेषदर्शनं निषिध्यते सत्त्वमेव तस्या
त्मसत्ताधीनं किं न स्यादित्याशंक्याह करणानीति। नन्ववस्थाद्वये विशेषदर्शनमात्मकृतं प्रतिभा
ति तस्य प्रधानत्वादत आह आत्मकृतमिवेति। नत्वित्यादेस्तात्पर्यमुपसंहरति तस्मादिति। प्रमातृ
करणविषयकृतत्वाद्विशेषदृष्टेस्तेषां च सुषुप्ते भावाभावात्तत्कार्याया विशेषदृष्टेरपि तत्राभावादिति
यावत्। तत्कृता जागरादावात्मकृतत्वेन भ्रांतिं प्रतिपन्ना विशेषदर्शनाभावप्रयुक्तेत्यर्थः॥ ॥७॥

यद्वैतन्नपश्यतीत्यादावुक्तन्यायमुत्तरवाक्येष्वतिदिशतिसमानमिति।मनोबुद्ध्योःसाधारणकरणत्वात्पृथग्व्यापा
समानमन्यत्॥२४॥ ॥यद्वैतन्नजिघ्रति।यद्वैतन्नरसयतेयद्वैतन्नवदति।यद्वैतन्नशृणोति।यद्वैतन्नमनु
यद्वैतन्नजिघ्रतिजिघ्रन्वैतन्नजिघ्रतिनहिघ्रातुर्घ्रातेर्विपरिलोपोविद्यतेविनाशित्वान्नतुतद्द्वितीयमस्ति
ततोन्यद्विभक्तंयज्जिघ्रेत्॥२४॥यद्वैतन्नरसयतेरसयन्वैतन्नरसयतेनहिरसयितूरस यतेर्विपरि
लोपोविद्यतेविनाशित्वान्नतुतद्द्वितीयमस्तिततोन्यद्विभक्तंयद्रसयेत्॥२५॥यद्वैतन्नवदतिवदन्वैत
न्नवदतिनहिवक्तुर्वक्तेर्विपरिलोपोविद्यतेविनाशित्वान्नतुतद्द्वितीयमस्तिततोन्यद्विभक्तंयद्वदेत्
॥२६॥यद्वैतन्नशृणोतिशृण्वन्वैतन्नशृणोतिनहिश्रोतुःश्रुतेर्विपरिलोपोविद्यतेविनाशित्वान्नतुत
द्द्वितीयमस्तिततोन्यद्विभक्तंयच्छृणुयात्॥२७॥यद्वैतन्नमनुतेम न्वानोवैतन्नमनुतेनहिमंतु
र्मतेर्विपरिलोपोविद्यतेविनाशित्वान्नतुतद्द्वितीयमस्तिततोन्यद्विभक्तंयन्मन्वीत॥२८॥यद्वैत
न्नस्पृशतिस्पृशन्वैतन्नस्पृशतिनहिस्प्रष्टुःस्पृष्टेर्विपरिलोपोविद्यतेविनाशित्वान्नतुतद्द्वितीयम
स्तिततोन्यद्विभक्तंयत्स्पृशेत्॥२९॥यद्वैतन्नविजानातिविजानन्वैतन्नविजानातिनहिविज्ञातुर्वि
ज्ञातेर्विपरिलोपोविद्यतेविनाशित्वान्नतुतद्द्वितीयमस्तिततोन्यद्विभक्तंयद्विजानीयात्॥३०॥

न ते।यद्वैतन्नस्पृशति।यद्वैतन्नविजानातीति॥मनोविज्ञानयोर्दृष्ट्यादिसहकारित्वेपिसतिचक्षु
रादिनिरपेक्षयोर्भूतभविष्यद्वर्तमानविषयेव्यापारोविद्यतइतिपृथग्ग्रहणं॥ ॥७॥ ॥

राभावेकथंपृथग्निर्देशःस्यादित्याशंक्याहमननेति॥ ॥श्रीगोपालकृष्णायनमः॥ ७॥

वाक्यानि व्याख्याय स्वसिद्धांतस्फुटीकरणार्थं विचारयति किं पुनरिति। धर्मभेदो धर्मिणो सतां मिथो
धर्मिणो सतां मिथो धर्मिणश्च भेदोस्तीति यावत्। धर्मस्य दृष्ट्यादिपदार्थस्येत्यर्थः। परोपाधिनिमित्तं च
क्षुराद्युपाधिकृतमित्येतत्। धर्मान्यत्वं तद्धर्मिणो मिथोन्यत्वं चेत्यर्थः। भर्तृप्रपंचमतेन पूर्वपक्षं गृण्हात्य
त्रेति। गवादीनां सावयवत्वाद्रूपभेदसंभवादेकेन रूपेणाभिन्नत्वं रूपांतरेणा। भिन्नत्वमित्युभयथात्वे
पि निरवयवेष्वात्मादिषु कथमनेकरसत्वसिद्धिरित्याशंक्याह यथा स्थूलेष्विति। एकरूपत्वे वस्तुनो दृष्ट्या

किं पुनर्दृष्ट्यादीनामग्नेरौष्ण्यप्रकाशनज्वलनादिवत्। धर्मभेदस्त्वाहोस्विदभिन्नस्यैव धर्मस्य
परोपाधिनिमित्तकं धर्मान्यत्वमित्यत्र केचिद्व्याचक्षते। आत्मवस्तुनः स्वत एवैकत्वं च यथा
गोगोड्डव्यक्तयेकत्वं सास्नादीनां धर्माणां परस्परव्यभिचारदर्शनादात्मनोपि तद्वदेव दृष्ट्या
दीनां परस्परं भेदः॥ यथा स्थूलेष्वेकत्वं नानात्वं तथा निरवयवेष्वमूर्त्तवस्तुष्वेकत्वं नानात्वम
नुमेयं। सर्वत्राव्यभिचारदर्शनादात्मनोपि तद्वदेव दृष्ट्यादीनां परस्परं नानात्वमात्मनाचै
कत्वमिति। नान्यपरत्वात्॥ २५॥ न हि दृष्ट्यादिधर्मभेदप्रदर्शनपरमिदं वाक्यं। यद्वै तदि
त्यादि किं तर्हि यदि चैतन्यात्मज्योतिः कथं जानाति सुषुप्ते न नूनमतो न चैतन्यात्मज्योतिरि
त्येवमाशंकाप्राप्तौ। तन्निराकरणायैतदारब्धं यद्वैतदित्यादि॥ ॥७॥ ॥

तादृष्टेर्नानारूपत्वे गवादिदृष्टांतदर्शनात्तदेवानुमेयं विमतं भिन्नाभिन्नं वस्तुत्वात् गवादिवदित्यर्थः।
यद्यपि गगनादिषु भिन्नाभिन्नत्वमनुमीयते तथापि कथमात्मनि तदनुमानमित्याशंक्य वस्तुत्वस्य
नानारूपत्वेनाव्यभिचारादात्मन्यपि यथोक्तमनुमानं निरंकुशप्रसरमित्याह सर्वत्रेति। यथोक्ता
नुमानानुग्रहाद्यद्वै तदित्यादेर्भिन्नाभिन्ने वस्तुनि तात्पर्यमिति भावः। भर्तृप्रपंचोक्तं वाक्यतात्प
र्यं निराकरोति नेत्यादिना॥ ॥७॥ ॥७॥ ॥७॥

चैतन्यविनाशोवाक्यतात्पर्यंचेत्कथंतर्हिद्रष्ट्रादिभेदवचनमित्याशंक्याहयद्दृश्येति। तद्धिसुषुप्त्यवस्थायामु
पाधेरंतःकरणस्यचक्षुरादिभेदाधीनपरिणामव्यापारस्यनिवृत्तौसत्यामुपाधिभेदस्यानुद्भास्यमानत्वा
त्तेनभिन्नमिवानुपलक्ष्यमाणस्वभावेयद्यपितथापिचक्षुर्द्वारेणजायमानायांबुद्धिवृत्तौव्यक्तंचैतन्यंदृष्टि
र्घ्राणद्वारेणजातायांतस्यांव्यक्तंघ्रातिरित्युपाधिभेदात्प्राप्तभेदानुवादेनचैतन्यस्याविनाशित्वेवाक्यतात्प
र्यमित्यर्थः। उक्तेवाक्यतात्पर्येस्थितेफलितमाहतत्रेति। तत्रश्चद्रष्ट्रादिभेदकल्पनानभिज्ञेत्याह। सैंधवे
ति। तदेवस्पष्टयतिविज्ञानमिति। नद्रष्ट्रादिभेदकल्पनेतिशेषः। यथाघटाकाशोमहाकाशइत्येकशब्द

यद्दृश्यजाग्रत्स्वप्नयोश्चक्षुराद्यनेकोपाधिद्वारंचैतन्यात्मज्योतिःस्वाभाव्यमुपलक्षितंद्रष्ट्राद्य
भिधेयव्यवहारापन्नंसुषुप्तेतदुपाधिभेदव्यापारनिवृत्तावनुद्भास्यमानत्वादनुपलक्ष्यमाणस्वभा
वमथउपाधिभेदेनभिन्नमिवयथाप्राप्तानुवादेनैवविद्यमानत्वमुच्यते।। तत्रद्रष्ट्रादिधर्मभेद
कल्पनाविवक्षितार्थानभिज्ञतयासैंधवघनवत्प्रज्ञानैकरसघनश्रुतिविरोधाच्च। विज्ञानमानं
दंसत्यंज्ञानंप्रज्ञानंब्रह्मेत्यादिश्रुतिभ्यश्च। शब्दप्रवृत्तेश्चलौकिकीचशब्दप्रवृत्तिश्चक्षुषारूपं
विजानातिश्रोत्रेणशब्दंविजानाति रसने नान्नरसंविजानातीतिचसर्वत्रैवचद्रष्ट्रादिश
ब्दाभिधेयानांविज्ञानशब्दवाच्यतामेवदर्शयति।। शब्दप्रवृत्तिश्चप्रमाणं। दृष्टान्तोपपत्तेश्च।। ।।

विषयत्वादुपाधिभेदस्याकाशस्यैकत्वमिष्टंतथैकशब्दप्रवृत्तेरेकत्वंचितोपिस्वीकर्तव्यंतत्कुतोद्रष्ट्रादिभे
ह दसिद्धिरित्याशंक्यशब्दप्रवृत्तेश्चेति। तामेवविवृणोतिलौकिकीचेतियत्तुसिद्धान्तेदृष्टान्तोनास्तीतितत्राहदृ
ष्टान्तेति। किमेकरूपत्वेवस्तुनोदृष्टान्तोनास्तिकिंवामिथ्यात्वेतन्नानारूपत्वस्येतिवक्तव्यंनाद्योनाना
रूपवस्तुवादिभिरप्येकैकरूपस्यानवस्थापरिहारार्थमेकरूपत्वांगीकारादस्माकंदृष्टान्तसिद्धेर्वि
रुक्त त्वहेतोश्चतत्रैवानैकान्तिकत्वात्तस्मादेकरूपमेववस्तुस्वीकर्तव्यमितिभावः।। ।।७।। ।।

द्वितीयं दूषयति यथा हीति। तन्निमित्तमेवेत्यत्र तच्छब्देन स्वच्छस्वाभाव्यं परामृश्यते स्फटिके हरितादि धर्माणां स्वाभाविकत्वे किं न स्यादित्याशंक्याह न चेति। तस्य हि स्वच्छस्वाभाव्यं तद्द्वारेण हरिताद्युपाधिभेदसंबंधव्यतिरेकेणेति यावत्। एकस्य नानारूपत्वं मिथ्येत्यत्र दृष्टांतमुक्त्वा दार्ष्टांतिकमाह तथेति। आत्मा मिथ्या नानानिर्भासः उपहितत्वात् स्फटिकवदित्यर्थः। किं चात्मा मिथ्या नानात्वा

यथा हि लोके स्वच्छस्वाभाव्ययुक्तः स्फटिकस्तन्निमित्तमेव केवलं हरितनीललोहिताद्युपाधिभेदसंयोगात् तदाकारत्वं भजते। न च स्वच्छस्वाभाव्यव्यतिरेकेण हरितनीललोहितादिलक्षणो धर्मभेदः स्फटिकस्य कल्पयितुं शक्यते। तथा चक्षुराद्युपाधिभेदसंयोगात् प्रज्ञानघनस्वभावस्यैवात्मज्योतिषो दृष्ट्यादिशक्तिभेद उपलक्ष्यते। प्रज्ञानघनस्य स्वच्छस्वाभाव्यात् स्फटिकस्वच्छस्वाभाव्यवत्स्वयंज्योतिष्ट्वं च यथा चादित्यज्योतिरवभास्यभेदैः संयुज्यमानं हरितनीलपीतलोहितादिभेदैः विभाग्यं तदाकाराभासं भवति तथा चक्षुस्तं जगदवभासयच्चक्षुरादीनि च तदाकारं भवति तथा चोक्तमात्मनैवायं ज्योतिषास्त इत्यादि॥ ॥७॥ ॥

धारः स्वच्छत्वात् संप्रतिपन्नवदित्याह प्रज्ञानेति। किं चात्माकल्पितनानात्वाधारो ज्योतिष्ट्वादादित्यादिज्योतिर्वदित्याह स्वयमिति। आदित्यादावकल्पितोऽपि भेदोऽस्तीत्याशंक्य विवक्षितं साम्यमाह यथा चेत्यादिना विभाग्यं वस्तुतो विभागयोग्यमिति यावत्। चक्षुरादीनि चावभासयेदिति सं-बंधः। आत्मनः सर्वावभासकत्वे वाक्योपक्रमं प्रमाणयति तथा चेति॥७॥

यत्तु निरवयवेष्वपि नानारूपत्वमनुमेयमिति तत्राह नचेति। आकाशादीनां दृष्टांतत्वमाशंक्य निरा चष्टे य
द्यपीत्यादिना। कथमाकाशस्यानेकधर्मवत्त्वमौपाधिकमित्याशंक्य तस्य सर्वगतत्वं तावदौपाधिकमिति
साधयत्याकाशस्येति। कथं तर्हि तत्र सर्वगतत्वव्यवहारस्तत्राह सर्वोपाधीति। नन्वाकाशस्य सर्वत्रगमन
मपेक्ष्य सर्वगतत्वं किमिति नव्यवह्रियते तत्राह नत्विति। आकाशे गमनायोगं वक्तुं तत्स्वरूपमाह गमनेहीं
ति। ननु कुतश्चिद्विभागे संयोगे च केनचिद्देशेन तत्कारणीभूता क्रियापि श्येनादाविवाकाशे भविष्यति

नचनिरवयवेष्वनेकात्मता शक्यते कल्पयितुं दृष्टांताभावात्॥ यदप्याकाशस्य सर्वगतत्वादि
धर्मभेदः परिकल्प्यते परमाण्वादीनां च गंधरसाद्यनेकगुणत्वं तदपि निरूप्यमाणं परोपाधिनि
मित्तमेव भवति॥ आकाशस्य तावत्सर्वगतत्वं नाम न स्वतो धर्मोस्ति॥ सर्वोपाधिसंश्रयाद्धि सर्व
त्र स्वेन रूपेण सत्त्वमपेक्ष्य सर्वगतत्वव्यवहारः॥ नत्वाकाशः क्वचिद्गतो वा आगतो वा स्वतो गम
नं हि नाम देशांतरेण संयोगकारणं॥ सा च क्रिया नैवाविशेषे संभवति॥ एवं धर्मभेदा नैव सं
त्याकाशे॥ तथा परमाण्वादावपि परमाणुर्नाम पृथिव्या गंधघनायाः परमसूक्ष्मोवयवो गंधा
त्मक एव न तस्य पुनर्गंधवत्त्वं नाम शक्यते कल्पयितुं॥ ॥७॥ ॥ ॥

नेत्याह सा चेति। सावयवे हि श्येनादौ क्रिया दृश्यते आकाशात्वविशेषं निरवयवं कुतस्तत्र क्रियेत्यर्थः
। तथापि धर्मांतराण्याकाशे भविष्यंतीत्याशंक्य तेषामपि क्रियापूर्वकाणामुक्तन्यायकवलीकृत
त्वमाह एवमिति। भेदाभेदाभ्यां दुर्वचत्वाच्च तत्र धर्मधर्मिभावो न संभवतीति भावः। आकाशे दर्शि
तन्यायमन्यत्रापि संचारयति तथेति। पार्थिवत्वं परमाणोरेकं रूपं गंधवत्त्वं चापरमित्यनेकरूपत्व
मित्याशंक्याह परमाणुर्नामेति। नहि पार्थिवत्वातिरेकि गंधवत्त्वं प्रामाणिकमिति भावः॥ ॥७॥

बृ·भा·आ वैशेषिकपरिभाषामाश्रित्यशंकयत्यथेति।पार्थिवेपरमाणौरसादिमत्त्वमनौपाधिकंनभवतिजलादिसंसर्ग अ·अ·४
३४९ कृतत्वात्तथाचनिरुपाधिकभेदेनेदमुदाहरणमितिपरिहरति।नतत्रापीति।उक्तन्यायस्यदिगादावपिसम
त्वमत्वोपसंहरति।तस्मादिति।सतिपरस्मिन्नात्मनिदृगादिशक्तिभेदास्तेषांमध्येदृक् क्तिश्चक्षुरात्मनारू शा
पात्मनाचस्थगोवपरिणमतेघ्रातिशक्तिश्चघ्राणात्मनागंधात्मनाचेत्यनेनक्रमेणपरस्मिन्परिणामकल्प
नाभर्द्रप्रपंचैर्यत्कृतासापिपरस्यैकरूपत्वोपपादनेननिरस्तेत्याहैनेनेति।औपाधिकोदृष्ट्रादिभेदोनवास्त
अथतस्यैवरसादिमत्त्वंस्यादितिचेन्न॥नतत्राप्यबादिसंसर्गनिमित्तत्वात्॥तस्मान्ननिरवयवस्यानेक
धर्मवत्त्वेदृष्टांतोस्ति॥एतेनदृगादिशक्तिभेदानांपृथक्चक्षुरूपादिभेदेनपरिणामभेदकल्पना
परमात्मनिप्रत्युक्ता॥जाग्रत्स्वप्नयोरिवयद्विजानीयात्द्वितीयेप्रविभक्तमन्यत्वेनास्तीत्युक्तम न
तःसुषुप्तेनविजानातिविशेषं॥ननुयद्यस्यायमेवस्वभावःकिंनिमित्तमस्यविशेषविज्ञानेस्वभा

यत्रवाअन्यदिवस्यात्तत्रान्योन्यत्पश्येदन्योन्यज्जिघ्रेदन्योन्यद्रसयेदन्योन्यद्वदेदन्यो
न्यच्छृणुयादन्योन्यन्मन्वीतान्योन्यत्स्पृशेदन्योन्यद्विजानीयात्॥३१॥ ॥७॥॥

वपरित्यागेन॥२४॥ २५॥ २६॥ २७॥ २८॥ २९॥३०॥अथविशेषविज्ञानमेवास्यस्वभावःकस्माद्
विशेषंनजानातीति॥उच्यतेशृणुयत्रयस्मिन्जागरितेस्वप्नेवान्यदिवात्मनोवस्त्वंतरमिवाविद्यया
प्रत्युपस्थापितंभवतितत्रतस्मादविद्याप्रत्युपस्थापितादन्योन्यमिवात्मानंमन्यमानोऽसत्यात्म
नःप्रविभक्तेवस्त्वंतरेऽसतिचात्मनिततःप्रविभक्तेअन्योन्यत्पश्येदुपलभेत॥तच्चदर्शितंस्वप्नेप्र
त्यक्षतोघ्नंतीवजिनंतीवेति।तथान्योन्यज्जिघ्रेद्रसयेद्वदेच्छृणुयान्मन्वीतस्पृशेद्विजानीयादिति३१

वास्तीत्युपपाद्यसूत्रमनुद्रवतिजाग्रदिति॥यत्रेत्याद्युत्तरवाक्यस्यावर्त्यामाशंकांदर्शयतिनन्विति।किमस्य
विशेषविज्ञानराहित्यंस्वरूपंकिंवाविशेषविज्ञानवत्त्वंआद्येजाग्रत्स्वप्नयो रनुपपत्तिःद्वितीयेसुषुप्तेरसिद्धि
रितिभावः।प्रतीचश्चिन्मात्रज्योतिषोविशेषविज्ञानराहित्यमेवस्वरूपंतथापिस्वाविद्याकल्पितविशेष
विज्ञानवत्त्वमाश्रित्यावस्थाद्वयंसिध्यतीत्युत्तरवाक्यमवतंब्योत्तरमाहोच्यतइत्यादिना।तच्चेत्याविधं
दर्शनमित्यर्थः॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ४९

पूर्वोक्तवस्तूपसंहारार्थं सलिलवाक्यमुत्थापयति। यत्रेत्यादिना। तेनाविद्यायाः शांतत्वेनेति यावत्। वस्तुनोभा
वात्तत्रेति शेषः। सुषुप्ते विशेषविज्ञानाभावप्रयुक्तं फलमाह। आत्मेति पूर्वमेवास्यार्थस्योक्तत्वं द्योतयितुं हिशब्दः। सं
परिष्वंगफलं समस्तत्वमपरिच्छिन्नत्वं तत्फलं संप्रसन्नत्वमप्रसादो हि परिच्छेदाभिमानकृतः। संप्रसन्नत्वे हेतुत्वेन
रमाहाप्तकाम इति तदेवं संप्रसन्नत्वं दृष्टांतेन स्पष्टयति सलिलवदिति। उक्तेर्थे वाक्याक्षराणि योजयति सलिल इ
वेति। द्वितीयस्याभावे सुषुप्ते व्यक्तीकरोत्यविद्ययेति। अद्रष्टा द्रष्टेति वाच्छेदः। एको द्वैत इत्यभ्यासस्तात्पर्यलिंगं
यत्र पुनः सा विद्या सुषुप्ते वस्त्वंतरप्रत्युपस्थापिका शांता तेनान्यत्वेनाविद्याप्रविभक्तस्य वस्तुनो भावात्त
त्केन कं पश्येज्जिघ्रेद्विजानीयाद्वा। अतः स्वेनैव हि प्राज्ञेनात्मना स्वयंज्योतिःस्वभावेन संपरिष्वक्तः समस्तः
त् संप्रसन्नः आप्तकामः। आत्मकामः सलिलवत्स्वच्छीभूतः सलिल इव सलिलः एको द्वितीयस्याभावा
त्। अविद्यया हि द्वितीयः प्रविभज्यते। सा च शांतात्रातः एकोद्रष्टा द्रष्टेरपरिलुप्तत्वादात्मज्योतिःस्वभा
वायाः अद्वैतो द्रष्टव्यस्य द्वयस्याभावादेतदमृतमभयमेष ब्रह्मलोको ब्रह्मैव लोको ब्रह्मलोकः परएवा
यमस्मिन्काले व्यावृत्तकार्यकरणोपाधिभेदः स्वे आत्मज्योतिषि शांतसर्वसंबंधो वर्त्तते। हे सम्रा

सलिल एको द्रष्टाद्वैतो भवत्येष ब्रह्मलोकः सम्राडिति हैनमनुशशास याज्ञवल्क्य ए
षास्य परमा गतिरेषास्य परमा संपदेषोस्य परमो लोकः॥ ॥७॥ ॥

डिति ह एवं हैनं जनकमनुशशास अनुशिष्टवान् याज्ञवल्क्य इति श्रुतिवचनमेतत्कथं वानुशशास एव
षास्य विज्ञानमयस्य परमा गतिर्यास्त्वन्या देहग्रहणलक्षणा ब्रह्मादिस्तंबपर्यंता अविद्याकल्पितास्ता
गतयोतोपरमा अविद्याविषयत्वात्। इयं तु देवत्वादिगतीनां कर्मविद्यासाध्यानां परमोत्तमा यः सम
स्तात्मभावो यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानातीत्येषैव च परमा संपत् सर्वासां संपदां वि
भूतीनां इयं परमा स्वाभाविकत्वादस्याः॥ कृतका ह्यन्याः संपदः॥ तथैषोस्य परमो लोकः॥ येन्ये कर्मफ

गंतस्य परमपुरुषार्थत्वं दर्शयन्कूटस्थत्वमाहैतदिति। किमिति षष्ठीसमासमुपेक्ष्य कर्मधारयो गृह्यते
तत्राह पर एवेति। अस्मिन्काले सुषुप्त्यवस्थायामित्येतेन परमत्वं साधयति यास्त्विति। प्रस्तुतं समस्ता
त्मभावं विशेषविज्ञानराहित्येन विशिनष्टि यत्रेति॥ सर्वात्मभावाख्यस्य लोकस्य परमत्वमुपपादय
ति। येन्य इति। मीयते परिच्छिद्यते साध्यत इति यावत्॥ ॥ ॥ ॥ ॥

लाश्रया लोकास्तेभ्यः परमाः। अयं तु न केनचित्कर्मणा
मितस्स्वाभाविकत्वादेषोस्य परमो लोकः॥

सर्वात्मभावस्य परमानंदत्वं विशदयति यानीति। आत्मनोनवच्छिन्नानंदत्वे छांदोग्यश्रुतिं संवादयति यो वै
भूमेति। ननु वैषयिकमेकं सुखमात्मरूपं चापरमिति सुखभेदांगीकारात् परार्द्धोतः स्यादित्याशंक्य मुख्या
मुख्यभेदेन तदुपपत्तेर्मैवमित्याह यत्रेत्यादिना। किं च वस्तुतो नास्त्येवात्मसुखातिरिक्तं वैषयिकं सुखमित्या

तथैषोस्य परमानंदो यान्यन्यानि विषयेंद्रियसंबंधजनितान्यानंदजातानि तान्यपेक्ष्यैषोस्य प
रमानंदो नित्यत्वात्। यो वै भूमा तत्सुखमिति श्रुत्यंतरात्॥ यत्रान्यत्पश्यत्यन्यद्विजानाति तदल्पं म
त्यं मम मुख्यं सुखमिदं तु द्विपरीनमतएव एषोस्य परम आनंदः॥ एतस्यैवानंदस्य मात्रां कलामवि

एषोस्य परम आनंद एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंति॥ ३२॥ ७॥ ॥

द्याप्रत्युपस्थापितां विषयेंद्रियसंबंधकालविभाव्यामन्यानि भूतान्युपजीवंति कानि तानि तत
एवानंदादविद्याप्रविभज्यमानस्वरूपाण्यन्यत्वेन तानि ब्रह्मणः परिकल्प्यमानान्यन्यानि संत्यु
पजीवंति भूतानि विषयेंद्रियसंपर्कद्वारेण विभाव्यमानां॥ यस्य परमानंदस्य मात्रा अवय
वाः ब्रह्मादिभिर्मनुष्यपर्यंतैर्भूतैरुपजीव्यंते तदानंदमात्रावयवद्वारेण मात्रिणं परमानंदमधि
जिगमयिषन्नाह॥ सैंधवलवणशकलैरिव लवणशैलं॥ ॥७॥ ॥७॥ ॥

हैतस्येति। ब्रह्मातिरिक्तचेतनाभावे कान्युपजीवकानि स्युरित्याशंक्य परिहरति कानीत्यादिना विभा
व्यमानामानंदस्य मात्रामिति पूर्वेण संबंधः। स यो मनुष्याणामित्यादिवाक्यतात्पर्यमाह यस्येति। य
था सैंधवावयवैः सैंधवाचलं लोको बोधयति तथा तस्यानंदस्य मात्रानामावयवास्तत्प्रदर्शनद्वारेणा
वयविनं परमानंदमधिगमयितुमिच्छन्ननंतरो ग्रंथः प्रवृत्त इत्यर्थः॥ ॥७॥ ॥

तात्पर्यमुक्ताक्षराणि व्याचष्टे स यः कश्चिदित्यादिना। राद्धत्वमविकलत्वं चेत् समृद्धत्वेन पुनरुक्तिरित्याशं
क्याह समग्रेति। तदेव समृद्धत्वमपीत्याशंक्य व्याकरोत्युपभोगेति। अंतर्बहिःसंपत्तिभेदादपुनरुक्ति
रिति भावः न केवलमुक्तमेव तस्य विशेषणं किंतु विशेषणांतरं चास्तीत्याह किंचेति। विशेषणतात्पर्यमाह
दिव्येति। तदनिवर्तनेत्वस्य वक्ष्यमाणगंधर्वादिष्वंतर्भावः स्यादिति भावः। अतिशयेन संपन्न इति शेषः।
अभेदनिर्देशस्याभिप्रायमाह तत्रेति। प्रकृते वाक्ये सप्तम्यर्थः। आत्मनः सकाशादानंदस्येति शेषः।
स यः मनुष्याणां मध्ये राद्धः संसिद्धः विकलसमग्रावयव इत्यर्थः॥ समृद्ध उपभोगोपकरणसंप
न्नो भवति॥ किंचान्येषां समानजातीयानामधिपतिः स्वतंत्रः पतिर्न मांडलिकः सर्वैः समस्तैर्मनुष्य
लोके रिति दिव्यभोगोपकरणनिरत्यर्थं मनुष्याणामेव यानि भोगोपकरणानि तैः संपन्नाना
मथ तिशयेन संपन्नतमः स मनुष्याणां परमानंदः तत्रानंदानंदिनोरभेदनिर्देशान्नार्थांतरम्॥

स यो मनुष्याणां राद्धः समृद्धो भवत्यन्येषामधिपतिः सर्वैर्मानुष्यकैर्भोगैः संप
न्नतमः स मनुष्याणां परम आनंदः॥ ॥७॥ ॥ ॥

तत्त्वमित्येतत्परमानंदस्यैवेयं [redacted] विषयविषय्याकारेण मात्राप्रसृतेति त्वक्तं यत्र वा अन्य
दिव स्यादित्यादिवाक्येन। तस्मादुक्तोयं परम आनंद इत्यभेदनिर्देशः। युधिष्ठिरादितुल्यो
राजात्रोदाहरणं। दृष्टं मनुष्यानंदमादिं कृत्वायमानंदः शतगुणोत्तरक्रमेणोन्नीय परमानं
दं यत्र भेदो निवर्तते तमधिगमयति॥ ॥७॥ ॥ औपचारिकत्वमभेदनिर्देशस्य भविष्यतीत्याशंक्या
ह परमानंदस्येति। तस्यैव विषयत्वं विषयित्वमिति स्थिते फलितमाह तस्मादिति। यथोक्तो मनुष्यान
दृष्टिपथमवतरतीत्याशंक्याह युधिष्ठिरादीति अथ ये शतं मनुष्याणामित्यादेस्तात्पर्यमाह दृष्टमि
शोत्तर तिशतगुणेनोत्तरत्रानंदस्योत्कर्षप्रदर्शनक्रमेण परमानंदमुन्नीय तमधिगमयत्युत्तरेण ग्रंथेनेति
संबंधः परमानंदमेव विशिनष्टि यत्रेति भेदः संख्याव्यवहारः॥ ॥७॥ ॥७॥

उक्तमेवप्रपंचयत्यत्रेत्यादिना।परमानंदेविशुद्धिकाष्ठायांहेतुमाहान्यत्रेति।यद्यपियस्त्वित्यादिनो टी·अ·४
क्तमेतत्तथापीहाक्षरव्याख्यानावसरेतदेवविवृतमित्यविरोधः।तत्त दनंदप्रदर्शनानेतर्यत्रतत्राथ

अत्रायमानंदःशतगुणोत्तरक्रमेणवर्द्धमानोयत्रवृद्धिकाष्ठामनुभवति।।यत्रगणितभेदो
न निवर्ततेन्यदर्शनश्रवणमननाभावात्तंपरमानंदंविवक्षन्नाह।अथयेमानुषाएवंप्रकाराःशत
मानंदभेदाःसएकःपितृणांतेषांविशेषणंजितलोकानामितिश्राद्धादिकर्मभिःपितृंस्तो

अथयेशतंमनुष्याणामानंदाःसएकःपितृणांजितलोकानामानंदोऽथयेशतं
पितृणांजितलोकानामानंदाःसएकोगंधर्वलोकआनंदोऽथयेशतंगंधर्वलो
कआनंदाःसएकःकर्मदेवानामानंदायेकर्मणादेवत्वमभिसंपद्यंतेऽथयेशतं
कर्मदेवानामानंदाः॥ ॥३३॥ ॥

षयित्वातेनकर्मणाजितोलोकोयेषांतेजितलोकाःपितरस्तेषांपितृणांजितलोकानांमनु
ष्यानंदशतगुणीकृतपरिमाणःएकआनंदोभवतिसोपिशतगुणीकृतोगंधर्वलोकएक
आनंदोभवतिसशतगुणीकृतःकर्मदेवानामेकःआनंदअग्निहोत्रादिश्रौतकर्मणायेदे
वत्वंप्राप्नुवंतितेकर्मदेवाः॥ ॥३३॥ ॥

शब्दार्थः।तत्तद्वाक्योपक्रमोवाएवंप्रकारत्वंसमृद्धत्वादिपितृणामानंदइतिसंबंधः।श्राद्धादिकर्म
भिरित्यादिशब्देनपिंडपितृयज्ञादिगृह्यतेकेतेकर्मदेवानामन्त्राहाग्निहोत्रादीति॥ ॥३३॥ ॥ ५३

यथागंधर्वानंदश्शतगुणीकृतः कर्मदेवानामेकस्त्रानंदस्तथाकर्मदेवानांशतगुणीकृतः सन्नाजानदेवानामेव
ह आनंदोभवतीत्यातथेवेति। कुत्रवीतवृष्ठत्वेतत्राहाजानदेवेभ्यइति। श्रोत्रियादिवाक्यस्यप्रकृतासंगतिमाशंक्या
हतस्यचेति। एवंभूतस्यविशेषणात्रयविशिष्टस्येतियावत्। प्रजापतिलोकशब्दस्यब्रह्मलोकशब्दार्थभेदमा

तथैवाजानदेवानामेकआनंदः आजानतएवोत्पत्तितएवयेदेवास्तआजानदेवाः यश्चश्रोत्रियोधीतवेदः
अवृजिनः वृजिनंपापंतद्रहितोयथोक्तकारीत्यर्थः अकामहतोवितृष्णः आजानदेवेभ्योर्वाक्याववो
विषयास्तेषुतस्यचैवंभूतस्याजानदेवैः समानआनंदइत्येतदन्वाकृष्यतेचशब्दात्तच्छतगुणीकृत

सएकआजानदेवानामानंदोयश्चश्रोत्रियोवृजिनोकामहतोथयेशतमाजानदेवानामा
नंदाः सएकः प्रजापतिलोकआनंदोयश्चश्रोत्रियोवृजिनोकामहतोथयेशतंप्रजापतिलो
कआनंदाः सएकोब्रह्मलोकआनंदोयश्चश्रोत्रियोवृजिनोकामहतः ॥७॥ ॥
म

परिमाणः प्रजापतिलोकः एकआनंदोविराट्शरीरेतथातद्विज्ञानवान् श्रोत्रियोधीतवेदश्चावृ
जिनइत्यादिपूर्ववत्। तत्तच्छतगुणीकृतपरिमाणएकआनंदोब्रह्मलोकेहिरण्यगर्भात्मनियश्चे
त्यादिपूर्ववदेव॥ ॥७॥ ॥

हविराडिति। यथाविराडात्मन्याजानदेवानंदः शतगुणीकृतः सन्नेकआनंदोभवतितथाविराडात्मोपासिता
श्रोत्रियत्वादिविशेषणोविराजतुल्यानंदः स्यादित्याहतथेति। तच्छतगुणीकृतेतितच्छब्दोविराडानंदविष
यः। श्रोत्रियत्वादिविशेषणवानपिहिरण्यगर्भोपासकस्तेनतुल्यानंदोभवतीत्याहयश्चेति॥ ॥७॥ ॥

हिरण्यगर्भानंदादुपरिष्टादपिब्रह्मानंदेगणितभेदेप्राकरणिकेप्राप्तेप्रत्याहातःपरमिति।एषोस्यपरमानंदइत्युपक्रम्यकिमि
त्यानंदांतरमुपदर्शितमित्याशंक्याहैषइति।तथापिसोपुनःसर्वात्मत्वमुपेक्षितमितिचेन्नेत्याहयस्यचेति।प्रकृतस्यब्रह्मानंद
स्यापरिच्छिन्नत्वमाहतत्रहीति।अनवच्छिन्नत्वफलमाह।भूमत्वादिति।ब्रह्मानंदादितरेपरिच्छिन्नामर्त्याश्चेत्याहेतरइति।अथ
यत्रान्यत्पश्यतीत्यादिश्रुतेरितिभावः।श्रोत्रियादिपदानिव्याख्यायतात्पर्यंदर्शयत्यत्रचेति।मध्येविशेषणेषुत्रिष्वितियावत्
।तुल्येसर्वपर्यायेष्वितिशेषः।विशेषणांतरेविशेषमाह।अकामहतत्वेति।यथोक्तंविभागमुपपादयितुमर्थसिद्धमर्थमाह।अत्रै
तानीतियश्चेत्यादिवाक्यंसप्तम्यर्थः।तस्यतस्यानंदस्येतिदेवप्रजापत्यादिनिर्देशः।अर्थादभिहितत्वेदृष्टांतमाहयथेति
येकर्मणादेवत्वमित्यादिश्रुतिसामर्थ्याद्देवानंदाप्तौयथाकर्माणिसाधनान्युक्तानितथायश्चेत्यादिश्रुतिसामर्थ्यादि
अतःपरंपरिगणितनिवृत्तिरेषपरमआनंदइत्युक्तोयस्यपरमानंदस्यब्रह्मलोकाद्यानंदामात्रात्तदधेरिवविप्रुषःएवं
शतगुणाउत्तरोत्तरवृद्धिरूपेताःआनंदायत्रैकतांयांतियश्चश्रोत्रियप्रत्यक्षः॥अथैषएवसंप्रसादलक्षणःपरमआ
१॰ नान्यसत्त्वयत्विना न्य× नंदः।तत्रहिकृत्स्नतोभूमाभूमत्वादमृतः॥इतरेतद्विपरीताःअत्रचश्रोत्रियत्वावृजिनत्वेतुल्येअकामहतत्वकृ
तोविशेषःआनंदशतगुणवृद्धिहेतुरत्रैतानिसाधनानिश्रोत्रियत्वावृजिनत्वाकामहतत्वानितस्यानंदस्यप्राप्त्यर्था

अथैषएवपरम आनंदः

दभिहितानि।यथाकर्माण्यग्निहोत्रादीनिदेवानांदेवत्वप्राप्तौ।तत्रचश्रोत्रियत्वावृजिनत्वलक्षणेकर्मणीअधरभू
मिष्वपिसमानेइतिनोत्तरानंदप्राप्तिसाधनेअभ्युपेयेते।अकामहतत्वंतुवैराग्यतारतम्योपपत्तेरुत्तरोत्तरभू
म्यानंदप्राप्तिसाधनमित्यवगम्यते॥सएषपरमानंदोविरक्तश्रोत्रियप्रत्यक्षोधिगतः॥तथाचवेदव्यासः॥यच्चका
मसुखंलोकेयच्चदिव्यंमहत्सुखं॥तृष्णाक्षयसुखस्यैतेकलांनार्हंतिषोडशीमिति॥ ॥७॥ ॥७॥ ॥

नान्यपिश्रोत्रियत्वादीनितत्तदानंदप्राप्तौसाधनानिविवक्षितानीत्यर्थः।ननुत्रयाणामविशेषश्चेत्तोकथंश्रोत्रियत्वा
वृजिनत्वयोःसर्वत्रतुल्यत्वंनहितेपूर्वभूमिषुश्रुतेतथावाकामहतत्ववदानंदोत्कर्षेतयोरपिहेतुतेतितत्राहतत्रचेति।
निर्द्धारणार्थासप्तमीनहिश्रोत्रियत्वादिभूयःसार्वभौमत्वादिसुखमनुभवितुमुत्सहतेतथाचसर्वत्रश्रोत्रियत्वादे
स्तुल्यत्वान्नतदानंदातिरेकप्राप्तावसाधारणंसाधनमित्यर्थः।यदुक्तमानंदशतगुणवृद्धिहेतुरकामहतत्वकृतोवि
शेषइतितदुपपादयत्यकामहतत्वेति।पूर्वपूर्वभूमिषुवैराग्यमुत्तरोत्तरभूम्यानंदप्राप्तिसाधनवैराग्यस्यत
रतमभावेनपरमकाष्ठोपपत्तेर्निरतिशयस्यतस्यपरमानंदप्राप्तिसाधनत्वसंभवादित्यर्थः।यश्चेत्यादिवाक्यस्य
त्वंतात्पर्यमुक्त्वाप्रकृतेपरमानंदेविद्वदनुभवंप्रमाणयतिसएषइति।निरतिशयमकामहतत्वेपरमानंदप्राप्ति
हेतुरित्यत्रप्रमाणमाहतथाचेति॥ ॥७॥ ॥७॥ ॥७॥ ॥

प्रकृतं प्रत्यक्भूतपरमानंदमेष इति परामृशति श्रुतिर्मेधावीत्याद्यातोऽव्याचष्टेनेत्यादिना। तथापि किं तद्भयकारणं तदाह यद्यदिति। मेधावित्वाद्धस्तातिशयशालित्वादिति यावत्। तदेव भयकारणं प्रकटयति सर्वमिति॥ सवा

एष ब्रह्मलोको हे सम्राडिति होवाच याज्ञवल्क्यः सोऽहमेवमनुशिष्टो भगवते तुभ्यं सहस्रं ददामि गवामतऊर्ध्वं विमोक्षायैव ब्रूहीति व्याख्यातमेतत्। अत्र ह विमोक्षायेत्यस्मिन्वाक्ये याज्ञवल्क्यो बिभयांचकार भीतवान् याज्ञवल्क्यस्य भयकारणमाह श्रुतिर्न याज्ञवल्क्यो वक्तृत्वसामर्थ्याभावाद्भीतवान् नानिर्ज्ञा। किं तर्हि मेधावी राजा सर्वेभ्यो मामामंतेभ्यः प्रश्ननिर्णयावसानेभ्यः उदरौत्सीदुपरोधं कृतवानित्यर्थः॥ यद्यन्मया निर्णीतं प्रश्नरूपं विमोक्षार्थं तत्तदेकदेशत्वेनैव कामप्रश्नस्य गृहीत्वा पुनः पुनर्मां पर्यनुयुंक्त एवं मेधावित्वादित्येतद्भयकारणं। सर्वं मदीयं विज्ञानं कामप्रश्नव्याजेनोपादित्सतीति॥ ३३॥ अत्र विज्ञानमयः स्वयंज्योतिरात्मा स्वप्ने प्रदर्शितः॥ स्वप्नांतबुद्धांतसंचारेण का

एष ब्रह्मलोकः सम्राडिति होवाच याज्ञवल्क्यः सोऽहं भगवते सहस्रं ददाम्यत ऊ द
र्ध्वं विमोक्षायैव ब्रूहीत्यत्र ह याज्ञवल्क्यो बिभयांचकार मेधावी राजा सर्वेभ्यो
मांतेभ्य उदरौत्सीदिति॥ ३३॥

र्यकरणव्यतिरिक्तता कामकर्मप्रविवेकश्चासंगतया महामत्स्यदृष्टांतेन प्रदर्शितः॥ पुनश्चाविद्या
त कार्यं स्वप्न एव घ्नंतीवेत्यादिना प्रदर्शितमर्थादविद्यायाः सतत्त्वं निर्द्धारितमतद्धर्माध्यारोपणरूपत्वमनात्मधर्मत्वं च॥ तथा विद्यायाश्च कार्यं प्रदर्शितं सर्वात्मभावः स्वप्न एव प्रत्यक्षतः सर्वोऽस्मीति मन्यते सोऽस्य परमो लोक इति तत्र च सर्वात्मभावः स्वभावोऽस्या एवमविद्याकामकर्मादिसर्वसंसारधर्मसंबंधातीतरूपमस्य साक्षात्सुषुप्ते गृह्यत इत्येतद्दर्शितापितं स्वयंज्योतिरात्मा एष परमश्चानंदः एष विद्याविषयः॥ स एष परमः संप्रसादः सुखस्य च परा काष्ठेत्येतदेवमंतेन ग्रंथेन व्याख्यातं॥ तच्चैतत्सर्वं विमो

एष एतस्मिन्नित्याद्युत्तरग्रंथस्य संबंधं वक्तुं वृत्तं कीर्त्तयत्यत्रेति। अत्रायं पुरुषः स्वयंज्योतिर्भवतीति वाक्यस्यायमर्थः। वृत्तमर्थांतरमनुद्रवति स्वप्नांतेति। कार्यकरणव्यतिरिक्तत्वं प्रदर्शितमिति संबंधः। उक्तमर्थांत

 रमाह कामेति अथ यत्रैनं घ्नंतीत्यादावुक्तमनुभाषते पुनश्चेति। किं तत् कार्यप्रदर्शनसामर्थ्यान्निर्द्धारित
 मविद्यायाः सतत्वं तदाह। तद्धर्मेति। अनात्मधर्मत्वमात्मनि चैतन्यवदस्वाभाविकत्वमविद्याकार्यवद्विद्या
कार्यं च स्वप्ने सर्वात्मभावत्वलक्षणं प्रत्यक्षतएव प्रदर्शितमित्याह तथेति। सुषुप्तेपि स्वप्नवदेतद्दर्शितमि
त्याह एवमिति। साक्षात्स्वरूपचैतन्यवशादित्येतत् अन्यथोत्थितस्य सुखपरामर्शो न स्यादिति भावः। उक्तं
विद्याकार्यं निगमयत्येष इति। तमेवविद्याविषयं विशदयति स एष इति। वृत्तानुवादमुपसंहरति एवं
तदिति। एवमेतेन ग्रंथेन ब्रह्मलोकांतवाक्येनेति यावत्। सोहमित्यादेस्तात्पर्यमनुवदति तत्रेति। यतो
 राजेत्थं मन्यतेऽतस्तस्य सहस्रदाने युक्ता प्रवृत्तिरित्यर्थः॥ ॥७॥ ॥अत ऊर्द्ध्वमित्यादेरभिप्रायम

ते च एते मोक्षबंधने सहेतुके सप्रपंचे निर्द्दिष्टे विद्याविद्याकार्येन तत्सर्वं दृष्टांतभूतमेवेतित
दार्ष्टांतिकस्थानीये मोक्षबंधने सहेतुके कामप्रश्नार्थभूते त्वया वक्तव्ये इति पुनः पर्यनुयु
क्ते जनकोऽत ऊर्द्ध्वं विमोक्षायैव ब्रूहीति॥ तत्र महामत्स्यवत् स्वप्नबुद्धांतावसंगः संचरत्येक
आत्मा स्वयंज्योतिरित्युक्तं॥ यथा चासौ कार्यकरणानि मृत्युरूपाणि परित्यजन्नुपाददा
नश्च महामत्स्यवत् स्वप्नांतबुद्धांतावनुसंचरति॥ तथा जायमानो म्रियमाणश्च तैरेव मृत्यु
रूपैः संयुज्यते चोभौ लोकावनुसंचरतीति संचरणे स्वप्नबुद्धांतानुसंचारस्य दार्ष्टांतिकत्वेन
सूचितं॥७॥ ॥

नुवदति तत्रेति। यद्यपि यथोक्तलक्षणे मोक्षबंधने प्रागेवोपदिष्टे तथापि पूर्वोक्तं सर्वं दृष्टांतभूतमेव
तयोरिति यतो राजा मन्यतेऽतो मोक्षबंधने दार्ष्टांतिकभूते वक्तव्ये याज्ञवल्क्येनेति मन्यमानस्तं
प्रेरयतीत्यर्थः। बंधमोक्षयोर्वक्तव्यत्वेन प्राप्तयोरपि प्रथमं बंधो वर्ण्यत इति वक्तुं तद्दृष्टांतं स्मारयति
तत्रेति दृष्टांतमनूद्य दार्ष्टांतिकस्य बंधस्य सूत्रितत्वं दर्शयति यथा चेत्यादिना। उभौ लोकाविति अत्र
प्रथममेवशब्दो द्रष्टव्यः॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

वृत्तमनूद्यानंतरप्रकरणमुत्थापयति नदितीति। इहेति अतः संसारी सन्नित्यर्थः। सनिमित्तं कामादिना निमि
त्तेन सहितमित्येतत्। प्रकरणारंभमुक्त्वा समनंतरवाक्यस्याव्यवहितेन संबंधमाह। तत्र चेति। स वा एष
एतस्मिन्बुद्धांते रत्वेत्युपक्रम्य स्वप्नांतायैवेति वाक्ये सम्यगापरामृश्यते स्वप्नांतशब्दस्य स्वप्नविषयत्वा
त्तदिह विस्तरेण सनिमित्तसंचरणं वर्णयितव्यमिति तदर्थोयमारंभः। तत्र च बुद्धांतात्स्वप्नांतमयमात्मानु
प्रवेशितः। तस्मात्संप्रसादस्थाने मोक्षदृष्टांतभूते। ततः प्रच्याव्य बुद्धांते संसारव्यवहारः प्रदर्शयितव्य
इति तेनास्य संबंधः स वै बुद्धांतस्वप्नांतक्रमेण संप्रसन्नः। एष एतस्मिन्संप्रसादे स्थित्वा ततः पुनरीष
त्प्रच्युतः। स्वप्ने रत्वा चरित्वेत्यादि पूर्ववद्बुद्धांतायैव द्रवति॥३४॥ इतश्चारभ्यास्य संसारो वर्ण्यते॥ यथा
यमात्मा स्वप्नांताद्बुद्धांतमागतः एवमयमस्माद्देहाद्देहांतरं प्रतिपत्स्यत इत्याहात्र दृष्टांतं तत्र यथा
लोके अनः शाकटं सुसमाहितं सुष्ठु भृशं वा समाहितं भांडोपस्करणेनोलूख

स वा एष एतस्मिन्स्वप्नांते रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रति[न्या]यं प्रतियोन्याद्रवति न्या १
बुद्धांतायैव॥३४॥ तद्यथानः सुसमाहितमु[त्स]र्जद्यायादेवमेवायं शारीर आत्मा प्राज्ञेना
त्मनान्वारू[ढ] उत्सर्जन्याति॥ ॥३५॥ ॥ लमुशलशूर्पपीठरादिना अन्नाद्येन च संपन्नेन संभारेणा

क्रांतमित्यर्थः। तथा भाराक्रांतं सदुत्सर्जच्छब्दं कुर्वद्यथा यायात् गच्छेच्छाकटिकेनाधिष्ठितं सदेवमे क
वयथोक्तो दृष्टांतोयं शारीरः शरीरे भवः कोसौ आत्मा लिंगोपाधिर्यः स्वप्नांतबुद्धांताविव जन्ममरणा
भ्यां पाप्मसंसर्गवियोगलक्षणाभ्यामिहलोकपरलोकावनुसंचरति यस्य उत्क्रमणमनुप्राणा
द्युत्क्रमणं स प्राज्ञेन परेणात्मनान्वारूढोधिष्ठितः अवभास्यमानः तथा चोक्तमात्मनैवायं ज्यो
तिषास्त इत्युत्सर्जन्याति॥ तत्र चैतन्यात्मज्योतिषा भास्ये लिंगे प्राणप्रधाने गच्छति त
दुपाधिरात्मा गच्छतीव। तथा च श्रुत्यंतरं कस्मिन्न्वहमित्यादि। ध्यायतीवेति च॥ ॥३५॥ ॥
वृत्यर्थं विशिनष्टि संप्रसादेति। कथं पुनः संप्रसन्नस्य संसारोपवर्णनमित्याशंक्याह तत इति। प्रागुक्तः स
म्यगर्थोऽव्यवहितो ग्रंथस्तेनेति परामृश्यते समनंतरग्रंथः षष्ठ्योच्यते वाक्यस्याव्यवहितेन संबंध मुक्त्वा
तदक्षराणि योजयति स वै बुद्धांतादिति। स्वप्नांते रत्वा चरित्वेत्यादि बुद्धांतायैवाद्रवतीत्येतदंतं पूर्ववदिति। यो

जनात्तद्यथेत्यादेरितिनुकामयमानस्त्येतस्यसंदर्भस्यतात्पर्यंतदिहेत्यत्रोक्तमनुवदती तस्मात्स्येति।
तद्यथेत्यस्माद्वाक्यादित्येततु।दृष्टांतवाक्यमुत्थाप्यव्याकरोतियथेत्यादिना।इ तस्त्यत्र दृष्टांतमाहेति
योजना।भांडोपस्करणेनभांडप्रमुखेनगृहोपकरणेनेतियावत्।तदेवोपकरणंविशिनष्टिउलूखले
तिपिठरंपाकार्थंस्थूलभांडं।अन्वयंदर्शयितुंयथाशब्दोनूद्यतेलिंगविशिष्टमात्मानंविशिनष्टिय:
स्वप्नेति।जन्ममरणेविशादयतिपाप्मेतिकार्यकरणानिपाप्मशब्देनोच्यंतेशारीरस्यप्राधान्यंद्यो
तयतियस्यचेति।उत्सर्जन्याताीतिचेतदंगीकृतमात्म नोगमनमित्याशंक्याहतत्रेति।लिंगोपा
धेरात्मनोगमनप्रतीतिरित्यत्राथर्वणश्रुतिंप्रमाणयतितथाचेति।उत्सर्जनूयातीतिश्रुतेर्मुख्या
र्थत्वार्थमात्मनोवस्तुतोगमनेकिंनस्यादित्याशंक्याहध्यायतीवेतिचेति॥ ॥७॥ ॥
अतएवोक्तंप्राज्ञेनात्मनान्वारूढइति।अन्यथाप्राज्ञेनैकीभूतःशाकटवत्कथमुत्सर्जयाति।तेन
लिंगोपाधिरात्मा उत्सर्जन्मर्मसुविनिकृंत्यमानेषुदुःखवेदनयार्त्तःशब्दंकुर्वन्यातिगच्छतितत्कस्मि
न्कालइत्युच्यते॥यत्रैतदिवक्ष्येतदितिक्रियाविशेषणमूर्द्धोच्छ्वासीयत्रोर्द्ध्वोच्छ्वासित्वमस्यभवती।यथैः

यत्रैतदूर्ध्वोच्छ्वासीभवति॥३५॥

॥दृश्यमानस्याप्यनुवदनंवैराग्यहेतोः॥ईदृशःकष्टःखल्वयंसंसारः॥येनोत्क्रांतिकालेमर्मसुनिकृ
त्यमानेषुस्मृतिलोपोदुःखवेदनार्त्तस्यपुरुषार्थसाधनप्रतिपत्तौचासामर्थ्यंपरवशीकृतचित्तस्य।त
स्माद्यावदियमवस्थानागामि ष्यतितावदेवपुरुषार्थसाधनकर्त्तव्यतायामप्रमत्तोभवेदित्याह
कारुण्यात्श्रुतिः॥तदस्योच्छ्वासित्वं॥३५॥ ॥ औपाधिकमात्मनोगमनमित्यत्रलिंगांतरमाहतएवेति
।कथमेतावतानिरुपाधेरात्मनोगमनंनेष्यतेतत्राहान्यथेति।प्रमाणफलंनिगमयतितेनेति।तत्क
स्मिन्नित्यत्रतच्छब्देनार्तस्यशब्दविशेषकरणपूर्वकंगमनंगृह्यतेएतदूर्द्ध्वोच्छ्वासित्वमस्ययथास्या
त्तथायस्मिन्कालेभवतितस्मिन्कालेतत्गमनमित्युपपादयत्युच्यतइत्यादिना।किमितिप्रत्य
क्षमर्थंश्रुतिरनुवदतितत्राहदृश्यमानस्येति।कथंसंसारस्वरूपानुवादमात्रेणवैराग्यसिद्धिस्तत्राहे
दृशइति।ईदृशत्वमेवविशादयतियेनेत्यादिना।अनुवादश्रुतेरभिप्रायमुपसंहरतितस्मादिति।प्र

अत्र तु श्रुत्यमनूद्य तद्युक्तत्वेन सयत्रेत्यादिवाक्यमादाय व्याकरोति तदस्येत्यादिना॥

प्रश्नपूर्वकंकार्श्यनिमित्तंस्वाभाविकमागंतुकंचेतिदर्शयतिकिंनिमित्तेत्यादिनाकथंज्वरादिनाकार्श्यप्रा
प्तिरित्याशंक्याहोपतपथमानोहीति।यथोक्तनिमित्तद्वयवशात्कार्श्यप्राप्तिंनिगमयत्यणिमानमिति।क
स्मिन्कालेतदूर्ध्वोच्छ्वासित्वमस्येतिप्रश्नस्योत्तरमुक्तयाविधयासिद्धमित्याहयदेति।अवशिष्टप्रश्नत्र
कस्मिन्कालेकिंनिमित्तंवास्यादित्युच्यते॥सोयंप्राकृतःशिरःपाण्यादिमान्पिंडोयत्रयस्मिन् =
कालेयमणिमानमणोर्भावमणुत्वंकार्श्यमित्यर्थःनिएतिगच्छतिकिंनिमित्तंजरयावास्वयमे
त वकालपक्वफलवज्जीर्णःकार्श्यंगच्छति।उपपतीत्युपतपतूज्वरादिरोगस्तेनोपतपतावाउपत =
प्यमानोहिरोगेणविषमाग्नितयान्नंभुक्तंनजरयतिततोन्नरसेनानुपचीयमानःपिंडःकार्श्य
मापद्यते॥तदुच्यतउपतपतावेत्यणिमाणंनिगच्छतियदात्येतत्कार्श्यंप्रतिपन्नोजरादिनिमि
त्तैस्तदोर्ध्वोच्छ्वासीभवति॥यदोर्ध्वोच्छ्वासीतदाभ्यशाहितसंभारःशकटवदुत्सर्जन्याति।जरा
भिभवोरोगादिपीडनेकार्श्यापत्तिश्चशरीरवतोवश्यंभाविनएतेनर्थाइतिवैराग्यायेदमु

सयत्रायमणिमानंन्येतिजरयावोपतपतावाणिमानंनिगच्छतितद्यथाम्रं दुंबरंवा वो१
पिप्पलंवाबंधनात्प्रमुच्यतएवमेवायंपुरुषएभ्योंगेभ्यःसंप्रमुच्य॥ ॥७॥ ॥

च्यतेयदासावुत्सर्जन्यातितदाकथंशरीरंमुंचतीतिदृष्टांतउच्यतेतत्तत्रयथाम्रंफलमुदुंबरंवा
फलंपिप्पलंवाफलंविषमानेकदृष्टांतोपादानेमरणस्यानियतनिमित्तत्वस्यापनार्थमनि
यतानिहिमरणस्यनिमित्तान्यसंख्यातानितदपिवैराग्यार्थमेवयस्मादयमनेकनिमित्तमर
णवांस्तस्मात्सर्वदामृत्योरास्येवर्त्ततइतिबंधनाद्बध्यतेयेनवृंतेनसबंधकारणोरसोयस्मि
ना न्वाबध्यतइतिवृंतमेवोच्यतेबंधनंतस्माद्रसाद्वृंताद्वाबंधसंप्रमुच्यतेवानायनेकनिमित्तमेवमे
वायंपुरुषोलिंगात्मालिंगोपाधिरभ्योंगेभ्यश्चक्षुरादिदेहावयवेभ्यःसंप्रमुच्यसम्यग्निर्लेपेनप्रमु
यत्योत्तरमाहयदोर्ध्वोच्छ्वासीति।तत्रहिकार्श्यनिमित्तंसंभृतशकटवन्नानाशब्दकरणंस्वरूपेशरीरवि
मोक्षणंचप्रयोजनमित्यर्थः।सयत्रेत्यादिवाक्यादर्थसिद्धमर्थमाहजरेति॥तद्यथेत्यादिवाक्यंप्रश्न

पूर्वकमादायव्याचष्टेयदेत्यादिना।फलंबंधनात्प्रमुच्यतइतिसंबंधः।किमितिविषमानेकदृष्टांतोपा
दानमेकेनापिविवक्षितसिद्धेरित्याशंक्याहविषमेतिकथंमरणस्यानियतान्यनेकानिनिमित्तानि
संभवंतीत्याशंक्यानुभवमनुसृत्याहानियतानीति।अथमरणस्यानियतानेकनिमित्तवत्वसंकीर्त्तनं
कुत्रोपयुज्यतेतत्राहएतदपीति।तदर्थत्वमेवसमर्थयतेयस्मादिति।इत्यत्राप्रमत्तैर्भवितव्यमितिशेषः।
वृंतेनसहफलंयेनरसेनसंबध्यतेसरसोबंधनकारणभूतोबंधनंवृंतमेववाबंधनंयस्मिन्फलंबध्य
तेरसेनेतिव्युत्पत्तेस्तस्मात्बंधनादनेकनिमित्तवशात्पूर्वोक्तस्यफलस्यभवतिप्रमोक्षणमित्याह
बंधनादित्यादिना।लिंगमात्मोपाधिरस्येतितद्विशिष्टः।शारीरस्तथोच्यतेसंप्रमुच्याद्भवतीतिसंबंधः
॥७॥ ॥ ॥७॥ ॥
।सम्मित्युपसर्गस्यतात्पर्यमाहनेत्यादिना॥ ॥७॥ ॥

यदिस्वप्नावस्थायामिवमरणावस्थायांप्रा [illegible] णेनदेहंरक्षन्नाद्रवतीति
नाद्रियतेकेनप्रकारेणतर्हितदादेहांतरंप्रतिगमनमित्याशंक्याहकिंतर्हीति। वायुनाप्राणेनसहका
रणजातमुपसंहृत्याद्रवतीतिपूर्ववत्संबंधः।पुनःप्रतिन्यायमितिप्रतीकमादायपुनःशब्दस्यतात्प
किंतर्हिसहवायुनोपसंहृत्यपुनःप्रतिन्यायं॥पुनःशब्दात्पूर्वमथयंदेहांतर [illegible] मसकृद्गतवान्
यथास्वप्नबुद्धांतौपुनःपुनर्गच्छति॥तथापुनःप्रतिन्यायंप्रतिगमनेयथागतमित्यर्थः॥प्रतियोनी
योनिंप्रतिकर्मश्रुतादिवशादाद्रवतिकिमर्थंप्राणायैवप्राणव्यूहायेत्यर्थः॥सप्राणएवहिग
च्छति॥ततःप्राणायैवेति।विशेषणमनर्थकं॥प्राणव्यूहायहिगमनंदेहा [illegible] द्देहांतरंप्रतितेनह्य
स्यकर्मफलोपभोगार्थसिद्धिर्नप्राणसत्तामात्रेणतस्मात्तादर्थ्यार्थयुक्तंव्यूहायेति। तत्रास्यश
रीरंपरित्यज्यगच्छतोनान्यस्यदेहांतरस्योपादानेसामर्थ्यमस्तिदेहेंद्रियासंयोगात्नचान्यस्य

पुनःप्रतिन्यायंप्रतियोन्याद्रवतिप्राणायैव॥३६॥

भृत्यस्थानीयागृहमिवराज्ञेशारीरांतरंकृत्वाप्रतीक्षमाणाविद्यंतेऽथैवंसतिकथमस्यशारीरांत
रोपादानमितिउच्यतेसर्वंह्यस्यजगत्स्वकर्मफलोपभोगसाधनत्वायोपात्तं॥स्वकर्मफलभोगा लो
यचायंप्रवृत्तोदेहाद्देहांतरंप्रतिपित्सुस्तस्मात्तत्सर्वमेवजगत्स्वकर्मणाप्रयुक्तंतत्कर्मफलोप
भोगयोग्यंसाधनंकृत्वाप्रतीक्षतएव॥कृतंलोकंपुरुषोभिजायतइतिश्रुतेः॥यथास्वप्नाज्जा
गरितंप्रतिपित्सोः॥३६॥ ॥ ॥यमाहपुनरित्यादिना। तथापुनराद्रवतीतिसंबंधः। यथापूर्वमि
मंदेहंप्राप्तवान्पुनरपितथैवदेहांतरंगच्छतीत्याहप्रतिन्यायमिति।देहांतरगमनेकारणमाहकर्मे
ति।आदिशब्देनपूर्वप्रज्ञागृह्यतेप्राणव्यूहायप्राणानांविशेषाभिव्यक्तिलाभायेतियावत्।प्राणाये
तिश्रुतिःकिमर्थमित्थंव्याख्यायतेतत्राह।सप्राणइति।एतच्चतदंतरप्रतिपत्त्यधिकरणेनिर्द्धारि
तं।प्राणायेतिविशेषणस्यानर्थक्यादुक्तंप्राणव्यूहायेतिविशेषणमित्याहप्राणेति।नन्वस्यप्रा

 णः सह वर्त्तते चेत्तावतैव भोगसिद्धेरलं प्राणाग्रहेणेत्याशंक्याह तेन हीति। अन्यथा सुषुप्तिमूर्छयो
रपि भोगप्रसक्तेरित्यर्थः। तादर्थ्यार्थं प्राणस्य भोगशेषत्वसिध्यर्थमिति यावत्। तद्यथा राजानमित्या
दिवाक्यव्यावर्त्यामाशंकामाह तत्रेति। मुमूर्षावस्थासमन्यर्थः। अथास्य स्वयमसामर्थ्येपि शरीरां
तरकर्त्तारोन्ये भविष्यंतीति यथा राज्ञो भृत्या गृहनिर्मातारस्तत्राह नेति। स्वयमसामर्थ्यमन्येषां चा
सत्त्वमिति स्थितं फलितमाहाथेति। तद्यथेत्यादिवाक्यस्य तात्पर्यं दर्शयन्नुत्तरमाहोच्यत इति। भ
वत्वत्तस्य स्वकर्मफलोपभोगसाधनत्वसिध्यर्थं सर्वं जगदुपात्तं तथापि देहाद्देहांतरं प्रतिपित्समा
नस्य किमायातमित्याशंक्याह स्वकर्म्मेति। स्वकर्मणेत्यत्र स्वशब्दस्तत्कर्मफलोपभोगयोग्य
मित्यत्र तच्छब्दश्च प्रकृतभोक्तृविषयो तत्र प्रमाणमाह कृतमिति। पुरुषो हि त्यक्तवर्त्तमानदेहो भू
२ तपंचकादिना निर्मितमेव देहांतरमभिव्याप्य व्यवतिष्ठत इति श्रुतेरर्थः। उक्तमेवार्थं दृष्टांतेन स्प
ष्टयति यथेति। स्वप्रस्थानाज्जागरितस्थाने प्रतिपत्तुमिच्छतः शरीरं पूर्वमेव कृतेनापूर्वं क्रियते
तथा देहांतरं प्रतिपित्समानस्य पंचभूतादिना कृतमेव देहांतरमित्यर्थः॥ ॥७॥ सर्वेषांभू
तकथमिति लोकप्रसिद्धो दृष्टांत उच्यते॥ तत्तत्र यथा राजानं राज्याभिषिक्तमायांतं स्वराष्ट्रे उग्रा जातिविशे
षाः क्रूरकर्मिणो वा प्रत्येनसः प्रत्येनसि पापकर्मणि नियुक्ताः प्रत्येनसस्तस्करादिदंडनादौ युक्ताः सू
तद्यथा राजानमायंतमुग्राः प्रत्येनसः सूतग्रामण्योन्नैः पानैरावसथैः प्रतिकल्पंतेयमायात्ययमाग
च्छतीत्येवं हैवंविदं ॥ तांश्च ग्रामण्यश्च सूतग्रामण्यः सूता वर्णसंकरजा जातिविशेषाः ग्रामण्यो
ग्रामनेतारस्ते पूर्वमेव राज्ञ आगमनं बुध्वान्नैर्भोज्यभक्ष्यादिप्रकारैः पानैर्मदिरादिभिरावसथैश्च प्रा
सादादिभिः प्रतिकल्पंते निष्पन्नैरेव प्रतीक्ष्यंते ऽयं राजा आयात्ययमागच्छतीति एवं वदंतः। यथायं दृष्टांत ए
वं ह एवंविदं कर्मफलस्य वेदितारं संसारिणमित्यर्थः॥ ॥ तानां देहांतरं कृत्वा संसारिणि परलोकाय प्रस्थि
ते प्रतीक्षणं केन प्रकारेणेति प्रश्नपूर्वकं दृष्टांतवाक्यमुक्त्वाथ याचष्टे तत्रेत्यादिना। तत्र पापकर्मणि नियुक्तत्वमेव
व्यनक्ति तस्करादीति। आदिपदेनान्येपि निग्राह्या गृह्यंते दंडनादावित्यादिशब्दो हिंसाप्रभेदसंग्रहार्थः। ब्राह्मण्यां क्षत्रिया
त्सूत इति स्मृतिमाश्रित्य सूतशब्दार्थमाह वर्णसंकरेति। भोज्यभक्ष्यादिप्रकारैरित्यादिशब्देन लेह्यचोष्ययोः संग्र
हः मदिरादिभिरित्यादिपदेन क्षीरादिर्गृह्यते प्रासादादिभिरित्यादिशब्दो गोपुरतोरणादिग्रहार्थः॥ ॥७॥॥

विद्यान्मात्रे प्रतीयमाने किमिति कर्मफलस्य वेदितारमिति विशेषोपादानमित्याशंक्याह कर्मफले हीति। तत्क
र्मप्रयुक्तानीत्यत्र तच्छब्दः संसारिविषयः। संसारिणो वस्तुतो ब्रह्माभिन्नत्वात्तस्मिन्ब्रह्मशब्दः। अभ्यासस्तु
उभयत्रादरार्थः। तद्यथा राजानं प्रयियासंतमित्यादिवाक्यस्यावतरणं चोद्याममुत्थापयति तमेवमिति। वागाद
यस्तमनुगच्छंतीत्याशंक्याह ययेवेति। तत्क्रियाप्रणुन्नास्तस्य गंतुर्वागादिव्यापारेण प्रेरिताः समाहूता इतिया
कर्मफले हि प्रस्तुते तदेषशब्देन परामृश्यते॥ सर्वाणि भूतानि शरीरकर्तॄणि करणानुग्रहीतॄणि
चादित्यादीनि तत्कर्मप्रयुक्तानि कृतैरेव कर्मफलोपभोगसाधनैः प्रतीक्षंत इदं ब्रह्म भोक्तृ कर्तृ चा
स्माकमायाति तथेदमागच्छतीत्येवमेव च कृत्वा प्रतीक्षंत इत्यर्थः॥३७॥ तमेवं जिगमिषुं के सह ग
च्छंति ये वा गच्छंति ते तत्क्रियाप्रणुन्ना आहोस्वित्तत्कर्मवशात्स्वयमेव गच्छंति॥ परलोकशरीरक

सर्वाणि भूतानि प्रतिकल्पंत इदं ब्रह्मायातीदमागच्छतीति॥३७॥ तद्यथा राजानं प्रयि
यासंतमुग्राः प्रत्येनसः सूतग्रामण्योऽभिसमायंत्येवमेवेममात्मानमंतकाले सर्वे प्रा
णा अभिसमायंति यत्रैतदूर्ध्वोच्छ्वासी भवति॥३८॥ ॥तृतीयं ब्राह्मणं॥ ॥७॥ ॥

तॄणि च भूतानीत्यत्रोच्यते दृष्टांतः॥ तद्यथा राजानं प्रयियासंतं प्रकर्षेण यातुमिच्छंतमुग्राः प्रत्ये
नसः सूतग्रामण्यस्तं यथाभिसमायंत्याभिमुख्येन समायंत्येकीभावेन तमभिमुखा आयंत्य
नाज्ञप्ता एव राज्ञा केवलं तज्जिगमिषाभिज्ञा एवमेवेममात्मानं भोक्तारमंतकाले सर्वे प्राणा
वागादयोऽभिसमायंति यत्रैतदूर्ध्वोच्छ्वासी भवतीति व्याख्यातं॥४९॥ चतुर्थाध्यायस्य तृतीयब्राह्म
णं॥ यानि च भूतानि परलोकशरीरं कुर्वंति यानि वा करणानुग्रहीतॄणि आदित्यादीनि तेष्वपि
यथोक्तप्रश्नप्रवृत्तिं दर्शयति परलोकेति। नाद्यः परलोकार्थं प्रस्थितस्य वागादिव्यापाराभावादाह्वा
नानुपपत्तेर्न द्वितीयो भोक्तृकर्मणापि वागादिष्वचेतनेषु स्वयं प्रवृत्तेरनुपपत्तेरिति चोदयितुरभिमा
नः। उत्तरवाक्येनोत्तरमाहात्रेत्यादिना मरणकालमेव विशिनष्टि यत्रेति। अचेतनानामपि रथादीनां
चेतनप्रेरितानां प्रवृत्तिदर्शनात्तु वागादीनामपि भोक्तृकर्मवशात्तदाहूतत्वमंतरेण प्रवृत्तिः संभवती

मरणकाले

बृ·भा·आ· ब्राह्मणांतरमुत्थापयति। सयत्रेति। तस्यसंबंधंवक्तुमुक्तंकीर्तयतिसंसारेति। वक्ष्यमाणोपयोगित्वे टी·अ·४
३५७ नोक्तमर्थांतरमनुद्रवतितत्रेति। संसारप्रकरणंसप्तम्यर्थः। संप्रत्याकांक्षापूर्वकमुत्तरब्राह्मणमाद
त्तेतस्यसंप्रमोक्षणमिति। एवंब्राह्मणमवतार्यतदक्षराणिव्याकरोतिसोयमित्यादिना। गत्वासंमोहमि
वन्येतीत्युत्तरत्रसंबंधः। कथमात्मनोदौर्बल्यंतदाहयद्देहस्येति। किमित्युपचारोमुख्यमेवात्मनोदौर्ब

सयत्रायमात्मासंसारोपवर्णनेप्रस्तुतः॥ तत्रायंपुरुषःएभ्योंगेभ्यःसंप्रमुच्येत्युक्तं॥ तस्यसंप्र
मोक्षणे॥ कस्मिन्कालेकथंचेतिसविस्तरंवर्णयितव्यमित्यारभ्यते॥ सोयमात्माप्रस्तुतोय
त्रयस्मिन्कालेअबल्यमबलभावंनिएत्यगत्वा॥ य द्देहस्यदौर्बल्यंतदात्मनएवदौर्बल्यमि
त्युपचर्यतेअबल्यंनेत्येति॥ नह्यसौस्वतोमूर्तत्वादबलभावंगच्छति॥ तथासंमोहमिवसंमू

॥सयत्रायमात्माबल्यंन्येत्यसंमोहमिवन्येति॥

ढतासंमोहोविवेकाभावः संमोहतामिवनिएतिनिगच्छति॥ नचास्यस्वतःसंमोहोऽसंमोहो
वास्तिनित्यचैतन्यज्योतिःस्वभावत्वात्तेनेवशब्दःसंमोहमिवन्येतीति। उत्क्रांतिकालेहिक
रणोपसंहारनिमित्तोव्याकुलीभावआत्मनइवलक्ष्यतेलौकिकैः तथाचवक्तारोभवंति
मूढःसंमूढोयमिति॥ ॥७॥ ॥

ल्यंकिंनस्यादित्याशंक्याहन हीति। यथायमबलभावंनिगच्छतितथासंमोहंसंमूढतामिवप्रतिपद्य
तविवेकाभावोहिसंमोहस्तथाचसंमूढतामिवनिगच्छतीतियुक्तमित्याहतथेति। इवशब्दार्थमाह
नचेतिकथंपुनरात्मनःसमारोपितोपिसंमोहःस्यान्नित्यचैतन्यज्योतिष्ट्वादित्याशंक्याहोत्क्रांतीति
व्याकुलीभावोलिंगस्येतिशेषः तत्रलौकिकींवार्तामनुकूलयतितथेति॥ ॥७॥ ॥ ५७

यथाश्रुतमिवशब्दं गृहीत्वा वाक्यं व्याख्याय पक्षांतरमाहाथवेति। इवशब्दप्रयोगस्योभयत्र योजनामेवाभि
नयत्यबल्यमिति। उभयत्र तद्योजनहेतुमाहोभयस्येति। तुल्यप्रत्ययेनाबल्यसंमोहयोरेककर्तृत्वनिर्देशा
दुभयत्रैवकारो द्रष्टव्य इत्याह समानेति। अथेत्यादिवाक्यमवतार्य व्याकुर्वन् कस्मिन्काले तत्संप्रमोक्षण
अथवोभयत्रेवशब्दप्रयोगो योज्यो ऽबल्यमिवनेत्यसंमोहमिवनेतीति। उभयस्य परोपाधिनिमित्त
त्वाविशेषात्। समानकर्तृकनिर्देशाच्च॥ अथास्मिन्काले एते प्राणा वागादय एनमात्मानमभिसमा
यंति तदास्य शारीरस्यात्मनोंऽगेभ्यः संप्रमोक्षणं कथं पुनः संप्रमोक्षणं केन वा प्रकारेणात्मानमभिस
मायंतीत्युच्यते। स आत्मा एतास्तेजोमात्रास्तेजसो मात्रास्तेजोमात्रास्तेजोवयवा रूपादिप्रकाशक
त्वाच्चक्षुरादीनि करणानीत्यर्थः॥ ता एताः समभ्याददानः सम्यग्निर्लेपेनाभ्याददानः आत्माभिमु
ख्येनाददानः संहरमाणः सस्वप्नापेक्षया विशेषणं समिति॥ न तु स्वप्ने निर्लेपेन सम्यगादानं॥ अ

अथैनमेते प्राणा अभिसमायंति स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति॥

स्तित्वादानमात्रं गृहीता वाक् गृहीतं चक्षुरस्य लोकस्य सर्वावतो मात्रामपादाय भुक्रमादायेत्या
दिवाक्येभ्यः हृदयमेव पुंडरीकाकाशमन्ववक्रमत्यन्वागच्छति हृदये ऽभिव्यक्तविज्ञानो भवतीत्यर्थः
॥ बुद्ध्यादिविक्षेपोपसंहारे सति॥ न हि स्वतश्चलनविक्षेपोपसंहारादिविक्रिया ध्यायतीव लेलाय
तीवेत्युक्तत्वात्॥ बुद्ध्याद्युपाधिद्वारैव हि सर्वविक्रियाध्यारोप्यते तस्मिन्॥ ॥१॥ ॥

मित्यस्योत्तरमाह। अथेत्यादिना। कथं चेत्युक्तं प्रश्नमनूद्य प्रश्नांतरं प्रस्तौति कथमिति। अत्रोत्तरत्वेनोत्तरवा
क्यमादाय व्याकरोत्युच्यत इत्यादिना। रूपादिप्रकाशनशक्तिमत्सत्त्वप्रधानभूतकार्यत्वात्। तेजोमा
त्राश्चक्षुरादीनीत्युक्तं॥ संप्रति समभ्याददान इत्यस्यार्थमाह ता एता इति। संहरमाणो हृदयमन्वव
क्रामतीत्यन्वयः। तत्समिति विशेषणं स्वप्नापेक्षयेति संबंधः। कथं स्वप्नापेक्षया विशेषणं तदाह न त्विति।
आदानमात्रमपि स्वप्ने नास्तीति कुतस्तद्या इत्यर्थं विशेषणमित्याशंक्याहास्तीति। स एतास्तेजोमात्राः
समभ्याददान इत्येतद्व्याख्याय हृदयमेवेत्यादि व्याचष्टे हृदयमित्यादिना। स विज्ञानो भवतीति वाक्य
शेषमाश्रित्य वाक्यार्थमाह हृदय इति। कथमात्मनो निष्क्रियस्य तेजोमात्रादानकर्तृत्वमित्याशंक्याह

बुध्यादीति। तेषां तद्विक्षेपस्य चोपसंहारे सत्यात्मनस्तदादानकर्तृत्वमौपचारिकमित्यर्थः। तर्हि तद्विक्षेपो
पसंहर्तृत्ववत्तदादानकर्तृत्वमपि मुख्यमेव भविष्यतीत्याशंक्याह नहीति। आदिशब्देन क्रियाविशेषः सर्वो
गृह्यते। कथं तर्हि प्रतीचिकर्तृत्वादि प्रथेत्याशंक्याह बुध्यादीति॥ ॥७॥ ॥स यत्रेत्यादि वाक्यमाकांक्षापूर्व
कमवतार्य व्याकरोति कदा पुनरित्यादिना। तस्य पुरुषशब्दाङ्गीकृतत्वप्राप्ते विज्ञानघ्नादित्यांशइति। तस्य चाक्षु
षत्वं साधयति भोक्तुरित्यादिना। यावद्देहधारणमिति कुतो विशेषणं तत्राह मरणकालेत्विति। आदित्यांश

कदा पुनस्तस्य तेजोमात्रस्यादानमित्युच्यते। स यत्रैष चक्षुषि भवश्चाक्षुषः आदित्यांशो भोक्तुः कर्मणा
प्रयुक्तो यावद्देहधारणं तावच्चक्षुषोनुग्रहं कुर्वन्वर्त्तते। मरणकालेत्वस्य चक्षुरनुग्राहं परित्यजति। स्वमा
दित्यात्मानं प्रतिपद्यते। तदेतदुक्तं यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणः चक्षुरादित्यमित्यादि। पु

प१

सयत्रैष चाक्षुषः पुरुषः पराङ् पर्यावर्त्ततेथा रूपज्ञो भवति॥१॥७॥७॥

नर्देहग्रहणकाले संश्रयिष्यंति। तथा स्वप्स्यतः प्रबुद्ध्यतश्च तदेतदाह॥ चाक्षुषः पुरुषो यत्र यस्मिन्का
ले पराङ् पर्यावर्त्तते परि समंतात्पराङ् व्यावर्त्तत इति अथात्रास्मिन्काले रूपज्ञो भवति। मुमूर्षुः रूपं न
जानाति तदायमात्मा चक्षुरादितेजोमात्राः समभ्याददानो भवति॥१॥ ॥७॥ ॥७॥ ॥

स्य चक्षुरनुग्रहमकुर्वतः स्वातंत्र्यं वारयति स्वमिति। मरणावस्थायां चक्षुराद्यनुग्राहकदेवतांशानामधिदै
वतात्मनोपसंहारे श्रुत्यंतरं संवादयति तदेतदिति। तर्हि देहांतरे वागादिराहित्यं स्यादित्याशंक्याह पुनरिति।
संश्रयिष्यंतिवागादयस्तत्तद्देवताधिष्ठिता यथास्थानमिति शेषः। मुमूर्षोरिव स्वप्स्यतः सर्वाणि करणानि लिं
गात्मनोपसंह्रियंते प्रबुध्यमानस्य चोत्सिसृप्सोरिव तानि यथास्थानं प्रादुर्भवंतीत्याह तथेति। उक्तेर्थे वाक्यं
पातयति तदेतदाहेति। पराङ्गावर्त्तत इति रूपवैमुख्यं चाक्षुषस्य विवक्षितमिति शेषः॥ ॥७॥ ॥७॥

तर्हिश्रोत्रोपसंहृतंचक्षुरत्यंतताभावीभूतमित्याशंक्याहैकीति।उक्तेर्थेलोकप्रसिद्धिंदर्शयतितदेति।चक्षु
षिदर्शितंन्यायंघ्राणेतिदिशतितथेति।यथाचक्षुर्देवतायानिवृत्तौलिंगात्मनाचक्षुरेकीभवतितथाघ्रा
णदेवतांशस्यघ्राणानुग्रहनिवृत्तिद्वारेणांशितयैक्यलिंगात्मनाघ्राणमेकीभवतीत्यर्थः।तन्निवृत्त्यपेक्ष

स्वप्नकालइवैकीभवतिकरणजातंस्वेनलिंगात्मना॥तदैनंपार्श्वस्थाआहुर्नपश्यतीति।तथाघ्रा
णदेवतानिवृत्तौघ्राणमेकीभवतिलिंगात्मनातदानजिघ्रतीत्याहुः॥तदोपलक्ष्यतेदेवतानिवृत्तिः

एकीभवतिनपश्यतीत्याहुरेकीभवतिनजिघ्रतीत्याहुरेकीभवतिनरसयतइत्याहुरे
कीभवतिनवदतीत्याहुरेकीभवतिनशृणोतीत्याहुरेकीभवतिनमनुतइत्याहुरेकीभ
वतिनस्पृशतीत्याहुरेकीभवतिनविजानातीत्याहुः॥ ॥७॥ ॥७॥ ॥

समानमन्यत्।जिह्वायांसोमोवरुणोवादेवतातन्निवृत्त्यपेक्षयानरसयतइत्याहुः तथानवदति
नशृणोतिनमनुतेनस्पृशतितनविजानातीत्याहुः॥तदोपलक्ष्यतेदेवतानिवृत्तिःकरणानांचहृ
दयएकीभावः॥ ॥७॥

यावरुणादिदेवतायांजिह्वायामनुग्रहनिवृत्तौजिह्वायालिंगात्मनैक्यव्यपेक्षयेत्यर्थः।तत्तदनुग्रा
हकदेवतांशस्यतत्रतत्रानुग्रहनिवृत्यातत्तदंशिदेवताप्राप्तौतत्करणस्यलिंगात्मनैक्यंभवतीत्यभि त
प्रेत्याहतथेति।मरणदशायांरूपादिदर्शनराहित्यमर्थद्वयसाधकमित्याहतदेति॥ ॥७॥ ॥

तस्य हैतस्येत्यादिवाक्यमुपादत्ते तत्रेति। मुमूर्षावस्थासमन्वयार्थः। केनायं प्रद्योतो भवतीत्यपेक्षायामाह
स्वप्नेति। यथा स्वप्नकाले स्वेन भासा स्वेन ज्योतिषा प्रस्वपितीति व्याख्यातं तथात्रापि तेजोमात्राणां यदादाने
तत्कृतेन वासनारूपेण प्राप्तफलविषयबुद्धिवृत्तिरूपेण स्वेन भासा स्वेन चात्मचैतन्यज्योतिषा हृदयाग्रप्र
द्योतनमित्यर्थः। तस्यार्थक्रियां दर्शयति तेनेति। किमिति लिंगद्वारात्मनो निर्गमनं प्रतिज्ञायते तत्राह त
थेति। यदि मरणकाले तेजोमात्रादानं न तर्हि सदा लिंगोपाधिरात्मेत्याशंक्याह तत्रवेति। सप्तम्या लिंग
मुच्यते सर्वदेति। लिंगसत्त्व दृशोक्तिः। आत्मोपाधिभूते लिंगे किं प्रमाणमित्याशंक्यात्मनि कूटस्थे से
तत्र हृदय उपसंहृतेषु करणेषु यो ऽन्त्यो व्यापारः स कथ्यते॥ तस्य हैतस्य प्रकृतस्य हृदयस्य हृदयच्छिद्रस्ये
त्येतत्। अग्रं नाडीमुखं निर्गमनद्वारं प्रद्योतते स्वप्नकाल इव स्वेन भासा तेजोमात्रादानकृतेन स्वे
नैव ज्योतिषात्मनैव॥ तेनात्मज्योतिःप्रद्योतेन हृदयाग्रेण एष आत्मा विज्ञानमयो लिंगोपाधि
र्निर्गच्छति निःक्रामति॥ तथाथर्वणे॥ कस्मिन्वहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते

तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति॥ ७॥ ॥ ७॥

प्रतिष्ठास्यामीति स प्राणमसृजतेति तत्र चात्मचैतन्यज्योतिः सर्वदाभिव्यक्ततरं॥ तदुपाधिद्वारा
ह्यात्मनि जन्ममरणगमनागमनादिसर्वविक्रियालक्षणः संव्यवहारः। तदात्मकं हि द्वादशविधं
करणं बुद्ध्यादि तत्सूत्रं तज्जीवनं सोऽन्तरात्मा जगतस्तस्थुषश्च। तेन प्रद्योतेन हृदयाग्रप्रकाशेन नि

व्यवहारदर्शनमित्याह तदुपाधीति। चक्षुरादिप्रसिद्धिरपि तत्र प्रमाणमित्याह तदात्मकं हीति। एकाद
शविधं करणमित्यभ्युपगमात् कुतो द्वादशविधत्वमित्याशंक्य विशिनष्टि बुद्ध्यादीति। वायुर्वै गौत
म तत्सूत्रमित्यादिश्रुतिरपि यथोक्ते लिंगे प्रमाणमित्याह तत्सूत्रमिति। जगतो जीवनमपि तत्र मानमि
त्याह। तज्जीवनमिति। एष सर्वभूतान्तरात्मेति श्रुतिरपि यथोक्तं लिंगं साधयतीत्याह सोऽन्तरात्मेति॥
लिंगोपाधेरात्मनो यथोक्तप्रकाशेन मरणकाले हृदयान्निष्क्रमणे मार्गप्रश्नपूर्वकमुत्तरवाक्येनोपदि
शति तेनेत्यादिना॥ ॥ ७॥ ॥ ७॥ ॥ ७॥ ॥ ७॥

चक्षुष्टो वेति विकल्पे निमित्तं सूचयत्यादित्येति। मूर्ध्नो वेति विकल्पे हेतुमाह ब्रह्मलोकेति। तत्प्राप्ति
निमित्तं चेत् ज्ञानं कर्म वा स्यादिति पूर्वेण संबंधः। देहावयवांतरेभ्यो निष्क्रमणे नियामकमाह यथेति।
कथं परलोकाय प्रस्थितमित्युच्यते प्राणगमनाधीनत्वाद्विज्ञानात्मगमनस्येत्याशंक्याह परलोकाये
ति। ननु जीवस्य प्राणादितादात्म्ये सति कथमनुशब्देन क्रमो विवक्ष्यते तत्राह यथा प्रधानेति। प्रधान
मनतिक्रम्य हि अयमन्वाख्यानेच्छा तथा च जीवादेः प्राधान्याभिप्रायेणानुशब्दप्रयोगो न क्रमाभि
केन मार्गेण निःक्रामतीत्युच्यते॥ चक्षुष्टो वा आदित्यलोकप्राप्तिनिमित्तं ज्ञानं कर्म वा यदि स्यात्।
मूर्ध्नो वा ब्रह्मलोकप्राप्तिनिमित्तं चेदन्येभ्यो वा शरीरदेशेभ्यः शरीरावयवेभ्यः। यथाकर्म यथा
श्रुतं। तं विज्ञानमात्मानमुत्क्रामंतं परलोकाय प्रस्थितं परलोकायोद्भूताकूतमित्यर्थः। प्राणः सर्वा
धिकारिस्थानीयो राज्ञ इवानूत्क्रामति प्राणमनूत्क्रामंतं वागादयः सर्वे प्राणा अनूत्क्रामंति। य

चक्षुष्टो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्यस्तमुत्क्रामंतं प्राणोऽनूत्क्रामति प्राणमनू
त्क्रामंतꣳ सर्वे प्राणा अनूत्क्रामंति सविज्ञानो भवति॥ ॥७॥ ॥७॥ ॥

था प्रधानान्वाचिख्यासेयं न तु क्रमेण सार्थवद्गमनमिह विवक्षितं। तदेष आत्मा सविज्ञानो भ
वति स्वप्न इव विशेषविज्ञानवाननुभवति कर्मवशात् न स्वतंत्रः। स्वातंत्र्येण सविज्ञानत्वे सर्वः कृत
कृत्यः स्यात्। नैव तु तल्लभ्यते। अत एवाह व्यासः सदा तद्भावभावित इति। कर्मणा तद्भाव्यमा
नेनांतःकरणवृत्तिविशेषाश्रितवासनात्मकविशेषविज्ञानेन सर्वो लोक एतस्मिन्काले सविज्ञा
नो भवति॥ ॥ प्रायेण देशकालभेदाभावादित्यर्थः। सार्थसमूहे व्यक्तिषु क्रमेण गमनं दृश्यते न
तथा घ्राणादिष्विति व्यतिरेकः। यदुक्तं हृदयाग्रद्योतनं तत्सविज्ञानश्रुत्या प्रकटयति तदेति। कर्मवशा
दिति विशेषणं साधयति नेति। विपक्षे दोषमाह स्वातंत्र्येणेति। इष्टापत्तिमाशंक्याह नैवेति। मुमूर्षोरस्वा
तंत्र्ये मानमाह अत एवेति। कर्मवशादुक्तं सविज्ञानत्वमुपसंहरति कर्मणेति। अंतःकरणस्य वृत्तिविशेषो
भावि देहविषयस्तदाश्रितं तद्रूपं यद्वासनात्मकं विशेषविज्ञानं तेनेति यावत्॥ ॥७॥ ॥

म्रियमाणस्य सविज्ञानत्वे सत्यर्थसिद्धमर्थमाह सविज्ञानमेवेति। गंतव्यस्य सविज्ञानत्वं विज्ञानाश्र
यत्वमित्याशंक्य विशिनष्टि विशेषेति। प्रागेवोक्तेतेः सविज्ञानत्वादिश्रुतेस्तात्पर्यमाह तस्मादिति
। पुरुषस्य कर्मानुसारित्वं तच्छब्दार्थः योगश्चित्तवृत्तिनिरोधः तस्य धर्मा यमनियमप्रभृतयस्तेषाम म
नुसेवने पुनः पुनरावर्त्तने परिसंख्यानाभ्यासो योगानुष्ठाने कर्तव्य इति प्रकृतश्रुतेर्विधेयोर्थ इति
शेषः। किं च पुण्योपचयकर्तव्यतारूपेर्थे सर्वमेव विधिकांडे पर्यवसितमित्याह सर्वशास्त्राणामि
ति। दुश्चरितादुपरमणं कर्तव्यमित्येतस्मिन्नर्थे निषेधशास्त्रमपि पर्यवसितमित्याह दुश्चरिता
सविज्ञानमेव चरणं तव्यमन्ववक्रामति अनुगच्छति। विशेषविज्ञानोद्भासितमेवेत्यर्थः। तस्मात्तत्काले
स्वातंत्र्यार्थयोगधर्मानुसेवने परिसंख्यानाभ्यासविशिष्टपुण्योपचयश्च श्रद्दधानैः परलोकार्थि
भिरप्रमत्तैः कर्त्तव्य इति सर्वशास्त्राणां यत्नतो विधेयोर्थः। दुश्चरिताच्चोपरमणं। न हि तत्काले श
क्यते किंचित्संपादयितुं। कर्मणा नीयमानस्य स्वातंत्र्याभावात्। पुण्यो वै पुण्येन कर्मणा भव

सविज्ञानमेवान्ववक्रामति॥

ति पापः पापेनेत्युक्तं। एतस्यात्यनर्थस्योपशमोपायविधानाय सर्वशाखोपनिषदः प्रवृत्ताः। न
हि तद्विहितोपायानुसेवनं मुक्त्वान्यं इतिकोस्यानर्थस्योपशमोपायोस्ति। तस्मादत्रैवोपनिषद्वि
हितोपाये यत्नपरैर्भवितव्यमित्येष प्रकरणार्थः॥ ॥७॥ ॥

श्चेति। ननु पूर्वं यथेष्टचेष्टां कृत्वा मरणकाले सर्वमेव तत् संपादयिष्यते नेत्याह न हीति। कर्मणानी
यमानत्वे मानमाह पुण्य इति। तर्हि पुण्योपचयादेव यथोक्तानर्थनिवृत्तेः किमर्थं तत्त्वज्ञानमित्या
शंक्याह एतस्येति। उपशमोपायस्तत्त्वज्ञानं तस्य विधाने प्रकाशने तदर्थमिति यावत्। देवताध्याना
दनर्थो निवर्तिष्यते किं तत्त्वज्ञानेनेत्याशंक्याह न हीति। तद्विहितेति तच्छब्देन प्रकृताः सर्वशाखो
पनिषदो गृह्यंते विधांतरेणानर्थध्वंसासिद्धौ फलितमाह तस्मादिति। ज्ञापितं सविज्ञानवाक्येनेति

रत्तमनूद्यप्रश्नपूर्वकमुत्तरंवाक्यमवतार्यव्याचष्टेशाकटवदित्यादिना।विहिताविद्याध्यानात्मिकाप्रतिषिद्धा
नग्नस्त्रीदर्शनादिरूपाअविहितायद्यादिविषयाअप्रतिषिद्धापथिपतिततृणादिविषयाविहितंकर्मयागादिप्र
तिषिद्धंब्रह्महननादिअविहितंगमनादिअप्रतिषिद्धंनेत्रपक्ष्मविक्षेपादिविद्याकर्मणोःफलोपभोगसाधनत्वप्रसि
द्धेरन्वारंभेपिकिमित्यन्वारभ्यतेवासनेत्याशंक्याहसाचेति।अपूर्वकर्मारंभादावंगंपूर्ववासनेत्यत्रहेतुमा
हनहीति।उक्तमेवहेतुमुपपादयतिनहीत्यादिना।इंद्रियाणांविषयेषुकौशलमनुष्ठानेप्रयोजकंतत्त्वफलोपभो

शाकटवत्संभृतसंभारउत्सर्जन्यातीत्युक्तं॥किंपुनस्तस्यपरलोकायप्रवृत्तस्यपथ्यदनंशाकटिकसंभा
रस्थानीयंगत्वावापरलोकंयद्भुंक्तेशरीराद्यारंभकंचयत्॥तत्किमित्युच्यते।तंपरलोकायगच्छंतमा
त्मानंविद्याकर्मणीविद्याचकर्मचविद्याकर्मणी।विद्यासर्वप्रकाराविहिताप्रतिषिद्धाचअविहिताअप्र
तिषिद्धाचतथाकर्मविहितंप्रतिषिद्धंचअविहितमप्रतिषिद्धंचसमन्वारभेतेसम्यगन्वारभेतेअनुग

तंविद्याकर्मणीसमन्वारभेते॥

व च्छतेपूर्वप्रज्ञाचपूर्वानुभवविषयाप्रज्ञातीतकर्मफलानुभववासनेत्यर्थः॥साचवासनाअपूर्वकर्मा
रंभेकर्मविपाकेचांगंभवति॥तेनासावन्वारभ्यतेनहितयावासनयाविनाकर्मकर्तुंफलंचोपभोक्तुं
शक्यते।नह्यनभ्यस्तेविषयेकौशलमिंद्रियाणांभवति।पूर्वानुभववासनाप्रवृत्तानांत्विंद्रियाणा
मिहाभ्यासमंतरेणकौशलमुपपद्यते॥दृश्यतेचकेषांचित्क्वासुचक्रियासुचित्रकर्मादिलक्षणा
सुविनैवेहाभ्यासेनजन्मतएवकौशलं॥ ॥७॥

गेहेतुर्नचांतरेणाभ्यासमिंद्रियाणांविषयेषुकौशलंभवतितस्मादनुष्ठानाद्यभ्यासाधीनमित्यर्थः।
तथापिकथंपूर्ववासनाकर्मानुष्ठानादावंगमित्याशंक्याहपूर्वानुभवेति।तत्रलोकानुभवंप्रमाणयति
दृश्यतेचेति।चित्रकर्मादीत्यादिशब्देनप्रासादनिर्माणादिगृह्यते॥ ॥७॥ ॥७॥

 पूर्ववासनोद्भवकृतंकार्यमु ॒क्तातदभावकृतंकार्यमाह कासुचिदिति। रज्जुनिर्माणादिष्विति यावत्। तत्रे
 वोदाहरणसौलभ्यमाह तथेति। तत्रहेत्वंतरमाशंक्यपरिहरति तत्त्वेति। कर्मानुष्ठानादौ पूर्वप्रज्ञायाहेतुत्वमु
पसंहरतितेनेति। समन्वारंभव चनार्थंनिगमयति तस्मादिति। तस्यैव तात्पर्यार्थमाह यस्मादिति॥ ॥७॥

कासुचिदत्यंतसौक र्ययुक्तास्वथकौशलं केषांचित्तथाविषयोपभोगेषुस्वभावत एव केषांचि
त्कौशलाकौशलेदृश्येते॥ तच्चैतत्सर्वंपूर्वप्रसोद्भवानुद्भवनिमित्तं॥ तेन पूर्वप्रज्ञयाविनाकर्म

पूर्वप्रज्ञाच॥२॥

णिवाफलोपभोगेवानकस्यचित्प्रवृत्तिरुपपद्यते। तस्मादेतत्त्रयंशाकटिकसंभारस्थानीयं
परलोकपथ्यदनंविद्याकर्मपूर्व प्रज्ञाख्यं॥ यस्माद्विद्याकर्मणिपूर्वप्रज्ञाचदेहांतरंप्रतिपत्त्यु
पभोगसाधनंतस्माद्विद्याकर्मादिशुभमेवसमाचरेत्॥ यथेष्टदेहसंयोगोपभोगौस्यातामि
तिप्रकरणार्थः॥२॥ ॥७॥

श्रीरामचंद्रायनमः॥श्रीगोपालकृष्णायनमः॥श्रीकृष्णपरमात्मनेनमः॥श्रीपरब्रह्मणेनमः॥ ॥

रणजलायुकावाक्यमवतारयितुं वृत्तमनूद्य वादिविवादानुदर्शयन्नादौ दिगंबरमतमाहैवमित्यादिना। दे य
वतावादिमतमाह। अथवेति। देवतायेन शरीरेण विशिष्टं जीवं परलोकं नयति तदातिवाहिकं शरीरांतरं तेने
तियावत्। सांख्यादिमतमाह किंवेति। सिद्धांतं सूचयन्नाहोस्विदिति। वैशेषिकादिपक्षमाह किंचेति। न्यून
त्वनिवृत्त्यर्थमाह किंवा कल्पनांतरमिति। तत्र सिद्धांतस्य प्रामाणिकत्वेनोपादेयत्वं वदन्नकल्पनांतराणा
मा मप्राणिकत्वेन त्याज्यत्वमभिप्रेत्याहोस्वित इति। तेषां सर्वात्मकत्वे हेत्वंतरमाह सर्वात्मके इति। कथं तर्हि क

किमेवं विद्यादिसंभारसंभृतो देहांतरं प्रतिपद्यमानो मुक्त्वा पूर्वं देहं पक्षीव वृक्षांतरं देहांतरं प्रतिपद्यते।
अथवातिवाहिकेन शरीरांतरेण कर्मफलजन्मदेशं नीयते। किंचात्रस्थस्यैव सर्वगतानां करणानां वृ
त्तिलाभो भवत्याहोस्विच्छरीरस्थस्य संकुचितानि करणानि मृतस्य भिन्नघटप्रदीपप्रकाशवत्सर्वतो
व्याप्य पुनर्देहांतरारंभे संकोचमुपगच्छंति॥ किंवा मनोमात्रं वैशेषिकसमय इव देहांतरारंभदेशं प्रतिग
च्छति। किंवा कल्पनांतरमेव वेदांतसमय इत्यपेक्ष्यते॥ त एते सर्व एव समाः सर्वेऽनंता इति श्रुतेः सर्वात्मका
नि तावत्करणानि सर्वात्मकप्राणसंश्रयाच्च॥ तेषामाध्यात्मिकाधिभौतिकपरिच्छेदः प्राणिकर्मज्ञा
नभावनानिमित्तः। अतस्तद्वशात्स्वभावतः सर्वगतानामपि प्राणानां कर्मज्ञानवासनानुरूप्येणैव दे प्राणि
हांतरारंभवशात्प्राणानां वृत्तिः संकुचते विकसते च॥ तथा चोक्तं समो मशकेन समो नागेन समोऽनेन स
र्वेणेति। तथा चेदं वचनमनुकूलं। स यो हैतानन्नेतानुपास्त इत्यादि तं यथा यथोपासत इति च॥ ॥७॥

रणानां परिच्छिन्नत्वधीरित्याशंक्याह तेषामिति। आध्यात्मिकादिरूपेण परिच्छिन्नत्वे तिस्थिते फलमाहा
त इति। तद्वशादुदाहृतश्रुतिवशादित्येतत्। स्वभावतो देवतास्वरूपानुसारेणेत्यर्थः। कर्मज्ञानवासनारू
पेणेत्यत्र भोक्तुरिति शेषः। उभयत्र संबंधार्थं प्राणानामिति द्विरुक्तं तेषां वृत्तिसंकोचादौ प्रमाणमाह त
था चेति। परिच्छिन्नापरिच्छिन्नप्राणोपासने गुणदोषसंकीर्तनमपि प्राणसंकोचविकासयोः सूचकमि
त्याह तथा चेदमिति। आधिदैविकेन रूपेण सर्वगतानामपि करणानामाध्यात्मिकाधिभौतिकरूपेण
परिच्छिन्नत्वात्तत्परिवृतस्य गमने सिध्यतीति सिद्धांतो दर्शितः॥ ॥७॥ ॥७॥ ॥

बृ·भा·श्रा· इदानीं तृणजलायुकादृष्टांताद्देहांतरं गृहीत्वा पूर्वदेहं मुंचत्यात्मेति। स्थूलदेहविशिष्टस्यैव परलोकगमनमि टी·श्र·४
३६२ तिपौराणिकप्रक्रियां प्रत्याख्यातुं दृष्टांतवाक्यतात्पर्यमाह॥ तत्रेत्यादिना॥ देहनिर्गमनात् प्रागवस्था
सप्तम्यर्थः॥ तदेवं यथोक्ता वासना हृदयस्था विद्याकर्मनिर्मितं भाविदेहं स्पृशति जीवोपि तत्राभिमानं क
रोति पुनश्च पूर्वदेहं [illegible] त्यजति यथा स्वप्ने देवोहमित्यभिमन्यमानो देहांतरस्थ एष भवति तथा

तत्र वासना पूर्वप्रज्ञाख्या विद्याकर्मतंत्रा जलौकावत् संततैव स्वप्नकालइव कर्मकृतदेहाद्देहांतर
मारभते हृदयस्थैव पुनर्देहांतरारंभे पूर्वाश्रयं विमुंचति। इत्येतस्मिन्नर्थे दृष्टांत उपादीयते॥ तत्तत्र
देहांतरसंचार इदं निदर्शनं॥ यथा येन प्रकारेण॥ तृणजलायुका तृणजलौ[illegible]का तृणस्यांतमवसानं
गत्वा प्राप्यान्यं तृणांतरमाक्रममाक्रम्याश्रित्यात्मानमात्मनः पू

तद्यथा तृणजलायुका तृणस्यांतं गत्वान्यमाक्रममाक्रम्यात्मानमुपसꣳहरति॥३॥

र्वावयवमुपसंहरत्यन्त्यावयवस्थाने। एवमेवायमात्मा यः प्रकृतः संसारी इदं शरीरं पूर्वोपात्तं निह
त्य स्वप्नं प्रतिपित्सुरिव पातयित्वाविद्यां गमयित्वाचेतनं कृत्वा स्वात्मोपसंहारेणान्यमाक्रमं तृणां
तरमिव तृणजलूकाशरीरांतरं गृहीत्वा प्रसारितया वासनयात्मानमुपसंहरति॥३॥ ॥

क्तौ तावपि तस्मान्न पूर्वदेहविशिष्टस्यैव परलोकगमनमित्यर्थः। स्वात्मोपसंहारो देहे पूर्वस्मिन्नात्मा
भिमानत्यागः प्रसारितया वासनया शरीरांतरं गृहीत्वेति संबंधः॥ ॥छ॥ ॥३॥

उपसंहारस्वरूपमाह तत्रेति। सप्तम्यर्थं विवरणोत्या आरभ्यमाण इति आरब्धे देहांतरे सूक्ष्मदेहस्याभिव्यक्ति
माह तत्रेति चैकर्मग्रहणं विद्यापूर्वप्रज्ञयोरुपलक्षणं। ननु लिंगदेहबलादेवार्थक्रियासिद्धौ कृते स्थूल
शरीरेणेत्याशंक्य तद्व्यतिरेकेणेतरस्यार्थक्रियाकारित्वं नास्तीति मत्वाह बाह्यं चेति आरब्धे देहद्वये क
रणेषु देवतानामनुग्राहकत्वेनावस्थानं दर्शयति तत्रेति। स्थूलो देहः सप्तम्यर्थः। करणव्यूहस्तेषामभि
व्यक्तिः पेशस्कारिवाक्यव्यावर्त्यमाशंक्याह तत्रेति। संसारिणो हि प्रकृते देहांतरारंभे किमुपादान

तत्रात्मभावमारभते। यथा स्वप्ने देहांतरमारभते स्वप्नांतरारंभ इव शरीर … रंभे देवो आरभ्यमा
णो देहे जंगमे स्थावरे वा। तत्र च कर्मवशात्करणानि लब्धवृत्तीनि संहन्यंते॥ बाह्यं च कुशामृत्ति।

एवमेवायमात्मेदं शरीरं निहत्याविद्यां गमयित्वान्यमाक्रममाक्रम्यात्मानमुपसंहरति॥३॥

काष्ठानीयं शरीरमारभ्यते। तत्र च करणव्यूहमपेक्ष्य वागाद्यनुग्रहायाग्न्यादिदेवताः संयंत्येए
ष देहांतरारंभविधिः॥ तत्र देहांतरारंभे नित्योपात्तमेवोपादानमुपमृद्योपमृद्य देहांतरमारभ
ते॥ आहोस्विदपूर्वमेव पुनः पुनरादत्त इति॥ ॥७॥ ॥ ॥

मस्ति किं वा नास्ति नास्ति चेत्तत्राभावरूपं कार्यं सिद्धेदस्ति चेत्तनु किं भूतपंचकमुतान्यदाद्ये
पि तन्नित्योपात्तमेव पूर्वपूर्वदेहोपमर्देनान्यमन्यं देहमारभते किं वान्यदन्यत् भूतपंचकमन्य
मन्यं देहं जनयति नाद्यो भूतपंचकस्य तत्तद्देहोपादानत्वे मायायाः सर्वकारणत्वस्वीकारविरोधा
न्न द्वितीयो भूतपंचकोत्पत्तावपि कारणांतरस्य मृग्यत्वात्तस्यैव देहांतरकारणत्वसंभवान्नेतरो दे
हस्य पांचभौतिकत्वप्रसिद्धिविरोधादिति भावः॥ ॥७॥ ॥७॥ ॥

 उत्तरं वाक्यमुत्तरत्वेनादत्ते अत्रेति। तच्छब्दार्थापेक्षितं पूरयन्नाह दृष्टांत इति। अवशिष्टं भागमादाय व्या
 चष्टे यथेत्यादिना। किंपुनरुपादानमेतावता देहांतरारंभे अभ्युपगतं भवति तत्राह नित्योपात्तानीति। शा
रीरद्वयारंभकाणीति शेषः तेषामुभयारंभकत्वेन मूर्त्तामूर्त्तब्राह्मणे प्रस्तुतत्वं दर्शयति यानीति। दे
अत्रोच्यते दृष्टांतस्तत्रैतस्मिन्नर्थे॥ यथा पेशस्कारी पेशः सुवर्णं तत्करोतीति पेशस्कारी सुवर्णका
रः॥ पेशसः सुवर्णस्य मात्रामपादायापच्छिद्य गृहीत्वान्यत्पूर्वस्माद्रचनाविशेषान्नवतरमभिनव
पा। तरं कल्याणात्कल्याणतरं रूपं तनुते निर्मिनोति एवमेवायमात्मेत्यादि पूर्ववत्। नित्योपात्तान्येव पृ
थिव्यादीन्याकाशांतानि। यानि द्वे वाव ब्रह्मणो रूपे इति चतुर्थे व्याख्यातानि पेशःस्थानीयानि तान्य

तद्यथा पेशस्कारी पेशसो मात्रामपादायान्यन्नवतरं कल्याणतरꣳ रूपं तनुत एवमेवायमा
त्मेदꣳ शरीरं निहत्याविद्यां गमयित्वान्यन्नवतरं कल्याणतरꣳ रूपं कुरुते पित्र्यं वा गांधर्वं
वा दैवं वा प्राजापत्यं वा ब्राह्मं वान्येषां वा भूतानां॥ ४॥ ॥७॥ ॥७॥ ॥

वोपमृद्योपमृद्यान्यदन्यच्च देहांतरं नवतरं कल्याणतररूपं संस्थानविशेषं देहांतरमित्यर्थः।
कुरुते पित्र्यं वा पितृभ्यो हितं पितृलोकोप भोगयोग्यमित्यर्थः। गांधर्वं गंधर्वाणामुपभोगयोग्यं
तथा दैवानां दैवं प्रजापतेः प्राजापत्यं ब्रह्मण इदं ब्राह्मं वा। यथाकर्म यथाश्रुतमन्येषां वा भूता
नां संबंधि शरीरांतरं कुरुत इत्यभिसंबध्यते। येस्य बंधनसंज्ञितास्तउपाधिभूताः यैः संयुक्तस्त
न्मयोयमिति विभाव्यते ते पदार्थाः पुंजीकृत्येहैकत्र प्रतिनिर्दिश्यंते॥ ॥७॥ ॥

हविकल्पे नियामकमाह यथाकर्मेति। शरीरारंभे मायात्मकभूतपंचकमुपादानमिति वदता भू
वा। तावयवानामपि सहैव गमनमित्युक्तं। इदानीं सर्वाश्रयमात्मेत्यादेस्तात्पर्यमाह। यस्येति। तानेवोपा
धिभूतान्पदार्थान्विशिनष्टि यैरिति। ननु पूर्वमप्येते पदार्था दर्शिताः किंपुनस्तत्प्रदर्शनेनेत्याशंक्या
ह पुंजीकृत्येति॥ ॥७॥ ॥७॥

सवाअयमात्माब्रह्मेतिभागंव्याकुर्वन्नात्मनोब्रह्मैक्यंवास्तवंवृत्तंदर्शयतिसवाइति।तस्यैवावास्तवंरू
पमुपन्यस्यतिविज्ञानमयइत्यादिना।ज्योतिर्ब्राह्मणेपिव्याख्यातंविज्ञानमयत्वमित्याहकतमइति।कस्मि
न्नर्थेमयट्प्रयुज्यतेतत्राह।विज्ञानेतिउक्तेमयडर्थेहेतुमाह।यस्मादिति।बुध्येक्याध्यासात्तद्धर्मस्यकर्त्र

सवैअयंयएवंसंसरत्यात्माब्रह्मैवपरएवयोशनायाद्यतीतोविज्ञानमयोविज्ञानंबुद्धिस्तेनोपल
क्ष्यमाणस्तन्मयः॥कतमआत्मेतियोयंविज्ञानमयःप्राणेष्वितिव्यक्तं॥विज्ञानमयोविज्ञानप्रायः
यस्मात्तद्धर्मत्वमस्यविभाव्यते॥ध्यायतीवलेलायतीवेति।तथामनोमयोमनःसन्निकर्षान्मनो

सवाअयमात्माब्रह्मविज्ञानमयोमनोमयःप्राणमयश्चक्षुर्मयःश्रोत्रमयः॥७॥

मयः॥तथाप्राणमयःप्राणःपंचवृत्तिस्तन्मयोयेनचेतनश्चलतीवलक्ष्यते॥तथाचक्षुर्मयःरूप
दर्शनकालेएवंश्रोत्रमयःशब्दश्रवणकालेएवंतस्यतस्येंद्रियस्यव्यापारोद्भवेतन्मयोभवति॥
एवंबुद्धिप्राणद्वारेणचक्षुरादिकरणमयःसंछरीरारंभकपृथिव्यादिभूतमयोभवति॥ ७ ॥

त्वादे।रात्मनिप्रतीतिरित्यत्रमानमाहध्यायतीवेति।मनःसन्निकर्षात्तेनदृश्यतयासंबंधादितिया
वत्।चक्षुर्मयत्वादेरूपलक्षणत्वमंगीकृत्याहेवमिति।उक्तमनूद्यसामान्येनभूतमयत्वमाहैवंबुद्धीति॥

भूतमयत्वेसत्यवांतरविशेषमाहतत्रेत्यादिना।नचाकाशपरमाएवभावादाकाशस्यश्रुतिविरुद्धारंभप्रक्रियानभ्यु
पगमादित्यभिप्रेत्याहतथाकाशेति।कथंपुनईमीदिमयत्वेकामादिमयत्वमुपयुज्यतेतत्राहनहीति।कथंध
मीदिमयत्वंसर्वमयत्वेकारणमित्याशंक्याहसमस्तमिति।तद्यदेतदित्यादेरर्थमाहकिंबहुनेति।विषयःशब्दादि
स्ततोन्यदपिप्रत्यक्षतोगृह्यमाणमादिशब्दार्थः।इदंमयत्वमदोमयत्वेगमकमित्याहतस्मादिति।विशेषतस्तन्म

तत्रपार्थिवशरीरारंभेपृथिवीमयोभवति।तथावरुणादिलोकेष्वाप्यशरीरारंभेआपोमयोभवतितथावायव्यश
रीरारंभेवायुमयोभवति।तथाकाशशरीरारंभेआकाशमयोभवतिएवमेतानितैजसानिदेवशरीराणितेष्वार
भ्यमाणेतन्मयस्तेजोमयोभवत्यतोव्यतिरिक्तानिपश्वादिशरीराणिनरकप्रेतादिशरीराणिचातेजोमयानि
तान्यपेक्ष्याहातेजोमयइत्येवंकार्यकरणसंघातमयःसन्नात्माप्राप्तव्यंवस्त्वंतरंपश्यन्निदंमयाप्राप्तव्यमित्येवंवि
परीतप्रत्ययस्तदभिलाषःकाममयोभवति।।तस्मिन्कामेदोषंपश्यतस्तद्विषयाभिलाषप्रशमेचित्तंप्रसन्न
मकलुषंशांतंभवतितन्मयोऽकाममयःएवंतस्मिन्विहतेकामेकेनचित्सकामःक्रोधत्वेनपरिणमतेतेनतन्म
योभवतिक्रोधमयःक्रोधःकेनचिदुपायेननिवर्तितोयदाभवतितदाप्रसन्नमनाकुलंचित्तंसदक्रोधउच्यतेतेनतन्म

जो पृथिवीमय आपोमयोवायुमयआकाशमयस्तेजोमयोऽतेजोमयःकाममयोऽकाममयःक्रोधमयोऽक्रोध =
मयोधर्ममयोऽधर्ममयःसर्वमयस्तद्यदेतदिदंमयोऽदोमयइति।। ।।७।। यः।।एवंकामक्रोधाभ्यामकामाक्रो
धाभ्यांचतन्मयोभूत्वाधर्ममयोऽधर्ममयश्चभवति।।नहिकामक्रोधादिभिर्विनाधर्मादिप्रवृत्तिरुपपद्यते।।यद्धि
कुरुतेकर्मतत्तत्कामस्यचेष्टितमितिस्मरणाद्धर्ममयोऽधर्ममयश्चभूत्वासर्वमयोभवति।।समस्तंधर्माधर्मयोः
कार्यं।।यावत्किंचिद्व्याकृतंतत्सर्वंधर्माधर्मयोःफलं।तत्प्रतिपद्यमानस्तन्मयोभवतिकिंबहुनातदेतत्सिद्धम
दं स्ययदयमिदंमयोगृह्यमाणविषयादिमयः।तस्मादयमदोमयइतिपरोक्षंकार्येणगृह्यमाणेननिर्दिश्य
ते।।अनंताह्यंतःकरणेभावनाविशेषाः।।नैवतेविशेषतोनिर्देष्टुंशक्यंते।तस्मिन्तस्मिन्क्षणेकार्यतोवग
म्यंते।।इदमस्यहृदिवर्ततेदोस्येति।तेनगृह्यमाणकार्येणेदंमदस्तयानिर्दिश्यते।।परोक्षोंतःस्थोव्यवहारो
यल्लौकिकिंविनाकिमितिसामान्योक्तिरित्याशंक्याहानेनाहीति।तदस्तित्वेमानमाहतस्मिन्निति।अवगतिप्रकारमभि
नयतीदमस्येति।इदंमयत्वमदोमयत्वंचोपसंहरतितनेत्यादिना।परोक्षत्वंव्याकरोत्यंतस्थइतिव्यवहितविषयव्य
ति वहारवानियावत्।इदानीमित्यस्मादुपरिष्टादपितेनेतिसंबध्यतेपरोक्षत्वावस्थेदानीमित्यत्स्कातनीयपाचप्रकृ
तोव्यवहारोनिर्दिश्यतइतिशब्दःसर्वमयत्वोपसंहारार्थः।। ।।७।। ।।७।। ।।

विज्ञानमयादिवाक्यार्थं संक्षिपति। संक्षेपतस्त्विति। करणाचरणयोरैक्यमपौनरुक्त्यमात्रं शंक्याह करणं ना
मेति। आदिशब्दः शिष्टाचारसंग्रहार्थः। वाक्यान्तरं शंकोत्तरत्वेनोत्थापयन्नाचष्टे ताच्छील्य इत्यादिना। कुत्र तर्हि
ताच्छील्यमुपयुज्यते तत्राह। ताच्छील्ये त्विति। पूर्वपक्षमुपसंहरति तत्रेत्यादिना। कर्मणां संसारकारणत्वमु

संक्षेपतस्तु यथाकर्तुं यथा वाचरितुं शीलमस्य सोऽयं यथाकारी यथाचारी स तथा भवति॥ करणं नाम नि
यता क्रिया विधिप्रतिषेधादिगम्याचरणं नामानियता इति विशेषः॥ साधुकारी साधुर्भवतीति यथाका
रीत्यस्य विशेषणं पापकारी पापो भवतीति च यथाचारीत्यस्य ताच्छील्यप्रत्ययोपादानादत्यंततार्येणैव स
तन्मयत्वं न तु तत्कर्ममात्रेणेत्याशंक्याह॥ पुण्यः पुण्येन कर्मणा भवति पापः पापेनेति पुण्यपापक

यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पु
ण्येन कर्मणा भवति पापः पापेन॥ ॥५॥ ॥

र्ममात्रेणैव तन्मयता स्यान्न तु ताच्छील्यमपेक्ष्यते॥ ताच्छील्ये तु तन्मयत्वातिशय इत्ययं विशेषः॥ तत्र
कामक्रोधादिपूर्वकपुण्यापुण्यकारिता सर्वमयत्वहेतुः संसारस्य कारणं देहाद्देहान्तरसंचारस्य च।
एतस्य युक्तो ह्यन्यदन्यद्देहान्तरमुपादत्ते तस्मात्पुण्यापुण्ये संसारस्य कारणं। एतद्विषयौ हि विधिप्रति
षेधौ॥ अत्र शास्त्रसाफल्यमिति॥ ॥५॥ ॥

पसंहरति एतस्य युक्तो हीति संसारप्रयोजके कर्मणि प्रमाणमाह एतद्विषयौ हीति। कथं यथोक्तकर्मवि
षयत्वं विधिनिषेधयोरित्याशंक्याहात्रेति। इतिशब्दः पूर्वपक्षसमाप्त्यर्थः॥ ॥५॥ ॥

सिद्धांतमवतारयत्यथोइति। संसारकारणस्याज्ञानस्यप्राधान्येनकामःसहकारीतितत्सिद्धांतंसमर्थ
यतेसत्यमित्यादिना। कामाभावेपिकर्मणःसत्वंदृष्टमित्याशंक्याहकामप्रहाणेति। ननुकामाभावेपि
नित्याद्यनुष्ठानात्पुण्यापुण्येसंचीयेतेतत्राहोपचितेइति। योहिपश्चुपुत्रस्वर्गादीननतिशायपुरुषार्थान्म

अथोअथन्येबंधमोक्षकुशलाःखल्वाहुः। सत्यंकामादिपूर्वकेपुण्यापुण्येशरीरग्रहणकारणे॥ तथा
पिकामप्रयुक्तोहिपुरुषःपुण्यापुण्येकर्मणीउपचिनोतिकामप्रहाणेतुकर्मविद्यमानमपिपुण्या
पुण्योपचयकरंनभवति। उपचितेअपिपुण्यापुण्येकर्मणीकामशून्येफलारंभकेनभवतस्तस्मा
त्कामएवसंसारस्यमूलंतथाचोक्तमाथर्वणे। कामान्यःकामयतेमन्यमानःसकर्मभिर्जायतेतत्र
तत्रेति॥ तस्मात्काममयएवायंपुरुषोयदन्यमयत्वंतदकारणंविद्यमानमपी। त्यतोवधारयतिका

अथोखल्वाहुःकाममयएवायंपुरुषइतिसयथाकामोभवतितत्क्रतुर्भवतियत्क्रतुर्भवति
तत्कर्मकुरुतेयत्कर्मकुरुतेतदभिसंपद्यते॥५॥ ॥७॥ ॥

ममयएवेति॥ यस्मात्सचकाममयःसन्यादृशे नकामेनयथाकामोभवतितत्क्रतुर्भवति। सकाम
ईषदभिलाषमात्रेणाभिव्यक्तोयस्मिन्विषयेभवतिसोविहन्यमानःस्फुटीभवन्क्रतुत्वमापद्यते
॥ क्रतुर्नामाध्यवसायोनिश्चयोयदनंतराक्रियाप्रवर्त्तते॥ यत्क्रतुर्भवतियादृक्कामकार्येणक्रतुना
यथारूपःक्रतुरस्यसोयंयत्क्रतुर्भवतितत्कर्मकुरुतेयद्विषयःक्रतुस्तत्फलनिर्वृत्तयेयद्योग्यंतत्क
र्मकुरुतेनिर्वर्त्तयतियत्कर्मकुरुतेतदभिसंपद्यते। तदीयंफलमभिसंपद्यते। तस्मात्सर्वमयत्वेऽस्यसं
सारित्वेचकाममयत्वमेवहेतुरिति॥५॥ ॥७॥ ॥

न्यमानस्तानेवकामयतेनत्तज्ञोगभूमौनत्तत्कामसंयुक्तोभवतीत्याथर्वणश्रुतेरर्थः। श्रुतियुक्तिसि
द्धमर्थंनिगमयतितस्मादिति। धर्मादिमयत्वस्यापिसत्वादवधारणानुपपत्तिमाशंक्याह। यदिति। सय
थाकामोभवतीत्यादिव्याचष्टेयस्मादित्यादिना यस्मादित्यस्यतस्मादितिव्यवहितेनसंबंधः। इतिशा
ब्दोब्राह्मणसमाप्त्यर्थः॥ ॥७॥ ॥७॥ ॥७॥ ॥

तत्रेतिगतत्र्यफलपरामर्शस्तदेवगतत्त्वं फलंविशेषतोत्तानुपृच्छतिकिंतदितिप्रतीकमादायव्याचष्टेलिं
गमिति।योवगच्छतिसप्रमात्रादिसाक्षीयेनसाक्ष्येणमनसावगम्यतेतन्मनोलिंगमितिपक्षांतरमाहाथवेति।
यस्मिन्निश्चयेनसंसारिणोमनःसक्तंतत्फलप्राप्तिस्तस्येतिसंबंधः।तदेवोपपादयतितदभिलाषोहीति।पू
र्वोक्तार्थमुपसंहरतितेनेति।कामस्यसंसारमूलत्वेसत्यर्थसिद्धमर्थमाहातइति।वंध्यप्रसवत्वंनिष्फल
त्वंतस्मिन्नर्थएषश्लोकोमंत्रोपिभवति।तदेवेतितदेवगच्छतिसक्तःआसक्तःतत्रोद्भूताभिलाषःस
न्नित्यर्थः।कथमेतिसहकर्मणायत्कर्मफलासक्तःसन्नकरोत्तेनकर्मणासहैवतदेतितत्फलमेति।
किंतत्लिंगंमनोमनःप्रधानत्वाल्लिंगस्यमनोलिंगमित्युच्यते।अथवालिंग्यतेगम्यतेवगच्छतियेन
तल्लिंगंतन्मनोयत्रयस्मिन्निश्चयेनसक्तमुद्भूताभिलाषमस्यसंसारिणः।।तदभिलाषोहितत्कर्म
कृतवान्तस्मात्तन्मनोभिषंगवशादेवास्यतेनकर्मणातत्फलप्राप्तिस्तेनैतत्सिद्धंभवतिकामो
मूलंसंसारस्येति।अतःछिन्नकामस्यविद्यमानान्यपिकर्माणिब्रह्मविदोवंध्यप्रसवानिभवंति

तदेषश्लोकोभवतितदेवसक्तःसहकर्मणैतिलिंगंमनोयत्रनिषक्तमस्यप्राप्यांतंकर्मणस्त
स्ययत्किंचेहकरोत्ययं।।तस्माल्लोकात्पुनरैत्यस्मैलोकायकर्मणइतिनुकामयमानः

पर्याप्तकामस्यकृतात्मनस्त्विहैवसर्वेप्रविलीयंतिकामाइतिश्रुतेः।किंचप्राप्यांतंकर्मणःप्राप्य
भुक्त्वांतमवसानंयावत्कर्मणःफलपरिसमाप्तिंकृत्वेत्यर्थः।कस्यकर्मणोंतंप्राप्येत्युच्यते।त
स्ययत्किंचकर्मइहास्मिंल्लोकेकरोतिनिर्वर्त्तयत्ययंतस्यकर्मणःफलंभुक्त्वांतंप्राप्यतस्माल्लो
कात्पुनरैत्यागच्छत्यस्मैलोकायअयंहिलोकः।कर्मप्रधानस्तेनेहकर्मणइतिपुनःकर्मकरणाय
पुनःकर्मकृत्वाफलासंगवशात्पुनरमुंलोकंयातीत्येवमिति।नुकामयमानःसंसरति।। ७ ।।
त्वंपर्याप्तकामस्यप्राप्तपरमपुरुषार्थस्येतियावत्।कृतात्मनःशुद्धबुद्धेर्विदिततत्त्वस्येत्यर्थः।इहेतिजी
वदवस्थोक्तिः।कामप्रधानःसंसरतिचेत्कर्मफलभोगानंतरंकामाभावान्मुक्तिःस्यादित्याशंक्याहकिं
चेति।इतश्चसंसारस्यकामप्रधानत्वमास्थेयमित्यर्थः।यावदवसानंतावद्भुक्त्वेतिसंबंधः।उक्तमेवसं
क्षिपतिकर्मणइतिइत्येवंपारंपर्येणसंसरणादृतेज्ञानान्नमुक्तिरितिशेषः।संसारप्रकरणमुपसंहरतिइ

अवस्थाद्वयस्य दर्शीति किं बंधं प्रबंधेन दर्शयित्वा सुषुप्तस्य दर्शीति किं मोक्षं वक्तुमथेत्यादि वाक्यं तत्राथशब्दार्थमाह
यस्मादिति।कामरहितस्य संसाराभावं साधयति फलासक्तस्येति।विदुषो निष्कामस्य क्रियाराहित्येन कर्म्यमयत्वसि
द्धमिति भावः।अकामयमानत्वे प्रश्नपूर्वकं हेतुमाह कथमिति।वासनारूपकामाभावादकामतेत्यर्थः।निष्कामत्वे
प्रश्नपूर्वकं हेतुमुक्त्वा व्याचष्टे कथमिति प्राप्तपरमानंदत्वान्निष्कामतेत्यर्थः।आप्तकामत्वे हेतुमाकांक्षापूर्वकमा
ह कथमित्यादिना।हेतुमेव साधयति यस्येति।तस्य युक्तमाप्तकामत्वमिति शेषः।उक्तमर्थं प्रमाणदर्शनार्थं प्रपे
यस्मात्कामयमान एवैवं संसरतीति।।अथ तस्मादकामायमानो न क्वचित्संसरति फलासक्तस्य गतिरुक्ता
ऽकामस्य हि क्रियानुपपत्तेरकामयमानो मुच्यत एव।।कथं पुनरकामायमानो भवति।।यः अकामो भव
त्यसावकामयमानः।।कथमकामतेत्युच्यते यो निःकामो यस्मान्निर्गताः कामाः सोयं निःकामः।कथं
कामा निर्गच्छंति यः आप्तकामो भवत्याप्ताः कामाः येन स आप्तकामः।।कथमाप्यंते कामाः आत्मकाम
त्वेन।।यस्यात्मैव नान्यः कामयितव्यो वस्त्वंतरभूतः पदार्थः।।आत्मैवानंतरोबाह्यः कृत्स्नः प्रज्ञानघ

अथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामः।।७।।   ।।७।।

न एकरसो नोर्ध्वं न तिर्यङ् नाध आत्मनोन्यत्कामयितव्यं वस्त्वंतरं।।यस्य सर्वमात्मैवाभूत्तत्केन
कं पश्येत्शृणुयान्मन्वीत विजानीयाद्वा एवं विजानन्कं कामयेत।।ज्ञायमानो ह्यन्यत्वेन पदार्थः
य कामयितव्यो भवति।न चासावन्यो ब्रह्मविदः आप्तकामस्यास्ति।एवमात्मकामतयाप्तकामः सन्निः
कामोऽकामयमानश्चेति मुच्यते।न हि यस्यात्मैव सर्वं भवति।।तस्यानात्मा कामयितव्योस्ति।अनात्मा चा
न्यः कामयितव्यः सर्वं चात्मैवाभूदिति विप्रतिषिद्धं।। ।।७।। ।।यस्यात्मैवेति।कामयितृत्वाभावं ब्रह्म
विदः श्रुत्यवष्टंभेन स्पष्टयति।यस्येति।इति विद्यावस्थायस्य विदुषोस्ति सोन्यमविज्ञानन्नकंचिदपि काम
येतेति योजना।पदार्थोन्यत्वेनाविज्ञातोपि कामयितव्यः स्यादिति चेन्नेत्याह ज्ञायमानो हीति।अनुभूतेस्मर
णाविपरिवर्त्तिनि कामनियमादित्यर्थः।अन्यत्वेन ज्ञायमानस्तर्हि पदार्थो विदुषापि कामयितव्यः स्यादि
त्याशंक्याह न चेति।आप्तकामस्य ब्रह्मविदो दर्शितरीत्या कामयितव्याभावे मुक्तिः सिद्धेत्युपसंहरति
य एवेति कथं कामयितव्याभावोऽनात्मनस्तथात्वादित्याशंक्याह न हीति।सर्वात्मत्वमनात्म कामयि
तृत्वं च स्यादित्याशंक्याहानात्मा चेति।   ।।७।।   ।।७।।   ।।७।। ।।

अथेत्यादिवाक्यं श्रौतमर्थमुक्त्वार्थसिद्धमर्थं कथयति सर्वात्मदर्शिन इति। कर्मजडानां मतमुक्त्वा यथाश्रु
तिविरोधेन प्रत्याचष्टे यत्त्विति। ब्रह्मविदि प्रत्यवायप्राप्तिमंगीकृत्योक्तमिश्रानीनसाप्तिरेव तस्मिन्नास्तीत्या
हयेन चेति। यथोक्तस्यापि ब्रह्मविदो विहितत्वादेव नित्याद्यनुष्ठानं स्यादिति चेन्नेत्याह नित्यमेवेति यो हि सदेवा
संसारिणमात्मानमनुभवति न च हेयमादेयं चात्मनोऽन्यत्पश्यति यस्मादेवं तस्मात्तस्य कर्म संस्पृष्टुमयोग्यं
सर्वात्मदर्शिनः कामयितव्याभावात्कर्मानुपपत्तिः। ये तु प्रत्यवायपरिहारार्थं कर्म कल्पयंति ब्रह्मविदोऽपि
तेषां नात्मैव सर्वं भवति प्रत्यवायस्य जिहासितत्वस्यात्मनोऽन्यस्याभिप्रेतत्वात्॥ येन चात्राशनायाद्यतीतो
नित्ये प्रत्यवायासंबद्धो विदित आत्मा तं वयं ब्रह्मविदं ब्रूमो नित्यमेवात्राशनायाद्यतीतमात्मानं पश्यति य
स्माच्च जिहासितव्यमन्यमुपादेयं वा यो न पश्यति तस्य कर्म न शक्यत एव संबंद्धुं॥ यस्त्वब्रह्मवित्तस्य भव
त्येव प्रत्यवायपरिहारार्थं कर्मेति न विरोधः॥ अतः कामाभावादकामयमानो न जायते मुच्यत एव॥ तस्यैवमका

न तस्य प्राणा उत्क्रामंति ब्रह्मैव सन्ब्रह्माप्येति॥६॥

मयमानस्य कर्माभावे गमनकारणाभावात्॥ प्राणा वागादयो नोत्क्रामंति देहात्॥ स च विद्वानाप्तकामः
आत्मकाम इहैव ब्रह्मभूतः। सर्वात्मनो हि ब्रह्मणो दृष्टांतत्वेन प्रदर्शितमेतद्रूपं तद्वा अस्यैतदाप्तका
ममात्मकामरूपमिति। तस्य हि दार्ष्टांतिकभूतोऽयमर्थः उपसंह्रियते अथाकामयमान इत्यादिना॥ स कथ
मेवंभूतो मुच्यत इत्युच्यते॥ यो हि सुषुप्तावस्थमिव निर्विशेषमद्वैतमलुप्तचिद्रूपज्योतिःस्वभावमात्मानं
पश्यति स इहैव ब्रह्म यद्यपि देहवानिव लक्ष्यते। स ब्रह्मैव सन्ब्रह्माप्येति यस्मान्न हि तस्याब्रह्मवित्त्वपरि
च्छेदहेतवः कामाः संति तस्मादिहैव ब्रह्मैव सन्ब्रह्माप्येति न शरीरपातोत्तरकालं॥ ॥७॥ ॥

यथोक्तब्रह्मविद्यया कर्माधिकारहेतूनामुपमर्दितत्वादित्यर्थः। कर्मसंबंधस्तर्हि कस्येत्याशंक्याह यस्त्वि
ति। न विरोधो विधिकांडस्येति शेषः। श्रुत्यर्थाभ्यां सिद्धमर्थमुपसंहरति अत इति। विद्यावशादित्येतत् कामा
भावात्कर्माभावाच्चेति द्रष्टव्यम्। अकामयमानोऽकुर्वाणश्चेति शेषः। देशांतरप्राप्त्यपेक्षा मुक्तिरित्येतन्निरा
कर्तुं न तस्येत्यादि व्याचष्टे न तस्येत्यादिना॥ ब्रह्मैव सन्नित्येतदवतारयति स चेति। कथं वर्तमाने देहे तिष्ठन्ने
व ब्रह्मभूतो भवति तत्राह सर्वात्मनो हीति। दृष्टांतालोचनया दार्ष्टांतिकेऽपि सदा ब्रह्मत्वं भवतीति भावः।
सदा ब्रह्मीभूतस्य मुक्तिर्नाम नास्तीति शंकित्वा परिहरति स कथमिति। परिहारमेव स्फोरयति। यो हीति

 ननस्येत्यादिवाक्यार्थमनुद्रवतितस्येवेति। ब्रह्मैवसन्नित्यस्यार्थमनुवदतिकिंत्विति। विद्वानिहैवब्रह्मचेत्।क
थंतस्यब्रह्मप्राप्तिरित्याशंक्याह। ब्रह्मेवेति। यदुक्तंब्रह्मैवसन्नित्यादितदुपपादयतियस्मादिति॥ ॥७॥ ॥
प्रागपिब्रह्मभूतस्यैवपुनर्देहपातेब्रह्मप्राप्तिरित्ययुक्तंविदुषोमृतस्यभावांतरापत्तिस्वीकरादित्याशंक्याहन
हीतिकथंतर्हिब्रह्माप्येतीत्युच्यतेतत्राहदेहांतरेति। विदुषोभावांतरापत्तिर्मुक्तिरितिपक्षेपिकिंदूषणमिति
चेत्तदाहभावांतरापत्तौहीति। तथाचोपनिषदामप्रमाण्यंविनाहेतुनास्यादितिभावः। भावांतरापत्तिर्मुक्ति
रित्यत्रदोषांतरमाहकर्मेति। इतिपदादुपरिष्टात्क्रियापदस्यसंबंधः। अस्तुकर्मनिमित्तोमोक्षोज्ञाननि

नहिविदुषोमृतस्यभावांतरापत्तिर्जायतेन्याभावेदेहांतरप्रतिसंधानभावमात्रेणैवतुब्र
ह्माप्येतीत्युच्यते॥ भावांतरापत्तौहिमोक्षस्यसर्वोपनिषद्विवक्षितोर्थः॥ आत्मैकत्वाख्यः
सबाधितोभवेत्। कर्महेतुश्चमोक्षःप्राप्नोतिनज्ञाननिमित्तःसचानिष्टः अनित्यत्वंचमो
क्षस्यप्राप्नोति। नहिक्रियानिर्वृत्तोर्थोनित्योदृष्टःनित्यश्चमोक्षोभ्युपगम्यते॥ एषनित्यो
महिमेतिमंत्रवर्णात्॥ नचस्वाभाविकात्स्वभावादन्यन्नित्यत्वंकल्पयितुंशक्यं॥ ॥७॥

मित्तस्तुमाभूत्तत्राहसचेति। प्रसंगःसर्वनाम्नापरामृश्यतेप्रतिषेधशास्त्रविरोधादितिभावः। मोक्षस्य
कर्मसाध्यत्वेदोषांतरमाहानित्यत्वंचेति। तत्रोपयुक्तांव्याप्तिमाहनहीति। अस्तुतर्हिप्रासादादिवत्।
क्रियासाध्यस्यमोक्षस्यापिनित्यत्वंनेत्याहनित्यश्चेति। कृतकोपिब्रह्मभावोध्वंसवन्नित्यःस्यादित्या
शंक्याहनचेति। कृत्रिमस्वभावव्यावृत्त्यर्थंस्वाभाविकपदमतोन्यदार्त्तमितिहिश्रुतेर्ध्वंसस्यतुविक
ल्पमात्रत्वान्नित्यत्वमसंमतमितिभावः॥ ॥७॥ ॥७॥ ॥७॥ ॥

मोक्षोऽकृत्रिमस्वभावोऽपिकर्मोत्थःस्यादित्याशंक्याहस्वाभाविकश्चेदिति।अग्नेरौष्ण्यवदात्मनोमो
क्षःस्वाभाविकःस्वभावश्चेन्नसक्रियासाध्योव्याघातादित्यर्थः।दृष्टांतंसमर्थयते।नहीति।अरणिगत
स्याग्नेरौष्ण्यप्रकाशौनोपलभ्येतेसतिचज्वलनेदृश्येतेतेनस्वाभाविकावपितावागंतुकौकादाचित्कोपल
ब्धिमत्वादितिशंकतेज्वलनेति।नहिसतोग्नेरौष्ण्यादिकादाचित्कंयुक्तंदृष्टेर्व्यवधानस्यदार्वादेर्ध्वंसमथ
नज्वलनादिनावह्न्यभिव्यक्तिमपेक्ष्यनतुस्वभावस्यौष्ण्यादेर्व्यत्ययुपगमादितिपरिहरतिनान्येतितदे

स्वाभाविकश्चेदग्न्युष्णत्ववदात्मनःस्वभावःसनशक्यतेपुरुषव्यापारानुभावीतिवक्तुं॥न
ह्यग्नेरौष्ण्यंप्रकाशोवाग्निव्यापारानंतरानुभावीअग्निव्यापारानुभावीस्वाभाविकश्चेतिवि
प्रतिषिद्धं॥ज्वलनव्यापारानुभावित्वमुष्णप्रकाशकयोरितिचेत्॥न।अन्योपलब्धिव्य
वधानापगमेऽभिव्यक्त्यपेक्षत्वात्॥ज्वलनादिपूर्वकमग्नि रुष्णप्रकाशगुणाभ्या
मभिव्यज्यतेतन्नाग्न्यपेक्षया।किंतर्ह्यन्यदृष्टेरग्नेरौष्ण्यप्रकाशौधर्मौव्यवहितौकस्यचिद्दृ
ष्ट्यात्वसंबध्यमानौज्वलनापेक्षयाव्यवधानापगमेदृष्टेरभिव्यज्येते॥तदपेक्षयाभ्रांति
रुपजायतेज्वलनपूर्वकावेतावुष्णप्रकाशौधर्मौजानाविति॥ ॥७॥ ॥

वप्रपंचयतिज्वलनादीतिमथनादिव्यापारवशात्प्रकाशादिनाव्यज्यतेग्निरितियदुच्यतेतदग्नेःसत्त्वे
वतत्कृतव्यापारापेक्षयातदौष्ण्याद्यभिव्यक्तिवशान्नभवतिकिंतुदेवदत्तदृष्टेरग्निधर्मौव्यवहितौनतु
तौकस्यचिद्दृष्ट्यासंबध्येतेज्वलनादिव्यापारात्दृष्टेर्व्यवधानभंगेतयोरभिव्यक्तिरित्यर्थः।कथंतर्हिज्व
लनादिव्यापारादग्नेरौष्ण्यप्रकाशौजानावितिबुद्धिस्तत्राहतदपेक्षयेतिज्वलनादिव्यापाराद्दृष्टिव्यव
धान भंगेवह्नेरौष्ण्यप्रकाशाभिव्यक्त्यपेक्षयेतियावत्॥ ॥७॥ ॥७॥ ॥

यथावह्नेरौष्ण्यादिस्वाभाविकंनक्रियासाध्यंतथात्मनोमुक्तिःस्वाभाविकीनक्रियासाध्येत्येकमिदा
नीमग्नेरौष्ण्यादिनस्वाभाविकमित्याशंक्याहयथेति।उदाहरिष्यामोमोक्षस्यात्मस्वभावस्याकर्मसा
ध्यतायामितिशेषः।अथाग्नेःस्वाभाविकोनकश्चिद्धर्मोस्तियोमोक्षस्यदृष्टांतःस्यादतआहनचेति।लब्धा
त्मकंहिवस्तुवस्त्वंतरेणसंबध्यतेअस्तित्वनिर्बाधोतितत्त्वादिधीरित्यर्थः।भावांतरापत्तिपक्षंप्रतिक्षिप्य
पक्षांतरंप्रत्याहनचेति।नहिबंधस्यतथाभूतस्यनिवृत्तिर्विरोधान्नाप्यन्यथाभूतस्यअनवस्थानात्
नचप्रसिद्धिविरोधोदुर्निरूपध्वस्तिविषयत्वादितिभावः।किंचपरस्मादन्यस्यबंधनिवृत्तिस्तस्यैववा

यद्युभयप्रकाराद्योरपिस्वाभाविकत्वंनस्याद्यःस्वाभाविकोग्नेर्धर्मस्तमुदाहरिष्यामः॥नचस्वा
भाविकोधर्मएवनास्तिपदार्थानामितिशक्यंवक्तुंनचनिगडभंगइवाभावभूतोमोक्षोबंधन
निवृत्तिरूपपद्यते॥परमात्मैकत्वाभ्युपगमादेकमेवाद्वितीयमितिश्रुतेः॥नचान्योबद्धोस्ति
यस्यनिगडनिवृत्तिवत्बंधननिवृत्तिर्मोक्षःस्यात्॥परमात्मव्यतिरेकेणान्यस्याभावंविस्त
रेणावादिषं॥तस्मादविद्यानिवृत्तिमात्रेमोक्षव्यवहारइतिचावोचाम॥यथारज्ज्वादौसर्पा
दिज्ञाननिवृत्तौसर्पादिनिवृत्तिः॥ ॥७॥ ॥

नाद्यइत्याहनचेति।तत्रहेतुत्वेनपरमात्मैकत्वाभ्युपगमादित्यादिभाष्यंव्याख्येयं।नद्वितीयस्तस्य
नित्यमुक्तस्यत्वयापिबद्धत्वानभ्युपगमादितिद्रष्टव्यं।कथंपरस्मादन्योबद्धोनास्तीत्याशंक्यप्रवेश
विचारादावुक्तंस्मारयतिपरमात्मेतिनचेदन्योबद्धोस्तिकथंमोक्षव्यवहारःस्यादित्याशंक्याहतस्मा
दिति।अन्यस्यबद्धस्याभावात्परस्यचनित्यमुक्तत्वादितियावत्।यथारज्ज्वादावधिष्ठानेसर्पादिहे
तोरज्ञानस्यनिवृत्तौसत्यांसर्पादेरपिनिवृत्तिःतथाऽविद्यायाबंधहेतोर्निवृत्तिमात्रेणतत्कार्यस्यबंध
स्यापिनिवृत्तिव्यवहारोभवतीतिचावादिष्मेतियोजना॥ ॥७॥ ॥७॥

मतांतरमुद्भावयति येप्याचक्षत इति। वैषयिकज्ञानानंदापेक्षयांतरशब्दः। केयमभिव्यक्तिरुत्पत्ति
र्वा प्रकाशो वा नाद्यो मोक्षे सुखाद्युत्पत्तौ तदनित्यतापत्तेरित्यभिप्रेत्याह तैरिति। द्वितीयमालंबते य
दीति तत्र दोषं वक्तुं विकल्पयति तत इति। द्वितीये खरविषाणवदपरोक्षाभिव्यक्तिर्न स्यादित्यभिप्रेत्या
द्यमनुभाष्य दूषयति विद्यमाने चेदिति। उपलब्धिस्वभावत्वादात्मा तस्य विद्यमाने सुखादिव्यज्यते

येप्याचक्षते मोक्षे विज्ञानांतरमानंदांतरं चाभिव्यज्यत इति॥ तैर्वक्तव्योऽभिव्यक्तिशब्दार्थः॥ यदि
तावत् लौकिकस्येवोपलब्धिविषयप्राप्तिरभिव्यक्तिशब्दार्थः॥ ततो वक्तव्यं किं विद्यमानमभिव्य
ज्यते अथाविद्यमानमिति विद्यमाने चेद्यस्य मुक्तस्य तदभिव्यज्यते॥ तस्यात्मभूतमेव तदित्यु
पलब्धिव्यवधानानुपपत्तेर्नित्याभिव्यक्तत्वान्मुक्तस्याभिव्यज्यत इति विशेषवचनमनर्थकं।
अथ कदाचिदेवाभिव्यज्यते। उपलब्धिव्यवधानादनात्मभूतं तदित्यन्यतोऽभिव्यक्तिप्रसंगः

चेत्। ज्ञानानंदयोर्देशादिव्यवधानाभावादानंदः सदैव व्यज्यत इति मुक्तिविशेषणमनर्थकमित्यर्थः
। चक्षुर्घटयोर्विषयविषयित्वप्रतिबंधककुड्यादिवद्धर्मादिप्रतिबंधादानंदो ज्ञाने च संसारदशायां
न व्यज्यते मोक्षे तु व्यज्यते तदभावादिति शंकते थेति। उपलब्धिदेशाद्भिन्नदेशस्येव घटादेरुपलब्धि
प्रतिबंधदर्शनादनात्मभूते सुखेन स्वभावभूतयोपलब्ध्या प्रकाशेत किंतु विषयेंद्रियसंपर्कादि
त्युत्तरमाहोपलब्धीति॥ ॥७॥ ॥७॥ ॥७॥ ॥

अन्यतोभिव्यक्तौ किंस्यादितिचेत्तदाह। तथाचेति। तत्साधनानिचेन्मुक्तौस्युः संसारादविशेषः स्या
दितिभावः। उपलब्धिव्यवधानमानंदस्यांगीकृत्योक्तं इदानीं तदेवनास्तीत्याह। उपलब्धीति। कदाचिदभिव्यक्तिरनभिव्यक्ति
श्चकदाचिदित्येवंकालभेदेनोभयं किंनस्यादित्याशंक्याह। नत्विति। आनंदज्ञानयोर्विषयविषयित्वमभ्युपेत्यकारा
चिह्नौ तावदभिव्यक्तिर्निरस्ता संप्रतितदपिनसंभवतीत्याह। नचेति। आत्मभूतत्वंस्वाभाविकत्वं विमतेनसमानाश्रय
विषयेधर्मत्वात्प्रदीपप्रकाशवदितिभावः। मुक्तावानंदज्ञानाभिव्यक्तिपक्षेदोषांतरं वक्तुंभूमिकांकरोति। विज्ञानसु
खयोश्चेति। ततुभेदापादनमिष्टमेवेत्याशंक्यविवक्षितंदोषमाह। परमात्मेति। परमतेनिराकृते सिद्धांतेपिदोषद्वयमा

तथाचाभिव्यक्तिसाधनापेक्षतायामुपलब्धिसमानाश्रयत्वेनुव्यवधानकल्पनानुपपत्तिः। [illegible]

॥ सर्वदाभिव्यक्तिरनभिव्यक्तिर्वा॥ नत्वंतराकल्पनायांप्रमाणमस्ति॥ नचसमानाश्रयाणा
मेकस्यात्मभूतानांधर्माणामितरेतरविषयविषयित्वंसंभवति। विज्ञानसुखयोश्चप्रागभिव्यक्तेःसं
सारित्वमभिव्यक्त्युत्तरकालेचमुक्तत्वंयस्यसोन्यः परस्मान्नित्याभिव्यक्तज्ञानस्वरूपादत्यंतवैल
क्षण्याच्छैत्यमिवौष्ण्यात्। परमात्मभेदकल्पनायांचवैदिकः कृतांतःपरित्यक्तःस्यात्॥ मोक्षस्यचदा
नीमिवनिर्विशेषत्वेनतदर्थाधिकयत्नानुपपत्तिः शास्त्रवैयर्थ्यंचप्राप्नोतीतिचेत्। नाविद्याश्रमापो
हार्थत्वात्। नहिवस्तुनोमुक्तामुक्तत्वविशेषोस्त्यात्मनोनित्यैकरूपत्वात्। किंतुतद्विषयाअविद्या
पोह्यतेशास्त्रोपदेशजनितविज्ञानेन। प्राक्तदुपदेशप्राप्तेस्तदर्थश्चप्रयत्नउपपद्यतएव। अविद्याव
तोऽविद्यानिवृत्त्यनिवृत्तिकृतोविशेषआत्मनःस्यादितिचेत्। नाविद्याकल्पनाविषयत्वाभ्युप
गमाद्रज्जूषरशुक्तिकागगनानांसर्पादिकरजतमलिनत्वादिवददोषइत्यवोचाम ॥ ॥

शंकतेमोक्षस्येति। मोक्षार्थोधिकोयत्नः शमदमादिः शास्त्रंमोक्षविषयं मोक्षस्यनिर्विशेषत्वेपिप्रत्यगविद्यातदु
त्थानर्थध्वंसित्वेनोभयमर्थवदितिपरिहरतिनाविद्येति। तत्रनञर्थंविवृणोतिनहीति। कथंतर्हिशास्त्राद्यर्थ
वत्वमित्याहकिंत्विति। तत्रशास्त्रस्यार्थवत्वंसमर्थयतेतद्विषयेति। प्रस्तुतात्मविषयस्तच्छब्दः संप्रतिप्रयत्न
स्यार्थवत्वंप्रकटयतिप्रागिति। प्रथमस्तच्छब्दः शास्त्रविषयः द्वितीयोमोक्षविषयः। आत्मनःसदैकरूपत्वं
प्रागुक्तमाक्षिपत्यविद्येति। आविद्यःसोपीतिसमाधत्तेनेति। यथारज्ज्वाद्यविद्योत्थसर्पादिस्तद्विद्ययाध्वंसा

ध्वंसयोरज्ज्वादेर्नवास्तवोविशेषस्तथात्मनोपिस्वाविद्यामात्रोत्थविशेषवत्वेपितत्
ध्वंसाध्वंसयोर्नवास्तवोविशेषास्तीत्यर्थः॥ ॥७॥

अदोषः सविशेषत्वदोषराहित्यं प्रकारांतरेण सविशेषत्वं शंकते तिमिरेति। किमिदमविद्याकर्तृत्वं किं त
ज्जनकत्वं किं वा तदाश्रयत्वमिति विकल्प्याद्यं दूषयति नध्यायतीवेति। आत्मनः स्वतो विद्याकर्तृत्वाभावे
हेत्वंतरमाहानेकेति विषयविषयाकारांतःकरणस्य तत्र च चिदाभासोदयश्चात्मनो व्यापारस्तथा चानेक
व्यापारसंनिपाते सति अहं संसारीत्यविद्यात्मको भ्रमो जायते न स्मान्न तस्यात्मकार्यतेत्यर्थः। कल्पां
तरं प्रत्याह विषयत्वेति। अविद्यादेरात्मदृश्यत्वान्न तदाश्रयत्वं न हि तत्तद्गतस्य तत्तद्ग्राह्यत्वमंशातः स्वग्र

तिमिरातिमिरदृष्टिवदविद्याकर्तृत्वाकर्तृत्वकृतमात्मनो विशेषं स्यादिति चेन्न। नध्यायतीव
लेलायतीवेति स्वतोविद्याकर्तृत्वस्य प्रतिषिद्धत्वात्। अनेकव्यापारसन्निपातजनितत्वाच्चा
विद्याभ्रमस्याविद्याविषयत्वोपपत्तेश्च॥ यस्य चाविद्याविभ्रमो घटादिवद्विविक्तो गृह्यते सना
विद्याभ्रमवान्। अहं न जाने मुग्धोस्मीति प्रत्ययदर्शनादविद्याभ्रमवत्वमेवेति चेन्न। न तस्या
पि विवेकग्रहणात्। न हि यो यस्य विवेकेन ग्रहीता स तस्मिन्भ्रांत इत्युच्यते॥ तस्य च विवेक
ग्रहणं तस्मिन्नेव च भ्रम इति विप्रतिषिद्धं। न जाने मुग्धोस्मीति दृश्यत इति ब्रवीषि तद्दर्शिनश्चा
ज्ञानं मुग्धरूपता दृश्यत इति च दर्शनस्य विषयं संभवति। कर्मतामापद्यत इति॥ ॥७॥ ॥

हापत्तेरित्यर्थः। तदेव स्फोरयति यस्य चेति। अनुभवमनुसृत्य शंकते नेत्यादिना। साक्षिसाक्ष्यभावेन भेदा
भ्युपगमान्नात्मनो विद्याश्रयत्वमित्युत्तरमाह न तस्यापीति। तदेव स्पष्टयति न हीति। अविद्यादेर्विवेके
न ग्रहीतर्यपि तद्विषयेभ्रांतत्वे का हानिरित्याशंक्याह तस्य चेति। अज्ञाने मुग्धत्वं चात्मनो न विशेषणमि
ति विधांतरेण दर्शयितुं चोद्यवाक्यमनुवदति न जान इति। तद्याचष्टे तद्दर्शिनश्चेति। अज्ञानादिस्तच्छ
ब्दार्थः। दृश्यमानत्वमेव विशदयति कर्मतामिति। इति ब्रवीषीति संबंधः॥ ॥७॥ ॥

बृ·भा·आ· एवंपरकीयंवाक्यंव्याख्यायफलितमाहतत्कथमिति।तत्रचोद्यवाक्यार्थेदर्शितरीत्यास्थितेसतिकर्तृ टी·अ·४
३७० विशेषणेनाज्ञानमुग्धतेस्यातांतयोःप्रत्येकंकर्मभूतत्वादित्यर्थः।विपक्षेदोषमाहयथेति।कथंकर्मस्था
नामित्येतदेवव्याचष्टेदर्शिनेति।तत्रापिकथंशब्दःसंबध्यतेएतदेवस्फुटयतिकर्मणीति।एवंसतिव्या
प्यव्यापकभावस्यभेदनिष्ठत्वेसतीत्येतत्।किंचाज्ञानमुपलब्धृधर्मोनभवत्युपलभ्यमानत्वाद्देहगत
कार्श्यादिवदित्याहनचेति।अज्ञानवत्तत्कार्यमपिनात्मधर्मःस्यादित्यतिदिशतियथेति।अज्ञा

तत्कथंकर्मभूतंसत्कर्तृस्वरूपंदृशिविशेषणमज्ञानमुग्धतेस्याताम्।अथदृशिविशेषणत्वंतयोः
कथंकर्मस्याताम्।दर्शिनाव्याप्यते।कर्मनोव्याप्यते।कर्महिकर्तृक्रियाव्याप्यमानंभवत्यन्यच्चव्या
प्यमन्यद्व्यापकंनतेनैवतद्व्याप्यतेवदकथमेवंसत्यज्ञानमुग्धतेदृशिविशेषणेस्याताम्।नचाज्ञा
नविवेकदृशेरज्ञानमात्मनःकर्मभूतमुपलभ्यमानःउपलब्धृधर्मत्वेनगृह्णातिशरीरका ५
र्श्यादिरूपवत्।यथासुखदुःखेच्छाप्रयत्नादीन्सर्वोलोकोगृह्णातीतिचेत्।तथापिगृहीतु
र्लोकस्यविविक्ततैवाभ्युपगतास्यात्।नजानेऽहंत्वदुक्तंमुग्धएवेतिचेत्भवत्वज्ञोमुग्धोयस्त्व
वंदर्शितत्वंमुग्धंप्रतिजानीमहेवयं॥७॥ ॥

नोऽलस्येच्छादेरात्मधर्मत्वनिराकरणेप्रतीतिविरोधःस्यादितिशंकतेसुखेति।तेषांग्राह्यत्वमंगीकृ
त्यपरिहरतितथापीति।आत्मनिष्ठत्वेसुखादीनांचैतन्यवदात्मग्राह्यत्वायोगात्तत्ग्राह्याणांतेषां
नतद्धर्मतेतिभावः।प्रकारांतरेणनिराकर्तुंनिराकृतमेवचोद्यमनुद्रवति।जानेऽहमिति।किंप्रमातुर
ज्ञानाद्याश्रयत्वमनुभवादभिदधासितत्साक्षिणोवा।तत्राद्यंप्रत्याहभवत्विति।कल्पांतरंनिराक
रोतियस्त्विति।नहियोयत्रसाक्षीसतत्राज्ञोमूढोवातथासर्वसाक्षीनाज्ञानादिमानुभवतीत्यर्थः॥७॥ ७०

आत्मनोमोहादिराहित्येभगवद्वाक्यंप्रमाणयतितथेति।तस्यसर्वविशेषशून्यत्वेवाक्यांतरमुदाहरतिसममि
तिआदिशब्देनसमंपश्यन्हिसर्वत्रज्योतिषामपितज्ज्योतिरित्यादिर्गृह्यते।आत्मनोनिर्विशेषत्वेप्रामाणि
कत्वमतमुपसंहरतितस्मान्नेति।पक्षांतरमनुभाषतेयत्त्विति।अतोनिर्विशेषस्वाभाव्यादितियावत्।अज्ञाना
२ द्वंधोज्ञानान्मुक्तिरितिशास्त्रमर्थवादः।आदिशब्देनरुद्ररोदनाद्यर्थवादेदृष्टोतंसूचयतिसोपहासंदूषयतिअस
हेत्विति।नहिविशेषत्वमात्मनःशक्यंप्रतिपत्तुंनिर्विशेषत्वप्रत्यायकागमविरोधादितिभावः।कथंतर्हिभव

तथाव्यासेनोक्तंरछादिकृत्स्नंक्षेत्रंक्षेत्रीप्रकाशयतीतिसमंसर्वेषुभूतेषुतिष्ठंतंपरमेश्वरं।विनश्यत्स्व
विनश्यंतमित्यादिनातत्रशउक्तं।तस्मान्नात्मनःस्वतोबद्धमुक्तज्ञानाज्ञानकृतोविशेषोऽस्तिसर्वदास
मेकरसस्वाभाव्याभ्युपगमात्।यत्वतोऽन्यथाऽऽत्मवस्तुपरिकल्प्यबंधमोक्षादिशास्त्रंचार्थवादमापा
दयंति।तेउत्साहंतेखेपिशाकुनंपदंद्रष्टुंखंवामुष्टिनाकृष्टुंचर्मवत्।वयंतुतत्कर्तुमशक्ताःसर्वदासमे
करसमद्वैतमविक्रिय मजमजरममरममृतमभयमात्मतत्त्वंब्रह्मैवास्मःस्त्येषसर्ववेदांतनिश्चि
तोऽर्थइत्येवंप्रतिपद्यामहे॥ ॥७॥ ॥

द्विरात्मतत्त्वमभ्युपगम्यतेतत्राहवयंत्विति।प्रमाणविरुद्धार्थदर्शनेतच्छब्देनपरामृश्यतेसत्वादीनामिवसा
म्यंदूषयतिसर्वदेति।भेदाभेदवादमपवदत्येकरसमिति।तत्रहेतुमाहाद्वैतमिति।द्वैताभावोपलक्षितत्वा
दित्यर्थः।एकरस्यकौटस्थ्येहेत्वंतरमाहाविक्रियमिति।तदुपपादयत्यजमित्यादिना।अमरणंमरणायो
ग्यंतत्रसर्वत्राविद्यासंबंधराहित्यंहेतुमाहाभयमिति।ननुब्रह्मैवंविधंनत्वात्मतत्त्वमित्याशंक्याहब्रह्मै
वेति।यथोक्तंप्रत्यक्त्वंनब्रह्मेत्यत्रप्रमाणमाहइत्येषइति।तत्रैवविद्वदनुभवंप्रमाणयतिइत्येवमिति॥७॥

 परपक्षनिरासेनप्रकृतंवाक्यार्थमुपसंहरतितस्मादिति।उपचारेनिमित्तमाहविपरीतेति।आत्मा
 तत्वतःसंसारीतिविपरीतग्रहवतीयादेहसंततिःतस्याविच्छेदमात्रंज्ञानफलमपेक्ष्योपचारइत्यर्थः।
ब्राह्मणोक्तेर्थेमंत्रमवतारयितुंब्राह्मणार्थमनुवदतिस्वप्नेत्यादिना।अयमर्थःसंसारस्तद्धेतुश्चमं

तस्माद्ब्रह्माध्येतीत्युपचारमात्रमेतत्विपरीतग्रहवद्देहसंततेर्विच्छेदमात्रंविज्ञानफलमपे
क्ष्य।स्वप्नप्रबुद्धांतगमनदृष्टांतस्यदार्ष्टांतिकःसंसारोवर्णितःसंसारहेतुश्चविद्याकर्मपूर्वप्र
ज्ञावर्णितःयैश्चोपाधिभूतैःकार्यकरणलक्षणैर्भूतैःपरिवेष्टितःसंसारित्वमनुभवतितानि
चोक्तानितेषांसाक्षात्प्रयोजकौधर्माधर्माविति पूर्वपक्षंकृत्वाकामएवेत्यवधारितंयथाचब्रा
ह्मणेनार्थोवधारितएवंमंत्रेणापीतिबंधंबंधकारणंचोक्तोपसंहृतंकरणमितितुकामयमा अ
नमितिअथाकामयमानआरभ्यसुषुप्तदृष्टांतस्यदार्ष्टांतिकभूतःसर्वात्मभावोमोक्षउक्तो
मोक्षकारणंचात्मकामतयायदाप्तकामत्वमुक्तं।तत्रसामर्थ्यान्नात्मज्ञानमंतरेणात्मकाम
तु तयाप्तकामत्वमितिसामर्थ्याद्ब्रह्मविद्यैवमोक्षकारणमित्युक्तमतोयद्यपिकामोमूलमित्यु
क्तंतथापिमोक्षकारणविपर्ययेणबंधकारणमविद्येत्येतदप्युक्तमेवभवति॥६॥ ॥७॥ ॥

त्रस्तदेवसक्तःसहकर्मणेत्यादिः।आत्मज्ञानस्यतर्हिमोक्षकारणत्वमुपेक्षितमित्याशंक्याहतत्रे
ति।अतोब्रह्मज्ञानंमोक्षकारणमित्युक्तत्वादितियावत्मूलेबंधस्येतिशेषः॥ ॥७॥ ॥

अत्रेतिमोक्षप्रकरणोक्तिः।बंधप्रकरणंदृष्टांतयितुमपिशब्दः।उक्तेर्थेतदेषइत्याद्यक्षराणिव्याचष्टेत
स्मिन्नेवेति।यस्मिन्कालेविद्यापरिपाकावस्थायामित्यर्थः।सुषुप्तिव्यावृत्त्यर्थंसर्वविशेषणमितिमत्वा
हसमस्ताइतिकामशब्दस्यार्थांतरविषयत्वंव्यावर्तयतितृष्णेति।क्रियापदंसोपसर्गंव्याकरोत्यात्मकाम
स्येति।तानेवविशिनष्टियेप्रसिद्धाइतिकामानामात्माश्रयत्वंनिराकरोतिहृदीति।समूलतःकामवियो

अत्रापिमोक्षोमोक्षसाधनेचब्राह्मणेनोक्तं॥तस्यैवदृढीकरणायमंत्रउदाह्रियते॥श्लोकशब्द
वाच्यः॥तस्मिन्नेवार्थएषश्लोकोमंत्रोभवति॥यदायस्मिन्कालेसर्वेसमस्ताःकामास्तृष्णाप्रभे
दाःप्रमुच्यंते॥आत्मकामस्यब्रह्मविदःसमूलतोविशीर्यंतियेप्रसिद्धालोकइहामुत्रार्थाःपुत्रवि
त्तलोकैषणालक्षणाअस्यप्रसिद्धस्यपुरुषस्यहृदिबुद्धौनिश्रिताआश्रिताःअथतदामर्त्योम

तदेषश्लोकोभवतियदासर्वेप्रमुच्यंतेकामायेस्यहृदि
श्रिताः॥अथमर्त्योमृतोभवत्यत्रब्रह्मसमश्नुतइति॥॥

रणधर्मासन्कामवियोगात्समूलतोमृतोभवत्यर्थादनात्मविषयाःकामाअविद्यालक्षणोमृ
त्युरित्येतदुक्तंभवति॥अतोमृत्युवियोगेविद्वानृजीवन्नेवामृतोभवत्यत्रास्मिन्नेवशरीरेवर्त
मानोब्रह्मसमश्नुतेब्रह्मभावंमोक्षंप्रतिपद्यतइत्यर्थः।अतोमोक्षोनदेशांतरगमनाद्यपेक्षते॥
तस्माद्विदुषोनोत्क्रामंतिप्राणायथावस्थिताएवस्वकारणेपुरुषेसमवनीयंते॥नाममात्रेह्यवशि

गादितिसंबंधः।कामवियोगादमृतोभवतीतिनिर्दिष्टसामर्थ्यसिद्धमर्थमाहार्थादिति।तेषांमृत्युत्वेकिं
स्यात्तदाहतर्हीति।अत्रेत्यादिना।विवक्षितमर्थमाह।तेनेति।आदिपदमुत्क्रांत्यादिसंग्रहार्थमुक्तेस्तद
पेक्षाभावेफलितमाहतस्मादिति।तर्हिमरणासिद्धिरित्याशंक्याहयथेति।उत्क्रांतिगत्यागतिराहि
त्यंयथावस्थितत्वं।एतत्स्वप्रपंचमेवप्रतिपादितमित्याह।नाममात्रमिति॥ ॥७॥ ॥७॥

तद्यथेत्यादिवाक्यनिरस्यांशंकामाह कथंपुनरिति। विदुषोविद्ययात्ममात्रत्वेनप्राणादिषुबाधितेष्वपिदेहेचेदसौवर्त्तते।
ततोस्यपूर्ववद्देहित्वादिद्यावैयर्थ्यमित्यर्थः। दृष्टांतेनपरिहरत्यत्रेत्यादिना। देहेवर्त्तमानस्यापिविदुषस्तत्राभिमानराहि
त्यंतत्रेत्युच्यतेयस्यांत्वचिसर्पोनितरांलीयतेसानिर्ल्वयनीसर्पत्वगुच्यते। सर्पनिर्मोकदृष्टांतस्यदार्ष्टांतिकमाहेवमेवेवि
सर्पदृष्टांतस्यदार्ष्टांतिकंदर्शयत्यथेति। अज्ञानेनसहदेहस्यनष्टत्वमशरीरत्वेदेहेतुरथशब्दार्थः। अथशब्दावद्यो
तितहेत्ववष्टंभेनाशरीरत्वंविशदयतिकामेति। पूर्वमित्यविद्यावस्थोक्तिः इदानीमितिविद्यावस्थोच्यतेकर्मत्य
नुसारिणंरूढंचमुख्यंप्राणंव्यावर्त्तयतिप्राणस्येति। श्लोकेपरएवात्मायथाप्राणशब्दस्तथात्रापीत्यर्थः। यथाच

कथंपुनःसमवनीतेषुप्राणेषुदेहेचस्वकारणेप्रलीनेविद्वान्मुक्तोत्रैवसर्वात्मासन्वर्त्तमानःपुनःपूर्ववद्देहित्वसं
सारित्वलक्षणंनप्रतिपद्यतइति। अत्रोच्यतेतत्तत्रायंदृष्टांतोयथालोकेअहिःसर्पस्तस्यनिर्ल्वयनीनिर्मोकः
साहिनिर्ल्वयनीवल्मीकेसर्पाश्रयेवल्मीकादावित्यर्थः। प्रत्यस्ताप्रक्षिप्तानात्मभावेनसर्पेणपरित्यक्ताश
यीतवर्त्तते। एवमेवयथायंदृष्टांतःइदंशरीरंसर्पस्थानीयेनमुक्तेनानात्मभावेनपरित्यक्तंमृतमिवशेते। अ
थेतरःसर्पस्थानीयोमुक्तःसर्वात्मभूतःसर्पवत्तत्रैववर्त्तमानोथशरीरएवनपूर्ववत्पुनःसशरीरोभवति। काम

तद्यथाहिनिर्ल्वयनीवल्मीकेमृताप्रत्यस्ताशयीतैवमेवेदंशरीरंशेतेऽथायमशरीरोमृतःप्राणोब्र
ह्मैवतेजएव॥७॥ ॥

कर्मप्रयुक्तशरीरात्मभावेनहिपूर्वंशरीरीमर्त्यश्चतद्वियोगादथेदानीमशरीरोतएव
वचामृतःप्राणःप्राणितीतिप्राणःप्राणस्यप्राणमितिहिवक्ष्यमाणेश्लोकेप्राणबंधनेहिसोम्यमनइतिच
श्रुत्यंतरे। प्रकरणवाद सामर्थ्याच्चपरएवात्माप्राणशब्द वाच्यःब्रह्मैवपरमात्मैवकिंपुनस्त
त्तेजएवमेतत्तु विज्ञानंज्योतिःयेनज्योतिषाजगदवभास्यमानेप्रज्ञानेत्रंविज्ञानज्योतिष्मदेहेसेविश्रंशावद्दत्ते
। यःकामप्रश्नविमोक्षार्थोयाज्ञवल्क्येनवरोदत्तोजनकायसहेतुकोबंधमोक्षार्थलक्षणोदृष्टांतदार्ष्टांतिकभू
तःसएषनिर्णीतःसविस्तरोजनकयाज्ञवल्क्याख्यायिकारूपधारिण्याश्रुत्या। संसारविमोक्षोपायउक्तःप्रा
श्रुत्यंतरेप्राणशब्दःपरएवात्मातथात्रापीत्याहप्राणेति। किंचपरविषयमिदंप्रकरणं। अथाकामयमानइतिमोक्ष
स्यप्रक्रांतत्वादथायमितिवाक्यंतद्विषयेअन्यथाब्रह्मादिशब्दानुपपत्तेस्तस्मादुभयसामर्थ्यादत्रपरएवात्मा
प्राणशब्दितइत्याहप्रकरणेति। विशेष्यंदर्शयित्वाविशेषणंदर्शयतिब्रह्मैवेतिब्रह्मशब्दस्यकमलासनादिविष
यत्वंवारयतिकिंपुनरिति। तेजःशब्दस्यकार्यज्योतिर्विषयत्वमाशंक्याहविज्ञानेति। तत्रप्रमाणमाहयेनेति। प्रज्ञा
प्रकृष्टाज्ञप्तिःस्वरूपचैतन्यंनेत्रंप्रकाशकमस्येतितथोक्तंसोहमित्यादेस्तात्पर्यंवक्तुंवृत्तंकीर्त्तयतियःकामप्रश्न

सोहमित्यादिवाक्यांतरमुत्थापयतीदानीमिति।आकांक्षापूर्वकंवाक्यमादायविभजतेकथमिति।स
हस्रदानमाक्षिपत्यत्रेतिसर्वस्वदानप्राप्तावपिसहस्रदानेहेतुमेकदेशीयंदर्शयत्यत्रेत्यादिना।कदानहिगु
रवेसर्वस्वंराजानिवेदयिष्यतितत्राहशुश्रूषुत्वेतिननुपुनःशुश्रूषुरपिराजाकिमितिसंप्रत्येवसर्वस्वंगुरवेनप्रय
च्छतिप्रभूताहिदक्षिणागुरुंप्रीणयतीत्स्वीयांशुश्रूषांफलयतितत्राहयदिवेति।अनाप्तोक्तोहृदयेसन्नि
रस्तानीश्रुतिःस्वयमेवाह।विद्यानिःक्रियार्थंजनकेनैवमुक्तमिति।।कथंसोहमेवंविमोक्षितस्त्वयाभगवते
तुभ्यंविद्यानिःक्रियार्थंसहस्रंददामीतिहएवंकिलउवाचोक्तवान्जनकोवैदेहः।।अत्रकस्माद्विमोक्षप
दार्थेभिणीतेविदेहराज्यमात्मानमेवच ननिवेदयत्येकदेशोर्ककिंविवसहस्रमेवददातितत्रकोभिप्रायइ
त्यत्रकेचिद्वर्णयंतिअध्यात्मविद्यारसिकोजनकःश्रुतमप्यर्थंपुनर्मंत्रैःशुश्रूषमाणोनसर्वमेवनिवेदयति
।श्रुत्वाभिप्रेतेयाज्ञवल्क्यात्पुनरंतेनिवेदयिष्यामीतिहिमन्यते।।यद्विचात्रैवसर्वंनिवेदयामिनिरस्ताभि
लाषोयंश्रवणादितिमत्वाश्लोकान्नवक्ष्यतीतिचभयात्सहस्रंदानेशुश्रूषालिंगज्ञापनायेति।सत्वैम

सोहंभगवतेसहस्रंददामीतिहोवाचजनकोवैदेहः।।७।।७।।

तदसत्पुरुषस्येवप्रमाणभूतायाःश्रुतेर्व्याजानुपपत्तेरर्थविशेषोपपत्तेश्च।विमोक्षपदार्थउक्तेयात्म
ज्ञानसाधनश्चात्मज्ञानशेषभूतःसर्वैषणापरित्यागःसन्यासाख्योवक्तव्योऽर्थविशेषोविद्यते।तस्माच्छ्लोक
मात्रशुश्रूषाकल्पनानरज्वीअगतिकाहिगतिःपुनरुक्तार्थकल्पनासाचायुक्तासत्यांगतौ।नचतनरक्त
तिमात्रमित्यवोचाम।नन्वेवंसत्यतऊर्ध्वंविमोक्षायैवेतिवक्तव्यं।नैषदोषः।आत्मज्ञानेप्रयोजकःसन्यासः ४२
पक्षेप्रतिपत्तिकर्मवदितिहिमन्यते।सन्यासेनतनुंत्यजेदितिस्मृतेःसाधनत्वपक्षेपिनातऊर्ध्वंविमोक्षा
येतिप्रश्नमर्हतिमोक्षसाधनभूतात्मज्ञानपरिपाकार्थत्वात्।आत्मकामस्यब्रह्मविदोमोक्षमिति।७।
धायवाचान्यनिष्पादनात्मकंव्याजोत्तरंयुक्तंश्रुतौत्वपौरुषेय्यामपास्ताशेषदोषशंकायांनव्याजोक्तिर्यु
क्तातदीयस्वारसिकप्रामाण्यभंगप्रसंगादितिदूषयतिसर्वमपीति।एकीयपरिहारासंभवेहेत्वंतरमाहा
थेति।तदुपपत्तिमेवोपपादयतिविमोक्षेतितस्यापिपूर्वमसकृदुक्तेस्तदीयशुश्रूषाधीनंसहस्रदानमनुचि
तमित्याशंक्यशमादेर्ज्ञानसाधनत्वेनप्रागुक्तेस्तेनसहभूयोपिसंन्यासस्यावक्तव्यत्वयोगात्तदपेक्षगाम

कंसहस्रदानमित्याद्यागामिकाहीति। ननु संन्यासादिविद्यास्तुत्यर्थमुच्यते महाभागा ही ये यत्तदर्थं दुष्क
रमपि कुर्वन्त्यतो नार्थं शेषसिद्धिस्तत्राह न चेति। न तावत्संन्यासो विद्यास्तुतिर्विदित्वा व्युत्थायेति समानकर्तृ
त्वनिर्देशादिति पंचमे स्थितं नापि शमादिर्विद्यास्तुतिस्तत्रापि विधेर्वक्ष्यमाणत्वादित्यर्थः। अर्थशेषशुश्रू
षया सहस्रदानमित्यत्र जनकस्याकौशलं चोदयति नन्विति। शङ्कितमकौशलं दूषयति नैष इति। त
त्र हेतुमाह आत्मज्ञानवदिति। यथा ज्ञाने मोक्षे प्रयोजके न तथा संन्यासो न चास्मिन्पक्षे तस्याकर्तव्यत्वं
पाति प्रतिकर्मवदनुष्ठानसंभवादिति। राजा यतो मन्यते ततः संन्यासस्य ज्ञानेनातुल्यत्वात्तत्र विमोक्षा
येति पृच्छतीत्यर्थः। संन्यासस्य प्रतिपत्तिकर्मवत्कर्तव्यत्वे प्रमाणमाह संन्यासेनेति। ननु विविदिषा सं
न्यासमंगीकुर्वता न तस्य प्रतिपत्तिकर्मवदनुष्ठेयत्वमिष्यते तत्राह साधनत्वेति। त्यजतैव हि तत्तज्ज्ञेयं त्य
क्तुः प्रत्यक्परं पदमित्युक्तत्वादित्यर्थः। शङ्कितौ कौशलं परिहृत्य मन्त्रानवतारयति आत्मकामस्येति॥ ७॥
एतस्मिन्नर्थे मन्त्रब्राह्मणोक्ते विस्तरप्रतिपादका एते श्लोका भवन्ति॥ अणुः सूक्ष्मः पन्थाः दुर्विज्ञेयत्वाद्वितते
विस्तीर्णो विस्पष्टतरणहेतुत्वाद्वा वितर इति पाठान्तरान्मोक्षसाधनो ज्ञानमार्गः पुराणश्चिरंतनो नित्यश्रुति
प्रकाशितत्वात्। न तार्किकबुद्धिप्रभवकुदृष्टिमार्गवदर्वाक्कालिकः मां स्पृष्टो [illegible] मया लब्ध इत्यर्थः। यो
ल हि यं न भ्यते स तेन स्पृष्ट इतीव संबध्यते तेनायं ब्रह्मविद्यालक्षणो मोक्षमार्गो मया लब्धत्वान्मां स्पृष्ट इत्युच्य[illegible]ते।
तः तदेते श्लोका भवन्त्यणुः पन्था वितत[illegible]ः पुराणो मां स्पृष्टोऽनुवित्तो मयैव॥ ॥ ७॥
न केवलं मया लब्धः किं त्वनुवित्तो मयैव अनुवेदनं नाम विद्यायाः परिपाकापेक्षया फलावसानता निष्ठाप्रा
प्तिः भुजेरिव तृप्त्यवसानता पूर्वं तु ज्ञानप्राप्तिसंबंधमात्रमेवेति विशेषः किमसावेवमत्र दृगेको ब्रह्मविद्याफ
लं प्रापनान्यः प्राप्तवान्येनानुवित्तो मयैवेत्यवधारयति। नैष दोषोऽस्याः फलमात्मसाक्षिकमनुवित्तमिति
च दर्शयतीत श्लोकेनागामिश्लोकानामर्थापौनरुक्त्यं सूचयति विस्तरेति। ज्ञानमार्गस्य सूक्ष्मत्वे हेतुमाह दुर्विज्ञे
यत्वादिति। विस्तीर्णत्वं पूर्णत्वं पूर्णवस्तुविषयत्वादवधेयं। माध्यंदिनश्रुतिमाश्रित्याह विस्पष्टेति प्रयत्नसाध्य
त्वं तस्य पंचम्या विवक्ष्यते कथं पुनरधुनातनो वैदिको ज्ञानमार्गश्चिरंतनो निरुच्यते तत्राह नित्येति विशेषणप्रका
शितमर्थमुक्त्वा तस्य व्यवच्छेद्यमाह न तार्किकेति। मन्त्रदृशा लब्धत्वेऽपि कुतो ज्ञानमार्गस्य तत्संस्पर्शित्वमित्याशं
क्याह यो हीति। अनुवेदनलाभयोर्विशेषाभावात्पौनरुक्त्यमाशंक्याह। ननु वेदनमिति। पूर्वशब्देन पाठक्रमानु
सारेण लाभो गृह्यते। एवकारमाश्रित्य शंकते किमसाविति। तथा च तद्यो यो देवानामित्यादिरविशेषश्रुतिर्विरुध्येते ति शे

स्तुतिपरत्वमेवप्रकटयत्येवंकीति। कृतार्थोस्मीत्यात्मन्यभिमानकरं स्वानुभवसिद्धमात्मज्ञानं नास्मादन्य
दुत्कृष्टं किंचिदित्येवं विद्यामवधारणश्रुतिः स्तौतीत्यर्थः। यथाश्रुतार्थत्वे दोषः स्यादितिचेत्तत्राह नत्विति
। इत्यवधारणश्रुत्या विवक्षितमितिशेषः। तत्र हेतुस्तद्योयइति सर्वार्थश्रुतेर्ब्रह्मविद्यासर्वार्था सर्वसाधारणी
तिश्रवणादिति यावत्। ब्रह्मविद्यायाः सर्वार्थत्ववाक्यशेषप्रमाणत्वेनावतार्य व्याचष्टे तद्वेवेतिननु मोक्षे

एवं हि कृतार्थाभिमानः करणमात्मप्रत्ययसाक्षिकमात्मज्ञानं किमतः परमन्यत्स्यादिति ब्रह्मवि
द्यां स्तौति॥ नतु पुनरन्यो ब्रह्मवित्तत्फलं न प्राप्नोतीति। तद्योयो देवानामिति सर्वार्थश्रुतेस्तद्वेवाह।
तेन ब्रह्मविद्यामार्गेण धीराः प्रज्ञानवन्तोऽन्येपि ब्रह्मविद इत्यर्थः॥ अपियन्तीति अपिगच्छंति ब्रह्मवि

तेनधीराअपियंतिब्रह्मविदःस्वर्गंलोकमितऊर्ध्वंविमुक्ताः॥८॥

द्यायाः फलं मोक्षे स्वर्गंलोकं। स्वर्गलोकशब्दस्त्रिविष्टपवाच्यपि सन्निह प्रकरणान्मोक्षाभिधा
यकः इतोस्माच्छरीरपातादूर्ध्वं जीवंत एव विमुक्ताः संतस्तस्मिन्मोक्षसाधनमार्गे विप्रतिपत्तिर्मु
मुक्षूणां॥८॥ ॥७॥ ॥७॥ ॥

स्वर्गशब्दो न युज्यते तस्यार्थांतररूढत्वादत आह स्वर्गेति। यथा ज्योतिष्टोमप्रकरणे श्रुतो ज्योतिःशब्दो
ज्योतिष्टोमविषयस्तथा मोक्षप्रकरणे श्रुतः स्वर्गशब्दो मोक्षमधिकरोति रूढयोगापहारब्रह्मविद्याया
निःकर्षप्रसंगादिति भावः। जीवंत एव मुक्ताः संतः शरीरपातादूर्ध्वं मोक्षमपियंतीति संबंधः। तस्मि
न्नित्यादि पूर्वपक्षमुत्थापयति तस्मिन्निति॥ ॥७॥ ॥७॥ ॥७॥

विप्रतिपत्तीरेवप्रश्नपूर्वकंविनादयतिकथमित्यादिना।पिंगलंवह्निज्वालातुल्यंलोहितंजपाकुसुमसन्नि
भंसप्रपंचंशब्दस्पर्शरूपरसादिमत्ब्रह्मतदुपासनमनुसृत्यतत्प्राप्तिमार्गेविवादोमुमुक्षूणामित्याह ॥७॥
यथादर्शनमिति।तथापिकथंब्रह्मप्राप्तिमार्गेशुक्लादिरूपसिद्धिर्नहिज्ञानस्यरूपादिमत्त्वमित्याशंक्या
हनाड्यस्त्विति।तासामपिकथंयथोक्तरूपवत्त्वमित्याशंक्याहश्लेष्मादिरिति।तथापिकथंशुक्लादिरूपव
त्त्वमित्याशंक्यनाडीखंडोक्तंस्मारयतिशुक्लस्येतिनाडीपरिग्रहेनियामकाभावमाशंक्यपक्षांतरमा
हादित्यंवेति।एवंविधंशुक्लादिनानाव र्णमित्यर्थः।तस्यतथात्वेप्रमाणमाहेषइति।प्रकृतेज्ञानमा
र्गेकिमितिमार्गांतरंकल्प्यतेतत्राहदर्शनेति।तर्हिनाडीपक्षोवादित्यपक्षोवाकतरोविवक्षितस्तत्रा ॥७॥
कथंतस्मिन्शुक्लंशुद्धंविमलमाहुःकेचिन्मुमुक्षवोनीलमन्येपिंगलमन्येहरितंचयथादर्शनं
नाड्यस्त्वेताःसुषुम्णाद्याःश्लेष्मादिरसपूर्णाःशुक्लस्यनीलस्यपिंगलस्येत्याद्युक्तत्वात्।आ
दित्यंवामोक्षमार्गमेवंविधंमन्यंतेएषशुक्लएषनीलइत्यादिश्रुत्यंतरात्।दर्शनमार्गस्यचशुक्ला
दिवर्णासंभवात्।सर्वथापितुप्रकृताद्ब्रह्मविद्यामार्गादन्यएतेशुक्लादयः॥ननुशुक्लःशुद्धइतमे

तस्मिंछुक्लमुतनीलमाहुःपिंगलंहरितंलोहितंच॥७॥

र्गः॥न॥नीलपीतादिशब्दैर्वर्णवाचकैःसहानुद्रवणात्यान्शुक्लादीन्योगिनोमोक्षपदमाहुर्नते
मोक्षमार्गाःसंसारविषयाएवहितेचक्षुष्टोवामूर्ध्नोवान्येभ्योवाशरीरदेशेभ्योवेतिशरीरदेशान्निः
सारणसंबंधात्।ब्रह्मादिलोकप्रापकाहिते॥तस्मादयमेवमोक्षमार्गोयआप्तकामत्वेनाप्तकाम
तयासर्वकर्मक्षयेगमनानुपपत्तौप्रदीपनिर्वाणवच्चक्षुरादीनांकार्यकरणानामत्रैवसमवनयइति
हसर्वथापीति।शुक्लमार्गस्यज्ञानमार्गादन्यत्वमाक्षिपतिनन्विति।शुक्लशब्दस्यनाद्वैतमार्गविषयत्वंनीला
दिशब्दसमभिव्याहारविरोधादितिपरिहरतिनत्वेतिसेद्धांतिकंमंत्रभागंव्याख्यातुंपूर्वपक्षंदूषयति।या
न्शुक्लादीनिति।नकेवलंदेहदेशान्निःसरणसंबंधादेवनाडीभेदानांसंसारविषयत्वंकिंतुब्रह्मलोकादिसंबं
धादपीत्याहब्रह्मादीति।आदित्योपिदेवयानमध्यपातीब्रह्मलोकप्रापकःसंसारहेतुरेवेतिमत्वानोमोक्ष
मार्गमुपसंहरतितस्मादिति।आप्तकामतयाज्ञानमार्गइतिसंबंधः।एवंभूमिकांकृत्वैषइत्यस्यार्थमाहस
र्वकर्मेति।यथातैलादिविलयेप्रदीपस्यज्वलनानुपपत्तौतेजोमात्रेनिर्वाणमिष्यतेतथास्थूलस्यसूक्ष्मस्य

चसर्वस्यैवकामस्यज्ञानानलक्षयेसतिगत्यनुपपत्तावत्रैवप्रत्यगात्मनिकार्यकरणानामे
कीभावेनावसानमित्ययमेषशब्दार्थइत्यर्थः॥

पंथाइत्येतद्व्याचष्टेज्ञानमार्गइति।इत्थंभावेतृतीयामाश्रित्याहपरमात्मेति।अनुवेदनकर्तुर्ब्राह्मणस्यस
न्यासित्वंदर्शयतित्यक्तेति।विप्रतिपत्तिंनिराकृत्यमोक्षमार्गंनिर्द्धारयतिनधीराअपि यंतीत्यत्रोक्तंनिगम
यतितेनेति।अन्योपिमंत्रदृशःसकाशादितिशेषःइहेतिजीवदवस्थोक्तिःसमुच्चयकारिणोत्रब्रह्मप्राप्ति
ण्य र्विवक्षितेतिकेचित्तान्प्रत्याहनपुनर्नेतिविरोधात्ज्ञानकर्मणोरितिशेषः।किंचक्रमसमुच्चयःसमस
मुच्चयोवेतिविकल्प्याद्यमंगीकृत्यद्वितीयंदूषयतिअपुण्येति।ज्ञानस्यकर्मसमुच्चयेपिविवेकज्ञानेन

एषज्ञानमार्गःपंथाब्रह्मणापरमात्मस्वरूपेणैवब्राह्मणेनत्यक्तसर्वैषणेनानुवित्तः॥तेनब्रह्मविद्या
मार्गेणब्रह्मविदन्योप्येति॥कीदृशोब्रह्मवित्तेनैतीत्युच्यते॥पूर्वंपुण्यकृद्भूत्वापुनस्त्यक्तपुत्राद्येष
णःपरमात्मतेजस्यात्मानंसंयोज्यतस्मिन्नभिनिर्वृत्तःतैजसश्चात्मभूतइहैवेत्यर्थः॥ईदृशो
ब्रह्मवित्तेनमार्गेणेतिनपुण्यादिसमुच्चयकारिणोग्रहणंविरोधादित्यवोचाम॥अपुण्यपुण्यो

एषपंथाब्रह्मणाहानुवित्तं॥

परमेयंपुनर्भवनिर्भयाःशांताःसंन्यासिनोयांतितस्मैमोक्षात्मनेनमइतिचस्मृतेःत्यजधर्मम
धर्मंचेत्यादिपुण्यापुण्यत्यागोपदेशात्॥निराशिषमनारंभंनिर्नमस्कारमस्तुतिं॥अक्षीणं
क्षीणकर्माणंतंदेवाब्राह्मणंविदुः॥नैतादृशंब्राह्मणस्यास्तिवित्तंयथैकतासमतासत्यताच॥
शीलंस्थितिर्दंडनिधानमार्जवंततस्ततश्चोपरमःक्रियाभ्यःइत्यादिस्मृतिभ्यश्च॥ ॥७॥

समुच्चयोस्तीत्याशंक्याहत्यजेति।ब्रह्मविदोपिस्कंत्यादिदृष्टेस्तेनसमुच्चयोज्ञानस्येत्याशंक्याहनिराशि
षमितिकाम्यानुष्ठानमनारंभोअक्षीणत्वंनिषिद्धानाचरणंक्षीणकर्मत्वंनित्यादिकर्मराहित्यं।असमुच्चये
वाक्यांतरमाह।नेत्यादिना॥एकतानिरपेक्षतासर्वोदासीनतेतियावत्समतामित्रोदासीनशत्रुबुद्धिव्यति
रेकेणसर्वत्रस्वस्मिन्निवदृष्टिःदंडनिधानमहिंसापरत्वंअर्थस्यमूलंनिकृतिःक्षमाचेत्यादिचतुर्विधेपु
रुषार्थसाधनभेदोपदेशिवाक्यमादिशब्दार्थः।इत्यादिस्मृतिभ्यश्चनपुण्यादिसमुच्चयकारिणोग्रहण
मितिसंबंधः॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

नथापिप्रकृतेमंत्रेसमुच्चयोभातीत्याशंक्याहोपदेक्ष्यतीति। वाक्यशेषादिपर्यालोचनासिद्धमर्थमुपसंहरति
तस्मादिति। पूर्वंपुण्यकृत्भूत्वापुनस्त्यक्तपुत्राद्येषणोब्राह्मणोब्रह्मवित्तेनैतीतिक्रमोनयुज्यतेश्रश्रुतत्वादि
दित्याशंक्याहाथवेति। स्तुतिमेवोपपादयतिपुण्यकृतीति। तैजसिकरणान्युपसंहृत्यस्थितस्तैजसोदहराद्यु
पासीनोयोगी। तस्मिन्नणिमाद्यैश्वर्यान्महानुभावत्वप्रसिद्धिस्ताभ्यांपुण्यकृत्तैजसाभ्यामित्यर्थः। अतः
उपदेक्ष्यतिचेहापिलेषनित्योमहिमाब्राह्मणस्य। नवर्द्धतेकर्मणानोकनीयानितिकर्मप्रयोजनाभावेहे
तुमुक्तातस्माद्ब्राह्मणःशांतोदांतइत्यादिनासर्वक्रियोपरमंदर्शयति। तस्माद्यथाव्याख्यातमेवपुण्य
कृत्वं। अथवायोब्रह्मवित्तेनेतिसपुण्यकृत्तैजसश्चेतिब्रह्मवित्स्तुतिरेषा॥ पुण्यकृतितैजसेचयोगिनि
महाभाग्यंप्रसिद्धंलोकेताभ्यामतोब्रह्मवित्स्तूयतेप्रख्यातमहाभाग्यत्वात्लोके॥९॥ अंधमदर्शना
त्मकंतमःसंसारनियामकंप्रविशंतिप्रतिपद्यंतेकेतेयेविद्योविद्यातोन्यांसाध्यसाधनलक्षणामुपा
सतेकर्मानुवर्त्ततइत्यर्थः ततस्तस्मादपिभूयइवतमःप्रविशंतियेउविद्यायामविद्यावस्तुप्रतिपादिके

॥९॥ स्तर तेनैतिब्रह्मवित्पुण्यकृत्तैजसश्च॥ अंधंतमःप्रविशंतियेविद्यामुपासते॥ ततोभूयइवतेतमोय
उविद्यायांरताः॥१०॥ अनंदानामतेलोकाअंधेनतमसावृताः॥ तांस्तेप्रेत्याभिगच्छंत्यवि मर
द्वांसोबुधोजनाः॥११॥ ॥ यांकर्मार्थायांत्रय्यामेवविद्यायांरताःअभिरताःविधिप्रतिषेधपरएव
वेदोनान्योस्तीत्युपनिषदर्थानपेक्षिणइत्यर्थः॥१०॥ यदितेदर्शनलक्षणेतमःप्रविशंतिकोदोषइत्यु
च्यते॥ अनंदाःअनानंदाःअसुखानामतेलोकास्तेनांधेनादर्शनलक्षणेनतमसावृताव्याप्ताःतेत
स्याज्ञानतमसोगोचरास्तान्प्रेत्यमृत्वाअभिगच्छंत्यभियांतिकेयेऽविद्वांसःकिंसामान्येनाविद्वत्तामा
त्रेणनेत्युच्यते॥ अबुधः बुधेरवगमनार्थस्यधातोःक्विप्प्रत्ययांतस्यरूपं॥ आत्मावगमवर्जितइत्य
र्थः॥ जनाःप्राकृताएवजननधर्मिणोवेत्येतत्॥ ॥११॥ ॥ शब्दपरामृष्टंस्पष्टयतिप्रख्यातेति। पुण्यकृत्तै
जसयोरितिशेषः॥ प्रस्तुतज्ञानमार्गस्तुत्यर्थंमार्गांतरंनिंदत्यंधमित्यादिना। विद्यायामितिप्रतीकमादा
यव्याकरोत्यविद्येतिकथंपुनस्त्रय्यामभिरतानामधःपतनमित्याशंक्याहविधीति। मंत्रांतरमाकांक्षाद्वा
रालभ्यव्याचष्टेयदीत्यादिना॥ अबुधइत्यस्यनिष्पत्तिंसूचयन्विवक्षितमर्थमाहबुधेरिति॥ ॥११॥॥

उक्तात्मसाानस्तुत्यर्थमेवं तन्निष्ठस्य कायक्लेशराहित्यं दर्शयत्यात्मानमित्यादिना॥ विज्ञानात्मनो वैलक्षण्यार्थं
विज्ञानश्चि सर्वेति नारस्त्वं या यावर्तयति हृत्स्वमिति। बुद्धिसंबंधप्राप्तसंसारित्वं वारयत्यशनायादीति प्रश्नपूर्व
कं ज्ञानप्रकारं प्रकटयति कथमित्यादिना॥ सर्वभूतसंबंधप्रयुक्तं दोषं वारयितुं विज्ञानश्चिनित्युक्ति। इति विज्ञा
नीयादिति संबंधः प्रयोजनाय शरीरमनुसंज्वरेदिति संबंधः। किमिच्छन्नित्याक्षेपं समर्थयते नहीति कस्य
आत्मानं स्वं परं सर्वप्राणिमनीषितज्ञं हृत्स्थमशनायादिधर्मातीतं चेद्यदि विजानीयात्सहस्रेषु कश्चिन्नु चे
दित्यात्मविद्याया दुर्लभत्वं दर्शयति। कथमयं पर आत्मा सर्वप्राणिप्रत्ययसाक्षी यो नेति नेत्याद्युक्तः अ
स्मान्नान्योऽस्ति द्रष्टा श्रोता मंता विज्ञाता समः सर्वभूतस्थो नित्यशुद्धबुद्धमुक्तस्वभावोऽस्मि भवामीति
॥पूरुषः पुरुषः॥ स किमिच्छन्नु तत्स्वरूपव्यतिरिक्तमन्यद्वस्तु फलभूतं किमिच्छन्नु कस्य वान्यस्यात्मनो

आत्मानं चेद्विजानीयादयमस्मीति पूरुषः॥ किमिच्छन्नु कस्य कामा
य शरीरमनुसंज्वरेत्॥१२॥ ॥छ॥ ॥छ॥ ॥

व्यतिरिक्तस्य कामाय प्रयोजनाय नहि तस्यात्मनः एष्टव्यं फलं॥ न चाप्यात्मनोऽन्योऽस्ति यस्य कामाये
च्छति सर्वस्यात्मभूतत्वात्॥ अतः किमिच्छन्नु कस्य कामाय शरीरमनुसंज्वरेदनुसंज्वरेन्न शरीरोपाधि
कृतदुःखमनुदुःखी स्यात्शरीरतापमनुतप्येत॥ अनात्मदर्शिनो हि तद्व्यतिरिक्तवस्त्वंतरेप्सोर्मम
दं स्यात्॥१२॥ पुत्रस्येदं भार्याया इदमितीहमानः पुनर्जननमरणप्रबंधारूढः शरीररागमनुरज्यते॥

कामायेत्याक्षेपमुपपादयति न चेति। आक्षेपद्वयं निगमयत्यत इति। तदेव स्पष्टयति शरीरेति।
विदुषस्तापाभावं व्यतिरेकमुखेन विशदयत्यनात्मेति। स चेत्यध्याहृत्य ममेदमित्यादियोज्यमि
त्येतदाह किमिच्छन्नित्याद्याश्रुतिरिति शेषः॥ ॥छ॥ ॥छ॥ ॥छ॥

नकेवलमात्मविद्यारसिकस्यकार्यकुशलाहित्यंकिंतुकृतकृत्यताचास्तीत्या॰
भिर्भूतैरुपचितेशरीरेसंदेहत्वंसाधयत्यनेकेति।विषमत्वंविशदयत्यनेकशतेति।ननामम॰
रस्तान्कम्रस्तस्मादितिपठितव्यंयस्मादित्युपक्रमाद्विश्वकृत्वमितिशेषः।परशब्दोविद्यावि॰

सर्वात्मदर्शिनस्तुतदसंभवइत्येतदाह।किंचयस्यब्राह्मणस्यानुवित्तोनुलब्धःप्र॰
क्षात्कृतःकथमहमस्मिपरंब्रह्मेत्येवंप्रत्यगात्मत्वेनावगतः।।आत्मास्मिन्संदेह्येसंदे॰
नर्थसंकरोपचयेगहनेविषमेनेकशतसहस्रविवेकविज्ञानप्रतिपक्षेविषमेप्रविष्टः॰
ह्मणस्यानुवित्तःप्रतिबोधेनेत्यर्थः।।सविश्वकृद्विश्वस्यकर्त्ताकथंविश्वकृत्वंतस्यवि॰
दितिनामेत्याशंक्याह।।सहियस्मात्सर्वस्यकर्त्तानमममात्रेनकेवलंविश्वकृत्सर्व॰

यस्यानुवित्तःप्रतिबुद्धआत्मास्मिन्संदेह्येगहनेप्रविष्टः।।सविश्वकृत्सहि
सर्वस्यकर्त्तातस्यलोकःसउलोकएव।।१३।। ।।छ।। ।।छ।। ।।

नुकिंतर्हितस्यलोकःसर्वःकिमन्योलोकोन्योसावित्युच्यते।सउलोकएवलोकशब्देनात्मो
च्यते।तस्यसर्वआत्मासचसर्वस्यात्मेत्यर्थः।यएषब्राह्मणेनप्रत्यगात्माप्रतिबुद्धतयानुवित्त
आत्मानर्थसंकटेगहनेप्रविष्टःसनसंसारी।किंतुपरमेश्वरएवयस्माद्विश्वस्यकर्त्तासर्वस्या
त्मातस्यचसर्वआत्माएकएवाद्वितीयःपरएवास्मीतिगंतव्यइतिश्लोकार्थः।। ।।छ।। ।।

ट्कृतकृत्यइत्येतत्लोकलोकीविभागेनभेदंशंकित्वादूषयतिकिमित्यादिना।यस्येत्यादिमंत्रस्य
तात्पर्यार्थंसंगृह्णातियएषइति।अस्त्वेवंकिंतावतेत्याशंक्याहैकएवेति।योहिपरःसर्वप्रकारभेदरा
हित्यानपूर्णतयावर्त्ततेसएवास्मीत्यात्मानुसंधातव्यइतियोजना।। ।।छ।। ।।छ।। ७६

न ब्रह्मविदोविद्ययाकृतकृत्यत्वेश्रुतिसंप्रतिपत्तिरेवकेवलंभवति किंतुस्वानुभवसंप्रतिपत्तिरस्ती
त्याहकिंचेति।अथेत्यस्यकथंचिदिवेतिव्याख्यानंतदित्यस्यब्रह्मतत्वमित्युक्तमर्थंस्फुटयतिवेदेतदिति।ब्र
ह्मज्ञानेकृतार्थत्वंश्रुत्यनुभवाभ्यामुक्त्वातदभावेदोषमाहयदेतदिति।तर्हिमहतीविनष्टिरितिसंबंधः।बहु
किंचेहैवानेकानर्थसंकुलेसंतोभवंतोऽज्ञानदीर्घनिद्राहिताःसंतःकथंचिदिवब्रह्मतत्वमात्मतत्वे
नाथविद्मःविजानीमः॥तदेतद्ब्रह्मप्रकृतमहोवयंकृतार्थाइत्यभिप्रायः।यदेतद्ब्रह्मविजानीमः।त
न्नचेदिहेदितवंतोवयंवेदनंवेदोवेदोस्यास्तीतिवेदीवेद्यववेदिर्नवेदिरवेदिःनचेदिहेदिस्ततोहमवेदिः
स्यात्कोदोषःस्यान्महतीअनंतपरिमाणाजन्ममरणादिलक्षणाविनष्टिर्विनशनं।अहोवयम
स्मान्महतोविनाशनात्निर्मुक्तायद्वयंब्रह्मविदितवंतइत्यर्थः॥यथाचवयंब्रह्मविदित्वास्माद्वि
नशनाद्विप्रमुक्ताएवंयेतद्विदुरमृतास्तेभवंतियेपुनर्नैवंब्रह्मविदुस्तइतरेब्रह्मविज्ञोऽन्येऽब्रह्म
विदइत्यर्थः॥दुःखमेवजननमरणादिलक्षणमेवापियंतिप्रतिपद्यंतेनकदाचिदथविदुषांततोवि
इहैवसंतोथविद्मस्तद्वयंनचेदवेदिर्महतीविनष्टिः॥येतद्विदुरमृतास्तेभवंत्यथेतरेदुःखमे
वापियंति॥१४॥यदैतमनुपश्यत्यात्मानंदेवमंजसा॥ईशानंभूतभव्यस्यनततोविजुगुप्सते
निवृत्तिरित्यर्थः॥दुःखमेवहितमात्मत्वेनोपगछंति॥१४॥यदापुनरेतमात्मानंकथं ॥१५॥॥
चित्परमकारुणिकंकंचिदाचार्यंप्राप्यततोलब्धप्रसादःसन्ननुपश्चात्पश्यतिसाक्षात्करोतिस्व
मात्मानंदेवंद्योतनवंतंदातारंवासर्वप्राणिकर्मफलानांयथाकर्मानुरूपमंजसासाक्षादीशानंस्वा
मिनंभूतभव्यस्यकालत्रयस्येत्येतत्।नततस्तस्मादीशानाद्देवादात्मानंविशेषेणजुगुप्सतेगो
पायितुमिच्छतिसर्वोहिलोकःईश्वराद्गुप्तिमिच्छतिभेददर्शी॥अयंत्वेकदर्शीनबिभेतिकुतश्चना
तोनतदाविजुगुप्सतेयदेशानंदेवमंजसात्मत्वेनपश्यति।नतदानिंदतेवा॥किंचित्सर्वमात्मानंहि
पश्यति।यएवंपश्यन्कमसौनिंद्यात्॥१५॥ ॥त्वेनविवक्षितंज्ञानान्मोक्षोत्रविवक्षितइत्यभिप्रेत्यवे
दिरित्यस्यार्थमाहवेदनमित्यादिनानचेद्ब्रह्मविदितवंतोवयंततोहमवेदिःस्यामितियोजना।विद्याभा
वेदोषमुक्त्वाविद्वदनुभवसिद्धमर्थंनिगमयत्यहोवयमिति॥इहैवेत्यादिनापूर्वार्द्धेनोक्तमेवार्थमुत्तरा
र्द्धेनप्रपंचयतियथाचेत्यादिना।दुःखादविदुषांविनिर्मोकाभावेहेतुमाहदुःखमेवेति।किंचविदुषोविहि

ताकरणादिप्रयुक्तंभयंनास्तीतिविद्यास्तोतुमेवमंत्रांतरमादायव्याचष्टेयदापुनरित्यादिनाउक्तमर्थंव्य
तिरेकमुखेनविशदयतिसर्वोहीति।जुगुप्सायानिंदात्वेनप्रसिद्धत्वात्कथमवयवार्थमादायव्याख्या
यतेरूढिर्योगमपहरतीतिन्यायादित्याशंक्याहयदेति।तदेवोपपादयतिसर्वमिति॥ ॥७॥ ॥अथे
श्वरस्यापिकालान्यत्वेसतिवस्तुत्वात्।घटवत्कालावच्छिन्नत्वान्नकालत्रयंप्रतियुक्तमीश्वरत्वमतआह
किंचेति।यस्मादीशानादर्वाक्संवत्सरोवर्त्ततेतमुपासतेदेवाइतिसंबंधः।ननुकथंसंवत्सरोर्वागित्यु
किंचयस्मादीशानादर्वाक्यस्मादन्यविषयएवेत्यर्थः॥संवत्सरःकालात्मा॥सर्वस्यजनिमतः
अ परिच्छेत्तायमपरिच्छिंदन्नर्वागेववर्त्ततेऽहोभिःस्वावयवैरहोरात्रैरित्यर्थः॥तज्ज्योतिषांज्योतिरा
दित्यादिज्योतिषामप्यवभासकत्वादायुरित्युपासतेदेवाःअमृतंज्योतिरतोन्यन्म्रियते॥नहि
ज्योतिःसर्वस्यह्येतत्ज्योतिरायुरायुर्गुणेनयस्माद्देवास्तज्ज्योतिरुपासते।तस्मादायुष्मंत
स्ततस्मादायुःकामेनायुर्गुणेनोपास्यंब्रह्मेत्यर्थः॥१६॥किंचयस्मिन्यत्रब्रह्मणिपंचपंचजनाःगंध
॥१५॥यस्मादर्वाक्संवत्सरोहोभिःपरिवर्त्तते॥तद्देवाज्योतिषांज्योतिरायुर्होपासतेमृतं॥१६॥यस्मि
न्पंचपंचजनाआकाशश्चप्रतिष्ठितः॥तमेवमन्यआत्मानंविद्वान्ब्रह्मामृतोमृतं॥१७॥ ॥
र्वादयःपंचैवसंख्याताःगंधर्वाःपितरोदेवाअसुरारक्षांसिनिषादपंचमावर्णाःआकाशश्चाव्या
कृताख्योयस्मिन्सूत्रमोतंचप्रोतंचयस्मिन्प्रतिष्ठितःएतस्मिन्खल्वक्षरेगार्ग्याकाशइत्युक्तंत
मेवात्मानममृतंब्रह्ममन्येहं॥नचाहमात्मानंततोन्यत्वेनजाने॥किंतर्ह्यमृतोहंब्रह्मविद्वान्स
न्नज्ञानमात्रेणमर्त्योहमासंतदपगमाद्विद्वानहममृतएव॥ ॥७॥ ॥७॥ ॥
च्यतेकालस्यकालांतराभावेनपूर्वकालसंबंधाभावादतआहयस्मादिति।अन्वयस्तुपूर्ववत्॥आ
त्मज्योतिषोगुणमायुष्ट्वलक्षणंस्पष्टयन्नुपासकस्यफलमाहसर्वस्येति।यथोक्तोपासनेदेवानामेवा
धिकारोविशेषवचनादित्याशंक्याहतस्मादिति।ज्योतिषांज्योतिरमृतमित्युक्तंतस्यामृतत्वंसर्वाधि
ष्ठानत्वेनसाधयतिकिंचेति।एवकारार्थमाहनचेति।यद्यात्मानंब्रह्मत्वेनजानासितर्हिकिंतेतद्वि
द्याफलमितिप्रश्नपूर्वकमाहकिंतर्हीतिकथंतर्हितेमर्त्यत्वप्रतीतिस्तत्राहाज्ञानमात्रेणेति॥ ॥७॥

प्रकृताः पंचजनाः पंचज्योतिषा सह प्राणादयो वा स्युरित्यभिप्रेत्याह किंचेति कथं चक्षुरादिषु चक्षुरादि
त्वं ब्रह्मणः सिध्यति तत्राह ब्रह्मशक्तीति। विमतानि केनचिदधिष्ठितानि प्रवर्त्तंते करणत्वाद्वास्यादिवदि
ति चक्षुरादिव्यापारेणानुमितास्तित्वं प्रत्यगात्मानं ये विदुरिति योजना। विदिक्रियाविषयत्वं व्यावर्त्तय
ति नेति। प्रत्यगात्मविदां कथं ब्रह्मवित्त्वमित्याशंक्याह वरति। मनसो ब्रह्मदर्शनसाधनत्वे कथं ब्रह्म
किंचेते नहि चैतन्यात्मज्योतिषावभास्यमानः प्राणश्चात्मभूतेन प्राणिति तेन प्राणस्यापि प्राणः
सं तं प्राणस्य प्राणं तथा चक्षुषोपि चक्षुरुत श्रोत्रस्यापि श्रोत्रं ब्रह्मशक्त्यधिष्ठितानां हि चक्षुरा
दीनां दर्शनादिसामर्थ्यं स्वतः काष्ठलोष्टसमानि हितानि चैतन्यात्मज्योतिःशून्यानि मनसोपि
मन इति ये विदुश्चक्षुरादिव्यापारद्वारानुमितास्तित्वं प्रत्यगात्मानं न विषयभूतं ये विदुस्ते किं

प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुः॥ ते निचिक्युर्ब्र
ह्म पुराणमग्र्यं॥१८॥ मनसैवानुद्रष्टव्यं नेह नानास्ति किंचन॥ मृत्योः स मृत्युमाप्नोति
य इह नानेव पश्यति॥१९॥ ॥छ॥ ॥ निचिक्युर्निश्चयेन ज्ञातवंतो ब्रह्म पुराणं चिरंत
नमग्र्यमग्रे भवं॥ तद्यदात्मविदो विदुरिति ह्याथर्वणे॥१८॥ तद्ब्रह्मदर्शनसाधनमुच्यते॥ मनसै
व परमार्थज्ञानसंस्कृतेनाचार्योपदेशपूर्वकं चानुद्रष्टव्यं॥ तत्र च दर्शनविषये ब्रह्मणि इह न
नानास्ति किंचन किंचिदपि॥ असति नानात्वे नानात्वमध्यारोपयत्यविद्यया॥ स मृत्योर्मरणा
न्मरणं प्राप्नोति॥ कोसौ य इह नानेव पश्यति अविद्याध्यारोपणव्यतिरेकेण नास्ति परमार्थ
तो द्वैतमित्यर्थः॥१९॥ ॥छ॥ ॥

णो वाङ्मनसातीतत्वश्रुतिरित्याशंक्याह परमार्थेति। केवलं मनो ब्रह्माविषयी कुर्वदपि श्रवणादिसं
स्कृतं तदाकारं जायते तेन द्रष्टव्यं तदुच्यते अत एव वृत्तिव्याप्यं ब्रह्मेत्युपगच्छेतीति भावः। अनुशब्दार्थमा
हाचार्येति। द्रष्टृद्रष्टव्यादिभावेन भेदमाशंक्याह। तत्र चेति। एवकारार्थमाह नचेति कथमात्मनि व
स्तुतो भेदरहितेपि भेदो भातीत्याशंक्याहासतीति। नेहेत्यादेः संपिंडितमर्थं कथयत्यविद्येति॥छ॥

द्वैताभावे कथमनुद्रष्टव्यमित्याशंक्याह यस्मादिति॥ तमेवैकं प्रकारं प्रकटयति विज्ञानेति। परिच्छिन्नत्वंयव
च्छिन्नत्वाकाशवदिति। एकरसत्वं हेतूकृत्याप्रमेयत्वं प्रतिजानीते यस्मादिति। एतमृत्स्नं यस्मादेकरसं तस्मा
दप्रमेयमिति योजना॥ हेत्वर्थं स्फुरयति सर्वैकत्वादिति। तथापि कथमप्रमेयत्वं तदान्येनेति। मिथोविरोधमा ह
शंकते नन्विति। विरोधमेव स्फोरयति ज्ञायत इतीति। चोदितविरोधं निराकरोति नैष दोष इति। संगृहीतंस
माधानं विशदयति यथेत्यादिना॥ तस्य मानान्तरैर्विषयीकर्तुमशक्यत्वे हेतुमाह सर्वस्येति। इति सर्वद्वैतो

यस्मादेवं तस्मादेकधैव एकेनैव प्रकारेण विज्ञानघनैकरसप्रकारेणाकाशवन्निरन्तरेणानुद्रष्टव्यं। य
स्मादेतद्ब्रह्माप्रमेयं अप्रमेयं सर्वैकत्वात्। अन्येन ह्यन्यत्प्रमीयते इदं त्वेकमेवातोऽप्रमेयं ध्रुवं नित्यं कू
टस्थमविचालीत्यर्थः। ननु विरुद्धमिदमुच्यते। अप्रमेयं ज्ञायत इति च। ज्ञायत इति प्रमाणेन मीयत इ
त्यर्थोऽप्रमेयमिति च तत्प्रतिषेधः॥ नैष दोषोऽन्यवस्तुवदागमातिरिक्तप्रमाणाप्रमेयत्वप्रतिषेधार्थ
त्वात्॥ यथान्यानि वस्तून्यागमनिरपेक्षप्रमाणैर्विषयीक्रियन्ते न तथैतदात्मतत्त्वं प्रमाणान्तरेण वि

एकधैवानुद्रष्टव्यमेतदप्रमेयं ध्रुवं॥७॥

षयीकर्तुं शक्यते। सर्वस्यात्मत्वे केन कं पश्येद्विजानीयादिति प्रमातृप्रमाणादिव्यापारप्रतिषेधेनै
वागमोऽपि विज्ञापयति। न त्वभिधानाभिधेयलक्षणवाक्यधर्माङ्गीकरणेन॥ तस्मान्नागमेनापि
स्वर्गमेर्वादिवत्प्रतिपाद्यते प्रतिपादयित्रात्मभूतं हि तत्। प्रतिपादयितुः प्रतिपादनस्य प्रतिपाद्य
विषयत्वात्। भेदे हि सति तद्भवति। ज्ञानं च तस्मिन्परात्मभावनिवृत्तिरेव॥ ॥७॥ ॥

पश्यतीति श्रुतेरिति शेषः। आगमोऽपि तर्हि कथमात्मानमावेदयेदित्याशंक्याह प्रमात्रिति। आत्मनः स्वर्गा
दिवद्विषयत्वेनागमप्रतिपाद्यत्वाभावे हेतुमाह प्रतिपादयित्रिति। तथापि किमिति विषयत्वेनाप्रतिपा
द्यत्वं तत्राह प्रतिपादयितुरिति। तदिति प्रतिपाद्यत्वमुक्तं कथं तर्हि तस्मिन्नागमिकज्ञानं तदाह ज्ञानं चे
ति। परस्मिन्देहादावात्मभावस्यारोपितस्य निवृत्तिरेव वाक्येन क्रियते तथा चात्मनि परिशिष्टस्वाभा
विकमेव स्फुरणं प्रतिबंधविगमात्प्रकटीभवतीति भावः॥ ॥७॥ ॥७॥ ॥

ननुब्रह्मण्यात्मभावःश्रुत्याकर्तव्योविवक्षितेनतुदेहादावात्मत्वव्यावृत्तिरतआहनतस्मिन्निति।ब्रह्मणश्चे
दात्मभावःसदामन्यतेकथमन्यथाप्रथेत्याशंक्याह।नित्योहीति।सर्वस्यपूर्णस्यब्रह्मण इत्येतत्।अत
द्विषयोब्रह्मव्यतिरिक्तविषयइत्यर्थः।ब्रह्मण्यात्मभावस्यसदाविद्यमानत्वेफलितमाहतस्मादिति।अ
तद्विषयाभासोदेहादावात्मत्वप्रतिभासः।तस्मिन्ब्रह्मणीत्यर्थः।अन्यस्मिन्नात्म भावनिवृत्तिरेवाग
मेनक्रियतेचेत्तर्हिकथमात्मातेनगम्यतइत्युच्यतेतत्राहान्येति।यद्यागमिकवृत्तिव्याप्यत्वेनात्मनो

नतस्मिन्साक्षादात्मभावःकर्तव्योविद्यमानत्वादात्मभावस्यनित्योह्यात्मभावःसर्वस्यातद्विष
८ यइवप्रत्यवभासते।।तस्मात्तद्विषयाभासनिवृत्तिव्यतिरेकेणनतस्मिन्नात्मभावोविधीयते।।अ
न्यात्मभावनिवृत्तावात्मभावःस्वात्मनिस्वाभाविकोयःसकेवलोभवतीत्यात्माज्ञायतइत्युच्यते

विरजःपरआकाशादजआत्मामहान्ध्रुवः॥

स्वतश्चाप्रमेयःप्रमाणांतरेणनविषयीक्रियतइति।उभयमप्यविरुद्धमेव।विरजोविगतर
जोरजोनामधर्माधर्मादिमलंतद्रहितइत्येतत्परः।परोव्यतिरिक्तःसूक्ष्मोव्यापीवाआकाशा
दव्याकृताख्यात्।।अजोनजायते।जन्मप्रतिषेधादुत्तरेपिभावविकाराःप्रतिषिद्धाः।सर्वेषां
जन्मादित्वादात्मामहान्परिमाणतोमहत्तरःसर्वस्मात्ध्रुवोविनाशी॥ ॥७॥ ॥

मेयत्वमिष्यतेकथंतर्हितस्यामेयत्ववाचोयुक्तिरित्याशंक्याहस्वतश्चेति।वृत्तिव्याप्यत्वेनमेयत्वंस्फु
रणाव्याप्यत्वेनचामेयत्वमित्युपसंहरतिइत्युभयमिति।यदुक्तंध्रुवत्वंतदुपस्कारपूर्वकमुपपा
दयतिविरजइत्यादिना।कथंजन्मनिषेधादितरेविकारानिषिध्यंतेतत्राहसर्वेषामिति॥ ॥७॥

बृ॰भा॰शा॰ यथोक्तं वस्तु निदर्शनेन निगमयति तमीदृशमिति। नित्यशुद्धत्वादिलक्षणमिति यावत्। उक्तया रीत्या प्रज्ञाकर टी॰अ॰४
३७१ णकानि साधनानीति चेत्तानि दर्शयत्येवमिति। काम्यनिषिद्धत्यागः संन्यासः उपरमो नित्यनैमित्तिकत्यागर
ति भेदः। बहूनिति विशेषणवशादायातमर्थं दर्शयति नेति। चिंतनीयेषु शब्देष्विति यावत्। तत्र श्रुत्यंतरं

तमीदृशमात्मानमेव धीरो धीमान् विज्ञायोपदेशतः शा[illegible]स्त्रतश्च प्रज्ञां शास्त्राचार्योपदिष्टविषयां
जिज्ञासापरिसमाप्तिकरीं कुर्वीत ब्राह्मणः। एवं प्रज्ञाकरणसाधनानि संन्यासशमदमोपरमति
तिक्षासमाधानानि कुर्यादित्यर्थः। नानुध्यायान्नानुचिंतयेद्बहून् प्रभूतान् शब्दानत्र बहु

तमेव धीरो वि[illegible]ज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः॥ नानुध्यायाद्बहूं
च्छब्दान्वाचो वि[illegible]पनं हि तदिति॥२१॥ ॥७॥ ॥

ग्ला२

त्वप्रतिषेधात् केवलात्मैकत्वप्रतिपादकाः स्वल्पाः शब्दा अनुज्ञायंते। ओमित्येवं ध्यायथ आ
त्मानमन्या वाचो विमुंचथेति चाथर्वणे॥ वाचः विग्लापनं विशेषेण ग्लानिकरं श्रमकरं हि य
स्मात्तद्बहुशब्दाभिधानमिति॥२१॥ ॥७॥ ॥

संवादयत्योमित्येवमिति। नानुध्यायादित्यत्र हेतुमाह वाचइति। तस्माद्बहूंछब्दान्नानुचिंतयेदि
ति पूर्वेण संबंधः इति शब्दः श्लोकव्याख्यानसमाप्त्यर्थः॥ ॥७॥ ॥७॥ ॥

कंडिकांतरमवतारयितुं वृत्तं कीर्तयति सहेतुकाविति। उत्तरकंडिकातात्पर्यमाह। एवमिति। विरजः पर इत्या
दिनोक्तक्रमेणावस्थिते ब्रह्मणीति यावत्। तदित्युपयुक्तोक्तिः तदर्था ब्रह्मात्मनि सर्वस्य वेदस्य विनियोगप्र
दर्शनार्थेत्यर्थः। ननु विविदिषावाक्येन ब्रह्मात्मनि सर्वस्य वेदस्य विनियोगो वक्ष्यते तथा च तस्मात्याकेन
वाक्येन किमर्थमित्याशंक्याह तत्रेति। यथास्मिन्नध्याये सफलमात्मज्ञानमुक्तं तथैव तदनूद्यत इति योजना।
कथं यथोक्ते ज्ञाने सर्ववेदो विनियोक्तुं शक्यते स्वर्गकामादिवाक्यस्य स्वर्गादावेव पर्यवसानादित्याशंक्य
सहेतुकौ बंधमोक्षावभिहितौ मंत्रब्राह्मणाभ्यामन्तोके च पुनर्मोक्षस्वरूपं विस्तरेण प्रतिपादितं॥
एवमेतस्मिन्नात्मविषये सर्ववेदो यथोपयुक्तो भवति तथा वक्तव्यमिति तदर्थं कंडिका आरभ्य
ते। तत्र यथास्मिन्प्रपाठके विहितं सप्रयोजनमनूद्यात्रैवोपयोगः कृत्स्नस्य वेदस्य काम्यराशिवर्जि
तस्येत्येवमर्थः॥ उक्तार्थानुवादः॥ स वा एष इत्यादि स इत्युक्तपरामर्शार्थः॥ कोसावुक्तः परामृश्यते
तं परिनिर्दिशति। य एष विज्ञानमय इत्यतीतानंतरवाक्योक्तसंप्रत्ययो माभूदिति य एषः कतम ए

स वा एष महानज आत्मा योयं विज्ञानमयः प्राणेषु॥ ७॥

त्यु षइत्युच्यते। विज्ञानमयः प्राणेष्विति ^ कवाक्योल्लिंगनं सेवायनिरस्त्यर्थमुक्तं हि पूर्वं जनकप्रश्नारंभे क
तम आत्मेति योयं विज्ञानमयः प्राणेष्वित्यादि एवमुक्तं भवति। योयं विज्ञानमयः प्राणेष्वित्यादिना
वाक्येन प्रतिपादितः स्वयंज्योतिः आत्मा स एष कामकर्माविद्यानामनात्मधर्मत्वप्रतिपादनद्वारेण
मोक्षितः परमात्मभावमापादितः पर एवायं नान्य इत्येव साक्षात् महानज आत्मेत्युक्तो योयं वि
ज्ञानमयः प्राणेष्विति यथाव्याख्यातार्थ एव॥ ॥७॥ ॥संयोगपृथक्त्वन्यायमनादृत्य विशिनष्टि
काम्यराशीति। उक्तस्य सफलस्यात्मज्ञानस्यानुवाद इति यावत्। उक्तानां भूयस्त्वे विशेषं ज्ञातुं पृच्छति को
सावितिं विशेषणानर्थक्यमाशंक्य परिहरत्यवीतेति। तद्विरजः पर इत्यादिते नोक्तो महत्वादिविशेषणः
परमात्मा तत्र सशब्दात्सती निर्माभूदिति कृत्वा तेन ज्योतिर्ब्राह्मणस्थं जीवं परामृश्य तमेव वैशब्देन स्मा
रयित्वा तस्य संनिहितेन परेणात्मनैक्यमेषशब्देन निर्दिशतीत्यर्थः। विशेषणवाक्यस्य मेषशब्दे प्रश्नपू
र्वकं व्याचष्टे कतम इति। कथं जीवो विज्ञानमयः कथं वा प्राणेष्विति सप्तमी प्रयुज्यते तत्राहोक्तेति। तदानुवा

दस्यशब्दार्थसंदेहापोहफलमाहसंशयेति। उक्तवाक्योल्लिंगनमित्युक्तं विवृणोत्युक्तं हीति। योऽयं विज्ञानमयः प्राणे
षु प्रागुक्तः सएषमहानात्मेतिजीवानुवादेनपरमात्मभावोविहितइतिवाक्यार्थमाहएतदिति। परमात्मभावापाद
नप्रकारमनुवदतिसाक्षादिति। विशेषणवाक्यस्य व्याख्येयत्वप्राप्तावुक्तवाक्योल्लिंगनमित्यत्रोक्तं स्मारयतियो
यमिति॥ ॥७॥ ॥वाक्यांतरमवतार्यव्याचष्टे यएषइति। कथंपुनराकाशशब्दस्यपरमात्मत्वमुपेत्यद्वितीये
यएषोंतर्हृदयेहृदयपुंडरीकमध्येयएषआकाशोबुद्धिविज्ञानसंश्रयःतस्मिन्नाकाशेबुद्धिविज्ञान
सहितेशेतेतिष्ठत्यथवासंप्रसादकालेंतर्हृदयेयएषआकाशःपरएवात्मानिरुपाधिकोविज्ञान
मयस्यस्वभावःतस्मिन्स्वस्वभावेपरमात्मन्याकाशाख्येशेतेचतुर्थएतद्व्याख्यातं। कैषतदाभूदि
त्यस्यप्रतिवचनत्वेन॥ सर्वस्यब्रह्मेंद्रादेर्वशीसर्वोह्यस्यवशेवर्तते। उक्तंचैतस्यवाअक्षरस्यप्र
शासनइतिनकेवलंवशीसर्वस्येशानईशिताचब्रह्मेंद्रप्रभृतीनामीशितृत्वंचकदाचिज्जातिकृ
तेयथाराजकुमारस्यबलवत्तरानपिभृत्यान्प्रतितद्वन्माभूदित्याहसर्वस्याधिपतिरधिष्ठायपा
यएषोंतर्हृदयआकाशस्तस्मिंछेतेसर्वस्यवशीसर्वस्येशानःसर्वस्याधिपतिःसनसाधु
नाकर्मणाभूयान्नोएवासाधुनाकनीयान्॥ लयितास्वतंत्रइत्यर्थः॥ राजपुत्रवदमात्यादि
भृत्यतंत्रःस्वयमित्येतत्। वशित्वादिहेतुहेतुमद्रूपं॥ यस्मात्सर्वस्याधिपतिस्ततःसर्वस्येशानोयो
ह्ययमधिष्ठायपालयतिसतंप्रतिईष्टएवेतिप्रसिद्धं॥ यस्माच्चसर्वस्येशानः। तस्मात्सर्वस्यवशीति
किंचान्यत्सएवंभूतोहृद्यंतर्ज्योतिःपुरुषोविज्ञानमयःनसाधुनाशास्त्रविहितेनकर्मणाभूयान्
भवतिनवर्द्धतेपूर्वावस्थातःकेनचिद्धर्मेणनोएवशास्त्रप्रतिषिद्धेनासाधुनाकर्मणाकनीयानल्प
तरोभवतिपूर्वावस्थातोनहीयतइत्यर्थः॥ ॥व्याख्यानेतस्यार्थांतररूढत्वादित्याशंक्याहचतुर्थइति
।इत्थमुक्तंज्ञानमनूद्यतत्फलमनुवदतिसवेत्यादिना। कथंपुनर्निरुपाधिकस्येश्वरस्यवशित्वंकथंचत
दभावेतदात्मनोविदुषस्तदुपपद्यतेतत्राहोक्तंचेति। विशेषणत्रयस्यहेतुहेतुमद्रूपत्वमेवविशदयतियस्मा
दित्यादिना। तत्रप्रसिद्धिंप्रमाणयतियोहीति। नकेवलमुक्तमेवविद्याफलंकिंत्वन्यच्चास्तीत्याहकिंचेति
एवंभूतत्वंज्ञानपरमात्माभिन्नत्वपरिशुद्धत्वमर्थमनुवदतिहृदीति। ब्रह्मीभूतस्यविदुषःस्वातंत्र्यादिव
द्धर्माधर्मास्पर्शित्वमपिफलमित्यर्थः॥ ॥७॥ ॥

अधिष्ठानादिकर्तृत्वाद्विदुषोपि लौकिकवद्धर्मादिसंबंधित्वं स्यादिति शंकते सर्वो हीति। परतंत्रमुपाधिरिति त्वे
परिहरत्युच्यत इति। सर्वाधिपत्यराहित्यं चोपाधिरित्याह किंचेति। सर्वपालकत्वराहित्यं चोपाधिरित्या
ह एष इति। सर्वानाधारत्वं चोपाधिरित्याह। एष इति कथं विधारयितृत्वमित्याशंक्याह तदा हेति। तदेव साध

किंच सर्वो ह्यधिष्ठानपालनादि कुर्वन्परानुग्रहपीडाकृतेन धर्माधर्माख्येन युज्यते तस्यैव तु कथं
तदभाव इत्युच्यते। यस्मादेष सर्वेश्वरः सन्कर्मणोपि शास्तृत्वं भवत्येव वशी। अतस्तस्मान्न कर्मणा संब
ध्यते। किंच एष भूताधिपतिः ब्रह्मादिस्तंबपर्यंतानां भूतानामधिपतिरित्युक्तार्थं पदं एष भूतानां
तेषामेव पालयिता रक्षिता। एष सेतुः किं विशिष्ट इत्याह। विधरणः वर्णाश्रमादिव्यवस्थायाः विधार
यिता तदाह। एषां भूरादीनां ब्रह्मलोकांतानां लोकानामसंभेदायासंभिन्नमर्यादाये परमेश्वरेण सेतु

एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय॥७॥

वद्विधार्यमाणा लोकाः संभिन्नमर्यादाः स्युरतो लोकानामसंभेदाय सेतुभूतोयं परमेश्वरो यः स्व
यंज्योतिरात्मैव॥ एवंवित्सर्वस्य वशीत्यादि ब्रह्मविद्यायाः फलमेतन्निर्दिष्टं किंज्योतिरयं पुरुष इत्ये
वमादिषष्ठप्रपाठकविहितायामेतस्यां ब्रह्मविद्यायामेवंफलायां काम्यैकदेशवर्जितं कृत्स्नं कर्म
कांडं तादर्थ्येन विनियुज्यते॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥

यति परमेश्वरेणेति। सर्वस्य वशीत्यादिनोक्तमुपसंहरत्येवंविदिति। सफलं ज्ञानमनूद्य विविदिषावा
क्यमवतारयति। किंज्योतिरिति। एवंफलायां सर्वस्य वशीत्यादिनोक्तफलोपेतायामिति यावत्। ताद
र्थ्येन परंपरया ज्ञानोत्पत्तिशेषत्वेनेत्यर्थः॥ ॥छ॥ ॥छ॥ ॥छ॥

 विनियोजकं वाक्यमाकांक्षापूर्वकमादाय व्याचष्टे तत्कथमित्यादिना। एवंभूतं श्लोकोक्तविशेषणमित्यर्थः।
ब्राह्मणशब्दस्य क्षत्रियाद्युपलक्षणत्वे हेतुमाह अविशिष्टो हीति। संभवितं पक्षांतरमाह अथवेति। तेन विविदि
षाप्रकारं प्रश्नपूर्वकं विवृणोति कथमित्यादिना भर्तृप्रपंचप्रस्थानमुत्थाप्य प्रत्याचष्टे ये पुनरित्यादिना। तत्र
हेतुमाह न हीति। भवतूपनिषन्मात्रग्रहणमित्याशंक्य वेदवादमनुच्यते गुरूच्चारणानंतरं पठ्यत इति व्यु
त्पत्तेर्वेदानुवचनशब्देन सर्ववेदग्रहे संभवति तदेकदेशत्यागो न युक्त इत्याह वेदेति। दोषसाम्यमाशंक्य
तत्कथमित्युच्यते॥ तमेतमेवंभूतमौपनिषदं पुरुषं वेदानुवचनेन मंत्रब्राह्मणाध्ययनेन नित्यस्वाध्या
यलक्षणेन विविदिषंति वेदितुमिच्छंति॥ के ब्राह्मणा ब्राह्मणग्रहणमुपलक्षणार्थं अविशिष्टो ह्य
धिकारस्त्रयाणां वर्णानां॥ अथवा कर्मकांडेन मंत्रब्राह्मणेन वेदानुवचनेन विविदिषंति॥ कथं
विविदिषं तीत्युच्यते॥ यज्ञेनेत्यादि। ये पुनर्मंत्रब्राह्मणलक्षणेन वेदानुवचनेन प्रकाश्यमानं विवि
दिषंतीति व्याचक्षते तेषामारण्यकमात्रमेव वेदानुवचनं स्यात्। न हि कर्मकांडेन परमात्मा प्रकाश्यते।

तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति॥ ७॥

तं त्वौपनिषदमिति विशेषश्रुतेः॥ वेदानुवचनेनेति चाविशेषितत्वात्समस्तग्राहीदं वचनं॥ न च तदेक
त्व देशोत्सर्गो युक्तः॥ ननु स्वपक्षेप्युपनिषद्भ्योऽन्यत्र इत्येकदेशत्वं स्यात्। नाद्यव्याख्यानेऽविरोधादस्मत्पक्षे नैष
दोषो भवति॥ यज्ञवेदानुवचनशब्देन नित्यस्वाध्यायोऽभिधीयते तदौपनिषदमपि परिगृहीतं वेति वेदा
नुवचनशब्दार्थैकदेशो न परित्यक्तो भवति। यज्ञादिसहपाठाच्च। यज्ञादीनि कर्माण्येवानुक्रमिष्यन् वे
दानुवचनशब्दं प्रयुंक्ते तस्मात्कर्मैव वेदानुवचनशब्देनोच्यत इति गम्यते। कर्म हि नित्यस्वाध्या
येनेति ज्ञातेति सिद्धांतेऽप्युपनिषदं वर्जयित्वा वेदानुवचनशब्देन कर्मकांडं गृहीतमिति कृत्वा तस्य वेदैकदेश
विषयत्वं स्यात्ततश्च यत्रोभयोरित्यादिन्यायविरोध इत्यर्थः। नित्यस्वाध्यायो वेदानुवचनमिति पक्षमा
दाय परिहरति नेत्यादिना। वेदैकदेशापरिग्रहपरित्यागात्मकविरोधाभावं साधयति यज्ञेति तर्हि व्या
ख्यानांतरमुपेक्षितमित्याशंक्य तदपि वाक्यशेषवशादपेक्षितमेवेत्याह यज्ञादीति। संग्रहवाक्यं
विवृणोति यज्ञादिकर्माणीति। तर्हि प्रथमव्याख्याने कथं वाक्यशेषोपपत्तिरित्याशंक्याह कर्म हीति॥

वेदानुवचनादीनामात्मविविदिषासाधनत्वमाक्षिपति कथमिति। उपनिषद्भिरिवात्मा तैरपि ज्ञायतामि
त्याशंक्याह नैषेति कर्मणामप्रमाणत्वेपि परंपरया ज्ञानहेतुत्वाद्विविदिषाश्रुतिरविरुद्धेति समाधत्ते नै
षदोष इति। तदेव स्फुटयति कर्मभिरिति। तत्रश्रुत्यंतरं प्रमाणयति तथाहीति। ततो नित्याद्यनुष्ठानाद्वि
शुद्धधीरात्मानं सदाचिंतयन्नुपनिषद्भिस्तं पश्यतीत्यर्थः। आदिशब्देन कषायपक्तिरित्यादि स्मृति
संग्रहः। नित्यकर्मणो संस्कारार्थत्वे प्रमाणं पृच्छति कथमिति। यद्यपि श्रुतिस्मृतिश्यां कर्मभिः
कथं पुनर्नित्यस्वाध्यायादिभिः कर्मभिरात्मानं विविदिषंति नैव हि तान्यात्मानं प्रकाशयंति य
थोपनिषदः। नैषदोषः। कर्मणां विशुद्धिहेतुत्वात्। कर्मभिः संस्कृता हि विशुद्धात्मानः शक्नुवं
त्यात्मानमुपनिषत्प्रकाशितमप्रतिबंधेन वेदितुं॥ तथा ह्याथर्वणे। विशुद्धसत्वः ततस्तु तं पश्यते
निःकलं ध्यायमान इति। स्मृतिश्च। ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मण इत्यादि। कथं पुनर्नि प
त्यानि कर्माणि संस्कारार्थानीति गम्यते स ह वा आत्मयाजी यो वेदेदं मेनेनांगं संस्क्रियत इदं मेने

यज्ञेन दानेन॥७॥

नांगमुपधीयत इत्यादिश्रुतेः। सर्वेषु हि धर्मशास्त्रेषु कर्माणि संस्कारार्थान्येवाचक्षते। अष्ट ॥
चत्वारिंशत्संस्काराः इत्यादिषु गीतासु च। यज्ञो दानं तपश्चैव पावनानि मनीषिणां॥ सर्वेप्येते य ॥७॥
ज्ञविदो यज्ञक्षपितकल्मषा इति। यज्ञेनेति। द्रव्ययज्ञा ज्ञानयज्ञाश्च संस्काररूपास्तैः संस्कृ
तस्य च विशुद्धसत्वस्य ज्ञानोत्पत्तिरप्रतिबंधेन भविष्यति। अतो यज्ञेन विवि दिषंति। दाने
न। दानमपि पापक्षयहेतुत्वाद्धर्मवृद्धिहेतुत्वाच्च॥ ॥७॥ ॥
संस्कृतस्योपनिषद्भिरात्मा ज्ञातुं शक्यते तथापि तेषां संस्कारार्थत्वे किं प्रमाणमिति प्रश्ने श्रुतिस्मृती प्र
माणयति स ह वा इत्यादिना किं पुनः स्मृतिशास्त्रं तदाह अष्टाचत्वारिंशादिति। अष्टावनायोसादयो गुणा
श्चत्वारिंशत्तु गर्भाधानादयः संस्कारा इति विभागः। बहुवचनोपात्तं स्मृत्यंतरमाह। गीतासु चेति। पदां
तरमादाय व्याचष्टे। यज्ञेनेतीति। तेषां संस्कारार्थत्वेपि कथं ज्ञानसाधनत्वमित्याशंक्याह संस्कृतस्येति
। दानेन विविदिषंतीति पूर्वेण संबंधः। कथं पुनः स्वतंत्रं दानं विविदिषाकारणमत आह दानमपीति। वि

तपसेत्यत्रापिपूर्ववदन्वयः।कामानशनेनरागद्वेषरहितैरिन्द्रियैर्विषयसेवनंयदृच्छालाभसंतुष्टत्वमिति
यावत्।यथाश्रुतार्थत्वेकाहानिरित्याशंक्याहनत्विति।भवतूपात्तानांवेदानुवचनादीनामित्थमात्मज्ञा
नेविनियोगस्तथापिकथंसर्वंनित्यकर्मतत्रविनियुक्तमित्याशंक्याहवेदानुवचनेति।उपलक्षणफल
माहैवमिति।प्रणाड्याकर्मणोमुक्तिहेतुत्वेकांडद्वयस्यैकवाक्यत्वमपिसिध्यतीत्याहैवंकर्मेति।वाक्यां
तरमवतार्यव्याकरोतिएवमिति।तस्यैवार्थमाहयथोक्तेनेति।यज्ञाद्यनुष्ठानाद्धिशुद्धिद्वाराविवि
तपसातपस्त्वविशेषणकृच्छ्रचांद्रायणादिप्राप्तौविशेषणमनाशकेनेति॥कामानशनमना
शकं।ननुभोजननिवृत्तिःभोजननिवृत्तौम्रियतएवनात्मवेदनं।वेदानुवचनयज्ञदानतपः
शब्देनसर्वमेवनित्यंकर्मोपलक्ष्यते॥एवंकाम्यवर्जितंनित्यंकर्मजातंसर्वमात्मज्ञानोत्पत्ति
द्वारेणमोक्षसाधनत्वंप्रतिपद्यते।एवंकर्मकांडेनास्यैकवाक्यतावगतिः॥एवंयथोक्तेनन्या
येनैतमात्मानंविदित्वायथाप्रकाशितंमुनिर्भवति॥मननान्मुनिर्योगीभवतीत्यर्थः।एव

तपसानाशकेनैतमेवविदित्वामुनिर्भवति॥

मेवविदित्वामुनिर्भवतिनान्यं॥नन्वन्यवेदनेपिमुनित्वंस्यात्कथमवधार्यते॥एतमेवेति
॥बाढमन्यवेदनेपिमुनिर्भवेत्किंत्वन्यवेदने नमुनिरेवस्यात्किंतर्हिकर्म्यपिभवेत्सः॥ए
तंत्वौपनिषदंपुरुषंविदित्वामुनिरेवस्यात्॥ननुकर्मी॥अतोसाधारणंमुनित्वंविवक्षितम
स्येत्यवधारयत्येतमेवेति॥एतस्मिन्हिविदितेतत्केनकंपश्येदित्येवंक्रियासंभवान्मनन
मेवस्यात्॥ ॥७॥ ॥
दिषोत्पत्तौगुरुपादोपसर्पणंश्रवणादिचेत्यनेनक्रमेणेत्यर्थः।यथाप्रकाशितंमोक्षप्रकरणेमंत्रब्रा
ह्मणाभ्याम्मुक्तलक्षणमित्यर्थः।योगिशब्दोजीवन्मुक्तविषयः।एवकारंव्याकरोत्येतमेवेति।अवधार
णमाक्षिप्यसमाधत्तेनन्वित्यादिना॥एवकारस्तर्हित्यज्यतामित्याशंक्याहकिंत्विति।आत्मवेदनेपिक
र्मित्वंस्यादितिचेन्नेत्याहैतंत्विति।कथमात्मविदोपिमुनित्वमसाधारणंतदाहैतस्मिन्निति॥ ॥७॥

इतश्चात्मविदो न कर्मित्वमित्याह। किं चेति। आत्मलोकमिच्छतां मुमुक्षूणामपि कर्मत्यागश्रवणादात्मविदां
न कर्म तेषां किं वक्तव्यमित्यर्थः। ताच्छील्यं वैराग्यातिशयशालित्वं। अवधारणसामर्थ्यसिद्धमर्थमाहैतमे
वेति। पारिव्राज्ये लोकत्रयार्थिनामनधिकारे दृष्टांतमाह नहीति। लोकत्रयार्थिनश्चेत्पारिव्राज्ये नाधिक्रियं
ते कुत्र तर्हि तेषामधिकारस्तत्राह तस्मादिति। स्वर्गकामस्य स्वर्गसाधने यागेऽधिकारवल्लोकत्रयार्थिनामपि

किंच॥ एतमेवात्मानं स्वं लोकमिच्छंतः प्रार्थयंतः प्रव्राजिनः प्रव्रजनशीलाः प्रव्रजंति प्रकर्षेण व्रजंति। स
र्वाणि कर्माणि संन्यस्यंतीत्यर्थः॥ एतमेव लोकमिच्छंत इत्यवधारणान्न बाह्यलोकत्रये स्तूनां पारिव्रा
ज्येऽधिकार इति गम्यते॥ न हि गंगाद्वारं प्रतिपित्सुः काशींदिशानिवा संपूर्वाभिमुखः प्रैति॥ तस्माद्बा
ह्यलोकत्रयार्थिनां पुत्र कर्मापरब्रह्मविद्या साधनं पुत्रेणायं लोको जय्यो नान्येन कर्मणेत्यादिश्रुतेः।
अतस्तदर्थिभिः पुत्रादिसाधने प्रत्याख्यायन पारिव्राज्यं प्रतिपत्तुं युक्तमतत्साधनत्वात् पारिव्राज
स्य॥ तस्मादेतमेव लोकमिच्छंतः प्रव्रजंतीति युक्तमवधारणं॥ आत्मलोकप्रतिपत्तिर्ह्यविद्यानिवृत्ते

एतमेव प्रव्राजिनो लोकमिच्छंतः प्रव्रजंति॥ ७॥

स्वात्मन्यवस्थानमेव॥ तस्मादात्मानं चेल्लोकमिच्छति यस्तस्य सर्वक्रियोपरम एवात्मलोकसाध
नं मुख्यमंतरंगं। यथा पुत्रादिरेव बाह्यलोकत्रयस्य। पुत्रादिकर्मणः आत्मलोकं प्रत्यसाधनत्वात्
असंभवेन च विरुद्धमवोचाम। तस्मादात्मानं लोकमिच्छंतः प्रव्रजंत्येव सर्वक्रियाभ्यो निवर्तेरन्ने
वेत्यर्थः। यथा च बाह्यलोकत्रयार्थिनः प्रतिनियतानि पुत्रादीनि साधनानि एवमात्मलोकार्थिनः स विहितानि
र्वैषणानिवृत्तिः पारिव्राज्यं ब्रह्मविदो विधीयत एव॥ ॥७॥ ॥

तत्साधने पुत्रादावधिकार इत्यर्थः। पुत्रादीनां बाह्यलोकसाधनत्वे प्रमाणमाह पुत्रेणेति। पुत्रादीनां लो
कत्रयसाधनत्वे फलितमाह अत इति। अतत्साधनत्वं लोकत्रयं प्रत्यनुपायत्वं अवधारणार्थमुपसंहर
ति। तस्मादिति। लोकत्रयार्थिनां पारिव्राज्येऽनधिकारादिति यावत्। आत्मलोकस्य स्वरूपत्वेन सदास
त्वात्। कथं तत्रेच्छेत्याशंक्याहात्मेति। तस्यात्मत्वेन नित्यप्राप्तत्वेऽप्यविद्याव्यवहितत्वात्सेमासंभवतीति

भावः।भवत्वात्मलोकप्रेप्सा तथापि किं तस्यास्ति साधनं तदाह तस्मादिति।अविद्यावत्त्वात्तदीप्सासंभ
वादित्यर्थः।तदिच्छायादेर्लभ्येयेत्यनयितुं चेच्छब्दः।मुख्यत्वं श्रुत्यक्षरप्रतिपन्नत्वं प्रणाडिकासाधनेभ्यो
वेदानुवचनादिभ्यो विशेषस्तर्हि तदन्तरंगमिति।पारिव्राज्यमेव लोकस्यान्तरंगं साधनमिति दृष्टान्तमाह य
थेति।तथा पारिव्राज्यमेवात्मलोकस्य साधनमिति शेषः।पारिव्राज्यमेवेति नियमे हेतुमाह पुत्रादीति
।तस्यान्यत्र विनियुक्तत्वादिति शेषः।यद्यपि केवलं पुत्रादिकं नात्मलोकप्रापकं तथापि पारिव्राज्य
समुच्चितं तथा स्यादित्याशंक्याह।असंभवेनेति।नहि परिव्राजकस्य पुत्रादि तद्वतो वा पारिव्राज्यं
संभवतीत्युक्तं च समुच्चयं निराकुर्वद्भिः सपरिकरस्य ज्ञानस्य कर्मादिविरुद्धत्वं तेन कुतः समुच्चि
तं पुत्राद्यात्मलोकप्रापकमित्यर्थः।साधनान्तरासंभवे फलितमुपसंहरति तस्मादात्मानमि
ति।प्रव्रजेतीति वर्तमानोपदेशान्नात्र विधिरस्तीत्याशंक्याग्निहोत्रं जुहोतीतिवद्विधिमाश्रित्याह
यथा चेति॥ ॥७॥ ॥

परिव्राज्यविधिमुक्त्वा तदपेक्षितमर्थवादमाकांक्षापूर्वकमुत्थापयति। कुतः पुनरिति। उत्थापि
तस्यार्थवादस्य तात्पर्यमाह तत्रेति। आत्मलोकार्थिनां पारिव्राज्यनियमः स्तुत्यर्थः। अर्थवाद
इ स्थान्यक्षराणि व्याचष्टे तदेतदिति। क्रियापदेनेदमिति संबध्यते। निपातद्वयस्यार्थमाह किलेति। प्र
जां न कामयंत इत्युत्तरत्र संबंधः प्रजामात्रे श्रुते कथं कर्मादि गृह्यते तत्राह प्रजेति। आकांक्षापूर्व
कमन्वयमन्वाचष्टे प्रजां किमिति। अकामयमानत्वस्य पर्यवसानं दर्शयति पुत्रादीति पूर्वे विद्वां
सः साधनत्रयं नानुतिष्ठंति। उक्तमाक्षिपति नन्विति। एषणाभ्यो व्युत्तिष्ठंतां किं तदनुष्ठानेनेत्या
कुतः पुनस्तेषामात्मलोकार्थिनः प्रव्रजंत्येवेत्युच्यते॥ तत्रार्थवादवाक्यरूपेण हेतुं दर्शयति।
एतद्ध स्म वै तत्॥ तदेतत्पारिव्राज्यकारणमुच्यते। ह स्म वै किल पूर्वेऽतिक्रांतकालीनाः वि
द्वांसः आत्मज्ञाः प्रजां कर्म परब्रह्मविद्यां च। प्रजोपलक्षितं हि त्रयमेतत्॥ बाह्यलोकत्रयसा
धनं निर्दिश्यते। प्रजामिति॥ प्रजां किं न कामयंते॥ पुत्रादिलोकत्रयसाधनं नानुतिष्ठंतीति॥
एतद्ध स्म वै तत्पूर्वे विद्वांसः प्रजां न कामयंते॥ ७॥
त्यर्थः। नन्वपरब्रह्मदर्शनमनुतिष्ठंत्येव॥ तत्त्वादिव्युत्थाने॥ नाऽपवादात्॥ ब्रह्म तं परादाद्यो
न्यत्रात्मनो ब्रह्म वेद सर्वं तं परादादित्यपरब्रह्मदर्शनमथापवदत्येव। अपरब्रह्मणोऽपि सर्व
मध्यांतर्भावात्। यत्र नान्यत्पश्यतीति च॥ पूर्वापरबाह्यांतदर्शनप्रतिषेधाच्च। अपूर्वमनपर
म म्नंतरं बाह्यमिति। तत्केन कं पश्येद्विजानीयादिति। तस्मान्नात्मदर्शनव्यतिरेकेणान्यद्व्युत्थं
नकारणमपेक्षते॥ ॥ ७॥ ॥व्याख्या हत तद्वादीति। आत्मविदामपरविद्यानुष्ठानं दूषयति। ना
पवादादिति। अथात्र सर्वस्यानात्मनो दर्शनमेवापोद्यते न तु परस्य ब्रह्मणो दर्शनमत आहाप
रब्रह्मणोऽपीति। तदपवादे श्रुत्यंतरमाह यत्रेति। यस्मिन्भूम्नि स्थितश्चक्षुरादिभिरन्यं न पश्य
ति न शृणोतीत्यादिना च दर्शनादिव्यवहारस्य वारितत्वादात्मविदो न युक्तमपरब्रह्मदर्शनमित्य
र्थः। तत्रैव हेत्वंतरमाह पूर्वेति। प्रतिषेधप्रकारमभिनयत्यपूर्वमिति। इतश्चात्मविदां नापरब्रह्मदर्श
नमित्याह तत्केनेति। अपरब्रह्मदर्शनासंभवे किं तेषामेषणाभ्यो व्युत्थानकारणमित्याशंक्या

 साधनत्रयमननुतिष्ठतामभिप्रायं प्रश्नपूर्वकमाह कः पुनरित्यादिना। कैवल्यमेव तत्साध्यं फ
 लमित्याशंक्याह प्रजा हीति। निर्ज्ञातासोऽयमित्यादिश्रुतावितिशेषः। स एव तर्हि प्रजया साध्य
तामिति चेन्नेत्याह। स चेति। आत्मव्यतिरिक्तो नास्तीत्युक्तमुपपादयति। सर्वं हीति। आत्माव्यति
रिक्तस्यैव लोकस्य प्रजादिसाध्यत्वमिष्टतामिति चेन्नेत्याह। स चेति। आत्मयाजिनः संस्कारार्थं

कः पुनस्तेषामभिप्राय इत्युच्यते। किं प्रयोजनं फलं साध्यं करिष्यामः प्रजया साधनेन। प्रजा हि बा
ह्यलोकसाधने निर्ज्ञाता। स च बाह्यलोको नास्त्यस्माकमात्मव्यतिरिक्तः। सर्वो ह्यस्माकमात्मभू
तमेव। सर्वस्य च वयमात्मभूताः॥ आत्मा चनः आत्मत्वादेव न केनचित्साधनेनोत्पाद्यः आप्यो
विकार्यः संस्कार्यो वा। यत्त्वात्मयाजिनः संस्कारार्थं कर्मेति। तदपि कार्यकरणात्मदर्शनवि
षयमेव। इदमनेनांगं संस्क्रियत इत्यंगांगित्वादिश्रवणात्॥ न हि विज्ञानघनैकरसनैरंतर्यद

किं प्रजया करिष्यामः॥

र्शिनामंगांगिसंस्कारोपधानदर्शनं संभवति। तस्मान्न किंचित्प्रजादिसाधनैः करिष्यामः। अ
विदुषां हि तत्प्रजादिसाधनैः कर्त्तव्यं फलं। न हि मृगतृष्णिकायामुदकपानाय तदुदकदर्शिप्र
ख वृत्त इति तत्रोषरमात्रमुदकाभावं पश्यतोऽपि प्रवृत्तिर्युक्ता। एवमस्माकमपि परमार्थात्मलोकद क
र्शिनां प्रजादिसाधनसाध्ये मृगतृष्णिकादिसमे विद्वद्दर्शनविषये न प्रवृत्तिर्युक्तेत्यभिप्रायः।

कर्मेत्यंगीकारादात्मनोऽस्ति संस्कार्यत्वमित्याशंक्याह यत्त्वपीति। अथांगांगित्वं संस्कार्यत्वं च मु
ख्यात्मदर्शनविषयमेव किं नेष्यते तत्राह न हीति। आत्मविदां प्रजादिसाध्याभावमुपसंहरति।
तस्मान्नेति। केषां तर्हि प्रजादिभिः साध्यं फलं तदाह। अविदुषां हीति। केषांचित्पुत्रादिप्रवृत्तिश्चेत्त पु
नैवं न्यायेन विदुषामपि तेषु प्रवृत्तिः स्यादित्याशंक्याह न हीति। तत्र प्रवृत्तिरिति संबंधः। अविद्व ८४
द्दर्शनविषय इति छेदः॥ ॥७॥ ॥

उक्तेर्थे वाक्यमवतार्य व्याचष्टे तदेतदिति। आत्मा चेत्तदभिप्रेतं फलं तर्हि तत्र साधनमेष्टव्यमित्याशंक्याह न
चेति। क्व तर्हि साधनमेष्टव्यमित्याशंक्याह साध्यस्येति। विपक्षे दोषमाह। असाध्यस्येति। येषामित्यादि वि
य नदेतदुच्यते येषामस्माकं परमार्थदर्शिनो नो आत्मा अशनायादिविनिर्मुक्तः साध्वसाधुभ्यामवि
कार्योयं लोकः फलमभिप्रेतं। न चास्यात्मनः साध्यसाधनादिसर्वसंसारधर्मविनिर्मुक्तस्य
साधनं किंचिदेषितव्यं। साध्यस्य हि साधनान्वेषणा क्रियते। असाध्यस्य साधनान्वेषणायां
हि जलबुध्या स्थलरवतरणकृतं स्यात्। खे वा शाकुनपदान्वेषणं तस्मादेनमात्मानं विदित्वा प्र
व्रजेयुरेव ब्राह्मणाः न कर्मारभेरन्नित्यर्थः यस्मात्पूर्वे ब्राह्मणाः एवं विद्वांसः प्रजामकामयमा
नाः॥ तदेवं साध्यसाधने संव्यवहारं निंदतो विद्वद्विषयायमिति कृत्वा किमकुर्वतेत्युच्यते ते ह
स्म किल पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाभिक्षाचर्यं चरंतीत्यादि य
व्याख्यातं॥ तस्मादात्मलोकमिच्छंतः प्रव्रजंति प्रव्रजेयुरित्येष विधिरर्थवादेन संगच्छते॥ न

येषां नोयमात्मायं लोक इति ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च
व्युत्थायाथ भिक्षाचर्यं चरंति या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणो णा
भे ह्येते एषणे एव भवतः॥ ॥७॥

॥ हि सार्थवादस्यास्य लोकस्तुत्याभिमुख्यमुपपद्यते
॥ प्रव्रजंतीत्यस्यार्थवादरूपो ह्येतद्ध स्मेत्यादिरुत्तरग्रंथः॥ अर्थवादश्चेन्नार्थवादो न रमपे
क्षितापेक्षितत्वे तद्ध स्मेत्य र्थवादं प्रव्रजंतीत्येतत्॥ यस्मात्पूर्वे विद्वांसः प्रजादिकर्मभ्यो विनिवृ
त्ताः प्रव्रजितवंत एव तस्मादधुनातना अपि प्रव्रजंति प्रव्रजेयुरित्येवं संबध्यमानेन लोकस्तुत्य
भिमुख्यं भवितुमर्हति। विज्ञानेन समानकर्तृकत्वोपदेशादित्यादिना वोचाम। वेदानुवचनादि सह
न पाठाच्च। यथात्मवेदे साधनत्वेन विहितानां वेदानुवचनादीनां यथार्थत्वमेव न चार्थवादत्वं॥ तथै
तैर तैरेव सह पठितस्य पारिव्राज्यस्यात्मलोकप्राप्तिसाधनत्वेनार्थवादत्वमुक्तं॥ फलविभागोपदेशा
क्यार्थमुपसंहरति तस्मादिति। ब्राह्मणानां ब्रह्मविदां प्रजादिभिः साध्याभावादिति यावत्। वाक्यांतरं

बृ·भा·श्वा· प्रश्नद्वारेणावतार्यपांचमिकंव्याख्यानेनतस्यस्मारयतितत्रएवमित्यादिना।यदर्थोयमर्थवादस्तंवि टी·अ·४
३८५ धिंनिगमयतितस्मादिति।महानुभावोयमात्मलोकोत्तदर्थिनोदुष्करमपिपारिव्राज्यंकुर्वंतीतिस्तु
तिरत्रविवक्षितानविधिरित्याशंक्याहनहीति।तदेवप्रपंचयतिप्रव्रजंतीत्यस्यैति।तथापिप्रव्रजंती
तिवाक्यस्यार्थवादत्वेकिंनस्यादित्याशंक्याहार्थवादश्चेदिति।अपेक्षाप्रकारमेवप्रकटयन्न
स्यस्तुत्यभिमुखत्वाभावाद्विधित्वमेवेत्याहयस्मादिति।किंचविदित्वाव्युत्थायभिक्षाचर्यंच
रंतीत्यत्रविज्ञानेनसमानकर्तृत्वंव्युत्थानादेरुपदिश्यतेविज्ञानेचसर्वासूपनिषत्सुविधीयते ४
तोव्युत्थानमपिविधिमर्हतीत्युक्तंतथाचात्रापिव्युत्थानापरपर्यायेपारिव्राज्येविधेयमित्याह
विज्ञानेति।इतश्चपारिव्राज्यवाक्यमर्थवादोनभवतीत्याह।वेदेति।तदेवस्पष्टयति।यथेत्यादि
ना।पारिव्राजस्यविधेयत्वेहेत्वंतरमाहफलेति।पुत्रादिफलापेक्षयापारिव्राज्यफलविभागे
नोपदिश्यंते।तथाचफलवत्वात्पुत्रादिवत्पारिव्राज्यस्यविधेयत्वसिद्धिरित्यर्थः॥ ॥७॥

तदेवविवृणो त्येतमेवेति।प्रकृतमात्मानंस्वंलोकमाप्ततोविदित्वातमेवसाक्षात्कर्तुमिच्छंतःप्रव्र
जंतीतिवचनात्पुत्रादिसाधनान्मनुष्यादिलोकादात्माख्यलोकेपारिव्राज्यस्यफलांतरत्वेनयतःश्रु
स्त तिर्विभज्याभिदधातिअतस्तस्यविधेयत्वमप्रत्यूहमित्यर्थः।फलविभागोपदेशेदृष्टांतमाहयथेति।त
थापारिव्राज्येपिफलविभागोक्तेर्विधेयतेतिदार्ष्टांतिकमितिशब्दार्थः।पारिव्राजस्यस्तुतिपरत्वाभा
वेहेत्वंतरमाहनचेति।यथावायुर्वैक्षेपिष्ठेत्यादिरर्थवादःप्राप्त्यर्थेदेवतादिस्तुत्यर्थंस्थितोनानतथेदं
स्तुतिपरंतदवद्योतिशब्दाभावादित्यर्थः।किंचप्रधानस्यदर्शपूर्णमासादेरर्थवादापेक्षावत्पारिव्रा

त् एतमेवात्मानंलोकेविदित्वेत्यन्यस्माद्बाह्याल्लोकादात्मानंफलांतरत्वेनप्रविभजति॥यथा
पुत्रेणैवायंलोकोजय्योनान्येनकर्मणा॥कर्मणापितृलोकइति।नचप्रव्रजेतीत्येतस्यास्तवत्
लोकस्तुतिपरं॥प्रधानवच्चार्थवादापेक्षं॥सकृच्छ्रुतंस्यात्॥तस्माद्भ्रांतिरेवैषालोकस्तुतिपर
मिति॥नचानुष्ठेयेनपारिव्राज्येनस्तुतिरुपपद्यते॥यदिपारिव्राज्यमनुष्ठेयमपिसदन्यस्तु
त्यर्थंस्यात्।दर्शपूर्णमासादीनामप्यनुष्ठेयानांस्तुत्यर्थतास्यात्॥ ॥७॥ ॥

ज्यमपितदपेक्षमुपलभ्यतेतेनतस्यदर्शादिवद्विधेयत्वंदुर्वारमित्याहप्रधानवच्चेति।किंचपारिव्रा
ज्यंसकृदेवश्रुतंचेदविवक्षितमन्यस्तुतिपरंस्यान्नचेदंसकृदेवश्रूयतेप्रव्रजंतीत्युपक्रम्यप्रजां
नकामयंतेव्युत्थायाथभिक्षाचर्यंचरंतीत्यभ्यासादतोपिनस्तुतिमात्रमेतदित्याहसकृदिति।
नचेत्यत्रापिसंबध्यतेकथंतर्हिपारिव्राज्यस्यस्तुतिपरत्वप्रतीतिस्तत्राहतस्मादिति।अस्तुतर्हिवि
धेयमपिपारिव्राज्यंस्तावकमपीतिचेन्नेत्याहनचेति।विपक्षेदोषमाहयदीति॥ ॥७॥ ॥

अथपारिव्राज्यंयज्ञादिवदन्यत्रविधीयतामिहतुस्तुतिरेवेत्याशंक्याहनचान्यत्रेति।आत्मज्ञानाधिकारादन्य
त्रपारिव्राज्यविध्यनुपलंभादित्यर्थः।अन्यत्रविध्यनुपलंभंसमर्थयतेयदीत्यादिना।अन्यत्रक्रियायामितिया
वत्।कर्माधिकारेतत्यागविधेर्विरुद्धत्वादितिभावः।भवत्विहपारिव्राज्येविधिस्तथापिसर्वकर्मानधिकृतविषयः
स्यादित्याशंक्याहयद्यपीति।तत्रकर्मानधिकृतेपुंसीत्येतत्।तत्रहेतुमाहकर्तव्यत्वेनेति।कर्मानधिकृतेनक
र्तव्यतयाज्ञातत्वेवृक्षारोहणादाविवपारिव्राज्येपिनास्तितथाचानधिकृतविषयेपारिव्राज्यंकल्प्यतेचेत्तस्मि
न्विषयेवृक्षारोहणाद्यपिकल्प्येताविशेषादित्यर्थः।पारिव्राज्यस्याधिकृतविषयत्वेविधेयत्वेचसिद्धेफलितमा
नचान्यत्रकर्तव्यतेतस्माद्विषयान्निर्ज्ञातायतइहस्तुत्यर्थेभवेत्।।यदिपुनःक्वचिद्विधिःपरिकल्प्ये
तपारिव्राज्यस्यसइहैवमुख्योनान्यत्रसंभवति।।यद्यनधिकृतविषयेपारिव्राज्यंपरिकल्प्यतेत
य त्र वृक्षाद्यारोहणादिपिपारिव्राज्यवत्कल्प्यते।कर्तव्यत्वेनानिर्ज्ञातत्वाविशेषात्।तस्मात्स्तुतित्वगंधो
३ प्यत्रनशक्यःपरिकल्पयितुंपद्ययमात्मालोकोर्थ्यतेकिमर्थंतत्प्राप्तिसाधनत्वेनकर्माण्येवनारभेर
न्किंपारिव्राज्येनेति।अत्रोच्यते।।अस्यात्मलोकस्यकर्मभिरसंबंधाद्यमात्मानमिच्छंतःप्रव्रजेयुः
सआत्मासाधनत्वेनफलत्वेनचोत्पाद्यत्वादिप्रकाराणामन्यतमत्वेनापिकर्मभिर्नसंबध्यते।क
स्मात्सएषनेतिनेत्यात्माऽगृह्योनहिगृह्यतेइत्यादिलक्षणोयस्मादेवंलक्षणश्चात्माकर्मफलसं
धनासंबंधीसर्वसंसारधर्मविलक्षणोऽशनायाद्यतीतोऽस्थूलादिधर्मवानजोऽजरोऽमरोऽमृ
तोऽभयःसैंधवघनवद्विज्ञानैकरसस्वभावःस्वयंज्योतिरेकएवाद्वितीयोऽपूर्वोऽनपरोऽनंतरोऽ
बाह्यइत्येतदागमतस्तर्कतश्चस्थापितं।विशेषतश्चेहजनकयाज्ञवल्क्यसंवादेस्मिन्।।तस्मादे
वंलक्षणआत्मनिविदितआत्मत्वेननैवकर्मारंभउपपद्यते।नहिचक्षुष्मान्पथिप्रवृत्तोहनिकू
पेकंटकेवापतति।कृत्स्नस्यचकर्मफलस्यविद्याफलेंतर्भावात्।। ।।७।। ।।हतस्मादिति।सार्थवादंपरिव्रा
ज्यंव्याख्यायसएषइत्यादिव्याकर्तुंशंकयतियदीति।परिहरत्यत्रेति।तदर्थिनोनारभंतेकर्माणीतिशेषः।कर्मभिर
संबंधमात्मलोकस्यसाधयतियमात्मानमिति।तस्यकर्मासंबंधेनिष्प्रपंचत्वंफलतीत्याहतस्मादिति।आत्मनोनि
ष्प्रपंचत्वेपिकथंतदर्थिनांपारिव्राज्यसिद्धिरित्याशंक्याहयस्मादिति।निर्विशेषत्वंतत्रतत्रवाक्येदर्शितस्वरूपोयमात्मे
त्येतदागमोपपत्तिभ्यांयथापूर्वंस्थापितंतथैवात्रापिब्राह्मणद्वयेविशेषतोयस्मान्निर्द्धारितंतस्मादस्मिन्नात्मन्यापात
तोज्ञातेकर्मानुष्ठानप्रयत्नासिद्धिरितियोजना।उक्तात्मविषयविवेकविज्ञानवतोनकर्मानुष्ठानमित्यत्रदृष्टांतमाहनहीति

तथापिविचित्रफलानिकर्माणीतिविवेकीकुतूहलवशादनुष्ठास्यतीत्याशंक्याहनचेति।तत्रलौकिकं
न्यायंदर्शयत्यर्कचेदिति।पुरोदेशमधुलभेतचेदितियावत्।ज्ञानफलेकर्मफलांतर्भावमाहस
नचायत्नप्राप्यवस्तुनिविद्वान्यत्नमातिष्ठति।अर्केचेन्मधुविंदेतकिमर्थंपर्वतंव्रजेत्।इष्टस्यार्थस्य
संप्राप्तौकोविद्वान्यत्नमाचरेत्।सर्वंकर्माखिलंपार्थज्ञानेपरिसमाप्यतइतिगी।तास्विहापिचैतस्यै
वपरमानंदस्यब्रह्मविज्ञाप्यस्यान्यानिभूतानिमात्रामुपजीवंतीत्युक्तं।अतोब्रह्मविदोनकर्मारं
भोयस्मात्सर्वैषणाविनिवृत्तःसएषनेतिनेत्यात्मानमात्मत्वेनोपगम्यतद्रूपेणैववर्त्तते।तस्मादेत
मेवविदंनेतिनेतीत्यात्मभूतंउहएवमेतेवक्ष्यमाणेनतरतोनप्राप्नुतइतियुक्तमेवेतिवाक्यशे
षः॥केतेइत्युच्यते॥अतोस्मान्निमित्ताच्छरीरधारणादिहेतोःपापंपुण्यंकर्माकरवंकृतवानस्मि म
कष्टंखलुममवृत्तमनेनपापेनकर्मणाहंनरकंप्रतिपत्स्यइतियोयंपश्चात्तापःकर्मकृतवतःपरिते
पःसएतंनेतिनेत्यात्मभूतंनतरति॥तथातःकल्याणंफलविषयकामान्निमित्तात्यज्ञदानादि
सएषनेतिनेत्यात्माऽगृह्योनहिगृह्यतेऽशीर्योनहिशीर्यतेऽसंगोनहिसज्यतेऽसितोनव्यथ
तेनरिष्यत्येतमुहैवैतेनतरतइत्यतःपापमकरवमित्यतःकल्याणमकरवमित्युभेउहै
वैषएतेतरतिनेनंकृताकृतेतपतः॥२२॥ ॥निमित्तेपुण्यंशोभनंकर्मकृतवानस्मिअतोहम
स्यफलंसुखमुपभोक्ष्येदेहान्तरइत्येषोपिहर्षस्तन्नतरति।उभेउहएवएषब्रह्मविदेतेकर्मणी
तरति॥पुण्यपापलक्षणे॥एवंब्रह्मविदःसन्यासिनःउभेअपिकर्मणीक्षीयेतेपूर्वजन्मनिकृते
येतेइहजन्मनिकृतेयेतेअपूर्वेचनारभ्येते।किंचनैनंकृताकृतेकृतंनित्यानुष्ठानमकृतंतस्यै
त वाक्रियातेअपिकृताकृतेएनंनतपतोऽनात्मज्ञंहिकृतंफलदानेनाकृतंप्रत्यवायोत्पादनेनतप
तोयंतुब्रह्मविदात्मविद्याग्निनासर्वाणिकर्माणिभस्मीकरोति।यथैधांसिसमिद्धोग्निरित्या
दिस्मृतेः॥शरीरारंभकयोस्तूपभोगेनक्षयः।अतोब्रह्मविदकर्मसंबंधी॥२३॥ ॥७॥ ॥
वीमिति।अखिलंसमग्रांगोपेतमित्यर्थः।तत्रैवश्रुतिंसंवादयतीत्यापीति।निषेधवाक्यतात्पर्यमुपसंहरत्यन्त
ति।एतमित्यादिवाक्यंयोजयतियस्मादिति।उहेतिनिपाताभ्यांसूचितोर्थोयस्मादित्यनुभाषितः।इतिशब्द

स्यापेक्षितं पूरयति इतियुक्तमिति। आकांक्षापूर्वकमुत्तरं वाक्यमवतार्य व्याकरोति। केनेत्यादिना। यथोक्ता
त्मविदः तापहर्षासंस्पर्शे हेतुमाह। उभे इति। पुण्यपापे तरतीत्युक्ते पृथगवस्थानं तयोः शंक्यते तन्निरस्यति। ए
वमिति। निषेधवाक्योक्तकर्मणेतियावत्। इतश्चात्मविदो धर्मादिसंबंधो नास्तीत्याह। किंचेति। तदेवानंत
रवाक्यव्याख्यानेन स्फोरयति। नैनमिति। तयोस्तर्हि कुत्र तापकत्वं तदाह। अनात्मज्ञं हीति। पुरुषत्वात्
ब्रह्मविदुष्यपि कृताकृतयोस्तापकत्वं स्यादित्याशंक्याह। अयं त्विति। तत्र भगवद्वाक्यं प्रमाणयति। य
थेति। यद्यपि पूर्वोत्तरयोर्द्धर्माधर्मयोरनारब्धयोरात्मविद्यावशाद्विनाशाश्लेषौ तथापि प्रारब्धयो
रस्ति तयोस्तापकत्वमित्याशंक्याह। शारीरेति। प्रकृतं विद्याफलमुपसंहरत्यत इति। कर्मकार्यासंबं
धादितियावत्॥ ॥२२॥ ॥उक्ते विद्याफले मंत्रं संवादयति। तदेतदिति। एष नित्यो महिमेत्यत्र नित्यत्वमुप
तदेतद्वस्तु ब्राह्मणेनोक्तमृचा मंत्रेणाभ्युक्तं प्रकाशितमेष नेति नेत्यादिलक्षणो नित्यो महिमा॥ अ
न्ये तु महिमानः कर्मकृता इत्यनित्या अयं तु नेति नेत्यादिलक्षणो महिमा स्वाभाविकत्वान्नित्यो ब्रह्म
विदो ब्राह्मणस्य त्यक्तसर्वैषणस्य॥ कुतोऽस्य नित्यत्वमिति हेतुमाह कर्मणा न वर्द्धते शुभलक्षणे
न कृतेन वृद्धिलक्षणां विक्रियां न प्राप्नोति॥ तथाऽशुभेन कर्मणा नो कनीयान् नाप्यपक्षयलक्षणां
तदेतद्वाऽभ्युक्तमेष नित्यो महिमा ब्राह्मणस्य न वर्द्धते कर्मणा नो कनीयान् तस्यैव स्यात्प
दवित्तं विदित्वा न लिप्यते कर्मणा पापकेनेति॥ ॥ विक्रियां प्राप्नोति। उपचयापचयहेतुभूता
एव हि सर्वा विक्रिया इत्येताभ्यां प्रतिषिध्यंते॥ अतोऽविक्रियावत्त्वान्नित्य एष महिमा॥ तस्मात्त
स्यैव महिम्नः स्याद्भवेत् पदवित्। पदस्य वेत्ता पद्यते गम्यते ज्ञायते इति महिम्नः स्वरूपमेव पदं त
स्य पदस्य वेदिता किं तत्पदवेदनेन स्यादित्युच्यते तं विदित्वा महिमानं न लिप्यते न संबध्यते कर्मणा पा
पकेन धर्माधर्मलक्षणेन। उभयमपि पापमेव विदुषः॥ ॥२३॥ ॥ पादयति अन्ये त्विति। तद्धि लक्षणत्वम
कर्मकृतत्वं अकर्मकृतो महिमा स्वाभाविकत्वान्नित्य इत्यत्राकर्मकृतत्वेन स्वाभाविकत्वमसिद्धमित्याशंक्याह।
कुतोऽस्येति। वृद्धि [illegible] रपक्षयश्चेति विक्रियाद्वयाभावेऽपि विक्रियांतराणि भविष्यंतीत्याशंक्याह। उपचयेति। ताभ्यां निषि
द्धाभ्यामितियावत्। आत्मनः सर्वविक्रियाराहित्ये फलितमाह। अत इति। तस्य नित्यत्वेऽपि किं तदाह। तस्मादिति। अ
धर्मलक्षणेनेति वक्तव्ये किमिदं धर्माधर्मलक्षणेनेत्युक्तमत आह उभयमपीति। संसारहेतुत्वाविशेषादित्यर्थः

तस्मादित्यादिवाक्यं व्याचष्टे यस्मादिति। एवंविदात्मा कर्मतत्फलसंबंधशून्य इत्यापाततो ज्ञानन्निय्यर्थः।
विशेषणाभ्यामुत्सर्गतो विहितस्योभयविधकरणव्यापारोपरमस्य यावज्जीवादिश्रुतिविहितकर्म्मापि
वादस्तस्माद्विरक्तस्यापि न नित्यादित्यागः। उत्सर्गस्यापवादेन बाधः कस्य न संमत इत्यादिन्यायादित्यर्थः।

यस्मादेवमकर्मसंबंध्येष ब्राह्मणस्य महिमा नेति नेत्यादिलक्षणस्तस्मादेवंवित् शांतो बाह्येंद्रिय
व्यापारतउपशांतः तथा दांतोंतःकरणतृष्णातो निवृत्तः उपरतः सर्वैषणाविनिर्मुक्तः संन्यासीति
तितिक्षुः द्वंद्वसहिष्णुः समाहितः इंद्रियांतःकरणचलनरूपात् व्यावृत्त्यैकाग्ररूपेण समाहितो भू

तस्मादेवंवित् शांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वात्म
न्येवात्मानं पश्यति सर्वमात्मानं पश्यति॥ ॥७॥ ॥

त्वा तदेतदुक्तं पुरस्तात्। बाल्यं च पांडित्यं च निर्विद्येति आत्मन्येव स्वकार्यकरणसंघाते आत्मा
नं प्रत्यक्चेतयितारं पश्यति। तत्र किं तावन्मात्रे परिच्छिन्ने नेत्युच्यते। सर्वं समस्तमात्मानमेव पश्य
ति नान्यदात्मव्यतिरिक्तं वालाग्रमात्रमप्यस्तीत्येवं पश्यति॥ मननान्मुनिर्भवति जाग्रत्स्वप्नसुषु
प्त्याख्यं भावत्रयं हित्वा॥ ॥७॥

व्याख्योपरत इति। जीवनविच्छेदव्यतिरिक्तं शीतादिसहिष्णुत्वे तितिक्षुत्वं यत्र कर्म्मकर्त्तुः स्वातंत्र्यं तेषां
कर्म्मणां निवृत्तिः शमादिपदैरुक्ता यत्र तु सम्यग्धीविरोधिनि निद्रालस्यादौ पुंसो न स्वातंत्र्यं तन्निवृ
त्तिः समाधानं समाहितो भूत्वा पश्यतीति संबंधः। पश्यतीति वर्त्तमानापदेशात् कथं विशेषणेषु संक्रामितो

विद्वद्व्याख्यातमेतदिति॥ ॥७॥ ॥ न

यथोक्तैः साधनैरुदितायां विद्यायां किं स्यादित्याशंक्याहैवमिति। तस्य पुण्यपापासंस्पर्शे हेतुमाशं
क्येत्विति। इतश्च विदुषो न कर्मसंबंधोस्तीत्याह नैनमिति। किमिति विपाप्मा ब्रह्मविदं न तपतीत्याशंक्या
ह। सर्वमिति। कथं ब्राह्मणो भवतीत्यपूर्ववदुच्यते। प्रागपि ब्राह्मण्यस्य सत्वादित्याशंक्याहायंत्वि

एवंपश्यंतं ब्राह्मणं नैनं पाप्मा पुण्य पापलक्षणस्तरति न प्राप्नोति॥ अयं तु ब्रह्मवित् सर्वंपा
प्मानं तरत्यात्मभावेनैव व्याप्नोत्यतिक्रामति॥ नैनं पाप्मा कृताकृतलक्षणस्तपति। इष्टफ
लप्रत्यवायोत्पादनाभ्यां॥ सर्वं पाप्मानमयं तपति ब्रह्मवित् सर्वात्मदर्शनवह्निना भस्मीक
रोति॥ स एष एवंवित् विपापो विगतधर्माधर्मो विरजो विगतरजो कामो विगतकामः अवि

नैनं पाप्मा तरति सर्वं पाप्मानं तरति नैनं पाप्मा तपति सर्वं पाप्मानं तपति विपापो
विरजो विचिकित्सो ब्राह्मणो भवत्येष ब्रह्मलोकः सम्राडिति होवाच याज्ञवल्क्यः

चिकित्सः छिन्नसंशयो हमस्मि सर्वात्मा परं ब्रह्मेति निश्चितमतिर्ब्राह्मणो भवत्ययं त्वेवंभू
तः एतस्यामवस्थायां मुख्यो ब्राह्मणः प्रागेतस्माद्ब्रह्मस्वरूपावस्थानात् गौणमस्य ब्राह्म
ण्यं। एष ब्रह्मलोकः ब्रह्मैव लोको ब्रह्मलोकः। मुख्यो निरुपचरितसर्वात्मभावलक्षणः हे स ल
म्राट् एवं ब्रह्मलोकं परिप्रापितोस्यभयेनेति नेत्यादिलक्षणमिति होवाच याज्ञवल्क्यः॥

ति। मुख्यत्वमबाधितत्वं सफलां विद्यां मंत्रब्राह्मणाभ्यामुपदिश्योपसंहरत्येष इति। तत्र कर्मधा
रयं समासं सूचयति ब्रह्मैवेति। तथाविधसमासपरिग्रहे प्रकरणमनुग्राहकमभिप्रेत्याह मुख्य
इति। तथापि किं मम सिद्धमिति तदाहैवमिति॥ ॥७॥ ॥७॥ ॥७॥ ॥

ब्राह्मीयं विद्यालाभं द्योतयितुं राज्ञो वचनमित्याहैवमिति। सति वक्तव्यशेषे कथमित्थं राज्ञो वचनमित्याशंक्या
ह परिसमापितेति। तथापि परमपुरुषार्थस्य वक्तव्यत्वमित्याशंक्याह समाप्त इति। कर्तव्यान्तरं वक्तव्यमस्तीत्या
शंक्याह तावदिति। तथापि यत्र निष्ठा कर्तव्या तद्वाच्यमित्याशंक्याहैषेति। तथापि परमा निष्ठान्यास्तीति चेत्तत्र
एवं ब्रह्मभूतो जनको याज्ञवल्क्येन ब्रह्मभावमापादितः प्रत्याह सोऽहं त्वया ब्रह्मभावमापादितः सन्भ
गवते तुभ्यं विदेहान्देशान्मम राज्यं समस्तं ददामि मां च सह विदेहैर्दास्याय यदा सकर्मणे ददामीति च
शब्दात्संबध्यते। परिसमापिता ब्रह्मविद्या सह संन्यासेन सांगा सेतिकर्तव्यता। का परिसमाप्तः पु
रुषार्थः। एतावत्पुरुषेण कर्तव्यं एषा निष्ठा। एषा परा गतिः। एतन्निःश्रेयसं। एतत्प्राप्य कृ
तकृत्यो ब्राह्मणो भवति। एतत्सर्ववेदानुशासनमिति॥२२॥ योऽयं जनकयाज्ञवल्क्याख्यायिका
यां व्याख्यातः। आत्मा स वै एष महानज आत्मान्नादः सर्वभूतस्थं सर्वान्नानामत्ता वसुदानः

सोऽहं भगवते विदेहान्ददामि मां चापि सह दास्यायेति॥२२॥ स वा एष महानज आत्मान्नादो
वसुदानो विंदते वसु य एवं वेद॥२३॥

॥ वसु धनं सर्वप्राणिकर्मफलं तस्य दाता प्राणिनां यथा
कर्मफलेन योजयितेत्यर्थः॥ तमेतमजमन्नादं वसुदानमात्मानमन्नादवसुदानगुणाभ्यां युक्तं
यो वेद स सर्वभूतेष्वात्मभूतोऽन्नमत्ति विंदते च वसु सर्वं कर्मफलजातं लभते सर्वात्मत्वादेव य
एवं यथोक्तं वेद। अथवा दृष्टफलार्थिभिरप्येवं गुण उपास्यः। तेनान्नादो वसोश्च लब्धा दृष्टेनै
व फलेनान्नात्त्वेन गोऽश्वादिना चास्य योगो भवतीत्यर्थः॥२३॥ ॥ त्याहैषेति। निश्चितं श्रेयोऽन्यदस्ती
त्याशंक्याह तदिति। तथापि कृतकृत्यतया मुख्यब्राह्मण्यसिध्यर्थं वक्तव्यान्तरमस्तीत्याशंक्याहैतत्प्राप्ये
ति। किमस्यां प्रतिज्ञापरंपरायां नियामकमित्याशंक्याहैतदिति। निरुपाधिकब्रह्मज्ञानात्कैवल्यमि
ति गमयितुमिति शब्दः। संप्रति सोपाधिकब्रह्मध्यानादभ्युदयं दर्शयति। योऽयमित्यादिना। ईश्वरश्चेत्क
र्मफलं प्राणिभ्यो ददाति तर्हि तस्य वैषम्यनैर्घृण्ये स्यातामित्याशंक्याह प्राणिनामिति। उपास्यस्वरूपं दर्श
यित्वा तदुपासने सफलं दर्शयति तमेतमिति। सर्वात्मत्वफलमुपासनमुक्त्वा पक्षान्तरमाहाथवेति। दृष्टं
फलमन्नात्त्वं धनलाभश्चोक्तगुणकमीश्वरं ध्यायतः फलमाह तेनेति। तदेव फलं स्पष्टयति दृष्टेनेति॥ ॥

बृ॰भा॰आ॰ ३८१ मि अन्नादत्वं दीप्ताग्नित्वं निरुपाधिकब्रह्मज्ञानान्मुक्तिरुक्ता सोपाधिकब्रह्मध्यानाच्चाभ्युदय उक्तस्तथा च कि टी॰अ॰४
मुत्तरकंडिकयेत्याशंक्याहेदानीमिति। अजत्वाद्यविनाशीतिवक्तुं चशब्दः। कथं जन्मजराभावयोरमरत्वाविना
शित्वसाधकत्वं तदाह यो हीति। अयं त्वजत्वादविनाशी अजरत्वाच्चामरोऽमरत्वाच्चाविनाशीति योजना। मरणा
योग्यत्वमुपजीव्य मरणकार्याभावं दर्शय त्यत एवेति। जन्मापक्षयविनाशानामेव भावविकाराणामिह
मुखतो निषेधात्। वृध्द्यादीनि विकारांतराणि आत्मनि भविष्यंतिति विशेषनिषेधस्य शेषाभ्यनुज्ञापरत्वादि
त्याशंक्याह यस्मादिति। इतरे सत्त्वविवृद्धिविपरिणामा अत एवाभय इत्युक्तं विवृणोति यस्माच्चेति। किं त
इदानीं समस्तस्यैवारण्यकस्य योऽर्थ उक्तः स समुच्चित्यास्यां कंडिकायां निर्दिश्यत एतावान्समस्ता
रण्यकार्थ इति स वा एष महानज आत्मा अजरो न जीर्यत इति न विपरिणमत इत्यर्थः। अमरो यस्मा
च्चाजरस्तस्मादमरो न म्रियत इत्यमरः। यो हि जीर्यते जायते च स विनश्यति विम्रियते वा अयं त्व
जत्वादजरत्वाच्चाविनाशी। अत एवामृतो यस्माज्जनिप्रभृतिभिस्त्रिभिर्भावविकारैर्वर्जितस्तस्मा
दितरैरपि भावविकारैस्त्रिभिस्तत्कृतैश्च काम कर्म मोहादिभिर्मृत्युरूपैर्वर्जित इत्येतदभयो

स वा एष महानज आत्माजरोऽमृतोऽभयो ब्रह्माभयं वै ब्रह्माभयं हि वै मू॰ २५

त एव यस्माच्चैवं पूर्वोक्तविशेषणस्तस्माद्भयवर्जितः। भयं चाविद्याकार्यं तत्कार्यप्रतिषेधेन भा
वविकारप्रतिषेधेन चाविद्यायाः प्रतिषेधः प्रसिद्धो वेदितव्यः अभय आत्मैवं गुणविशिष्टः कि
मसौ ब्रह्म परिवृढं निरतिशयं महदित्यर्थः। अभयं वै ब्रह्म प्रसिद्धमेतल्लोके। भयं ब्रह्मेति। त
स्माद्युक्तमेवं गुणविशिष्ट आत्मा ब्रह्मेति॥ ॥७॥

द्भयं तदाह भयं चेति। अविद्यानिषेधि विशेषणाभावादात्मा नेसा सदा स्पृशतीत्याशंक्याह तत्कार्येति
। विशेषणांतरं प्रश्नपूर्वकमुत्थाप्य व्याकरोत्यभय इति कथं पुनरभयगुणविशिष्टस्यात्मनो ब्रह्मत्वं त
दाहाभयमिति। वैशब्दार्थमाह प्रसिद्धमिति॥ ॥७॥ ॥७॥ ॥७॥

लोकशब्दः शास्त्रस्याप्युपलक्षणं वेद्यस्वरूपमुक्त्वा विद्याफलं कथयति य एवमिति कंडिकार्थमुपसंहरत्येष इ
ति। स्रष्ट्रादेरपि तदर्थत्वात्किमित्यसाविह नोपसंह्रियते तत्राह नेत्येति। स्रष्ट्रादेरारोपितत्वेऽगमकमाह तदपो
हेनेति। नञ्छब्दः स्रष्ट्रादिप्रपंचविषयः। तदपोहे नेति यदुक्तं तदेव स्फुटयति नेतीति। अध्यारोपापवादन्यायेन त
त्वस्यावेदितत्वादारोपितं भवत्येव स्रष्ट्रादिद्वैतमित्यर्थः। अध्यारोपापवादन्यायस्य पंकप्रक्षालनन्यायविरु
द्धत्वात्तत्त्वं विवक्षितं चेत्तदेवोच्यतो कृतं स्रष्ट्रादिद्वैतारोपेणेत्याशंक्याह यथेति। उदाहरणांतरमाह यथा चे
ति। दृष्टांतद्वयमनूद्य दार्ष्टांतिकमाचष्टे तथा चेति। इहेति मोक्षशास्त्रोक्तिः तथापि कल्पितप्रपंचसंबंधप्र

यएवं यथोक्तमात्मानमभयं ब्रह्म वेद सोऽभयं हि ब्रह्मैव भवति। एष सर्वस्या उपनिषदः संक्षिप्तोऽर्थ उक्तः।
एतस्यैवार्थस्य सम्यक्प्रबोधायोत्पत्तिस्थितिलयादिकल्पना क्रियाकारकफलाध्यारोपणा चात्म
नि कृता। तदपोहेन च नेति नेतीत्यध्यारोपितविशेषापनयद्वारेण पुनस्तत्त्वमावेदितं। यथा एकप्र
भृत्यापरार्द्धसंख्यास्वरूपपरिज्ञानाय रेखाध्यारोपणं कृत्वा एकेयं रेखा दशेयं सहस्रेयमिति ग्रा

ब्रह्म भवति य एवं वेद ॥२४॥ ॥ चतुर्थं ब्राह्मणं शारीरं ॥

हयति। अवगमयति संख्यास्वरूपं केवलं न तु संख्याया रेखात्मत्वमेव। यथा वा अकारादीन्यक्षरा
णि विजिग्राहयिषुः पत्रमषीरेखादिसंयोगोपायमास्थाय वर्णानां तत्त्वमावेदयति न पत्रमष्याद्या
त्मतामक्षराणां ग्राहयति। तथा चेहोत्पत्त्याद्यनेकोपायमास्थायैकं ब्रह्मतत्त्वमावेदितं। पुनस्तत्कल्पि
तोपायजनितविशेषपरिशोधनार्थं नेति नेतीति तत्त्वोपसंहारः कृतः। तदुपसंहृतं पुनः परिशुद्धं के
वलमेव सफलं ज्ञानमंते अस्यां कंडिकायामिति ॥२४॥ ॥ चतुर्थं प्रकरणं ॥ ॥१॥ ॥
युक्तं सविशेषत्वं ब्रह्मणः स्यादित्याशंक्याह पुनरिति। तस्मिन्नात्मनि कल्पितः स्रष्ट्रादिरूपोपायस्तेन जनितो
विशेषस्तस्मिन्कारणत्वादिः तस्य निरासार्थमिति यावत्। तर्हि द्वैताभावविशिष्टं तत्त्वमिति चेन्नेत्याह तदुप
संहृतमिति। परिशुद्धं भाववदभावेनापि न संस्पृष्टमित्यर्थः। केवलमित्यद्वितीयोक्तिः स्रष्ट्रादिवचनस्य गतिमु
क्त्वा प्रकृतमुपसंहरति सफलमिति। इतिशब्दः संग्रहसमाप्त्यर्थो ब्राह्मणसमाप्त्यर्थो वा। चतुर्थं ब्राह्मणं ॥ ॥१॥

समाप्ते शारीरकब्राह्मणे वंशब्राह्मणं व्याख्यातव्यं कृतं गतार्थेन मैत्रेयीब्राह्मणेन व्याख्यातं व्याख्येयमधुकाण्डार्थमनु
द्रवत्यागमेति। पाञ्चमिकमर्थमनुभाषते पुनरिति। तस्यैव ब्राह्मणस्तत्त्वमिति शेषः। विगृह्य वादो जयपराजय
प्रधानो जल्पन्यायः षष्ठेन प्रतिष्ठापितमनुवदति निश्चित्येति। प्रश्नप्रतिवचनन्यायस्तत्त्वनिर्णयप्रधानो वादः उ
पसंहृतं तदेव तत्त्वमिति शेषः। संप्रत्यनन्तरब्राह्मणस्यागतार्थत्वमाह। अथेति। आगमोपपत्तिभ्यां निश्चितं तत्त्वे
निगमनमकिंचित्करमित्याशंक्याहार्थवेति। प्रकारान्तरेण संगतिमाहाथवेति। कथमिह तर्केणाधिगति
स्तत्राह तर्केति। मुनिकाण्डस्य तर्कप्रधानत्वे किं स्यात्तदाह तस्मादिति। इति फलतीति शेषः। शास्त्रादिनाय
आगमप्रधानेन मधुकाण्डेन ब्रह्मतत्त्वं निर्द्धारितं। पुनस्तस्यैवोपपत्तिप्रधानेन याज्ञवल्कीयेन काण्डेन प्रति
पक्षपरिग्रहं कृत्वा विगृह्यवादेन निर्धारितं। शिष्याचार्यसंबंधेन च षष्ठे प्रतिवचनन्यायेन सविस्तरं विचा प्रश्न
र्योपसंहृतं। अथेदानीं निगमनस्थानीयं मैत्रेयिब्राह्मणमारभ्यते। अथ च न्यायो वाक्यकोविदैः परिगृ
हीतो हेत्वपदेशात्प्रतिज्ञायाः पुनर्वचनं निगमनमिति। अथवागमप्रधानेन मधुकाण्डेन यदमृतत्वसाध
नं ससंन्यासमात्मज्ञानमभिहितं तदेव तर्केणाप्यमृतत्वसाधनं ससंन्यासमात्मज्ञानमधिगम्यते॥

॥ अथह॥

तर्कप्रधानं हि याज्ञवल्कीयं काण्डं। तस्माच्छास्त्रतर्काभ्यां निश्चितमेतद्यदेतदात्मज्ञानं ससंन्यासममृ
स्त्रश्र तत्वसाधनमिति॥ तस्माद्बुद्धावद्भिरमृतत्वप्रतिपित्सुभिरेतत्प्रतिपत्तव्यमिति। आगमोपपत्तिभ्यो
हि निश्चितोर्थः श्रद्धेयो भवत्यव्यभिचारादिति। अक्षराणां तु चतुर्थे यथा व्याख्यातोर्थस्तथा प्रतिपत्त
तानि व्योत्रापि। यान्यक्षराण्यव्याख्यातानि तानि व्याख्यास्यामः। अथेति हेत्वपदेशानन्तर्यप्रदर्शनार्थः। हेतुप्रधा
नानि हि वाक्यान्यतीतानि तदनन्तरमागमप्रधानेन प्रतिज्ञातोर्थो निगम्यते मैत्रेयिब्राह्मणेन ह शब्दे
थोक्तस्य ज्ञानस्य निश्चितत्वेपि किं सिध्यति तदाह तस्माच्छास्त्रश्रद्धावद्भिरिति। एतच्छब्दो यथोक्तज्ञानप
रामर्शार्थः। इति सिध्यतीति शेषः। तत्र हेतुमाहागमेति। अव्यभिचारात्म नैर्युक्तिगम्यस्यार्थस्य तथैव सत्वा
दिति यावत्। इति शब्दो ब्राह्मणसंगतिसमाप्त्यर्थः। तात्पर्यार्थं दर्शितं सत्यक्षरव्याख्यानं प्रसक्तं वा हाक्ष
राणां त्विति। तर्हि ब्राह्मणेस्मिन्वक्तव्याभावात्परिसमाप्तिरेवेत्याशंक्याह यानीति। ननु वाक्यानि पूर्ववत्त्व्याख्या
तानि न हेतुरुपदिष्टस्तत्कथं तदपदेशानन्तर्यं तत्ससंन्यासस्यामृतत्वहेतोरात्मज्ञानस्याथशब्देन द्योत्यते तत्राह हेतुप्रधानानीति॥७॥

तदेवकर्त्तव्यनक्रियातवल्क्यस्येति॥अथेत्यास्यार्थमाह॥एवंसतीति॥भार्याद्वयेदर्शितरीत्यास्थितेतस्यच
याज्ञवल्क्यस्यऋषेःकिलद्वेभार्येपत्न्यौबभूवतुरास्तांमैत्रेयीचनामतःएकापराकात्यायनीनामतः।
तयोर्भार्ययोर्मैत्रेयीहकिलब्रह्मवादिनीब्रह्मवदनशीलाबभूवआसीत्॥स्त्रीप्रज्ञास्त्रियांयोचिता॥सा
स्त्रीप्रज्ञैवयस्याःप्रज्ञागृहप्रयोजनान्वेषणालक्षणासास्त्रीप्रज्ञाएवंतर्हितस्मिन्कालआसीत्कात्या
यनी॥अथैवंसतिहकिलयाज्ञवल्क्यःपूर्वस्माद्गार्हस्थ्यलक्षणात्वृत्तात्पारिव्राज्यलक्षणंवृत्तंउपाकरि ह
ष्यन्नुपाचिकीर्षुःसन्॥१॥हेमैत्रेयीतिज्येष्ठांभार्यामामंत्रयामासआमंत्र्यचोवाचह॥प्रव्रजिष्यन्पा
रिव्राज्यंकरिष्यन्वैअरेमैत्रेयीअस्मात्स्थानाद्गार्हस्थ्यादहमस्मिभवामिमैत्रेय्यनुजानीहिमांहे

याज्ञवल्क्यस्यद्वेभार्येबभूवतुर्मैत्रेयीचकात्यायनीचतयोर्हमैत्रेयीब्रह्मवादिनीबभूवस्त्री
प्रज्ञैवतर्हिकात्यायन्यथहयाज्ञवल्क्योन्यद्वृत्तमुपाकरिष्यन्॥१॥मैत्रेयीतिहोवाचयाज्ञवल्क्यः
प्रव्रजिष्यन्वाअरेहमस्मात्स्थानादस्मिहंततेनयाकात्यायन्यांतंकरवाणीति॥२॥साहोवाच
मैत्रेयीयन्नुमइयंभगोःसर्वापृथिवीवित्तेनपूर्णास्यात्स्यांन्वहंतेनामृताहो३नेतिनेतिहोवाचया
ज्ञवल्क्योयथैवोपकरणवतांजीवितंतथैवतेजीवितंस्यादमृतत्वस्यतुनाशास्तिवित्तेनेति॥
॥३॥साहोवाचमैत्रेयीयेनाहंनामृतास्यांकिमहंतेनकुर्यांयदेवभगवान्वेदतदेवमेविब्रूही
ति॥४॥सहोवाचयाज्ञवल्क्यःप्रियावैखलुनोभवतीसतीप्रियमवृधद्धंततर्हिभवत्येतद्व्या
ख्यास्यामितेव्याचक्षाणस्यतुमेनिदिध्यासस्वेति॥५॥ ॥तेछसियदितेनयाकात्यायन्यां
तंकरवाणीत्यादिव्याख्यातं॥२॥सैवमुक्तोवाचमैत्रेयीसर्वेयंपृथिवीवित्तेनपूर्णास्यान्नुकिंस्यांकिम
हंवित्तसाध्येनकर्मणामृताआहोनस्यामिति॥नेतिहोवाचयाज्ञवल्क्यइत्यादिसमानमन्यत्॥३॥
॥४॥ ॥५॥ ॥सहोवाचप्रियैवपूर्वंखलुनोस्मभ्यंभवतीभवंतीप्रियमेवाद्यवृधद्वर्द्धितवती।निर्द्धारित =
वत्यसिअतःतुष्टोहंहंतेछसिचेदमृतत्वसाधनंज्ञातुंहेभवतितेतुभ्यंतदमृतत्वसाधनंव्याख्यास्यामीति॥ ग
वैराग्यातिरेकेसतीत्यर्थः।तस्याःब्रह्मवादित्वंतदामंत्रणद्वारेणतांप्रत्येवसंवादेहेतूकर्त्तव्यंतस्याब्रह्मवा

 दित्वंद्योतयितुमिछसियदीत्युक्तं। मैत्रेयीत्वमृतत्वमात्रार्थितामात्मनोदर्शयितिसैवमिति। गुरुप्रसादाधी
 नाविद्यावाप्तिरितिद्योतनार्थमाहसहोवाचेति॥ ॥७॥ ॥ज्ञानेछादुर्लभताद्योतनायचेदित्युक्तंव्याख्या
नप्रकारमेवाह आत्मनीति। दृष्टेसर्वमिदंविदितंभवतीत्युत्तरत्रसंबंधः केनोपायेनात्मनिदृष्टेसर्वंदृष्टंभव
आत्मनिखल्वरेमैत्रेयि दृष्टे॥ कथंदृष्टआत्मनीत्युच्यते॥ पूर्वमाचार्यागमाभ्यांश्रुतेपुनस्तर्केणोपप
सहोवाचनवाअरेपत्युःकामायपतिःप्रियोभवत्यात्मनस्तुकामायपतिःप्रियोभवतिनवाअरेजा
यायैकामायजायाप्रियाभवत्यात्मनस्तुकामायजायाप्रियाभवतिनवाअरेपुत्राणांकामायपुत्राः
प्रियाभवंत्यात्मनस्तुकामायपुत्राःप्रियाभवंतिनवाअरेवित्तस्यकामायवित्तंप्रियंभवत्यात्मन
स्तुकामायवित्तंप्रियंभवतिनवाअरेपशूनांकामायपशवःप्रियाभवंत्यात्मनस्तुकामायपशवः
प्रियाभवंतिनवाअरेब्रह्मणःकामायब्रह्मप्रियंभवत्यात्मनस्तुकामायब्रह्मप्रियंभवतिनवा
अरेक्षत्रस्यकामायक्षत्रंप्रियंभवत्यात्मनस्तुकामायक्षत्रंप्रियंभवतिनवाअरेलोकानांकामाय
लोकाःप्रियाभवंत्यात्मनस्तुकामायै [illegible] प्रियाभवंतिनवाअरेदेवानांकामायदेवाःप्रियाभवं
त्यात्मनस्तुकामायदेवाःप्रियाभवंतिनवाअरेभूतानांकामायभूतानिप्रियाणिभवंत्यात्मन
स्तुकामायभूतानिप्रियाणिभवंतिनवाअरेसर्वस्यकामायसर्वंप्रियंभवत्यात्मनस्तुकामा
यसर्वंप्रियंभवत्यात्माव [illegible] रेद्रष्टव्यःश्रोतव्योमंतव्योनिदिध्यासितव्योमैत्रेय्यात्मनिखल्व
रेदृष्टेश्रुतेमतेविज्ञातइदंसर्वंविदितं॥ ॥५॥ ॥
लोकाः ५
त्यामतेविचारितेश्रवणंत्वागममात्रेणमतउपपत्त्यापश्चाद्विज्ञातेएवमेतन्नान्यथेति॥ निर्द्धारणेकिं
भवतीत्युच्यते॥ इदंसर्वंविदितंभवति॥ इदंसर्वमिति॥ ॥५॥ ॥७॥ ॥७॥
तीत्युपायंपृछतिकथमिति। आत्मदर्शनोपायंश्रवणादिकंदर्शयितुमुत्तरमाहोच्यतइति। उक्तोपाय
फलंप्रश्नपूर्वकमाहकिमित्यादिना॥ ॥७॥ ॥७॥ ॥७॥ ॥

नवा अरे देवानां कामाय देवाः प्रिया भवन्ति । २
आत्मनस्तु कामाय देवाः प्रिया भवन्ति ।

इदꣳसर्वमित्यनूद्यतस्यार्थमाहयदात्मनोन्यदिति।तदात्मनिदृष्टेदृष्टꣳस्यादितिशेषः।कथमन्यस्मिन्दृष्टेसत्य
न्यत्दृष्टꣳभवतितत्राहात्मव्यतिरेकेणेति।सयथार्द्रैधाग्नेरित्यादाविष्टꣳहुतमित्याद्यधिकंदृष्टंतस्यार्थमाहचतु
यदात्मनोन्यदात्मव्यतिरेकेणाभावात्॥चतुर्थेशब्दनिश्वासेनेवलो काद्यर्थनिश्वासःसामर्थ्या

ब्रह्मतंपरादाद्योन्यत्रात्मनोब्रह्मवेदक्षत्रंतंपरादाद्योन्यत्रात्मनःक्षत्रंवेदलोकास्तंपरादुर्योन्य
त्रात्मनोलोकान्वेददेवास्तंपरादुर्योन्यत्रात्मनोदेवान्वेदवेदास्तंपरादुर्योन्यत्रात्मनोवेदान्वेदभू
तानितंपरादुर्योन्यत्रात्मनोभूतानिवेदसर्वंतंपरादाद्योन्यत्रात्मनःसर्वंवेदेदंब्रह्मेदंक्षत्रमिमे
८ लोकाइमेदेवाइमेवेदाइमानिभूतानीꣳसर्वंयदयमात्मा॥६॥सयथादुंदुभेर्हन्यमानस्यनबा
ह्यांछब्दांछक्नुयाद्ग्रहणायदुंदुभेस्तुग्रहणेनदुंदुभ्याघातस्यवाशब्दोगृहीतः॥७॥सयथाशं
खस्यध्मायमानस्यनबाह्यांछब्दांछक्नुयाद्ग्रहणायशंखस्यतुग्रहणेनशंखध्मस्यवाशब्दो
गृहीतः॥८॥सयथावीणायैवाद्यमानायैनबाह्यांछब्दांछक्नुयाद्ग्रहणायवीणायैतुग्रहणेनवी
णावादस्यवाशब्दोगृहीतः॥९॥सयथार्द्रैधाग्नेरभ्याहितस्यपृथग्धूमाविनिश्चरंत्येवंवा
अरेस्यमहतोभूतस्यनिश्वसितमेवैतद्यदृग्वेदोयजुर्वेदःसामवेदोथर्वांगिरसइतिहासःपु
राणंविद्याउपनिषदःश्लोकाःसूत्राण्यनुव्याख्यानानिव्याख्यानानीष्टꣳहुतमाशितंपायित
च मयंचलोकःपरश्चलोकःसर्वाणिभूतान्यस्यैवैतानिसर्वाणिनिश्वसितानि॥१०॥सयथासर्वा
सामपाꣳसमुद्रएकायनमेवꣳसर्वेषाꣳस्पर्शानांत्वगेकायनमेवꣳसर्वेषाꣳरसानांजिह्वैकाय
नमेवꣳसर्वेषांगंधानांनासिकेएकायनमेवꣳसर्वेषांरूपाणांचक्षुरेकायनमेवꣳसर्वेषाꣳशब्दा
नाꣳश्रोत्रमेकायनमेवꣳसर्वेषाꣳसंकल्पानांमनएकायनमेवꣳसर्वेषामानंदानामुपस्थएकायन
मेवꣳसर्वेषांविसर्गाणांपायुरेकायनमेवꣳसर्वेषामध्वनांपादावेकायनमेवꣳसर्वेषांवेदानांवागेका
दुक्तोभवतीतिपृथङ्गोक्तः॥६॥ ॥७॥ ॥८॥ ॥९॥ ॥१०॥ ॥११॥ ॥
र्थइति।सामर्थ्यादर्थभन्यस्यशब्दस्यानुपपत्तेरित्यर्थः॥ ॥७॥ ॥७॥ ॥ ॥७॥ ॥

यनं॥११॥

* सर्वासांविद्यानांꣳहृदयमेकायनमेवꣳसर्वेषांकर्मणांꣳ
* हस्तावेकायनमेवꣳ

 नन्वत्रापिसामर्थ्याद्विशेषात्पृथगुक्तिरयुक्तेत्याशंक्याहेहत्विति। सयथासैंधवघनइत्यादिवाक्यतात्पर्यमाह
सर्वकार्येति। एतेभ्योभूतेभ्यइत्यादेरर्थमाह पूर्वंत्विति ज्ञानोदयात्प्रागवस्थायामित्यर्थः। लब्धविशेषविज्ञान
इहतु सर्वशास्त्रार्थोपसंहार इति कृत्वार्थप्राप्तोप्यर्थः स्पष्टीकर्त्तव्य इति पृथगुच्यते॥ सर्वकार्यप्रलयेवि
द्यानिमित्ते सैंधवघनवदनंतरोबाह्यः कृत्स्नः प्रज्ञानघनः एक आत्मावतिष्ठते। पूर्वंतुभूतमात्रासंसर्ग
विशेषाल्लब्धविशेषविज्ञानः सन्प्रविलापितविद्यया विशेषविज्ञाने तन्निमित्ते चभूतसंसर्गेमिप्रेत्यसं
ज्ञास्तीत्येवं याज्ञवल्क्येनोक्ता॥१२॥ साहोवाच॥ अत्रैवमाभगवानेतस्मिन्नेववस्तुनिप्रज्ञानघनए
वप्रेत्यसंज्ञास्तीतिमोहांतंमोहमध्यं मा अपिपीपदवगमितवानसिमोहितवानसीत्यर्थः॥ अतो

सयथासैंधवघनोनंतरोबाह्यः कृत्स्नोरसघनएवैवंवा अरेयमात्मानंतरोबाह्यः कृत्स्नः प्र
ज्ञानघनएवैतेभ्योभूतेभ्यः समुत्थायतान्येवानुविनश्यतिनप्रेत्यसंज्ञास्तीत्यरेब्रवीमीति
होवाचयाज्ञवल्क्यः॥१२॥ साहोवाचमैत्रेय्यत्रैवमाभगवान्मोहांतमापीपिपंनवा अहमिमं
विजानामीतिसहोवाचनवा अरेहंमोहंब्रवीम्यविनाशी वा अरेयमात्मानुच्छित्तिधर्मा॥१३॥

नचैअहमिममात्मानंउक्तलक्षणंविजानामिविवेकतः॥ सहोवाचनाहंमोहंब्रवीमीत्याहयाज्ञवल्क्यः
॥ अविनाशीअयमात्मायतः। विनष्टुंशीलमस्येतिविनाशीनविनाशी अविनाशी विनाशशब्देन वि
ल क्रियाअविनाशीत्यविक्रियात्मेत्यर्थः॥ अरेमैत्रेय्ययमात्माप्रकृतोऽनुच्छित्तिधर्माउच्छित्तिरुच्छेदः। उ
च्छेदांतोविनाशः उच्छित्तिर्धर्मोस्येत्युच्छित्तिधर्मानउच्छित्तिधर्मा अनुच्छित्तिधर्मानापिविक्रियाल
क्षणोनान्योप्युच्छेदलक्षणोविनाशोस्यविद्यतइत्यर्थः॥१३॥ ॥छ॥ ॥छ॥ ॥

स्सनूव्यवहरतीतिशेषः। प्रविलापितेनस्येत्यध्याहारः। पूर्वोत्तरविरोधंशंकित्वापरिहरतिसाहोवाचे
त्यादिना। अविनाशित्वेपूर्वत्रहेतुरित्याहयतइति॥ ॥७॥ ॥७॥ ॥७॥

प्रत्यध्यायमन्यथाप्रतिपादनादात्मनः सविशेषत्वमाशंक्य स एष इत्यादेस्तात्पर्यमाह चतुर्ष्वपीति। के
न प्रकारेण तस्य तुल्यत्वमित्याशंक्याह परं ब्रह्मेति। अध्यायभेदस्तर्हि कथमित्याशंक्याहोपायेति। उ
पायभेदवदुपेयभेदोपि स्यादित्याशंक्याहोपेयस्त्विति। चातुर्थिकादर्थात्तौ चमिकस्यार्थस्य भेदं व्या
वर्तयति स एवेति। प्राणप नौपन्यासेन मूर्द्धातेस्य प तिष्ठतीति मूर्द्धपातोपन्यासात्प्राणपा[illegible]ते प
चतुर्ष्वपि प्रपाठकेष्वेकस्यात्मा तुल्यो निर्द्धारितः। परं ब्रह्म उपायविशेषस्तु तस्याधिगमे अन्यश्चा
न्यश्चोपेयस्तु स एवात्मा यश्च तुर्थे अथात आदेशो नेति नेतीति निर्दिष्टः स एव पंचमे प्राणपणोपन्या
सेन शाकल्ययाज्ञवल्क्यसंवादे निर्द्धारितः पुनः पंचमसमाप्तौ पुनर्जनकयाज्ञवल्क्यसंवादे पु

यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति तदितर इतरं जिघ्रति तदितर इतरꣳ रसयते त
दितर इतरमभिवदति तदितर इतरꣳ शृणोति तदितर इतरं मनुते तदितर इतरꣳ स्पृशति तदि
तर इतरं विजानाति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं जिघ्रेत्तत्केन कꣳ रस
येत्तत्केन कमभिवदेत्तत्केन कꣳ शृणुयात्तत्केन कं मन्वीत तत्केन कꣳ स्पृशेत्तत्केन कं विजा
नीयाद्येनेदꣳ सर्वं विजानाति तं केन विजानीयात्स एष नेति नेत्यात्मा ॥ ॥७॥ ॥

नरिहोपनिषत्समाप्तौ चतुर्णामपि प्रपाठकानामेतदात्मनिष्ठतानान्योन्तराले कश्चिदपि विवक्षि
तोर्थ इत्येतत्प्रदर्शनायां तत्रोपसंहारः स एष नेति नेत्यादिः॥ ॥७॥ ॥ नगृहीताऽइति गम्यते तेन शाक
ल्यब्राह्मणेन निर्विशेषः। प्रत्यगात्मा निर्द्धारित इत्यर्थः। विज्ञानमानंदं ब्रह्मेत्यादावुक्तं स्मारयति पुनरि
ति पंचमसमाप्तौ पुनर्विज्ञानमित्यादिना स एव निर्द्धारित इति योजना। कूर्चब्राह्मणादावपि स एवो
क्त इत्याह पुनर्जनकेति। अस्मिन्नपि ब्राह्मणे स एवोक्त इत्याह पुनरिहेति। किमिति पूर्ववत्तत्र तत्रो
क्तस्य निर्विशेषस्यात्मनोवसाने वचनमित्याशंक्याह चतुर्णामपीति॥ ॥७॥ ॥

 पूर्वापरपर्यालोचनायामुपनिषदर्थोनिर्विशेषमात्मतत्वमित्युपपाद्यवाक्यांतरमवतार्यव्याकरोतिय
 स्मादित्यादिना॥इतिहोक्त्वेत्यादिवाक्यमाकांक्षापूर्वकमादायव्याचष्टेयत्त्वष्टवत्यसीत्यादिनाब्राह्म
णार्थमुपसंहरतिपरिसमाप्तेति।तथाप्युपदेशांतरंकर्त्तव्यमस्तीत्याशंक्याहैतावानिति।किमत्रप्र

यस्मात्प्रकारशतेनापिनिरूप्यमाणेतत्वेनेतिनेत्यात्मैवनिष्ठानान्योपलभ्यतेतर्केणवागमेन
वातस्मादेतदेवामृतत्वसाधनंयदेतन्नेतिनेत्यात्मपरिज्ञानंसर्वसंन्यासश्चेत्येतमर्थमुपसंजि
हीर्षन्नाह।एतावदेतावन्मात्रंयदेतन्नेतिनेत्यद्वैतात्मदर्शनमिदंचान्यसहकारिकारणनिरपेक्षं
मैत्रेय्यमृतत्वसाधनं यत्पृष्टवत्यसियदेवभगवान्वेत्थतदेवमेविब्रूहीत्यमृतत्वसाधनमितितदेव

अगृह्योनहिगृह्यतेऽशीर्योनहिशीर्यतेऽसंगोनहिसज्यतेऽसितोनव्यथतेनरिष्यतिविज्ञाता
रमरेकेनविजानीयादित्युक्तानुशासनासिमैत्रेय्येतावदरेखल्वमृतत्वमितिहोक्त्वायाज्ञ
वल्क्योविजहार॥१४॥ ॥पंचमंब्राह्मणं॥ ॥७॥ ॥

देवेतिविज्ञेयंत्वयाइतिहकिलएवंकिल्वामृतत्वसाधनमात्मज्ञानंप्रियायैउक्त्वायाज्ञवल्क्यःकिं भार्यायै
कृतवान्यत्पूर्वंप्रतिज्ञातंप्रव्रजिष्यन्नस्मीतितच्चकारविजहारप्रव्रजितवानित्यर्थः।परिसमा
प्ताब्रह्मविद्यासंन्यासपर्यवसाना।एतावाननुपदेशः।एतद्वेदानुशासनं।एषापरमानिष्ठा।एषपुरुषा
र्थकर्त्तव्यतांतइति॥ ॥७॥ ॥

माणमितितत्राहएतदिति।तथापिपरमानिष्ठासंन्यासिनोवक्तव्येतिचेन्नेत्याहैषेति।आत्मज्ञानेस
संन्यासेसत्यपिपुरुषार्थांतरंकर्त्तव्यमस्तीत्याशंक्याहैषइति।इतिशब्दोब्राह्मणसमाप्त्यर्थः॥ ॥७॥

ससन्यासमात्मज्ञानममृतत्वसाधनमित्युपपाद्य सन्यासमधिकृत्य विचारमवतारयति इदानीमिति। त
त्र तत्र प्रागेव विचारितत्वात् किं पुनर्विचारेणेत्याशंक्याह शास्त्रार्थेति विरक्तस्य सन्यासो ज्ञानस्यांतरंगसाध
नं ज्ञानं तु केवलममृतत्वस्येति शास्त्रार्थविवेकरूपा प्रतिपत्तिरपि प्रागेव सिद्धेति किं तदर्थेन विचारारंभेणे
त्याशंक्याह यतस्त्विति। अतो विचारः कर्तव्यो नान्यथा शास्त्रार्थविवेकः स्यादित्युपसंहारार्थो हिशब्दः। वाक्या
नामाकुलत्वमेव दर्शयति यावदिति। यदग्निहोत्रमित्यादौ नेत्यादिशब्दादैकाश्रम्यं त्वाचार्याः प्रत्यक्ष
विधानात् गार्हस्थ्यस्येत्यादिस्मृतिवाक्यं गृह्यते। कथमेतावता वाक्यानि व्याकुलानीत्याशंक्याहान्या

इदानीं विचार्यते। शास्त्रार्थविवेकप्रतिपत्तये। यतस्त्वाकुलानि हि वाक्यानि दृश्यंते यावज्जीवमग्निहो
त्रं जुहुयात् यावज्जीवं दर्शपूर्णमासाभ्यां यजेत कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः। एतद्वै जराम
र्यं सत्रं यदग्निहोत्रमित्यादीन्यैकाश्रम्यज्ञापकानि। अन्यानि चाश्रमांतरप्रतिपादकानि वाक्यानि
विदित्वा व्युत्थाय प्रव्रजेति। ब्रह्मचर्यं समाप्य गृही भवेत् गृहाद्वनी भूत्वा प्रव्रजेत्। यदि वेतरथा ब्र
व ह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वेति। द्वावेव पंथानावनुनिःक्रांततरौ क्रियापथश्चैव पुरस्तात्संन्यासश्च न
तयोः सन्यास एवातिरेचयतीति न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरित्यादीनि॥ ॥ अ

नि चेति। विदित्वा व्युत्थाय भिक्षाचर्यं चरंतीति। वाक्यं पाठक्रमेण विद्वत्सन्यासपरमर्थक्रमेण तु विविदि
षासन्यासपरम् आत्मानमेव लोकमिच्छंतः प्रव्रजंतीति तु विविदिषासंन्यासपरमेवेति विभागः। क्रमसंन्या
सपरां श्रुतिमुदाहरति ब्रह्मचर्यमिति। अक्रमसंन्यासविषयं वाक्यं पठति यदि वेति। कर्मसन्यासयोः स
न्यासस्याधिक्यप्रदर्शनपरां श्रुतिं दर्शयति द्वावेवेति। अनुनिष्क्रांततरौ शास्त्रे क्रमेणाभ्युदयनिःश्रेयसो
पायत्वेन पुनः पुनरुक्तावित्यर्थः। ज्ञानद्वारा संन्यासस्य मोक्षोपायत्वे श्रुत्यंतरमाह न कर्मणेति। तानि
वा एतान्यवराणि तपांसि न्यास एवात्यरेचयदित्यादिवाक्य मादिशब्दार्थः॥ ॥७॥ ॥

यथाश्रुतयस्तथास्मृतयोथाकुलाद्ध्वयंतइत्याह तथेति। तत्राक्रमसंन्यासेस्मृतिमादावुदाहरति
ब्रह्मचर्यवानिति। यथेष्टाश्रमप्रतिपत्तौप्रमाणभूतांस्मृतिंदर्शयत्यविशीर्णेति। आश्रमविकल्पविष
यांस्मृतिंपठंतितस्येति। ब्रह्मचारीषष्ठ्यर्थः। क्रमसंन्यासेप्रमाणमाह। तथेतितत्रैववाक्यांतरेपठतिप्राजा
पत्यामिति। सर्ववेदसंसर्वस्वंदक्षिणायस्यांतांनिर्वर्त्येत्यर्थः। आदिपदेनमुंडानिस्तंतवस्त्रेत्यादिवाक्यं
गृह्यते। इत्याद्याःस्मृतयश्चेति। पूर्वेणसंबंधः व्याकुलानिवाक्यानिदर्शितान्युपसंहरत्येवमिति। इतश्च
कर्त्तव्योविचारइत्याहाचारश्चेति। श्रुतिस्मृतिविदामाचारः विरुद्धोलक्ष्यतेकेचित्ब्रह्मचर्यादेवप्रव्रजंति

तथास्मृतयश्च। ब्रह्मचर्यवान्प्रव्रजति। अविशीर्णब्रह्मचर्योयमिच्छेत्तमावसेत्। तस्याश्रमविकल्प
मेकेकुर्वते॥ तथावेदानधीत्यब्रह्मचर्येणपुत्रपुत्रानिच्छेत् वनार्थंपितॄणामग्नीनाधायविधिवत्त्वि
ष्टयज्ञोवनंप्रविश्याथमुनिर्बुभूषेत्। प्राजापत्यांनिरूप्येष्टिंसर्ववेदसदक्षिणांआत्मन्यग्नीन्समा
रोप्यब्राह्मणःप्रव्रजेद्गृहादित्याद्याः एवंव्युत्थानविकल्पक्रमयथेष्टाश्रमप्रतिपत्तिप्रतिपादका
निहिश्रुतिस्मृतिवाक्यानिशातशउपलभ्यंतेइतरेतरविरुद्धानिआचारश्चतद्विदांविप्रपत्तिश्चशा
स्त्रार्थप्रतिपत्तॄणांबहुविदामपि। अतोनशक्यतेशास्त्रार्थोमंदबुद्धिभिर्विवेकेनप्रतिपत्तुं॥ ॥७॥

अपरेतुतत्परिसमाप्यगार्हस्थ्यमेवाचरंति अन्येतुचतुरोथाश्रमानूक्रमेणाश्रयंतेतथाचविनाविचा
रंनिर्णयासिद्धिरित्यर्थः। इतश्चास्तिविचारस्यकार्यतेत्याहविप्रतिपत्तिश्चेति। यद्यपिबहुविदःशास्त्रा
र्थप्रतिपत्तारोजैमिनिप्रभृतयस्तथापितेषांविप्रतिपत्तिरुपलभ्यतेकेचिद्दूर्ध्वरेतसआश्रमाःसंतीत्या
हुर्नसंतीत्यपरेतत्कृताविचारादृतेनिश्चयसिद्धिरित्यर्थः। अथकेषांचिदंतरेणापिविचारंशास्त्रार्थोवि
वेकेनप्रतिभास्यतेतत्राहानइति। श्रुतिस्मृत्याचारविप्रतिपत्तेरितियावत्॥ ॥७॥ ॥७॥ १४

केस्तर्हि शास्त्रार्थविवेक नज्ञातुं शक्यते तत्राह परिनिष्ठितेति। नानाश्रुतिदर्शनादिवशादुपपादिते विचा
रारंभमुपसंहरति तस्मादिति। विचारकर्तव्यतामुक्त्वा पूर्वपक्षं गृह्णातियावदित्यादिना। श्रुत्यादी
त्यादिशब्देन कुर्वन्नित्यादिमंत्रवादो गृह्यते एकाश्रम्यहेत्वंतरमाहतमिति। एतद्वै जरामर्यसत्रं यदग्नि
होत्रमितिश्रुतेश्च पारिव्राज्यासिद्धिरित्याह जरेति। तत्रैव हेत्वंतरमाह लिंगाच्चेति। पारिव्राज्यपक्षेपि
तदुपपत्तिमाशंक्याह नहीति। इतश्च नास्ति पारिव्राज्यमित्याह स्मृतिश्चेति। तस्याः तात्पर्यमाह समंत्रे
परिनिष्ठितशास्त्रार्थन्यायबुद्धिभिरवश्यमेषां वाक्यानां विषयविभागः शक्यतेऽवधारयितुं॥ तस्मा
देषां विषयविभागज्ञानाय यथाबुद्धिसामर्थ्यं विचारयिष्यामः। यावज्जीवश्रुत्यादिवाक्यानामन्य
र्थासंभवात् क्रियावसान एव वेदार्थः॥ तेयज्ञपात्रैर्दहंतीत्यंत्यकर्मश्रवणात्। जरामरणश्रवणाच्च
। लिंगाच्चेत्समांतं शरीरमिति। नहि पारिव्राज्यपक्षे भस्मांततानाशरीरस्यस्यात्। स्मृतिश्च। निषेकादि
श्मशानांतो मंत्रैर्यस्योदितो विधिः। तस्य शास्त्रेऽधिकारोस्मिन् ज्ञेयो नान्यस्य कस्यचिदिति। स
मंत्रकं हि यत्कर्म वेदेनेहाभिधीयते। तस्य श्मशानांततां दर्शयति स्मृत्याधिकारांतराभावप्रदर्श
नाच्चाल्पंतमेव श्रुत्यधिकाराभावोऽकर्मिणो गम्यते। अभ्युद्धासनापवादाच्च वीरहा एष देवानां यो
ऽग्निमुद्वासयत इति। ननु व्युत्थानादिविधानादैकल्पिकं क्रियावसानत्वं वेदार्थस्य नान्यार्थत्वाद्व्यु
त्थानादिश्रुतीनां। यावज्जीवमग्निहोत्रं जुहोति यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेत्येवमादीनां जी
రోధేన విదితావిదితాయమాన బోధ్య బోధా ద్విపికల్పానుస్పృష్టే తరసాంత బహుప్పంచదశ కలనా
గోంచర బుద్ధివృత్తయో బోధశబ్దాః. తాదృశబోధం ప్రతిబోధం ప్రతి తత్తద్బోధవృత్త్యుపస్థానవముక్షైవ
నిర్తృతియోగికత్వమాత్రతయా యద్వదితం తత్ప్రతిబోధవిదితం తదేవ శాంద్యశ్రోత్రశోత వేదాంత
మతం య ఏవం నిర్విశేషం వేద నిర్విశేష ఏవ స భవతీతి శ్రుతి సిద్ధ నిర్విశేషబ్రహ్మవేదసమకాలం విదితావిదితవిభాగ
స్థానవనిర్ధునిర్తృతియోగికనిర్విశేషబ్రహ్మమాత్రావస్థానలక్షణం వదేవహి కైవల్యమేవామృతత్వమితి విదాం కుర్వ
శేషతయా విందతే. హి శబ్దానిష్కర్షయాంధేః బ్జానసమకాలమేవముక్తో భవతీత్యర్థః బ్జానసమకాలమేవముక్తః
కైవల్యం యాతీతి శ్రుతేః అమృతత్వం హి విందత ఇత్యుక్తం కేన హేతునామృతత్వం విందత ఇత్యత ఆహ ఆత్మన
తి॥ ఆత్మనా విందతే వీర్యం విద్యయా విందతేమృతమితి. ధనమంత్రతంత్రయంత్ర తపోయోగాదికృత వీర్యస్య
తత్తత్కర్తృకత్వాత్ వీర్యం స్వబ్జానతీతాత్మయమానమృత్యుం నిర్మూలయితుం న హి శక్తం భవతి స్వస్వాపి స్వ
బ్జానప్రభవసమృత్యురూపత్వాత్ స్వాత్మవీర్యాత్కృతవీర్యస్య మవిదితావిదితాయమానబోధ్య బోధాది బహు
ప్పంచదశ కలనావరణోద్భాటనపటుత్వాత్ తదేవసావిద్యాపదత్వాత్ సత్యస్వవ్యాపకత్వాత్ప్రాతి
భాసికత్వాదిరుపమృత్యుమపస్తాపం తద్యుక్తం శక్నోతి తథావిధాత్మవీర్యం కేన విందత ఇత్యత ఆహ. ఆత్మనేతి-

స్వరూపజ్ఞానాద్విశ్వవిశ్వాదితుర్యభిన్నం తం యవిరియతే ఆపన్నాతం వా యాతి తద్వద్భ్రమాద్ధియ నిరూపితాద్భారతావస్థావేతరణాసామర్థ్యం స్వరూపం స్వమాత్రమితి విందతేల భవజ్ఞత్వర్థః। నాయమాత్మాబలహీనేన లభ్యో నచప్రమాదాత్తపసోవాప్యలింగాత్। ఏతైరుపాయైర్యతతే యస్తు విద్వాంస్తస్యైష ఆత్మావిశతే బ్రహ్మధామేతి శ్రుత్యనురోధేన స్వమాత్రబలవత్యావిద్యయా స్వమాత్రావరణే యమానభాగ్రజ్జాగ్రదాది చతుష్టం చదిశేతలనాపన్నావేతరణాపయశక్త్యా నిష్ఠ్రుతి యోగినామృతం విశేషబలవత్కైవల్యం స్వవిశేషం విద్యాన్నిపం దితి నచానంతతోబాధిమతోమోక్షస్య న భవిష్యతీతి గౌడపాదాచార్యోక్త్యనురోధేన విద్యయామృతమశ్నుతే। తథావిధబ్రహ్మమాత్రవిద్యయా అపిస్వపస్థాతస్య బ్రహ్మమాత్రావరణాభాగ్రజ్జాగ్రదాది చతుష్టం చదిశేకలనాపన్నావ సమతాలమపన్నం గతత్వాత్। స్వతస్స్వమాత్రావస్థానలక్షణకైవల్యమవశిష్యతఇత్యత్ర యావద్యావన్మునిశ్రేష్ఠ స్వయం సంవ్యజ్యతేఖిలం। తావత్తావచ్చరాపూణః పరమాత్మైవశిష్యతఇతిశ్రుతేః। నిరవద్యమపి బ్రహ్మవిద్యయావృతవద్భవేత్। సావిద్యావరణేనష్టే స్వతోబ్రహ్మప్రకాశతఇతి స్మృతేః ఇతి బ్రహ్మవిద్యయా బ్రహ్మమాత్రావరణేపమూపపటే యస్త్వమత ఏవేహ జన్మనైవ బ్రహ్మవిద్యాశిక్షయైన స్వమాత్రావరణం తిలశక్త్యావ్యాపాస్త్యతిరిక్తసర్వోపన్నావసిద్ధం బ్రహ్మస్వమాత్రమితి విదిత్వా నన్యమన్యథాత్మనో మాత్రవద్వదనాత్మవాసనవరుత్వా బాయుతత్త్వాద్వా ఇహైవ ఇహచేదవేదీదథ సత్యమస్తి న చేదిహావేదీన్మహతీ వినష్టిరితి। యథాదర్శే తథాత్మని తిశ్రుత్యనురోధేన ఇహైవ మనుష్యజన్మని యదూక్తసాధనసంపన్నా బ్రహ్మవిద్యాధికారీ ముముక్షుస్స్వాతిరిక్త విదితావిదితసకలనాపన్నావసిద్ధం బ్రహ్మనిష్ఠు తియోగికే స్వమాత్రమప్యవేదీ ద్విదచదధవేద్వదనోంతరలక్షణం తథాప్యాత్రమసదసదితి శ్రుతిసిద్ధాపదపన్నావా విజ్ఞాతపన్మాత్రం సత్యం సత్తాసామాన్యస్వరూపావస్థాన

లక్షణా విదితా త్రైవల్యం విద్యతే స్వతః ప్రకాశత ఇత్యర్థః । యథోక్త బ్రహ్మవిద్యాధికార్యపి ముముక్షు రిహ
జన్మని యథోక్త ప్రకారేణ బ్రహ్మమాత్రం న భావయేద్విద్వాన్ స విదేహ త్వా దేహనాశానంతరం విదేహ నాశనన్తరం
మరణాదిప్రతిబంధ పాంతస్త్యమస ల్లోకేషు పంచకప్రాప్య స్వాపరాపత్తి లక్షణాం తాం భవతీ త్యత్రాల బ్రహ్మవిత్ త్వం బ్ర
హ్మమాదుర్లభం తత్రాపి పుంస్త్వం శ్రుతిపార దర్శనం । యస్త్వాత్మ ముక్తైవ నయతే తమూర్ధ్వ ధీస్సు ఆత్మ పాస్వం విని
పాత్య పాన్యత ఇతి । సర్వజ్ఞ భగవత్పాదైరుక్తః । యత ఏవ మాంత ఇహాజన్మన్యేవ స్వాప జ్ఞాద్యప్యాప్త్యా పాపవతరిత్త విదితావి
దితాం యమాన స్వాప విద్యాపదవత్పాద్య భూతే విద్య మానే పితద్ధత వేం యాం శేప న్యూన సిద్ధం బ్రహ్మ విదిత్వా తత్త
లంభోక్తృ వృత్తముత్యాపాం । భూతే ష్వితి । భూతేషు భూతేషు విచిత్య ధీరాః ప్రేత్యాస్మాల్లోకాదమృతా భవంతీతి
ముముక్షుభిర్ధీరాః శరీరమిదం ప్రైధునాదిప్రాప్త్యం తం సంవిద్యపదం చిరయుపవ మాంత్ర ద్వారేణ నిష్ప్రంత
మశ్రీభిశ్రితం మనాం నాను లభ్యం భర్గణాదిపబద్ధం విజ్ఞానాత్ర వాతపిత్త శ్లేష్మబహ్మామేధ్రూప సాంభరన్నై ర్వేమస్తం
బహుభిః పరిపూర్ణాం । ఏతాదృశే స్మిన్ శరీరే వర్తమాన స్యైతం తామేవ భూమిగిరి తత్త్వాదిది పాంపాసనయా బం
ఖేనా శాస్త్ర వాసనయాం పిచ । మోక్ష వాసనయా జ్ఞానం యథావస్త్రైవ భూయతే । న తర్కణై సర్వబయా
ధనేన త్యాగేనైకే అమృతత్వ మానశు రిత్యాదిశ్రుత్యర్థ పర్యాలోచనయా వాసనాత్రయ పురస్సరమేషణా
త్రయం సన్న్యస్య గురుకులవాస బ్రహ్మచర్య శుశ్రూషాభిస్తుష్ట గురుముఖాత్ గ్రహీతం తత్ప్రణవమహావా
క్య స్వరూపమేవ చిత్తానుష్ఠానం చతుర్ధా సన్న్యస్య శ్రవణం కుర్యాత్ విదిహం ముక్త్యా విశ్వేదేశస్త్రా తత్రశతం ప
రేతి । శ్రుత్యనురోధేన సంశయాది పంచదోష శాంతేనం తమనాం శాధ్యపస్తాత్ర శతవేదాంత శ్రవణమనన
నిదిధ్యాసనతో గుణాత్రయాంవ్యతి త్రిపదార్థ త్రయిమేపమర్థవి త్వాపరత్వ పరస్వపమేత్వాదాస్వబ్జ
సవజ్ఞద్యష్టి బ్రాం భూతేషు భూతేషు బ్రహ్మాదిస్థావరాంతేషు పత్యతేవాదవాపహారి కత్వేన ప్రతిభా
సితేష్వేవ వాసత్వ సత్వ పిపశ్యతే పాపిసన్మాత్ర మసన్నత్ బ్రహ్మమాత్రమసత్వా అన్యదేవతద్వి దితాదథో అవిది

తాదధి। సిద్ధాంతోఽధ్యాత్మశాస్త్రాణాం సర్వోపనిషదామపి॥ సర్వథా భేదకలనం ద్వైతం తాద్వైతం తదవేద్యతే॥ ఇతి-
శ్రుత్యనుసారాదేవ విదితావిదితాయమానబాగ్ర బాగ్రాది చతుష్టం చతుష్టం చదశకలనాస్తి నాస్తీతి భూమాపక్షా
పసిద్ధం బ్రహ్మనిష్ఠ ఇతి యోగిక సమాత్ర మితి విచిత్య నిశ్చిత్య బుద్ధౌ తా ఏతత్ బుద్ధ్యన సమతాలం సాక్షిబుద్ధిస్వబుద్ధిదృష్టివిభ్రం
ఖిల విదితా విదితా యమాన బాగ్ర బాగ్రాది చతుష్టం చదశ-కలనాభ్రమో యత్రామో తత్ర ... సాక్షిసత్
వ్యవహారికప్రాతిభాసికత్వాదిరూపేణ వా యత్ర దృశ్యతే సలోకతస్త్వ ... తాత్పర్య ... తత్త్వ ... స్వతిరిక్త
లోకాయవహారంత్వ ... సిద్ధ ... రిక్తాద పసహా పసిద్ధ నిష్ఠ ఇతి యోగిక బ్రహ్మ మాత్ర భావారూఢాస్థం తేః అ
మృతా విదేహా ముక్తా భవంతి బ్రహ్మైవ భవంతీత్యర్థః। తమేవం విద్వాంస ఇహామృతా భవంతి। బ్రహ్మైవాహం చిద
హామేవం వా వినయంత్యతే। బహ్వాత్రైకైవ యస్త్విష్టే ద్విదేవం ముక్త ఏవ స ఇత్యాదిశ్రుతేః॥ —✲— ద్వితీయః ఖండః —✲—
యద్విద్యాధీనః పరమపురుషార్థః స్వయం నిష్ఠ ఇతి యోగిక బ్రహ్మమాత్ర విద్యా విస్పష్టం ఖం దదయోనాం ... తాత్రే
త్రసత్యస్తోత్రం। న తత్ర చక్షుర్గచ్ఛతి యద్వాచానభ్యుదితం। తదేవ బ్రహ్మత్వం విద్ధి। అన్యదేవ తద్విదితాదథో
అవిదితాదధి। యో నస్తద్వేద తద్వేద నో న వేదేతి వేద చ। అవిజ్ఞాతం విజానతాం విజ్ఞాతమవిజానతామిత్యా
దివాక్యైః। అవిజ్ఞాతం విజానతామిత్యాద్యుక్తం। తత్ర ప్రత్యగాదిప్రమాణైః ... దస్త్యేవ అఖిలమతం తస్య
విశేషతో బ్రహ్మ ... శత్వాదివిజ్ఞాతం యస్య ... స్త్విష్యమతం తదవిజ్ఞాతం బ్రహ్మణో విజ్ఞాతతా ...
స దేవ బ్రహ్మేతి ముసలతిసల యమతీనామేవం ... మూలాదితి తదాశ్రయమాశ్రిత్య ... రభ్యదిహాసు
రాక్షసం చ యయా యహాతుత్వేన తదేవ బ్రహ్మ సర్వత్ర శాస్త్రం తత్ ... నాస్తీతి ప్రత్యయితవ్యం। సహాసర్వజ్ఞో
రాదన్యత్రా అగ్నివాయ్వింద్రాదిదేవాః పరిభూయంత్యేం ... సామర్థ్యమస్తి తత్త్వశౌకత దర్శయిత్వాది
లింగదర్శనాత్ అసర్వథాన్యత్ ... మాత్రం దర్శయామం ... యది ... మాత్రే ...
త్యేవం ... సహాకారణా విద్యాం వినా కార్యసిద్ధిరితి - తస్మాదస్య విశేషాఖిలం బ్రహ్మ యద్విద్యార్థేవాద
ముఖేన బ్రహ్మణో దురవజ్ఞేయతాం ప్రకటీనామేనముపాఖ్యాయికే యత ... అన్యాయతాంతి ... చేపి -

క్లేశాదేవ బ్రహ్మావిదితవంతః అథవాఽయం శమాదివిధిత్సయోక్త్యాయితా అగ్నిహోత్రాదినామభిమానశా
తనాత్ అయత్నశ్శమాదిహీనే బ్రహ్మవిద్యాసాధనం న హ్యశమాదివైరళ్యేనాధిష్ఠితలశితస్య బ్రహ్మవిద్యా
వికారోఽస్తి బ్రహ్మమాత్రావస్థానలక్షణో నైవత్యోక్తః తామాద్యరిషడ్వర్గనాశనపూర్వకత్వాత్ శాంతో
దాంతః। యదా సర్వే ప్రముచ్యంతే కామా యేఽస్య హృది శ్రితాః॥ అథ మర్త్యోఽమృతో భవత్యత్ర బ్రహ్మ సమ
శ్నుత ఇత్యాదిశ్రుతేః ఆహ యాన్యస్యేదం యదిదముపాసిత ఇత్యుపాసనా సామాన్యప్రతిషేధవత్వాదనుపాస్యత్వే
ప్రాప్తే బ్రహ్మమాత్ర బ్రహ్మప్రాప్తేశ్వర స్వరూప తదుపాసనార్థమయమాఖ్యాయితా అధిదైవతాం మధ్యాధ్యాత్మం
తద్వనమిత్యుపాసితవ్యమితీశోపాసనావిధానాత్ న హ్యయం యత్ప్రసాదం వినా శమాదిస్తద్యుక్తస్య సర్వోపపత్తు
పశ్యోద్బ్రహ్మమాత్రవిద్యోదేతి తదధిగమాయ శబళబ్రహ్మస్వరూపం ప్రకటయతి శ్రుతిః బ్రహ్మ హ దేవే
భ్య ఇత్యాదినా బ్రహ్మ హ దేవేభ్యో విజిగ్య ఇతి నిరవద్యమపి నిర్విశేషం బ్రహ్మ సోపాసనయా భక్త్యా స్వప
దం భజేయురిత్యనుగ్రహం ప్రయాయ ఉమాం హైమవతీం బిభ్రాణా సంగేశభావమాపన్నం సత్ సర్వత్ర పాత్రాఽరక్షితలోకః
దేవాసురసంగ్రామే ప్రాప్తే తత్ర స్వనియోజ్యేష్వపి దుష్టానసురాన్ జిత్వా స్వనియోజ్యేషు పరిపాలితే దేవేభ్యో
ఽయం విజిగ్యే జయం లబ్ధవత్ తత్ఫలభూతస్వర్గం చ దేవేభ్యః ప్రాయచ్ఛదిత్యర్థః అగ్నివాయ్వాదిదేవానా
త్మానం భావారూఢా దేవా బ్రహ్మణస్తదేవాసురజయం జయమేవ స్వకృతం వివమనిర ఇత్యాహ తస్యేతి త
స్య హ బ్రహ్మణో విజయే దేవా అమహీయంత త ఐక్షంతాస్మాకమేవాయం విజయోఽస్మాకమేవాయం మహి
మేతి అమహీయంత మిథ్యాభిమానం ప్రాప్తవంత ఇత్యర్థః। ఐక్షంత ఐక్షిషత ఏవం చింతితవంత ఇత్య
ర్థః। తేషాం మిథ్యాభిమానం బ్రహ్మ జ్ఞాతవదిత్యాహ శ్రుతిః తద్ధైషాం విజజ్ఞావితి తత్ బ్రహ్మ దేవగణం మిథ్యాభి
మానం జ్ఞాత్వా తద్భ్రాంతిభవేత్ అసురగణవత్పరాభవేయురితి తదనుకంపయా తాన్ మిథ్యాభిమానతో మో

చయిత్వా సుగృహీత్వా యత్వా మితి మూం వా విద్యాం స్థాలాం శానుతారి వదేవగణే చక్షుర్విషయో ప్రాదుర్బ
భూవేత్యాహం తేభ్యో హం ప్రాదుర్బభూవేదితి దేవాస్తద్యక్షే యత్తాం జిజ్ఞాసా నిర్ధారయామాసుష్టం తేష్వేత
ఆహం చదితి తస్యావ్యభాన తత్కిమిదం యక్షమితి స్వయోగమాహాత్మ్యసంభూత పశ్యద్విష్టయా
స్పద చక్షుర్విషయే దేశగత యక్షం యోగిసాత్త్వా తస్మిన్ యం దృష్ట్వా తే మథమద్యుష్టపూర్వమద్భు
తమితి సాం తద్విజ్ఞాయ స్వంతేరా దేవానవ్యభానతస్మై వవిజ్ఞాత ఇత్యర్థః దేవాస్తదుపవిజిజ్ఞాయా సర్వజ్ఞ
కల్పమతితేజస్వినమగ్నిం యక్షే యత్తాః పరిజ్ఞాతుం సమర్థమితి మత్వా ప్రేష యామాసుః సోగ్ని
శ్చేనత ద్వృక్షం గత్వా తత్రైజసాజిదే భూతస్థాక్షి మాస్థ తం ప్రత్యృషం తద్యక్షం సంభాష్య దస్మ్యత్వా జిమా
నం హోవాచ యామాస ప్రపద్యే తిహోవాచ ప్రతిగతవాన్ త్వాగ్నిర్వాతమితి తేగ్నిమబ్రువన్ జాతవేద
ఏతద్విజానీహి కిమేతద్యక్షమితి తథేతి తదభ్యద్రవత్తమభ్యవదత్ కోసీత్యగ్నిర్వా అహమస్మీ
త్యబ్రవీజ్జాతవేదా వా అహమస్మీతి తస్మింస్త్వయి కిం వీర్యమిత్యపీదం సర్వం దహేయం యదిదం పృథివ్యామితి
తస్మై తృణం నిదధావేతద్దహేతి తదుపప్రేయాయ సర్వజవేన తన్న శశాక దగ్ధుం స తత ఏవ నివవృతే నైతదశ
కం విజ్ఞాతుం యదేతద్యక్షమితి ఆపః ప్రవిశ్య వాగ్భూత్వా భవతీత్యగ్నిః ఆపో వా అగ్నిర్యోనిః అపాం వా అగ్నిః
తాయమిత్యాదిశ్రుతేః యస్య దేశతోమపదేశ మంతరాపర్యోపప్రతాశకే విదఘాంగస్య యమేవజాతఆవిర్భూ
తస్సాయం జాతవేదాః దేవాస్సయం భాతవేదా ఇత్యుక్తిః తథాయం దేవ అగ్నిర్జ్ఞాతుమశక్యం యక్షం పరి
జ్ఞాతుమగ్నేరపి జిదిక్షమధ్యాగ్నిపరిభవానంతరం వాయుమబ్రువన్ త్వాదిసమానమిత్యాహ అథేతి అథ వా
యుమబ్రువన్ వాయవేతద్విజానీహి కిమేతద్యక్షమితి తథేతి తదభ్యద్రవత్తమభ్యవదత్ కోసీతి వాయుర్వా
అహమస్మీత్యబ్రవీన్మాతరిశ్వా వా అహమస్మీతి తస్మింస్త్వయి కిం వీర్యమిత్యపీదం సర్వమాదదీయం యదిదం పృథి

వ్యామితి తస్మై తృణంనిదధావేతద్దహేతి తదుపప్రేయాయ సర్వజవేన తన్నశశాకదగ్ధుం స తత ఏవ నివవృతే-
నైతదశకంవిజ్ఞాతుం యదేతద్యక్షమితి తేతి వానాద్గంధనాద్వాయుః మాతర్యంతరిక్షే శ్వయతీతి మాతరిశ్వా
దేవా అథాగ్నివాయువత్త్ర దీయ్య పరిభవపోంతు యత్త్రేయుత్త్ర పరిజ్ఞానచతురం మత్వా దేవరాంబభూవుః తం
తత్పరిజ్ఞానాయ ప్రేషయామాసుస్తస్మాదింద్రో నామ మఘవాన్ బలవద్వాయుపత్త్రాదియుత్త్రాము పరిజ్ఞాయతాం
తాం స్త్రీమాగంతుము స్సవేరాయ ఇతి దేవా ఇయాం పారమైశ్వర్యా గర్వ పర్వతారూఢస్సంతద్యక్షంత్రుతి
వద్వాయువత్త్రదియుత్త్రాము పరిజ్ఞాయతాం స్త్రీమాగంతుము స్సవేంయమితి ద్రావతః తం భిము
తిస్సుతరాంనిరాతర్రవే స్వగ్నివాయుబ్యామివ సంవాదమాత్రమప్యదత్వామూలా విద్యార్థిమాత్రం గా
సంగత్రుత్యాగబిస్తబ్రుం స్వాత్మభావమిత్యతిరోదధే। తథాతిరోహితం తస్వరూపంధ్యాయన్నాకాశే మవలోకయన్
స్థితః తస్మాద్రుత్వాభిమానోగత ఇతి బ్రహ్మ విద్యాస్వాత్మానం దర్శయామాస। యత్తు స్వరూపబిజ్ఞాను
స్తాం పప్రచ్ఛ వా హా అథేవ అథేంద్ర మబ్రువన్మఘవన్నేతద్విజానీహి కిమేతద్యక్షమితి తథేతి తదభ్య
ద్రవత్తస్మాత్తిరోదధే స తస్మిన్నేవాకాశే స్త్రియమాజగామ బహుశోభమానాముమాం హైమవతీం
తాం హోవాచ కిమేతద్యక్షమితి తస్మాత్ ఈశ్వరభావమాపన్నేదింద్రాగమనాత్ పూర్వస్త్రిణాంబ్రహ్మ
తిరోదధే అగ్న్యాదిరివ సంవాదమాత్రమప్యదత్వాదేవరాంబభూవ నసుతరాంనిరాతర్రవ్యతిశయాప్సావి
ద్యావిద్యయ తత్త్వాత్యపవాదాయితరణం ప్రత్యగబిస్తబ్రహ్మభావంతద్గతవాం యాంశాపస్యాపసిద్ధబ్రహ్మ
మాత్రభావం వా జగామేత్యర్థః। యత్రబ్రహ్మతిరోదధే తస్మిన్నేవాకాశే స్థిమేతద్యక్షమితి ధ్యాయనాయూధ
స్సంస్త్రస్సైష ధ్యానాస్తనివృత్తేతథాబ్రహ్మవిద్యాగ్న్యాదివదింద్రస్యయత్తుపూత్రం బుధ్యాస్త్రీరూపేణ
ప్రాదురభూత్ బ్రహ్మమాత్రవిద్యయాత్మాభవతమత్వేన శోభమానేవవిశేషణముపపన్నమితి
సర్వజ్ఞోబహుశోభమానాము మాం బ్రహ్మవిద్యాం యద్యాప్రోమవతోదుహితామవతోదుహితా
హైమవతీ సా హి భరణి సా హైమవతీ నిత్యమీశ్వరేణసహవర్తతే జ్ఞాతవాంస్త్రియం బ్రహ్మవిద్యాస్వరూపేణ-

మనసాంబగాంమపునః కిమేద్భుతమితి తాపయమానపెంకిలకింతస్నై స్పౌత్త్వానందశ్రేయితస్తేతిరో
ధ్యంతద్భవిష్యం యత్త్రాం బ్రూహీంతిమమహాత్మనా ప్రాథేయామానేత్యర్థః ॥ ——— అత్యంతముగ్ధం దశః
సకాం తాభిమానేనేంద్రో హ్లైవంకిముదం యత్తమితి పృష్టో మావర్యత్తే యత్తావమానం బ్రహ్మ
తిపెహాం వాంచెతి యద్భావధ్భుష్ఠిఫథం ప్రాప్త తెరో భూతమిత భూతం తద్ధ్యాభూతాంత్సృష్టి సర్వోపపన్నావ
సిద్ధం బ్రహ్మనిష్ఠ్పతి యోగిక సప్తమాంత్రమితి సాక్షాత్కృతంతత్ యత్తం బ్రహ్మమాత్రం విద్ధి త్వం వాచవెంత్య
ర్థః ॥ యన్నిష్ఠ శం బ్రహ్మ తపస్వం । సాక్షాత్కృతం తద్బ్రహ్మం తిరోయోగినః । తదివవహాముహాం యత్తం తస్మాత్కం చిత్తవిద్వత
ఇతిస్మృతేః । పురాంభవత్కృతేశాశభూతమాపన్నేన బ్రహ్మణో బాతా ప్యాసురాంస్తృజ్య యెయాయం నిమిత్తమాత్రమిత్యా
పా బ్రహ్మణా ఇతి బ్రహ్మణో దాంవత్ద్విజయె మహాయద్భవమితి మహాయద్భవం వయంజితా ఇతి మిత్యామహీయా
నం ప్రాప్తమిత్యర్థః । మన్యైత్తైనిమాతాః పూర్వమేవ నిమిత్తమాత్రం భవసమ్యసాచి ఇతిస్మృతేః । వతదితి త్రియా
పశ్నేషు అతస్మాకమేవాయం విజయో మమ్మాకమేవ యమ్మహిమేతి మన్యా బిక్షాపి మాస్తీత్యర్థః ఇంద్రాదయ
ష్టం బ్రహ్మ తన్ముమహాత్మ్యజ్ఞానాతీత్య తతోహం ప్రాపవిదాం చకార బ్రహ్మేతి యస్మాత్ అగ్న్యాదయో నవహేం
ప్రస్తావం తాత్ర్యాం బ్రహ్మ బ్రహ్మవేద్యర్థః । ఇంద్రాయత్తం అగ్న్యాదయో బ్రహ్మ సంవాదదర్శనాద్వై ప్రోత్తమ తాం
గతాఇత్యహా । తస్మాదితి తస్మాద్వా ఏతేదేవా అతితరామహాన్యాం దేవాన్యదగ్నిర్వాయురింద్రస్తే హ్యేనన్నేదిష్ఠం పస్ప
ర్శుస్తే హ్యేనత్ప్రథమో విదాంచకార బ్రహ్మేతి యస్మాదగ్న్యాదయో బ్రహ్మసామీప్యముపాగతాస్తస్మాదేతే
బ్రహ్మోపదేశమహిమ్నా స్వస్వాం దేవానతితరామివ ఇవశబ్దో ఏవకారార్థః । అతిశయేన తథైవ యదగ్నిర్వాయు
స్తే హీంద్రస్త్వాదేన దేనత్ బ్రహ్మనేదిష్ఠమంతికతమం పస్పర్శుస్పృష్టవంతో హీయస్మాత్ ప్రథమః ప్రధానాస్సంతో బ్రహ్మ
బ్రహ్మవిచారవిదాంచక్రురిత్యర్థః । యస్మాదింద్ర వాక్యాదగ్నివాయు విదాంచక్రతురింద్రో వాక్యాద్ బ్రహ్మత్వవ
ద్భుతం యస్మాదగ్నివాయ్వపేక్షయా ఇంద్ర ఏవ పూర్వం బ్రహ్మ జ్ఞాతవాన్ తస్మాదితి తస్మాద్వా ఇంద్రోతితరామివాన్యాన్

దేవాః సహ్యేనన్నేదిష్ఠం పస్పర్శ సహ్యేనత్ప్రథమో విదాంచకార బ్రహ్మేతీతి తస్మాదేవేంద్రో దేవానగ్న్యాదీనతి
తరామివాతిశయేనైవ సహ్యేనన్నేదిష్ఠం పస్పర్శ స హ్యేనత్ప్రథమో విదాంచకార బ్రహ్మేత్యుక్తార్థమేతద్వా
క్యోపదేశప్రకారమాహ। తస్యేతి- తస్యైష ఆదేశో యదేతద్విద్యుతో వ్యద్యుతదా ఇతీ న్యమీమిషదా
ఇత్యధిదైవతమథాధ్యాత్మం యదేతద్గచ్ఛతీవ చ మనోఽనేన చైతదుపస్మరత్యభీక్ష్ణం సంకల్పః తద్ధ తద్వనం నా
మ తద్వనమిత్యుపాసితవ్యమితి- యద్బ్రహ్మయాథాత్మ్యం తస్య నిరుపమత్వాత్ తత్త్వదాదేశో వాపేక్షితః బ్రహ్మ
ప్రాపకత్వేన యత్తూపకృతం శబలబ్రహ్మ తస్య శబలబ్రహ్మణో యోఽసావుపమానేన నిరుపమోపదేశస్సంపాద
యతి సోఽయమేష ఆదేశః కిం తదుపమానమిత్యత ఆహ- యదేతదితి। యదేతత్ ప్రసిద్ధం లోకే విద్యుతో
విద్యుతః విద్యోతనం కృతవదిత్యేతదనుపపన్నత్వాద్విద్యుతో విద్యోతనమివేత్యర్థః। ఆ ఇత్యుపమార్థే
యదా సకృద్విద్యుత్తమితి శ్రుత్యంతరే దర్శనాదిదం బ్రహ్మ విద్యుదివాత్మానం దర్శయిత్వా తిరోభూతమేవేతి- అథ
వా విద్యుతస్తేజ ఇత్యధ్యాహార్యం విద్యుతో విద్యుత్ విద్యోతితవత్ ఆ యద్విద్యుత్తేజస్సకృద్విద్యోతిత
వదివేత్యాశయః। ఇత్యయమాదేశ ఇతి ఏవ శబ్ద ఆదేశప్రతినిర్దేశార్థః ఇత్యప్యన్యే సముచ్చయార్థః। ఆదా
దేశ ఉచ్యతే తద్బ్రహ్మశక్త్యా మాయామీషదప్యావృణోతి న్యమీమిషదితి నిమేషణం కృతవదితి చక్షుర్విషయం ఆదాయ ప్రకాశతిరో
భావ ఇత్యర్థః। అత్ర ఇతి తాకార ఉపమార్థే ఏవ బ్రహ్మణ ఉపమానదర్శనస్య విద్యుద్విద్యోతనస్య శబలబ్రహ్మదేవ
తావిషయత్వాదిత్యధిదైవతమితి దేవతా- తత్త్వాన్యుపవాదాధికరణాపరమాత్మవిషయోఽయమాదేశ ఇత్యర్థః।
తతః ప్రత్యగాత్మవిషయ ఆదేశ ఉచ్యతే। అథాధ్యాత్మమితి సూత్రేణాదేవతాయస్య తదాంవాం భావత్రు
తాశ్రితత్వేన పదవపవాదాధికరణాత్వేన చ యదధి ఆత్మ ద్రష్టాతి తదధ్యాత్మమిత్యర్థః। ప్రత్యగాత్మోపాస్తిం వివక్షితం
యన్మన ఏతత్ప్రత్యక్తత్త్వం గచ్ఛతి విషయాన్ ప్రాప్నోతీవ భాతి సోఽయం యచ్చానేన మనసైతద్బ్రహ్మోపస్మరతి సమీప
సమీపతాం ప్రాప్నోతి- భృశమభీక్ష్ణం మానసవృత్తిస్సంకల్పః బ్రహ్మణో మానసోపాధిత్వేన మనసో విషయీకృతమివ-

సంవత్సరశరాదిప్రత్యయైరభివ్యజ్యతే। అతఏవ ప్రత్యగాత్మాదేశః అధిదైవతం విద్యున్నిమేషణావత్
ప్రకాశధర్మి అధ్యాత్మం చ మనః ప్రత్యయసమకాలాభివ్యక్తిధర్మి ఏవమధిదైవతాధ్యాత్మతద్వ్యాపిరూపత్వే
తద్గతవిశేషాంశత్యాగేన ప్రత్యగభిన్నం బ్రహ్మ ~~మాత్రం మందబుద్ధిభిరవగంతుం శక్యం। కించ~~ తదేతత్ప్రత్య
గభిన్నబ్రహ్మాదేశాః న హి సర్వోపాసనసిద్ధబ్రహ్మమాత్రం మందబుద్ధిభిరవగంతుం శక్యం। కించ తదేతత్ప్రత్య
గభిన్నం బ్రహ్మ హి సకలసర్వప్రాణిభిః తత్ప్రత్యగభేదేన వననీయం సంభజనీయం ప్రత్యగభిన్నం బ్రహ్మ
స్తోతి చింతనీయమితి ధ్యానం న మత్ప్రకాశ్యం తం యత్ తస్య తస్య ధ్యానమిత్యుపాసితవ్యం ఏవము
పాసకస్య తత్ఫలమప్యాహ స య ఇతి। స య ఏతదేవం వేదాభి హైనం సర్వాణి భూతాని సంవాంఛ
త్యుపనిషదం భో బ్రూహీత్యుక్తా త ఉపనిషద్బ్రాహ్మీం వావ త ఉపనిషదమబ్రూమేతి తస్యై తపో దమః
కర్మేతి ప్రతిష్ఠా వేదాః సర్వాంగాని సత్యమాయతనం। యో వా ఏతామేవం వేదాపహత్య పాప్మానమనంతే
స్వర్గే లోకే జ్యేయే ప్రతితిష్ఠతి ప్రతితిష్ఠతి॥ స య ఏతద్ధ్యాతేత్యం ప్రత్యగభిన్నబ్రహ్మ వేద భూనామేత
మేతం బ్రహ్మవిదం సర్వాణి భూతాని సమ్యగభ్యర్చయంతి। న స్వేష్టసిద్ధయే యద్బ్రహ్మ తద్ధ్యానం చ
తేత్యర్థః। యం యం లోకం మనసా సంవిభాతి విశుద్ధసత్త్వః కామయతే యాంశ్చ కామాన్। తం తం లో
కం జయతే తాంశ్చ కామాన్ తస్మాదాత్మజ్ఞం హ్యర్చయేద్భూతికామః ఇతి శ్రుతేః। నను ఆచార్యస్య ప్రా
శాదేవం బ్రహ్మ సుశిష్యశిష్య ఆచార్యముపాస్య ఇత్యుపేత్య భో భగవన్నుపనిషదం భో బ్రూహీత్యుక్తవతి
శిష్యే ఆచార్య ఆహ ~~ఉక్తా~~ తా తే ఉపనిషద్ బ్రహ్మతోత్ప్రత్యర్థం చ త్రితయం తత్త్వ నవ విశరణాగత్యా
వసాదనార్థకస్యోపనిషత్పూర్వస్య సంధానమాహ రూపమునుపనిషదితి। సర్వోపాసనసిద్ధబ్రహ్మమాత్ర
~~స్వో~~ విద్యాభిధీయతే। తేనాస్య యోగేన విద్యైవ ముపనిషదయతీత్యభిధీయతే సాధనచతుష్టయసంప
న్నాయ ముముక్షవే విద్యాముపసద్య సాధ్వజ్ఞానబీజం శిథిలయతి అజ్ఞానవిశరణాదిపోషణాదివద్యా

వతి హ్యదిత్యస్యభ్యతీ అతిముచ్యధీరాః ప్రేత్యాస్మాల్లోకాదమృతా భవంతీతి శ్రుతేః। యద్వా ఉత్త
రశేషత్వాద్విశేషత్వమ్ ముముక్షోర్బ్రహ్మగమయతీతి బ్రహ్మవిద్యోపనిషత్ బ్రహ్మపదబుద్ధ్యావభవ
తీతి వేదసమంతాల్ బ్రహ్మభావం ప్రాప్నోతి శ్రుతేః అథవా విద్యయా సంప్రాప్తి సమంతాల్ ముముక్షుపద
లస్య గర్భజన్మజరామరణాదిశలనా వసాదయిత్వాదివ్యోపనిషత్ ఏవముపనిషద్బ్రహ్మ
ర్థస్య విద్యాయాం ఏవ సంభవాత్ తేనేషితము త్యాదీ గ్రంథస్యాపి తాదర్థ్యేనోపనిషద్బాదర్థేత్యా
ప్రవృత్తేః ప్రథమద్వితీయయోః ఖండయోః పూర్వోక్తాతు ఖండస్యాతిరిక్తస్యోపదేశం వనిరూపనిష్ప్రత్యయోగిత
బ్రహ్మమాత్ర బోధిన్యుపదిష్టముపదేశం పునరిత్యత ఆహ బ్రహ్మైవ త్వతిరిక్తం విదితా
విదితాయమాన బ్రహ్మ గ్రాహ్యాదిఖండ స్తుపదశకలనాపన్నోపనిషద్బ్రహ్మమాత్ర గోచరం బ్రహ్మ
ముపనిషదం బ్రూమ ఇత్యుక్తౌ ఉపనిషదం బ్రూమేత్యవధారయతి బ్రహ్మమాత్ర విషయామిముపనిషదం
బ్రాహ్మీం ఇతి ప్రశ్ని తత్ర్యస్యాభిప్రాయః కేయదిశ్రుతార్థః ప్రశ్నః ఫలపునరుక్త్యా నిరర్థకస్యాదితి
సాపశేషోపనిషత్తదా ప్రేత్యాస్మాల్లోకాదమృతా భవంతీతి ఫలవచనానుపపత్తేః యద్యుక్తోపనిషత్-
ఏతయా తత్ప్రాప్త్యంతర సాధనాంతరం కింతు బ్రహ్మవిద్యాప్రాప్త్యా యో వయాం షైశ్లేషం గసహపాఠేన సమాం
తరకాత్తు పఃప్రతిపాదనం సాంగవేదానాం బ్రహ్మ విద్యాశేషత్వం తత్ప్రాప్త్యంతరసాధనత్వం వా సంభవతి-
సహపాఠితానాం యథా యోగం వినియోగస్యాత్ చేత్ యథా సూక్తే నాతమంత్రాణాం యథాదైవతం విభాగో
దృష్టః తపోదమఋత్వాదిమపి బ్రహ్మవిద్యాశేషత్వం వేదేశ్చాంగ సాంగసహపాఠాదే ప్రతంకేతత్వేనాన్వయ
నోపాయత ఇతి విభాగో యుజ్యతే- విద్యయాం నిష్పత్తి రూఢే నస్యాతిరిక్తం ఏవముర్థేన సంబంధోపపత్తిస్యా
దితి చేన్న తాదృశ యుక్తి శైథిల్యాదేవం విభాగ ఘటనాన సహాపేక్ష్యం ఇత్యత ఆహ- యత్ర త్వస్య సర్వమాత్మైవాభూ
త్తేనకం పశ్యేతి త్యాది- కేవలాంతరశఫలనా కఫలనిరంతరకరణాత్ త్వ సుకూలైనస్యాతిరిక్తా ఉపన్యాస సిద్ధ బ్రహ్మ

విద్యాయా నవాంశేషశేషిత్వం- సమానారితత్వం వా యుజ్యతే విద్యాయా నిష్ప్రతియోగికత్వం మాత్ర

గోచరత్వాత్, తు ఫలత్వైవల్య స్వాతిరిక్త్రియాంతారక తలనాపన్నావఘూర్ణ్యతత్వాత్ తస్మాత్ తద్బద్ధ

ముద్ధత్వంబ అశ్వసత్వాన్నతే త్వత్త్వాయేనత్వంబని తత్త్వాబేతి మోక్షమిష్టేః సదాత్మత్వాచ్చేదేవ

సాధనం త్వబ త్వైవహితమ్ బ్రహ్మ యం తత్త్వమస్యాః ప్రత్యక్షరూపం పదమితి శ్రుతేస్తు తథా విద్యా

యా నవాంశత్వ సమానారత్వాన తత్త్వశేషత్వం యుజ్యతే అతో న సూత్రవాక్యం తద్వద్ధ్యాయో

గం విభాగ ఇతి తస్మాదవధారణాత్ తైవ ప్రశ్నప్రతివచనస్యోపపద్యతే అన్యనిరపేక్షతయా

ఉక్తా- తత ఉపనిషదో వ్యక్తా త్వాత్ బ్రాహ్మీం వావత ఉపనిషదం బ్రూమేతి తస్మైతస్యా ఉక్తా యా.

ఉపనిషదః ప్రాప్త్యుపాయభూతాని తప ఆదీని -తేల్లో బాంధ్రాయణో దితం బ్రహ్మ విరిక్తం త్రి౦౨

స్తేత్వాలోచనం వా తపః మన ఆదితరణాగ్రామైనాగ్ర వాయాదమః భగదర్భణాధియా సంధ్యాగ్రి

హోత్రాదితం కర్మ ఏవమేతేసంస్కృతస్య బ్రహ్మ నము త్పద్యతే ఇత్యత్ర తప ప్రాప్యతే మనః మ

న సాధ్యతే వ్యాఖ్యావ్యాఖ్యపత్వానివర్తత ఇతి శ్రుతేః శ్రుతిశేషతో బ్రహ్మనోత్పత్త్యుపవా

రతత్వేనానామానత్వాదయోగ్యత్వాంశేపద్యాంశ్రుగుష వత్త పత్త ప ఆది షు సత్యం బ్రహ్మవి

ద్యాప్రతిష్ఠితేతి- ప్రతిష్ఠాపదాః జగాదయశ్చవ్యాపః సర్వాణ్యేవాంగానివేతి శేష్యాదినిష్ఠేవదా

నాం కర్మ బ్రహ్మ నప్రవాంశకత్వాదంగానాం తదుప్తత్వాత్ ప్రతిష్ఠార్ధం యస్మాదా పాదశబ్దార్థః

ప్రతిష్ఠా అంగాని గృహేంతే అంగానాం గృహీతవాదేవ దగ్ధాంగాం గృహాణాం త్వేతమితి మంత

వ్యం యథాంగు త్తత్వాదంగానాం విద్యాయత్తావిష్ఠితిచేదాయతనం సత్యం ఉపనిషదాయ

తనం బ్రహ్మత్వార్థః సత్యం బ్రహ్మనమనంతం బ్రహ్మేతి శ్రుతేః యదాత్మా సాక్షాన్నామయాకామ

యిత్వా తయా పరాసాదేవ గ్రామే యోహి తతరం వాత్యం సత్యం యస్తత్వవత్తు బ్రహ్మవిద్యా ప్రయు

తివయెషుబిం ష్ఠావన్యతంనహూయాచేతి త్యాసుర ప్రత్యతివిముక్షుర్దైవప్రత్యత్యాయాంధేషు
బ్రహ్మవిద్యాప్రతితిష్ఠతేతి సత్యమాయతనం తప ఆదిషు తదిషశిష్య వప్రతిష్ఠి వద సత్యస్య
పునరాయతనగ్రహాణాం సాధనానాం విశయదృశ్యతనార్థం అశ్వమేధసహస్రంచ సత్యంచతు
లయాధృతం। అశ్వమేధసహస్రాత్తు సత్యమేవ విశిష్యత ఇతిస్మృతేః। అథవా పశ్యతేవర్జితి
సత్యాత్రమసదన్యత్॥ బ్రహ్మమాత్రమసత్సహానంద మాత్రోవామనుష్యమిదం జగత్-ఇత్యా
దిశ్రుత్యనురోధేన సర్వాతిరిక్తసర్వవిద్యాపదతత్వార్థబ్రహ్మ సదవస్థావసిద్ధసత్యాత్రమేవ సత్యమిత్యు
చ్యతే। తదేవాయతనం యస్యాని ష్ఠుతియోగకబ్రహ్మమాత్రవిద్యాం యూపస్తేషు తత్సమాయతనంయో
హై యథోక్తసాధనాధికారికానేషితమితి ప్రశ్నానురోధేన శ్రోత్రస్య శ్రోత్రమిత్యాదినాం సర్వాతిరిక్తశ్రో
త్రాదికరణప్రామప్రవృత్తినిమిత్తత్వగబ్రహ్మ బ్రహ్మప్రతిపాదితానం ప్రాప్తు పంచ సాపేక్షప్రత్య
గబ్రహ్మబ్రహ్మణోరవిశేషశంకాయాం నతత్ర గజ్ఞితవ్యాదినాం చ ధర్మవిశేషము న్యాలభ్య తథ్యం విదితమవి
దితం వేతిశంకాయాం విదితావిదితాం పసమానబోధశభావ గుణాంధాన ముష్టుం చదశతలనాపస్థావ
సిద్ధం బ్రహ్మస్వమాత్రమతిపరమసిద్ధాంతప్రబోధినం యదివమన్యస ఇత్యాదినాధ్యేత్యతాం-
బ్రహ్మదేవ జిత ఇత్యాదినా బ్రహ్మబోధకత్వఖ్యాపితామేతామపనిషదముక్తాం తోవాదిసాధయం విద్యార్థి
సర్వాతిరిక్తవిద్యాపదతత్వార్థబ్రహ్మతమాత్మత్వానసత్యోతేవన వ్యవహారికతేవన ప్రాతిభాసికతేవన-
శూన్యత్వేవన వాస్తివాస్తివవిభ్రమరూపం చంద్రనమపహాత్య అపస్థావం త్రావ్యవస్తుతత్త్వపస్థా
తత్ప్రవిషయయైకార్థదపస్థా వ్రాత్రైర్యపస్థానం కాంవశ్యతత్రా మతాలపవనిష్ఠుతియోగితానంత-
త్రవిధపరిచ్ఛేదాపస్థావసిద్ధైనిష్ఠుతియోగకస్తావశేషతయా నాయోగియతే తోక్యత ఇతి చసమగం

[illegible]
[illegible]
[illegible]
[illegible] కేనోపనిషద్వివరణం [illegible]

[illegible] ॥ శ్రీరామానందగురవే నమః ॥

శ్రీ వాసుదేవేంద్ర శిష్యోపనిషద్బ్రహ్మయోగినా లిఖితం [illegible] వివరణం
కేనోపనిషద్వివరణం

ఈశాద్యష్టోత్తరశతోపనిషద్వివరణే ద్వితీయా
సంఖ్యాపూరకం కేనోపనిషద్వివరణం సంపూర్ణం ॥

ఓం శ్రీ [illegible] పరమహంస సద్గురు శ్రీరామచంద్రార్పణమస్తు

గ్రంథసంఖ్య [illegible]

[illegible]

॥ श्रीगणेशाय नमः ॥ यदविद्याविलासेन भूतभौतिकसृष्टयः ॥ तं नौमि परमात्मानं सच्चिदानंदविग्रहं ॥ १ ॥ यदन्तेवा
सिपंचास्यैर्निरस्ता भेदिवारणाः ॥ तं प्रणौमि नृसिंहाख्यं यतीन्द्रं परमं गुरुं ॥ २ ॥ श्रीमद्वेंकटनाथाख्यान्वेलंगुडिनिवासिन
ः ॥ जगद्गुरूनहं वंदे सर्वतंत्रप्रवर्तकान् ॥ ३ ॥ बालबोधाय मंदानां वेदांतार्थावलंबिनी ॥ धर्मराजाध्वरींद्रेण परिभाषा
वितन्यते ॥ ४ ॥ इह खलु धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः न स पुनरावर्तत इत्या
दिश्रुत्या तस्यैव नित्यत्वावगमात् इतरेषां त्रयाणां प्रत्यक्षेण तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचि
तो लोकः क्षीयत इत्यादिश्रुत्या चानित्यत्वावगमाच्च स च ब्रह्मज्ञानादिति ब्रह्म तज्ज्ञानं तत्प्रमाणं च सप्रपंचं निरूप्य
ते तत्र प्रमाकरणं प्रमाणं तत्र स्मृतिव्यावृत्तं प्रमात्वमनधिगताबाधितार्थविषयज्ञानत्वं स्मृतिसाधारणं तु अ

बाधितार्थविषयज्ञानत्वं नीरूपस्यापि कालस्येंद्रियवेद्यत्वाभ्युपगमेन धारावाहिकबुद्धेरपि पूर्वपूर्वज्ञानावि
षयतयातत्तत्क्षणविशेषविशिष्टविषयकत्वेन तत्राव्याप्तिः किंच राद्धांते धारावाहिकबुद्धिस्थले न ज्ञानभेदः
५८२ किंतु यावत् स्फुरणं तावत् घटाकारांतःकरणवृत्तिरेकैव न तु नाना वृत्तेः स्वविरोधिवृत्त्युत्पत्तिपर्यंतस्थायित्वा
भ्युपगमात् तथा च तत्प्रतिफलितचैतन्यरूपं घटादिज्ञानमपि तत्र तावत्कालीनमेकमेवेति नाव्याप्तिशंकापि ननु सि
द्धांते घटादेर्मिथ्यात्वेन बाधितत्वात् ज्ञानं कथं प्रमाणं उच्यते ब्रह्मसाक्षात्कारानंतरं हि घटादीनां बाधः यत्र त्वस्य स
र्वमात्मैवाभूत्तत्केन कं पश्येदिति श्रुतेः न तु संसारदशायां बाधः यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीति श्रुतेः त
था चाबाधितपदेन संसारदशायामबाधितत्वं विवक्षितमिति न घटादिप्रमायामव्याप्तिः तदुक्तं देहात्मप्रत्ययो यद्वत्प्रमा

र्था

हांतपरि णत्वेन कल्पितः लौकिकं तद्व्देवेदं प्रमाणं त्वात्मनिश्चयादिति आत्मनिश्चयांतं ब्रह्मसाक्षात्कारपर्यंतमित्यर्थः
लौकिकं तिं घटादिज्ञानमित्यर्थः तानि च प्रमाणानि षट् प्रत्यक्षानुमानोपमानागमा र्थापत्त्यनुपलब्धिभेदात्
तत्र प्रत्यक्षप्रमाकरणं प्रत्यक्षप्रमाणं प्रत्यक्षप्रमा चात्र चैतन्यमेव यत्साक्षादपरोक्षाद्ब्रह्मेति श्रुतेः अपरोक्षादि
त्यस्यापरोक्षमित्यर्थः ननु चैतन्यमनादि तत्कथं चक्षुरादेस्तत्करणत्वेन प्रमाणत्वमिति उच्यते चैतन्यस्यानादित्वेपि त
दभिव्यंजकांतःकरणवृत्तिरिंद्रियसंनिकर्षादिना जायत इति वृत्तिविशिष्टं चैतन्यमादिमदित्युच्यते ज्ञानावछे
दकत्वाच्च वृत्तेर्ज्ञानित्वोपचारः तदुक्तं विवरणे अंतःकरणवृत्तौ ज्ञानत्वोपचारादिति ननु निरवयवस्यांतःकरणस्य
परिणामात्मिका वृत्तिः कथं इत्थं न तावदंतःकरणं निरवयवं सादिद्रव्यत्वेन सावयवत्वात् सादित्वं चतन्मनोसृजतं

राम
२

त्या ४ध्या कि॰ श्री

कथं

त्यादिश्रुतेः वृत्तिरूपत्वान्नस्यैव मनोधर्मत्वं कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन
एवेति श्रु[illegible]धीशब्देन वृत्तिरूपं ज्ञानाभिधानात् अत एव कामादेरपि मनोधर्मत्वं ननु कामादेरंतःकरणधर्म
त्वेऽहमिच्छाम्यहं जानाम्यहं बिभेमीत्याद्यनुभव आत्मधर्मत्वमवगाहमानः कथमुपपद्यते उच्यते अयःपिंडस्य दाह[illegible]
त्वाभावेपि दग्धृत्वाश्रयवह्नितादात्म्यात्सा यथाऽयो दहतीति व्यवहारः तथा सुखाद्याकारपरिणाम्यंतःकरणैक्याध्या २४
सादहं सुखी अहं दुःखीत्यादिव्यवहारः ननु अंतःकरणस्येंद्रियतयाऽतींद्रियत्वात्कथमहमिति प्रत्यक्षविषयतेति उ
च्यते न तावदंतःकरणमिंद्रियमित्यत्र मानमस्ति मनःषष्ठानींद्रियाणीति भगवद्गीतावचनं प्रमाणमिति चेन्न अ
निंद्रियेणापि मनसा षट्त्वसंख्यापूरणाऽविरोधात् न हींद्रियगतसंख्यापूरणमिंद्रियेणैवेति नियमः यजमानः

पंचमाऽऽभक्षयंतीत्यत्र लिंग तपंचत्वसंख्याया ऽनन्वहितापि यजमानेन वेदानध्यापयामासमहाभारतपंचमानि
त्याद्दौ वेदगतपंचत्वसंख्याया अवेदेनापि भारतेन पूरणदर्शनात् इंद्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः इत्यादिश्रु
त्या मनसोऽनिंद्रियत्वावगमाच्च नन्वेवं मनसोऽनिंद्रियत्वे सुखादिप्रत्यक्षस्य साक्षात्त्वं न स्यादिंद्रियाजन्यत्वादिति
वाच्यं न हींद्रियजन्यत्वेन ज्ञानस्य साक्षात्त्वं अनुमित्यादेरपि मनोजन्यतया साक्षात्त्वापत्तेः ईश्वरज्ञानस्याजन्यस्य साक्षात्त्वा
पत्तेश्च सिद्धांते प्रत्यक्षत्वप्रयोजकं किमिति चेत् किं ज्ञानगतस्य प्रत्यक्षत्वस्य प्रयोजकमिति पृच्छसि किं किं वा विषयग
तस्य आद्ये प्रमाणचैतन्यविषयावछिन्नचैतन्याभेद इति ब्रूमः तथाहि त्रिविधं चैतन्यं विषयचैतन्यं प्रमातृचैतन्यं प्रमा
णचैतन्यं चेति तत्र घटा वछिन्नचैतन्यं विषयचैतन्यं अंतःकरणवृत्त्यवछिन्नं चैतन्यं प्रमाणचैतन्यं अंतःकरणावछिन्न

रा

चैतन्यंप्रमातृचैतन्यंतत्रयथातडागोदकंछिद्रान्निर्गत्यकुल्यात्मनाकेदारान्प्रविश्यतद्वदेवचतुष्कोणाद्याकारंभव
तितथातैजसमंतःकरणमपिचक्षुरादिद्वाराघटादिविषयदेशंगत्वाघटादिविषयाद्याकारेणपरिणमतेसएवपरि
णामोवृत्तिरित्युच्यतेअनुमित्यादिस्थलेतुनांतःकरणस्यवह्न्यादिदेशगमनंवह्न्यादेश्चक्षुराद्यसंन्निकर्षात् तथा
चायंघट इत्यादिप्रत्यक्षस्थलेघटादेस्तदाकारवृत्तेश्चबहिरेकत्रदेशेसमवधानात्तदुभयावछिन्नचैतन्यमेकमेववि
भाजकयोरपिअंतःकरणवृत्तिघटादिविषययोरेकदेशस्थितत्वेनभेदाजनकत्वात् अतएवमठांतर्वर्तिघटावछिन्ना
काशोनमठावछिन्नाकाशाद्भिद्यतेतथाचायंघटइतिप्रत्यक्षस्थलेघटाकारवृत्तेर्घटसंयोगितयाघटावछिन्नचैतन्या
वृत्तिचैतन्यस्याभिन्नतयातत्रघटज्ञानस्यघटांशेप्रत्यक्षत्वंसुखाद्यवछिन्नचैतन्यस्यतद्वृत्त्यवछिन्नचैतन्यस्यच

८

नियमेनैकदेशावस्थितोपाधिद्वयावच्छिन्नत्वान्नियमेनाहंसुखीत्यादिज्ञानस्यस्फरवाद्यंशेप्रत्यक्षत्वंनन्वेवंस्वहत्तिस्फ
रवा दिस्मरणस्यापिस्फरवाद्यंशेप्रत्यक्षतापत्ति रितिचेन्नतत्रस्मर्यमाणसुखस्यातीतत्वेनस्मृतिरूपांतःकरणहत्तेः
र्वर्त्तमानत्वेनतन्नोपाध्योर्भिन्नकालीनतयातत्तदवच्छिन्नचैतन्ययोर्भेदात् उपाध्योरेकदेशस्थत्वेसत्येककालीनत्व
स्यैवोपधेयाऽभेदप्रयोजकत्वात् यद्वैकदेशस्थत्वमात्रमुपधेयाऽभेदप्रयोजकंतदाहंपूर्वंसुखीत्यादिस्मृतावतिव्याप्ति
वारणायवर्तमानत्वंविषयविशेषणंदेयंनन्वेवमपिस्वकीयधर्माधर्मौवर्तमानौयदाशास्त्रादिनाजानीयते तेतदातादृशाशा
स्त्र ज्ञानादावतिव्याप्तिः तत्रधर्माद्यवच्छिन्नतद्वृत्त्यवच्छिन्नचैतन्ययोरेकत्वादितिचेन्नयोग्यत्वस्यापिविषयविशेषण

।वराबाप

त्वातअंतःकरणधर्मत्वाविशेषेपिकिंचिद्योग्यंकिंचिदयोग्यंइत्यत्रफलबलकल्प्यः तत्तद्धर्मावच्छिन्नतद्वत्यव
च्छिन्नचैतन्ययोरेकत्वादितिचेत्स्वभावएवशरणंअन्यथान्यायमतेपिआत्मधर्मत्वासुखादिवद्धर्मादेःप्रत्यक्ष
त्वापत्तिःदुर्वारानचैवमपिवर्तमानदशायांत्वंसुखीत्यादिवाक्यजन्यज्ञानस्यप्रत्यक्षतापत्तिःस्यादितिवाच्यंइष्ट
त्वाद्दशमस्त्वमसीत्यादौसंन्निकृष्टविषयेशाब्दस्याप्यपरोक्षज्ञाना॑भ्युपगमात्अतएवपर्वतोवन्हिमानित्यादिज्ञान
मपिवन्ह्यंशेपरोक्षंपर्वतेअपरोक्षंपर्वताद्यवच्छिन्नचैतन्यस्यबहिर्निसृतांतःकरणवृत्यवच्छिन्नचैतन्याभेदात्व
न्ह्यंशेत्वंतःकरणवृत्तिर्निर्गमनाभावेनवन्ह्यवच्छिन्नचैतन्यस्यांतःकरणवृत्यवच्छिन्नचैतन्यस्यपरस्परंभेदा
त्तथाचानुभवःपर्वतंपश्यामिवन्हिमनुमिनोमिन्यायमतेचपर्वतमनुमिनोमीत्यनुव्यवसायापत्तिःअसंन्निकृ पे

सुरभिचन्दनमित्यादि ज्ञानमपि चन्दनखण्डांशे अपरोक्षं सौरभांशे तु परोक्षं सौरभस्य चक्षुरिन्द्रियायोग्यतया योग्यत्वघटितस्यानेकलक्षणस्या-
भावात् न चैवमेकत्र ज्ञाने परोक्षत्वापरोक्षत्वयोरभ्युपगमे तयोर्जातित्वं न स्यादिति वाच्यं

रि

वृद्धपक्षकानु मितौ तु सर्वांशेपि ज्ञानं परोक्षं त्वयोरभ्युपगमे तयोर्जातित्वं न स्यादिति वाच्यं इष्टत्वात् जातित्वोपाधित्व
परिभाषायाः सकलप्रमाणागोचरतया ऽप्रामाणिकत्वात् घटोयमित्यादिप्रत्यक्षं हि घटत्वादिसद्भावे मानं न तु त
स्य जातित्वेपि जातिस्वरूपसाध्याप्रसिद्ध्या तत्साधकानुमानस्याप्यनवकाशात् समवायासिद्ध्या नित्यत्वे सति अनेकसमवेतत्वघटितजातित्वस्य घटत्वादावसिद्धेश्च एवमेवोपाधित्वं निरसनीयं पर्वतो व
ह्निमानित्यादौ पर्वतांशो वह्न्यंशो चान्तःकरणवृत्तिभेदांगीकारेण तत्तद्वृत्त्यवच्छेदकभेदेन परोक्षत्वापरोक्षत्वयोरेकत्र
चैतन्ये वृत्तौ न विरोधः तथा च तत्तदिंद्रिययोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं तत्तदाकारवृत्त्यवच्छिन्न
ज्ञानस्य तत्तदंशे प्रत्यक्षत्वं घटादेर्विषयस्य प्रत्यक्षत्वं तु प्रमात्रभिन्नत्वं ननु कथं घटादेरन्तःकरणावच्छिन्नचैतन्याभे

ता
दः अहमिमं पश्यामीत्यनुभवविरोधादिति चेत् उच्यते प्रमात्रऽभेदेन ताववैक्यं किंतु प्रमातृसत्तातिरिक्तासां
कत्वाभावः तथा च घटादेः स्वावछिन्नचैतन्येऽध्यस्ततया विषयचैतन्यसत्तैव घटादिसत्ता अधिष्ठानसत्ताऽति
रिक्तायाः आरोपितसत्तायाः अनंगीकारात् विषयचैतन्यं च पूर्वोक्तप्रकारेण प्रमातृचैतन्यमेवेति प्रमातृचैतन्य
स्यैव घटाद्यधिष्ठानतया प्रमातृसत्तैव घटादिसत्ता नान्येति सिद्धं घटादेरपरोक्षत्वं अनुमित्यादिस्थले त्वंतःकरणस्य
वह्न्यादिदेशनिर्गमाभावेन वह्न्यवछिन्नचैतन्यस्य प्रमातृचैतन्यानात्मकतया वह्न्यादिसत्ता प्रमातृसंचैतन्यसत्ता ता
तो भिन्नेति नातिव्याप्तिः नन्वेवमपि धर्माधर्मादिगोचरानुमित्यादिस्थले धर्माधर्मयोः प्रत्यक्षत्वापत्तिः धर्माद्यवछि
न्नचैतन्यानात्मकतया वह्न्यादिसत्ता प्रमातृचैतन्यसत्तातो भिन्नेति नातिव्याप्तिः नन्वेवमपि धर्माधर्मादिगोचरा

नुमित्यादिस्थले धर्मधर्मयोः प्रत्यक्षत्वापत्तिः धर्माद्यवच्छिन्नचैतन्यप्रमातृचैतन्याभिन्नतया धर्मादिसत्तायाः प्रमा
तृसत्तानतिरेकादिति चेत् न योग्यत्वस्यापि विषयविशेषणत्वात् नन्वेमपि रूपी घट इति प्रत्यक्षस्थले घटगतपरिमा
णादेः प्रत्यक्षत्वापत्तिः रूपाद्यवच्छिन्नचैतन्यस्य परिमाणावच्छिन्नचैतन्यस्य चैकतया रूपावच्छिन्नचैतन्यस्य प्रमातृ
चैतन्याभेदे परिमाणावच्छिन्नचैतन्यस्यापि प्रमात्र अभिन्नतया परिमाण सत्तायाः रूपप्रमातृसत्तातिरिक्तत्वाभा
वादिति चेन्न तत्तदाकारवृत्त्युपहितत्वस्यापि प्रमातृविशेषणत्वात् रूपाकारवृत्तिदशायां परिमाणाकारवृत्त्यभावेन
परिमाणाकारवृत्त्युपहितं प्रमातृचैतन्याभिन्नसत्ताकत्वाभावेनातिव्याप्त्याभावात् नन्वेवं वृत्तावव्याप्तिः अनवस्था
भिया वृत्तिगोचरावृत्त्यनंगीकारेण तत्र स्वाकारवृत्त्युपहितत्वघटितोक्तलक्षणाभावादिति चेन्न अनवस्थाभि

अ

याद्वृत्तेर्वृत्त्यंतराविषयत्वेपिस्वविषयत्वाभ्युपगमेनस्वविषयवृत्त्युपहितप्रमातृचैतन्याभिन्नसत्ताकत्वस्यतत्रापिसं
भवात्एवंचांतःकरणतद्धर्मादीनांकेवलसाक्षिविषयत्वेपितत्तदाकारवृत्त्यभ्युपगमेउक्तलक्षणस्यतत्रापिसत्वा
न्नाव्याप्तिःनचांतःकरणतद्धर्मादीनांवृत्तिविषयत्वाभ्युपगमेकेवलसाक्षिविषयत्वाभ्युपगमविरोधइतिवाच्यं
नहिवृत्तिंविनासाक्षीविषयत्वंकेवलसाक्षिवेद्यत्वं [illegible]अनुमानादिप्रमाणव्यापारमंतरेणसाक्षिविषयत्वंअ
तएवाहंकाररीकायामाचार्यैरहमाकारांतःकरणवृत्तिरंगीकृताअतएवप्रातिभरजस्थलेरजताकाराविद्यावि
द्यावृत्तिःसंप्रदायिकैरंगीकृतातथाचांतःकरणतद्धर्मादिषुकेवलसाक्षिवेद्येषुवृत्त्युपहितत्वघटितलक्षणस्यस
त्वान्नाव्याप्तिःतदयंनिर्गलितार्थःस्वाकारवृत्त्युपहितप्रमातृचैतन्यसत्तातिरिक्तसत्ताकत्वशून्यत्वेसतियोग्यत्वं

भासि

विषयस्य प्रत्यक्षत्वं तत्र संयोगसंयुक्ततादात्म्यादीनां सन्निकर्षाणां चैतन्याभिव्यंजकवृत्तिजनने विनियोगः सा च वृत्तिश्चतुर्धा संशयो निश्चयो गर्वः स्मरणमिति एवं सति वृत्तिभेदेन एकमप्यंतःकरणं मन इति बुद्धिरिति अहंकार इति चित्तमिति चाख्यायते तदुक्तं मनो बुद्धिरहंकारश्चित्तं करणमांतरं संशयो निश्चयो गर्वः स्मरणं विषया इमे तच्च प्रत्यक्षं द्विविधं सविकल्पनिर्विकल्पकभेदात् तत्र सविकल्पकं वैशिष्ट्यावगाहि ज्ञानं यथा घटं जानामीत्यादि ज्ञानं निर्विकल्पकं तु संसर्गानवगाहि ज्ञानं यथा सोऽयं देवदत्तः तत्त्वमसीत्यादि वाक्यजन्यज्ञानं ननु नेदं निर्विकल्पकं ज्ञानं प्रत्यक्षं इंद्रियाजन्यत्वादिति चेन्न हीन्द्रियजन्यत्वं प्रत्यक्षत्वे तंत्रं दूषितत्वात् किंतु योग्यवर्तमानविषयत्वे सति विषयचैतन्याभिन्नत्वं इत्युक्तं तथा च सोऽयं देवदत्त इति वाक्यजन्यज्ञानस्य सन्निकृष्टविषयतया बहिर्निसृतांतःकरणवृत्त

भ्युपगमेन देवदत्तावच्छिन्नस्य तत्तदवच्छिन्नचैतन्यस्याभेदेन सोऽयं देवदत्त इति वाक्यजन्यज्ञानस्य प्रत्यक्षत्वं एवं तत्त्वमसी
त्यादिवाक्यजन्यज्ञानस्यापि तत्र प्रमातुरेव विषयतया तदुभयाभेद[illegible]स्य सत्वात् नेतु वाक्यजन्यज्ञानस्य पदार्थसंसर्गावगा
हितया कथं निर्विकल्पकत्वं उच्यते वाक्यजन्यज्ञानस्य विषयत्वे हि पदार्थसंसर्गत्वं तत्र अनभिमतसंसर्गस्यापि वाक्यज
न्यज्ञानविषयसंसर्गोपपत्तेः किं तु तात्पर्यविषयत्वं प्रकृते च सदेव सोम्येदमग्र आसीदित्युपक्रम्य तत्सत्यं स आत्मा तत्त्वमसी
त्युपसंहारेण विशुद्धे ब्रह्मणि वेदान्तानां तात्पर्यमवसितमिति कथं तात्पर्यविषयसंसर्गमवबोधयेत् इदमेव तत्त्वा
मस्यादिवाक्यानामखंडार्थत्वं यत्संसर्गानवगाहियथार्थज्ञानविषयजनकत्वमिति तदुक्तं संस गसंगिसम्यग्धी
हेतुता या गिरामियं उक्ताखंडार्थता यद्वा तत्प्रातिपदिकार्थता प्रातिपदिकार्थमात्रपरत्वं वाखंडार्थमिति चतुर्थपा

स्य
द्यर्थः तच्च प्रत्यक्षं पुनर्द्विविधं जीवसाक्षी ईश्वरसाक्षी चेति तत्र जीवो नामांतःकरणावच्छिन्नचैतन्यं साक्षी त्वंतः करणो
पहितं चैतन्यं अंतःकरणस्य विशेषणोपाधित्वाभ्यामनयोर्भेदः विशेषणं च कार्यान्वयि व्यावर्तकं उपाधिश्च कार्यानन्व
यी व्यावर्तको वर्तमानश्च रूपविशिष्टो घटोऽनित्य इत्यत्र रूपं विशेषणं कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रमित्यत्र कर्णशष्कुली
उपाधिः अयमेवोपाधिर्नैयायिकैः परिचायक इत्युच्यते प्रकृते चांतःकरणं जडतया विषयभासकत्वायोगेन विषयभा
सकचैतन्योपाधित्वं अयं च जीवसाक्षी प्रत्यात्मनाना एकत्वे तु चैत्रावगते मैत्रस्याप्यनुसंधानप्रसंगः ईश्वरसाक्षी तु मा
योपहितं चैतन्यं तच्चैकं तदुपाधिभूतमायाया एकत्वात् इंद्रो मायाभिः पुरुरूप ईयत इत्यादिश्रुतौ मायाभिरिति बहुव
चनस्य मायागतशक्तिविशेषाभिप्रायतया मायागतसत्त्वरजस्तमोरूपगुणाभिप्रायतया वोपपत्तेः मायां तु प्र
क
क

ह्रतीविद्यान्मायिनन्तु महेश्वरं न[illegible]रौविद्योतितं हृदियस्मिन्निवेशिते योगीमायाममेयायतस्मैविद्यात्मनेनमः अ
जामेकांलोहितशुक्लकृष्णांबह्वीः प्रजाः सृजमानां सरूपाः अजोह्येको [illegible]जुषमाणोऽनुशेते इति [illegible]दिश्रुत्या
त्तिस्मृतिष्वेकवचनबलेनलाघवानुगृहीतेनमायायाएकत्वंनिश्चीयते ततश्चतदुपहितचैतन्यमीश्वरसाक्षीत
स्यानादित्वतदुपाधेर्मायायाअनादित्वात् मायावच्छिन्नचैतन्यंपरमेश्वरः मायायाविशेषणत्वेईश्वरत्वं उपाधि
त्वेसाक्षीत्वमितिईश्वरत्वसाक्षित्वयोर्भेदः ननुधर्मिणोःईश्वरतत्साक्षिणोः सचपरमेश्वरएकोपिस्वोपाधिभू
तमायानिष्ठसत्वरजस्तमोगुणभेदेनब्रह्मवि[illegible]महेश्वरादिशब्दवाच्यतांभजते नन्वीश्वरसाक्षिणोरनादि

त्वेतदैक्षत बहुस्यां प्रजायेयेत्यादिसृष्टिपूर्वसमये परमेश्वरस्यां गं[illegible] (तु) कमीक्षणमुच्यमानं कथमुपपद्यते उच्यते यथा
विषयेंद्रियसंन्निकर्षादिकारणवशेन जीवोपाध्यंतःकरणस्य वृत्तिभेदाजायंते तथा स्रज्यमाणप्राणिकर्मवशे
न परमेश्वरोपाधिभूतमायया वृत्तिविशेषा इदमिदानीं स्रष्टव्यं इदमिदानीं पालयितव्यमिदमिदानीं संहर्तव्य
मित्याद्याकाराजायंते तासां च वृत्तीनां सादित्वात्तत्प्रतिबिंबचैतन्यमपि सादीत्युच्यते एवं साक्षि द्वैविध्येन प्र
त्यक्षज्ञानं द्वैविध्यं प्रत्यक्षत्वं च ॥ ज्ञेयगतं ज्ञप्तिगतं च निरूपितं तत्र ज्ञप्तिगत प्रत्यक्षस्य सामान्यलक्षणमु[illegible]लक्षणे
व पर्वतो वन्हिमानित्यादावपि वन्ह्याद्याकारावृत्युपहितचैतन्यस्य स्वात्मांशे स्वप्रकाशतया प्रत्यक्षत्वात् तत्रा

रि

धि

विषयांशे प्रत्यक्षत्वं पूर्वोक्तमेव तस्य च भ्रान्तिरूपप्रत्यक्षे नातिव्याप्तिः भ्रमप्रमासाधारणप्रत्यक्षत्वसामान्यनिर्वचने

न तस्यापि लक्ष्यत्वात् यद्वा तु प्रत्यक्षप्रमाया एव लक्षणं वक्तव्यं तदा पूर्वोक्तलक्षणे अबाधितत्वं विषयविशेषणं देयं ३

मया शुक्त्यादिभ्रमस्य संसारकालीनबाधविषयप्रातिभासिकरजतादिविषयकत्वात् ननु विसंवादिप्रवृत्त्या भ्रान्तिज्ञा

न विषयसिद्धावपि तस्य प्रातिभासिकतत्कालोत्पन्नरजतादिविषयकत्वेन प्रमाणं देशान्तरीयरजतस्य कौवत ३

स्यैव तद्विषयकत्वसंभावादिति चेन्न तस्यासंनिकृष्टतया प्रत्यक्षविषयत्वायोगात् न च ज्ञानं तत्र प्रत्यासत्तिः

ज्ञानस्य प्रत्यासत्तित्वे लिङ्गज्ञानस्य प्रत्यासत्तित्वे नतरेव वह्न्यादेः प्रत्यक्षत्वापत्तौ अनुमानोच्छेदापत्तेः ननु रजतो स्ताद्कानां र

त अनुमाना

जतावयवादीनामभावेशुक्तौकथंतत्रापिरजतमुत्पद्यतइतिचेत् उच्यते नहिलोकसिद्धसामग्रीप्रातिभासि
करजतोत्पादिकाकिंतुविलक्षणैवतथाहिकाचादिदोषदूषितलोचनस्यपुरोवर्तिद्रव्यसंयोगादिदमाकाराचा
कचिक्याद्याकाराचान्तरिदंतःकरणवृत्तिरुदेति तस्यांचवृत्तौइदमवछिन्नंचैतन्यंप्रतिबिंबते तत्रपूर्वोक्तरी
त्यावृत्तेर्बहिर्निर्गमनेनेदमवछिन्नचैतन्यंवृत्त्यवछिन्नचैतन्यंप्रमातृचैतन्यंचाभिन्नंभवति ततश्चप्रमातृ
चैतन्याभिन्नविषयचैतन्यनिष्ठाशुक्तित्वाप्रकारिकाऽविद्याचाकचिक्यादिसादृश्यसंदर्शनसमुद्बोधितरज
तसंस्कारसध्रीचीनाकाचादिदोषसमवहितारजतरूपार्थाकारेणरजतज्ञानाभासाकारेणचपरिणमते

परिणामोनामउपादानसमसत्ताककार्यापत्तिः विवर्तोनामउपादानविषमसत्ताककार्यापत्तिः प्रातिभासिक
रजतंचाविद्यापेक्षयापरिणामः चैतन्यापेक्षयाविवर्तइतिचोच्यते अविद्यापरिणामरूपंचतद्रजतमविद्याधि
ष्ठानेइदमवछिन्नचैतन्येवर्तते अस्मन्मते सर्वस्यापिकार्यस्यस्वोपादानाधिष्ठानाश्रितत्वनियमात् ननुचैतन्यनि
ष्ठरजतस्यकथमिदंरजतमितिपुरोवर्तीतादात्म्यंउच्यते यथान्यायमते आत्मनिष्ठसुखादेः शारीरनिष्ठत्वे
नोपलंभः शारीरस्यसुखाद्यधिकरणत्वावछेदकत्वात् तथाचैतन्यमात्रस्यरजतंप्रत्यनधिष्ठानतया इदमव
छिन्नचैतन्यस्यतदधिष्ठानत्वेनेदमैवछेदकतयारजतस्यपुरोवर्तिसंसर्गउपपद्यते तस्यचविषयचैतन्या

वा

न

स्यतदंतःकरणोपहितचैतन्याभिन्नतयाविषयचैतन्येऽध्यस्तमपिरजतंसाक्षिण्यध्यस्तंकेवलसाक्षिवेद्यं सुखादि
वदनन्यवेद्यमितिचोच्यते ननुसाक्षिण्य ध्यस्तत्वेऽहंरजतमितिप्रत्ययःस्यात्अहंसुखीति वदितिचेत्उच्यते
स्फरवादीनामंतःकरणनिष्ठाऽविद्याकार्यत्वेनमुक्तं अहंसुखीतिज्ञानंसुखादीनांघटादिवच्छुद्धचैतन्यएवाध्यासा
त्किंतुयस्ययदाकारानुभवाहितेसंस्कारसहकृताविद्याकार्यत्वंतस्यतदाकारानुभवविषयत्वंअहमाकारानु
भवाहितसंस्कारसहिताविद्याकार्यत्वादंतःकरणादेरहमनुभवविषयत्वंशरीरेंद्रियादेरुभयविधानुभवसं
स्कारसहितविषयत्वंतथाचोभयविधानुभवःइदंशरीरंअहंदेहःअहंमनुष्यःहंब्राह्मणःइदंचक्षुरहंकाणइदंश्रो

अ

ग्रं अहंबधिरइतिप्रकृतेचप्रातिभासिकरजतस्यप्रमातृचैतन्या[illegible]भिन्नेदम[illegible]वच्छिन्नचैतन्यनिष्ठाविद्याकार्यत्वेपि
इदंरजतमितिसत्यस्थलीयेदमाकारा[illegible]नुभवाहितसंस्कारजन्यत्वादिदमाकारानुभवविषयतानत्वहंरजतमित्यह
माकारानुभवविषयतेत्यनुसंधेयं नन्वेवमपिमिथ्यारजतस्यसाक्षात्साक्षिसंबंधितयाभानसंभवेरजतगोचरज्ञा
नाभासरूपायाअविद्यावृत्तेरभ्युपगमःकिमर्थमितिचेत्उच्यतेस्वगोचरवृत्त्युपहित[illegible]चैतन्याभिन्नसत्ताकत्वा
भावस्यविषयापरोक्षरूपतयारजतस्यापरोक्षसिद्धयेतदभ्युपगमात् नन्विदंवृत्तेरजताकारवृत्तेश्चप्रत्येकमेकै
कविषयत्वेगुरुमतवद्विशिष्टज्ञानानभ्युपगमेकुतोभ्रमज्ञानसिद्धिरितिचेतन्न वृत्तिद्वयप्रतिबिंबितचैतन्यस्यै

कस्यसत्यमिथ्यावस्तुतादात्म्यावगाहित्वेनभ्रमत्वस्वीकारात् अतएवसाक्षिज्ञानस्यसत्यासत्यविषयतयाप्रामा
ण्यानियमादप्रामाण्योक्तिःसांप्रदायिकानांननुसिद्धांतेदेशांतरीयरजतमप्यविद्याकार्यमध्यस्तं चेतिकथंशुक्ति
रूप्यतोवैलक्षण्यमितिचेन्नत्वन्मतेसत्यत्वाविशेषेपिकेषांचित्क्षणिकत्वंकेषांचित्स्थायित्वमित्यत्रयद्देवनियाम
कंतदेवास्त्कस्वभावविशेषादिकंममापिघटाद्यध्यासेअविद्यैवदोषत्वेनापिहेतुः शुक्तिरूप्याद्यध्यासेतुकाचाद
योदोषाः तथाचागंतुकदोषजन्यत्वंप्रातिभासिकत्वेप्रयोजकंअतएवस्वप्नोपलब्धरथादीनामागंतुकनिद्रादो
षजन्यत्वात्प्रातिभासिकत्वं ननुस्वप्नस्थलेपूर्वानुभूतरथादेःस्मरणमात्रेणैवव्यवहारोपपत्तौनरथादिसृष्टिक।

स्यनेगौरवादितिचेन्नरथादेःस्मृतिमात्राभ्युपगमेरथंपस्यामिस्वप्नेरथमद्राक्षमित्याद्यनुभवविरोधापत्तेःअथरथा
नरथयोगान्पथःसृजतइतिरथादिसृष्टिप्रतिपादकश्रुतिविरोधापत्तेश्चतस्माच्छुक्तिरूप्यवत्स्वप्नोपलभ्यरथा
ध्यासःकुत्रेतिचेन्नचैतन्यस्यैवस्वयंप्रकाशस्यरथाद्यधिष्ठानत्वात्प्रतीयमानोहिविशेषस्यापितदाऽसंन्निकृष्टत
यानिर्वचनीयप्रातिभासिकदेशोभ्युपगन्तव्यःयोपिप्रातिभासिकायावत्प्रतिभासमवतिष्ठते ननुस्वप्नरथाद्यधि
ष्ठानतयोपलभ्यमानदेशविशेषस्यापितदाऽसंन्निकृष्टतयानिर्वचनीयप्रातिभासिकदेशोभ्युपगंतव्यस्तथाच
रथाद्यध्यासःकुत्रेतिचेन्नचैतन्यस्यैवस्वयंप्रकाशस्यरथाद्यधिष्ठानत्वात्प्रतीयमानोहिरथादिरस्तीत्येवप्रती
यतइतिसद्रूपेणप्रकाशमानचैतन्यमेवाधिष्ठानंदेशविशेषोपिचिदध्यस्तःप्रातिभासिकःरथादिवदिंद्रियग्राह्यत्वा

मपिप्रातिभासिकंतदासर्वेंद्रियाणामुपरमात् अहंगजइतिप्रतीत्यापादनंतुपूर्ववन्निरसनीयंस्वप्नगजादयःसा
क्षान्मायापरिणामइतिकेचित् अंतःकरणद्वारातत्परिणामाइत्यन्येनतुगजादिःशुद्धचैतन्याश्रयस्तत्वेदा
नींतत्साक्षात्काराभावेनजागरणेपिस्वप्नोपलब्धगजादयोऽनुवर्तेरन् उच्यतेकार्यविनाशोहिद्विविधःकश्चि
न दुपादानेनसहकश्चित्तुविद्यमानएवोपादानेआद्योबाधःद्वितीयस्तुनिवृत्तिःआद्यस्यकारणमधिष्ठानत
त्वसाक्षात्कारःतेनविनोपादानभूतायाःअविद्यायाअनिवृत्तेःद्वितीयस्यविरोधिवृत्युत्पत्तिर्दोषनिवृत्तिश्च १३
यानि तदिहब्रह्मसाक्षात्काराभावात्स्वप्नप्रपंचोमाबाधिष्टमुसलप्रहारेणघटादाविवविरोधिप्रत्ययांतरोदये
नस्वजनकीभूतनिद्रादिदोषनाशेनवागजादिनिवृत्तौकोविरोधःएवंचशुक्तिरूप्यस्यशुक्त्यवच्छिन्नचैतन्य

निष्टमूलाविद्याकार्यत्वपक्षेशुक्तिरितिज्ञानेनतद्ज्ञानेनसहरजतस्यबाधमूलाविद्याकार्यत्वपक्षेमूलाविद्याया
ब्रह्म[illegible]तत्त्वसाक्षात्कारमात्रनिवर्त्यतयाशुक्तितत्त्वज्ञानान्निवर्त्यतयारजतस्यतत्रशुक्तिज्ञानान्निवृत्तिमात्रंमु
स्ये सलप्रहारेणघटस्येवनतुशुक्तौरजतस्यप्रातिभाससमयेसत्ताभ्युपगमेइदंनरजतमितितत्रैकनिषेधज्ञानंन
स्यात् किंत्विदानीमिदंरजतमितिइदानींघटःश्यामोनेतिवदितिचेन्ननहितत्ररजतत्वावच्छिन्नप्रतियोगिताकाभा
५ वोनिषेधधीविषयःकिंतुलौकिकपारमार्थिकत्वावच्छिन्नप्रातिभासिकरजतप्रतियोगिकःव्यधिकरणधर्मावच्छिन्न
प्रतियोगिताकाभावाभ्युपगमात् ननुप्रातिभासिकेरजतेपारमार्थिकत्वमवगतंनवाअनवगमेप्रतियोगितावच्छे
दकावच्छिन्नाज्ञानाद्भावप्रत्यक्षानुपपत्तिःअवगमेअपरोक्षावभासस्यतत्कालीनविषयसत्त्वनियतत्वात्रजते। प

पारमार्थिकत्वमप्यनिर्वचनीयरजतवदेवोत्पन्नमिति तदवच्छिन्नरजतसत्वे तदवच्छिन्नाभावस्तत्र कथं वर्त्तत इति चे
न्न पारमार्थिकत्वस्याधिष्ठाननिष्ठस्य रजते प्रतिभाससंभवेन रजतनिष्ठपारमार्थिकत्वात्यन्ताभ्युपगमात् या
त्रारोप्यमसंन्निकृष्टं तत्रैव प्रातिभासिकवस्तुसत्तेरंगीकारात् अतएवेंद्रियसंन्निकृष्टजपाकुसुमगतलोहित
स्फटिके भानसंभवात् स्फटिकेऽनिर्वचनीयलौहित्योत्पत्तिः नन्वेवं यत्र जपाकुसुमं द्रव्यांतरव्यवधाना
व संन्निकृष्टं तत्र लौहित्यप्रतीत्या प्रातिभासिकं लौहित्यं स्वीक्रीयते इति चेन्न इष्टत्वात् एवं प्रत्यक्षभ्रमांतरेष्वपि प्र
त्यक्षसामान्यलक्षणानुगमो यथार्थप्रत्यक्षलक्षणसद्भावश्च दर्शनीयः उक्तं प्रत्यक्षं प्रकारांतरेण द्विविधं इं
द्रियजन्यं तदजन्यं चेति तत्रेंद्रियाजन्यं सुखादिप्रत्यक्षं मनइंद्रियत्वनिराकरणात् इंद्रियाणि पंच घ्राणरसनचक्षु

श्रोत्रत्वगात्मकानिसर्वाणींद्रियाणिस्वस्वविषसंबंधादेवप्रत्यक्षज्ञानंजनयंतितत्रघ्राणरसनत्वगिंद्रियाणिस्वस्व
नस्थितान्येवगंधरसस्पर्शोपलंभान्जयंतिचक्षुःश्रोत्रेतुस्वतएवविषयदेशंगत्वास्वस्वविषयंगृह्णीतःश्रोत्रस्या
पिचक्षुर्वत्व्यवछिन्नतयाभेर्यादिदेशगमनसंभवात्अतएवानुभवोभेरीशब्दोमयाश्रुतइतिवीचीतरंगादिन्या
येनशंकर्णशष्कुलीप्रदेशेअनंतशब्दोत्पत्तिकल्पनायांगौरवंभेरीशब्दोमयाश्रुतइतिप्रत्ययस्यभ्रमत्वकल्पनायां
च गौरवंस्यात्तदेवव्याख्यातंप्रत्यक्षं परिछेदःप्रथमः१अथानुमानंनिरूप्यते अनुमितिकरणमनुमानंअनुमितिश्चव्या
प्तिज्ञानत्वेनव्याप्तिज्ञानजन्याव्याप्तिज्ञानानुव्यवसायादिस्मत्वेनतज्जन्यत्वाभावान्नानुमितित्वंअनुमितिकरणंच
व्याप्तिज्ञानंतत्संस्कारोवांतरव्यापारः नतुतृतीयंलिंगपरमर्शोनुमितौकरणंतस्यानुमितिहेतुत्वासिद्ध्यातत्करण

त्वस्य द्रूरनिरस्तत्वात् नच संस्कारजन्यत्वेन अनुमितेः स्मृतित्वापत्तिः स्मृतिप्रागभावजन्यत्वस्य संस्कारमात्रजन्यत्व
स्य वा स्मृतित्वप्रयोजकतया संस्कारध्वंससाधारणसंस्कारजन्यत्वस्य तदप्रयोजकत्वात् नचात्र व्याप्तिस्मरणादनु
मितिस्तत्र कथं संस्कारो हेतुरिति वाच्यं व्याप्तिस्मृतिस्थलेपि तत्संस्कारस्यैवानुमितिहेतुत्वात् नहि स्मृतेः संस्कारनाश
कत्वनियमः स्मृतिधारादर्शनात् नचानुद्बुद्धसंस्काराद्यनुमित्यापत्तिः तदुद्बोधस्यापि सहकारित्वात् एवं चायं
धूमवानिति पक्षधर्मताज्ञाने धूमो वह्निव्याप्य इत्यनुभवाहितसंस्कारोद्बोधे च सति वह्निमानित्यनुमितिर्भव
ति नतु मध्ये व्याप्तिस्मरणं तज्जन्यं वह्निव्याप्यधूमवानयमित्यादिविषयविशिष्टज्ञानं वा हेतुत्वेन कल्पनीयं गौर
वात् मानाभावाच्च तच्च व्याप्तिज्ञानं वह्निविषयकज्ञानांशएव करणं नतु पर्वतविषयकत्वांशइति पर्वतो वह्निमा

नितिज्ञानस्यच प्रामाण्यं एवानुमितित्वं न यद्वैताद्यं ज्ञेनरं ज्ञेयप्रत्यक्षत्वस्योपपादितत्वात् व्याप्तिश्चाशेषसाधनाश्रयाश्रित
साध्यसामानाधिकरण्यरूपा सा च व्यभिचारादर्शने सति सहचारदर्शने गृह्यते तच्च सहचारदर्शनं भूयोदर्शनं सकृ
द्दर्शनं चेति विशेषो नादरणीयः सहचारदर्शनत्वस्यैव प्रयोजकत्वात् तच्चानुमानमन्वयिरूपमेकमेव न तु केवला
न्वयि सर्वस्यापि धर्मस्यास्मन्मते ब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वेनात्यन्ताभावप्रतियोगित्वे साध्यकत्वयोगके व
लान्वयित्वस्यासिद्धेः नाप्यनुमानस्य व्यतिरेकिरूपत्वं साध्याभावेन साधनाभावनिरूपितव्याप्तिज्ञानस्य साधने
न साध्यानुमितावनुपयोगात् कथं तर्हि धूमादावन्वयव्याप्तिमविदुषोपि व्यतिरेकव्याप्तिज्ञानादनुमितिः अर्थापत्ति
प्रमाणादिति वक्ष्यामः अत एवानुमानस्य नान्वयव्यतिरेकीरूपत्वं व्यतिरेकिव्याप्तिज्ञानस्यानुमित्यहेतुत्वात् तच्चानु

ति

मानंस्वार्थपरार्थभेदेनद्विविधंतत्रस्वार्थमुक्तमेवपरार्थंतुन्यायसाध्यंन्यायोनामवयवसमुदायःअवयवाश्चत्रय
एवंप्रतिज्ञाहेतू उदाहरणरूपाःउदाहरणोपनयनिगमरूपावा नतुपंचावयवरूपाःउदाहरणादित्रयेणैवव्या
प्तिपक्षधर्मयोरुपदर्शनसंभवेनाधिकावयवद्वयस्यव्यर्थत्वात् एवमनुमानेनिरूपितेतस्माद्ब्रह्मभिन्ननिखि
लमिथ्यात्वसिद्धिः तथाहिब्रह्मभिन्नंसर्वंमिथ्याब्रह्मभिन्नत्वात्यदेवंतदेवंयथाशुक्तिरूप्यंनचदृष्टांतासिद्धिःतस्य
साधितत्वात् नचाप्रयोजकत्वंशुक्तिरूप्यंरज्जुसर्पादीनांमिथ्यात्वेब्रह्मभिन्नत्वस्यैवलाघवेनप्रयोजकत्वात् मि
थ्यात्वंचस्वाश्रयत्वेनाभिमतयावन्निष्ठात्यंताभावप्रतियोगित्वंअभिमतपदम संभववारणपयावसदमर्थां
तरवारणायतदुक्तं सर्वेषामपिभावानांस्वाश्रयत्वेनसंमतेप्रतियोगित्वमत्यंताभावंप्रतिमृषात्मनेतियद्वायंपरः

एतत्त्वं तु निष्ठात्यंताभावप्रतियोगीपटत्वात् पटांतरवदित्याद्यनुमानं मिथ्यात्वे प्रमाणं तदुक्तं अंशिनः स्वंशगात्यंता
भावस्य प्रतियोगिता अंशित्वादितरांशिवदिग्गैषैव गुणादिष्विति न च घटादेर्मिथ्यात्वे सन् घट इति प्रत्यक्षेण बाधः
अधिष्ठानब्रह्मसत्तायास्तत्र विषयतया घटादेः सत्यत्वासिद्धेः न च निरूपस्य ब्रह्मणः कथं चाक्षुषादिज्ञानविषयते
ति वाच्यं निरूपस्यापि रूपादेः प्रत्यक्षविषयत्वात् न च नीरूपस्य द्रव्यस्य चक्षुराद्ययोग्यमिति नियमः मन्मते ब्रह्म
णो द्रव्यत्वासिद्धेः गुणाश्रयत्वं द्रव्यत्वं समवायिकारणत्वं वा द्रव्यत्वमिति तन्न अभिमतं नाहि निर्गुणस्य ब्रह्मणो गुणा
श्रयतानापि समवायिकारणता समवायासिद्धेः अस्तु वा द्रव्यत्वं ब्रह्मणः तथापि निरूपस्य कालस्येव चक्षुरादिज्ञा
नविषयत्वेनाविरोधः यद्वा त्रिविधं सत्त्वं पारमार्थिकं व्यवहारिकं प्रातिभासिकं चेति तत्र पारमार्थिकं सत्त्वं ब्रह्म

णः व्यवहारिकं सत्वमाकाशादेः प्रातिभासिकं सत्वं शुक्तिरूप्यादेः तथाच घटः सन्निति प्रत्यक्षस्य व्यवहारिकसत्व
विषयत्वेन प्रामाण्यं अस्मिन्पक्षे घटादेः ब्रह्मणि निषेधो न स्वरूपेण किंतु पारमार्थिकत्वेनैवेति न विरोधः अस्मिन्प
क्षे च मिथ्यात्वलक्षण पारमार्थिकत्वावछिन्नप्रतियोगिकत्वमत्यंताभावविशेषणं द्रष्टव्यं तस्मादुपपन्नं मिथ्यात्वा
नुमानमिति इत्यनुमानपरिछेदः २ अथोपमानं निरूप्यते सादृश्यप्रमाकरणमुपमानं तथाहि नगरेषु दृष्टगोपिंड
स्य पुरुषस्य वनं गतस्य गवयेंद्रियसंन्निकर्षे सति भवति प्रतीतिरयं पिंडो गोसदृश इति तदनंतरं च भवत्यनेन
सदृशी मदीया गौरिति निश्चयः तत्रान्वयव्यतिरेकाभ्यां गवयनिष्ठगोसादृश्यज्ञानं करणं गोनिष्ठगवयसादृश्य
ज्ञानं फलं न चेदं प्रत्यक्षेण संभवति गोपिंडस्य तदेंद्रियासंन्निकर्षात् नाप्यनुमानं गवयनिष्ठगोसादृश्यस्मा[illegible]

त्तद्धिंगत्वान्नापि मदीयागोरतद्भवयसदृशीए तान्निष्ठसादृश्यप्रतियोगित्वात् योयद्गतसादृश्यप्रतियोगीसत
त्सदृशः यथामैत्रनिष्ठसादृश्यप्रतियोगी चैत्रोमैत्रसदृश इत्यनुमानात्तत्संभव इति वाच्यं एवंविधानुमानावता
रेपि अनेन सदृशी मदीया गौरितिप्रतीतेरनुभवसिद्धत्वात् उपमीनोमित्यनुव्यवसायाच्च तस्मादुपमानंमा
नांतरं ३ अथागमो निरूप्यते यस्य वाक्यस्य तात्पर्यविषयीभूतः संसर्गोमानांतरेण न बाध्यते तद्वाक्यप्रमाणंवा
क्यजन्ये च ज्ञाने आकांक्षायोग्यताऽऽसत्तयस्तात्पर्यज्ञंचेति चत्वारिकारणानि तत्र पदार्थानां परस्परजिज्ञासा
विषयत्वयोग्यत्वमाकांक्षा क्रियाश्रवणे कारकस्य कारकश्रवणे क्रियायाः कारणश्रवणे इति कर्तव्यतायाश्चजि
ज्ञासाविषयत्वात् अजिज्ञासोरपि वाक्यार्थबोधतो योग्यत्वमुपात्तं तद्वच्छेदकं च क्रियात्व। कारकत्वादिकंमि

तिनातिव्याप्तिः गौरश्वइत्यादौअन्वयभेदान्वयेन्वेसमानविभक्तिकपदप्रतिपाद्यत्वंतदेवछेदकमिति नत्वमस्यादिवाक्येषु
नाव्याप्तिः एतादृशाकांक्षाभिप्रायेणैवचबलाबलाधिकरणे तसेपयसीदध्यानयइतिसावैश्वदेव्यामिक्षावाजीभ्योवा
जिनमित्यत्रवैश्वदेवयागस्यामिक्षान्वितत्वेननवाजिनाकांक्षेत्यादिव्यवहारः ननुतत्रापिवाजिनस्यजिज्ञासाविषय
त्वेपितद्ग्राह्यत्वमस्त्येवप्रदेयद्रव्यत्वस्ययागनिरूपतजिज्ञासाविषयतावछेदकत्वादितिचेन्न स्वसमानजातीयपदा
र्थान्वयबोधविरहसहकृतप्रदेयद्रव्यत्वस्यैवतदवछेदकत्वेवाजिनद्रव्यस्यस्वसमानजातीयामीक्षाद्यान्वय।
बोधसहकृतत्वेनतादृशावछेदकत्वाभावात् अमिक्षायांतुनैववाजिनान्वयस्यतदानुपस्थापनात् उदाहरणंतरेष्व
पिदुर्बलत्वप्रयोजकआकांक्षाविरहएवद्रष्टव्यः योग्यताचतात्पर्यविषयीभूतः संसर्गबाधः वन्हिनासिंचयेदित्यादौता

दृशासंसर्ग। बाधात्नातिव्याप्तिः सप्रजापतिरात्मनोवपामुदखिददित्यादवपिताद्यर्थविषयीभूतापरपशुवपायागप्रा
शस्त्याबाधाद्योग्यतातत्वमस्यादिवाक्येष्वपिबोध्याभेदबाधेपिलक्ष्यस्वरूपाभेदाबाधाद्योग्यताअसत्तिश्चअव्य
वधानेनपदजन्यापदार्थोपस्थितिः मानांतरोपस्थापितपदार्थस्यान्वयबोधाभावात् अतएवाश्रुतस्थलेतत्तत्सदा
ध्याहारोउद्घाटयइत्यादौद्वारमितिअतएवेषेत्वेत्यादौछिन्नतीतीपदाध्याहारः अतएवविकृतिषुसूर्यायजुष्टंनिर्वपा
मितिपदप्रयोगः पदार्थश्चद्विविधः अशिक्योलक्ष्यश्चेति तत्रशक्तिर्नामपदानामर्थेषुमुख्यावृत्तिः यथापृथुपदस्य ५८
पृथुबुध्नोदराकाराकृतिविशिष्टेवस्तुविशेषोवृत्तिः साचवृत्तिः पदार्थांतरंसिद्धांतेतुकारणादिषुकार्यानुकूल
शक्तिमात्रस्यपदार्थांतरत्वात् साचतत्तत्पदजन्यपदार्थरूपकार्यानुमेया तादृशशक्तिविषयत्वंशक्यत्वंतच्चा
ज्ञान

जातेरेवनव्यक्तेः व्यक्तिनामानंतेनगुरुत्वात् कथंतर्हिगवादिपदाछक्तेभानमितिचेत्जातेव्यक्तिसमानसवित्संवेद्यत्वादि
तिब्रूमः यद्वागवादिपदानांव्यक्तौशक्तिः सरूपसतिनज्ञाताजातौतुसाज्ञाताहेतुः नव्यक्त्यंशेशक्तिज्ञानमपिकारणंगौ
रवात्जातिशक्तत्वज्ञानेसतिव्यक्तिशक्तत्वज्ञानंविनाव्यक्तिधीविलंबाभावाच्चअतएवन्यायमतेपिअन्वयेशक्तिःस्व
रूपसतीतिसिद्धांतः ज्ञायमानशक्तिविषयत्वमेववाच्यत्वमितिव्यक्तिरवाच्याअथवाव्यक्तेर्लक्षणावगमः यथानीलो
घटइत्यत्रनीलशब्दस्यनीलगुणविशिष्टेलक्षणातथाजातिवाचकस्यतद्विशिष्टेलक्षणेत्युक्तं अनन्यलभ्यः शब्दार्थइ
तिवंशक्योनिरूपितः अथलक्ष्यःपदार्थोनिरूप्यतेतत्रलक्षणाविषयोलक्ष्यः लक्षणाचद्विविधा केवललक्षणाल
क्षितलक्षणाचेति तत्रशक्यसाक्षात्संबंधः केवललक्षणा यथागंगायांघोषइत्यत्रप्रवाहसाक्षात्संबंधिनितीरेगंगाप

दृस्यकेवललक्षणायत्रशक्यपरंपरासंबंधेनार्थांतरप्रतीतिः तत्रलक्षितलक्षणायथा द्विरेफपदस्यरेफद्वययुक्तभ्रमरपदघ
[illegible]घटितपरंपरासंबंधिषुमधुकरेषुवृत्तिः गौण्यपिलक्षितलक्षणैवतथाहि सिंहशब्दवाच्यसंबंधीक्रौर्यादिसंबंधेनमाण
वकस्यप्रतीतेः प्रकारांतरेणलक्षणात्रिविधा जहल्लक्षणाअजहल्लक्षणाजहदजहल्लक्षणाचेति शक्यमनंतर्भाव्ययत्रा
र्थांतरस्यप्रतीतिस्तत्रजहल्लक्षणा यथाविषंभुंक्ष्वेत्यत्रहिस्वार्थंविहायशत्रुगृहेभोजननि। वृत्तिर्लक्ष्यतेयत्रशक्यार्थ
मंतर्भाव्यैवार्थांतरप्रतीतिः तत्राजहल्लक्षणायथा सोऽयंदेवदत्तइति अत्रहिपदद्वयवाच्ययोः विशिष्टयोरैक्यानुपप
त्त्यांशुक्लोघटइति अत्रहिशुक्लशब्दः स्वार्थंशुक्लगुणमंतर्भाव्यैवतद्वतिद्रव्येलक्षणयावर्ततेयत्रहिविशिष्टवाचकशब्द
एकदेशंविहायएकदेशेवर्तते तत्रजहदजहल्लक्षणायथा सोऽयंदेवदत्तइतिअत्रहिपदद्वयवाच्ययोः विशिष्टयोरैक्या

विशिष्टयोरैक्यानुपपत्त्या पदद्वयस्य विशेषणमात्रपरत्वं यथा वा तत्त्वमसीत्यादौ विशिष्टवाचकपदानामेकदेशपरत्वेपि
लक्षणा शक्त्युपस्थितविशिष्टयोरभेदान्वयोपपत्तौ विशेष्ययोः शक्त्युपस्थितयोर्वाभेदान्वयबोधाविरोधात् यथा घ
टोऽनित्य इत्यत्र घटपदवाच्यैकदेशघटत्वस्यायोग्यत्वेपि योग्यघटव्यक्त्या सहानित्यत्वान्वयः यत्र तु पदार्थैकदेश
स्य विशेषणतयोपस्थितिस्तत्रैव स्वातंत्र्येणोपस्थितये लक्षणाभ्युपगमात् यथा नित्यो घट इत्यत्र घटपदात् घटत्वस्य श
क्त्या स्वातंत्र्येणानुपस्थितत्वात्तादृश्योपस्थित्यर्थं घटपदस्य घटत्वे लक्षणा एवं तत्त्वमस्यादिवाक्येपि न लक्षणा शक्त्या स्वा
तंत्र्येणोपस्थितयोस्तत्त्वंपदार्थयोरभेदान्वये बाधकाभावात् अन्यथा गेहे घटः घटे रूपं घटमानयेत्यादौ घटत्वगेहत्वा
देरभिमतान्वयबोधायोग्यतया तत्रापि घटादिपदानां विशेष्यमात्रपरत्वे लक्षणा च स्यात् तत्त्वमसीत्यादिवाक्ये स्वा

र्यांलक्षणोक्तिरभ्युपगमवादेन बोध्या जहदजहल्लक्षणोदाहरणं तु काकेभ्यो दधि रक्षतामित्यादिमेव शाक्यकाकत्वपरि
त्यागेन शक्यदध्युपघातकत्वपुरस्कारेण नशक्यत्वपुरस्कारेण काकशब्दस्य वृत्तेः लक्षणाबीजं तु तात्पर्यानुपपत्तिरेव
न त्वन्वयानुपपत्तिः काकेभ्यो दधि रक्षतामित्यत्रान्वयानुपपत्त्यभावात् गंगायां घोष इत्यत्र तात्पर्यानुपपत्तेरपि भावात् ल
क्षणा न पदमात्रवृत्तिः किंतु वाक्यवृत्तिरपि यथा गंभीरायां नद्यां घोष इत्यत्र गंभीरायामिति पदद्वयसमुदायस्य तीरे लक्षणा
ननु वाक्यस्याशक्तया कथं शक्यसंबंधरूपा लक्षणा उच्यते शक्यपदार्थज्ञाप्यते तत्संबंधो लक्षणा शक्तिज्ञाप्यश्च
पदार्थः तथा वाक्यार्थेऽपीति न काचिदनुपपत्तिः एवमर्थवादशाक्यानां प्रशंसारूपार्थे प्राशस्त्ये लक्षणा सोरोदीदित्या
दिनिंदार्थवादवाक्यानां निंदितत्वे लक्षणा अर्थवादगतपदानां प्राशस्त्ये लक्षणाभ्युपगमे एकेन पदेन लक्षणया तदुप

स्थितेसंभवेपदांतरवैयर्थ्यंस्यात्एवंचविध्यपेक्षितप्राशस्त्यरूपपदार्थवादवाक्यानांनिरंतत्वेलक्षणाअर्थवादगतप
दानांप्राशस्त्येलक्षणाभ्युपगमेएकेनपदेनलक्षणयाप्रत्यायकतयार्थवादपदसमुदायस्यपदस्थानीयतयासंनिधि
तयानेनविधिवाक्येनएकवाक्यार्थत्वंसंभवतीत्यर्थवादवाक्यानांपदैकवाक्यताकृत्तर्हिवाक्यैकवाक्यतायत्रप्रत्येकं
भिन्नभिन्नसंसर्गप्रतिपादकयोर्वाक्ययोराकांक्षावशेनमहावाक्यार्थबोधकत्वंयथादर्शपूर्णमासाभ्यांस्वर्गका
मोयजेतेत्यादिवाक्यानांसमिधोयजतीत्यादिवाक्यानांपरस्परापेक्षितांगांगिभावबोधकतयैकवाक्यतातदुक्तंभ
ट्टपादैः स्वार्थबोधेसमाप्तानामंगांगित्वाद्यपेक्षयावाक्यानामेकवाक्यत्वंपुनःसंहत्यजायतइति एवंद्विविधोपिप
दार्थोनिरूपितः तदुपस्थितिश्चासत्तिसाचशाब्दबोधेहेतुः तथैवान्वयव्यतिरेकदर्शनात् एवंमहावाक्यार्थबो

धेवांतरवाक्यार्थबोधोहेतुस्तथैवान्वयाद्यवधारणात् क्रमप्राप्यंतात्पर्यंनिरूप्यतेतत्प्रतीतिछयोच्चरितत्वंनतात्पर्यं
अर्थज्ञानशून्येनपुरुषेणोच्चारिताद्वेदाद्दर्थप्रत्ययाभावप्रसंगात् अयमध्यापकोऽव्युत्पन्नः।इतिविशेषदर्शनेनतात्प
र्यभ्रमस्याप्यभावात् नचेश्वरीयतात्पर्यज्ञानात्तत्रशाब्दबोधइतिवाच्यं ईश्वरानंगीकर्तुरपितद्वाक्यार्थप्रतिपत्तिदर्शनात्उ
च्यते तत्प्रतीतिजननयोग्यत्वंतात्पर्यंगेहेघटइतिवाक्यंगेहघटसंसर्गप्रतीतिजननयोग्यंनतुपटसंसर्गप्रतीतिजननयो
ग्य तद्वाक्यंघटसंसर्गपरंनतुपटसंसर्गपरमित्युच्यते ननुसैंधवमानयेत्यादिवाक्येलवणानयनप्रतीछयाप्रयुक्तेत
दापश्वसंसर्गप्रतीतिज।नकेनेस्वरूपयोग्यतौस्वरूपत्वेसतीयदन्यप्रतीतिइछयानोच्चारितं तद्वाक्यंतत्संसर्गपर
मित्युच्यतेशुकादिवाक्येऽव्युत्पन्नोच्चारितवेदवाक्यादौच्चप्रती।तीछयाएवाभावः तदन्यप्रतीतीछयानुच्चारितत्व

ऽभावेन लक्षणसत्वान्नाव्याप्तिः नचोभयप्रतीतीछयोच्चारितेऽव्याप्तिः तदन्यमात्रप्रतीतीछयानुच्चरितत्वस्य विवि
क्षितत्वात् उक्तप्रतीतिमात्रजननयोग्यतायाश्चावछेदकाशक्तिः अस्माकं मते सर्वत्र कारणतायाः शक्तिरेवावछेद
कत्वादितिन कोपिदोषः एवं तात्पर्यस्य तत्प्रतीतिजनकरूपस्य शाब्दज्ञानजनकत्वे सिद्धे चतुर्थवर्णके तात्पर्यस्य ज्ञा
नहेतुत्वनिराकरणवाक्यं तत्प्रतीतीछयोच्चारितत्वरूपतात्पर्यस्य निराकारणपरं अन्यथा तात्पर्यनिश्चयफलकवे
दांतविचारवैयर्थ्यप्रसंगात् केचित्तु शाब्दज्ञानत्वावछेनतात्पर्यज्ञानं न हेतुरित्येवंपरं चतुर्थवर्णके वाक्यं तात्पर्यसं
शयविपर्ययोत्तरशाब्दज्ञानविशेषे तात्पर्यज्ञानं हेतुरेवइदं वाक्यं एतत्तत्परसुतान्यरमितिसंशये तद्विपर्यये च तदुत्तरवा
र्थविशेषनिश्चयस्य तात्पर्यनिश्चयं विनानुपपत्तेरित्याहुः तच्च तात्पर्यं वेदमीमांसापरिशोधितन्यायादेवावधार्यते लोके

तुप्रकरणादिना तत्र लौकिकवाक्यानां नानांतरावगतार्थतयानुवादकत्व वेदे तु वाक्यार्थस्यापूर्वतयानानुवादकत्वेन
तत्र लोके वेदे च कार्यपराणामिव सिद्धार्थानामपि प्रामाण्यं पुत्रस्ते जात इत्यादिषु सिद्ध्यपदार्थेपि पदानां सामर्थ्यावधार
णात् अत एव वेदांतवाक्यानां ब्रह्मणि प्रामाण्यं यथा चैतत्तथा विषयपरिछेदे वक्ष्यते तत्र वेदानां नित्यसर्वज्ञपरमे
श्वरप्रणीतत्वेन प्रामाण्यं इति नैयायिकाः वेदानां नित्यत्वेन निरस्तसमस्तपुंदूषणतया प्रामाण्यमित्यध्वरमीमां
सकाः अस्मात्तु मते वेदोऽनित्यः उत्पत्तिमत्वात् उत्पत्तिमत्वं चास्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सा
मवेदो इत्यादिश्रुतेः नापि वेदानां तीक्ष्णणवस्थायित्वं यएव वेदो देवदत्तेनाधीतः स एव मयापीत्यादिप्रत्यभिज्ञाविरो
धात् अत एव गकारादिवर्णानामपि न क्षणिकत्वं सोऽयं गकार इत्यादिप्रत्यभिज्ञाविरोधात् तथा च वर्णपदवाक्य

तत्समुदायस्य वेदस्य वियदादिवत्सृष्टिकालीनोत्पत्तिकत्वं प्रलयकालीनध्वंसप्रतियोगित्वं च न तु मध्ये वर्णानामुत्पत्तिवि
नाशौ नंतं ककारकस्य नायं गौरवात् अनुच्चारणदशायां वर्णानामनभिव्यक्तिस्तदुच्चारणरूपव्यंजकाभावान्न विरु
ध्यते अंधकारस्य घटानुपलंभवत् उत्पन्नो गकार इत्यादिप्रत्यक्षं सोयं गकार इत्यादिप्रत्यभिज्ञाविरोधादप्रमाणे
वर्णाभिव्यंजकध्वनिगतोत्पत्तिनिरूपितपरंपराविषयकत्वेन प्रमाणं वा तस्मान्न वेदानां क्षणिकत्वं ननु क्षणिकत्वा
भावेपि वियदादिप्रपंचवत् उत्पत्तिमत्त्वेन परमेश्वरकर्तृकतया पौरुषेयत्वापत्तौ अपौरुषेयत्वं वेदानामिति नित्यवासिद्धं
तो भज्येतेति चेन्न पुरुषेणोच्चार्यमाणत्वं पौरुषेयत्वं गुरुमतोपि अध्यापकपरंपरयापि पौरुषेयत्वापत्तेः नापि
पुरुषाधीनोत्पत्तिकत्वं पौरुषेयत्वं नैयायिकाभिमतपौरुषेयत्वानुमाने अस्मदादिना सिद्धसाधनापत्तेः किंतु स

जातीयोच्चारणानपेक्षोच्चारणविषयत्वं तथाच्चसर्गादिकाले परमेश्वरः पूर्वसर्गसिद्धवेदानुपूर्वीसमानानुपूर्वीकवेदं
रचितवान् नतुतद्विजातीयवेदमितिनसजातीयोच्चारणानपेक्षोच्चारणविषयत्वमपौरुषेयत्वंभारतादीनांतुस
जातीयोच्चारणानपेक्ष्यैवोच्चारणमितितेषांपौरुषेयत्वंएवंपौरुषेयापौरुषेभेदे। नागमोद्विधानिरूपितः इति
वेदांतपरिभाषायांआगमपरिछेदः॥ ॥४इदानीमर्थापत्तिर्निरूप्यते तत्रोपपाद्यज्ञानेनोपपादककल्प
नमेवार्थापत्तिः तत्रोपपाद्यज्ञानंकरणं उपपादकज्ञानंफलं येनविनायदनुपपन्नं तत्तत्रोपपाद्यं यस्याभावेयस्या
नुपपत्तिस्तत्तत्रोपपादकं यथा रात्रिंभोजनेनविनादिवाभुंजानस्यपीनत्वं अनुपपन्नमितितादृशंपीनत्वंउपपा
द्यंयथावारात्रीभोजनस्याभावेनाहदशपीनत्वस्यानुपपत्तिरितिरात्रीभोजनमुपपादकं रात्रिभोजनकल्पनारू

पायांप्रमितावर्थस्यापत्तिः कल्पनेतिषष्ठीसमासेनार्थापत्तिशब्दो वर्तते कल्पनाकरणपीनत्वादिज्ञाने तु अर्थस्याप
त्तिः कल्पना यस्मादिति बहुव्रीहीसमासेन वर्तत इति फलकरणयोरुभयोस्तत्प्रयोगः सेचार्थापत्तिर्द्विविधा दृष्टा
र्थापत्तिः श्रुतार्थापत्तिश्चेति तत्र दृष्टार्थापत्तिर्यथा इदं रजतमिति पुरोवर्तिनि प्रतिपन्नस्य रजतस्य नेदं रज
तमिति तत्रैव निषिध्यमानत्वं सत्यत्वे अनुपपन्नमिति रजतस्य सद्भिन्नत्वं सत्वात्यंताभाववत्त्वं वा मिथ्यात्वं कल्पयति
श्रुतार्थापत्तिर्यथा यत्र श्रूयमाणवाक्यस्य स्वार्थानुपपत्तिमुखेनार्थांतरकल्पनं सा एव श्रुतार्थापत्तिः यथा तर
ति शोकमात्मविदित्यत्र श्रुतस्य शोकशब्दवाच्यस्य बंधजातस्य ज्ञाननिवर्त्यत्वस्यानुपपत्त्या बंधस्य मिथ्यात्वं क
ल्पते यथा वा जीवी देवदत्तो गृहे नेति वाक्यश्रवणानंतरं जीविनो गृहासत्त्वं बहिःसत्त्वं कल्पयति श्रुतार्थापत्तिश्चाभि

देश

विधा अभिधानानुपपत्तिरभिहितानुपपत्तिश्च तत्र यत्रैकवाक्यैकश्रवणेऽन्वयाभिधानानुपपत्त्या अन्वयाभिधा
नोपयोगिपदांतरं कल्प्यते तत्राभिधानानुपपत्तिर्यथा द्वारमित्यत्रापिधेहि इत्यध्याहारः यथा वा विश्वजिता यजेते
त्यत्र स्वर्गकामपदाध्याहारः ननु द्वारमित्यादौ वाक्येऽन्वयाभिधानात् पूर्वमिदमन्वयाभिधानं पिधानोपस्थापक
पदं विनानुपपन्नमिति कथं ज्ञातमिति चेन्न अभिधानपदेन करणव्युत्पत्त्या तात्पर्यस्य विवक्षितत्वात् यथा च द्वार
कर्मपिधानक्रियाकसंसर्गपरत्वं पिधानोपस्थापकपदं विना अनुपपन्नमिति ज्ञानं तत्रापि संभाव्यते अभिहिता
नुपपत्तिस्तु यत्र वाक्यावगतोऽर्थो अनुपपन्नत्वेन ज्ञातः सन्नर्थांतरं कल्पयति तत्र द्रष्टव्या यथा स्वर्गकामो ज्योति
व ष्टोमेन यजेतेत्यत्र स्वर्गसाधनत्वस्य क्षणिकतया गतयाऽवगतस्य ज्योतिष्टोमस्यानुपपत्त्या मध्यवर्त्तिपूर्वं कल्प्यते न

चेयमर्थापत्तिरनुमानेंतर्भवितुमर्हति अन्वयव्याप्त्यज्ञानेन। नान्वयिन्यनंतर्भावात्व्यतिरेकिणश्चानुमानत्वंप्रा
गेवनिरस्तं अतएवार्थापत्तिस्थलेऽनुमिनोमीतिनानुव्यवसायः किंतु अनेनेदंकल्पयामीति नन्वर्थापत्तिस्थले इदम
 नेनविनानुपपन्नमितिज्ञानंकरणमित्युक्तंतत्रकिमिदंतेनविनानुपपन्नत्वंतदभावव्यापकाभावप्रतियोगित्वमि
त्व तिब्रूमः एवमर्थापत्तेर्ज्ञानांतरत्वेसिद्धेव्यतिरेकीनानुमानांतरंपृथ्वीतरेभ्योभिद्यतेइत्यादौगंधवत्त्वमितरभेदं विनानु
पपन्नमित्यादिज्ञानस्यकारणत्वात् अतएवानुव्यवसायः पृथिव्यामितरभेदंकल्पयामीति। व्यतिरेकीनानुमानांतरंपृ
थ्वीतरेभ्योभिद्यते इति इत्यर्थापत्तिपरिच्छेदः ५ इदानींषष्ठंनिरूप्यते ज्ञानकारणजन्याभावानुभवाऽसाधारण
कारणमनुपलब्धिरूपंप्रमाणं अनुमानादिजन्यातींद्रियाभावानुभवहेतावनुमानादावतिव्याप्तिवारणायाज

न्यांतौं अदृष्टादौ साधारणकारणे ऽतिव्याप्तिवारणाय असाधारणे ऽति अभावस्मृत्यसाधारणहेतुसंस्कारे ऽतिव्याप्तिवा
रणायानुभवेति विशेषणं न चाभावानुमितस्थलेप्यनुपलब्धेवाभावो गृह्यतां विशेषाभावादिति वाच्यं धर्माद्यनुपलब्धि
मत्त्वेपि तदभावानिश्चयेन योग्यानुपलब्धेरेवाभावग्राहकत्वात् ननु केयं योग्यानुपलब्धिः किं योग्यस्य प्रतियोगिनो
अनुपलब्धिः उत योग्याधिकरणे प्रतियोग्यनुपलब्धिः नाद्यः स्तंभेपि शगत्वादिभेदस्याप्रत्यक्षतापत्तेः नांतः आत्मनि
धर्माद्यभावस्यापि प्रत्यक्षतापत्तेरिति चेन्न योग्या चासावनुपलब्धिश्चेति कर्मधारयाश्रयणात् अनुपलब्धेर्योग्यताच नु
तर्कितप्रतियोगिसत्त्वप्रसंजितप्रतियोगिकत्वं यस्याभावो गृह्यते तस्य यः प्रतीयोगी तस्य सत्त्वेनाधिकरणे तर्कितेन प्र
संजितयोग्यमापादनयोग्यं यस्य प्रतियोग्युपलब्धिः स्वः अंधकारे तु तादृशोपादानाभावात्स्वरूपयस्यानुपलंभस्यत

त्वंतदनुपलब्धेर्योग्यत्वमित्यर्थः तथाहि स्फीतालोकवतिभूतलेयदिघटःस्यात्तदाघटोपलंभःस्यादितिआपा
दनसंभवात्तादृशभूतलेघटाभावोनुपलब्धिगम्यः अंधकारेषुतादृशापादनाभावात् नानुपलब्धिगम्यता अतएव
स्तंभेपिशाचसत्वेस्तंभवत् प्रत्यक्षत्वापत्यातदभावोनुपलब्धिगम्यः आत्मनिधर्मादिसत्वेप्यस्यातींद्रियतयानिरुक्तोप
लंभापादनासंभवात्धर्माद्यभावस्यानुपलब्धिगम्यत्वं ननुकरीत्याऽधिकरणेंद्रियसंनिकर्षस्थलेऽभावस्यानुपल
ब्धिगम्यत्वमनुमतं तत्रचक्लृप्तेंद्रियमेवाभावाकारवृत्तावपिकरणं इंद्रियान्वयव्यतिरेकानुविधानादितिचे
न्नप्रतियोग्यनुपलब्धेरप्यभावग्रहहेतुत्वेनक्लृप्तत्वेनकरणत्वमात्रस्यकल्पनात् इंद्रियस्याभावेनसहसंनिकर्षाभा
वेनाभावग्रहाहेतुत्वात् इंद्रियान्वयव्यतिरेकयोरधिकरणज्ञानाद्युपक्षीणत्वेनान्यथासिद्धेः ननुभूतलेघटोनेत्याद्यभा

वानुभवस्थलेभूतलांशेप्रत्यक्षत्वमुभयसिद्धमितितत्रवृत्तिनिर्गमनस्यावश्यकत्वेभूतलावछिन्नचैतन्यवन्निस्थघटाभा
वावछिन्नस्यापिप्रमातृअभिन्नतयाघटाभावस्यप्रत्यक्षत्वेवसिद्धांतेपीतिचेत्सत्यं अभावप्रतीतेः प्रत्यक्षत्वेपित
त्कारणस्यानुपलब्धेर्नामांतरत्वात्नहिफलीभूतज्ञानस्यप्रत्यक्षत्वेनतत्करणस्यप्रत्यक्षप्रमाणतानियमोऽस्तिदशमस्त्व
मसीत्यादिवाक्यजन्यज्ञानस्यप्रत्यक्षत्वेपितत्करणस्यवाक्यप्रमाणप्रत्यक्षप्रमाणभूत्वाभ्युपगमात् फलवैजात्यंविनाक
र्थंप्रमाणभेदइतिचेन्नवृत्तिवैजात्यमात्रेणप्रमाणवैजात्योपपत्तेः तथाचघटाद्यभावाकारावृत्तिर्नेंद्रियजन्याइंद्रियस्यवि
षयेणसंन्निकर्षात् किंतुघटाद्यनुपलब्धिमानांतरजन्येतिभवत्यनुपलब्धेर्मानांतरत्वं नन्वनुपलब्धिर्मानांतरया । रूप
क्षेप्यभावप्रतीतेप्रत्यक्षत्वेघटवतिघटाभावभ्रमस्यापिप्रत्यक्षत्वापत्तौतत्राप्यनिर्वचनीयघटाभावोऽभ्युपगम्येतनवे

ष्टापत्तिः तस्यमायोपादनकत्वेऽभावत्वानुपपत्तेर्मायोपादनकत्वाभावेमायायाःसकलकार्योपादानत्वानुपपत्तिश्चेन्नघ
टवतिघटाभावभ्रमोनतत्कालोत्पन्नघटाभावविषयकः किंतुभूतलरूपादौविद्यमानोलौकिकोघटाभावोभूतले
आरोप्यतइत्यन्यथाख्यातिरेवआरोप्यसंन्निकर्षस्थलेसर्वत्रान्यथाख्यातेरेवव्यवस्थापनात् अस्तुवाप्रतियोगिमति
तदभावभ्रमस्थलेतदभावस्यानिर्वचनीयत्वंतथापितदुपादानंमायैवनह्युपादानोपादेययोरत्यंतसाजात्यंतंतु
पटयोरपितंतुत्वपटत्वादिनावैजात्यात् यत्किंचित्साजात्यस्यमायायाअनिर्वचनीयघटाद्यभावस्यचमिथ्यात्वध
र्मस्यविद्यमानत्वात् अन्यथाव्यावहारिकघटाद्यभावंप्रतिकथंमायोपादनमितिकुतोनाशंक्येथाः नचविजातीय
योरप्युपादानोपादेयभावेब्रह्मैवजगदुपादानंस्यादितिनवाच्यंप्रपंचविभ्रमाधिष्ठानस्वरूपस्यतस्येष्टत्वात् परिण

भित्वरूपस्योपादानत्वस्यनिरवयवेब्रह्मण्यनुपपत्तेः नथाचप्रपंचस्यपरिणाम्युपादानंमायानब्रह्मेतिसिद्धांनद्रस्यलंप्रसं
गागतप्रपंचेनसत्ताभावश्चतुर्विधः प्रागभावः प्रध्वंसाभावोऽत्यंताभावोऽन्योन्याऽभावश्चेतिमृत्पिंडादौकारणेका
र्यस्यघटादेरुत्पत्तेः पूर्वयोऽभावः सप्रागभावः सत्त्वभविष्यतीतिप्रतीतिविषयः तत्रैवघटस्यमुद्गरप्रहारानंतरंयो
भावः सप्रध्वंसाभावः ध्वंसस्यापिस्वाधिकरणेकपालनाशेनाशएवनचघटोन्मज्जनापत्तिः ध्वंसध्वंसस्यापि
घटप्रतिघटप्रतियोगिकध्वंसत्वात् अन्यथाप्रागभावध्वंसात्मकघटस्यविनाशेप्रागभावोन्मज्जनापत्तिः नचैव
मपियत्रध्वंसाधिकरणंचैतन्यंतदासिद्धेः आरोपितप्रतियोगिकध्वंसस्याधिष्ठानेप्रतीयमानस्याधिष्ठानमात्र
त्वात् तदुक्तं अधिष्ठानावशेषोहिनाशः कल्पितवस्तुनइति एवंप्रकृतिरूप्यविनाशोपीदमवछिन्नचैतन्यमेवयत्रा
तादृशमधिकरणंयदिचैतन्यव्यतिरिक्तंतदातस्यानित्यत्वमसिद्धं ब्रह्मव्यतिरिक्तस्यसर्वस्यब्रह्मज्ञाननिवर्त्यत्वावक्ष्यमाण

धिकरणे यस्य कालत्रयेप्यभावः सं त्यंताभावः यथावायौरूपात्यंताभावः सोपिवियदादिवत् ध्वंसप्रतियोग्येवइद
मिदंनेतिप्रतीतिविषयोऽन्योन्याभावः अयमेवविभागोभेदः पृथक्त्वंचेतिव्यवह्रियते भेदातिरिक्तपृथक्त्वेप्रमा
णाभावात् अन्यंचान्योन्याभावोधिकरणस्यसादित्वेसादिरेव यथाघटेपटभेदः अधिकरणस्यानादित्वेअनादिरेव
यथाजीवेब्रह्मभेदोब्रह्मणिजीवभेदः द्विविधोपिभेदोध्वंसप्रतियोग्येव अविद्यानिवृत्तौतत्परतंत्राणांनिवृत्त्यवश्यं
भावात् पुनरपिभेदोद्विविधः सोपाधिकोनिरुपाधिकश्चेति तत्रोपाधिसत्ताव्याप्यसत्ताकत्वंसोपाधिकत्वंतच्छू
न्यत्वंनिरुपाधिकत्वं तत्राद्यो यथाएकस्यैवाकाशस्यघटोपाधिभेदेनभेदः यथावाएकस्यसूर्यस्यजलभाजनभेदेन
भेदः यथावाएकस्यब्रह्मणोंतःकरणभेदद्भेदः निरुपाधिकभेदो यथाघटेपटभेदः नचब्रह्मण्यपिप्रपंचभेदाभ्युपग

मेऽद्वैतविरोधः तात्त्विकभेदानभ्युपगमे वियदादिवदद्वैताव्याघातकत्वात् प्रपंचस्याद्वैते ब्रह्मणि कल्पितत्वांगीका
रात् तदुक्तं सुरेश्वराचार्यैः अक्षमां भवतः केयं साधुवंत्वं विद्वेषणं कल्पकल्पने किंन्वपस्यसि संसारं तत्रैवाज्ञानक
ल्पितमिति अतएव विवरणेऽविद्यानुमाने प्रागभावव्यतिरिक्तत्वं विशेषणं तत्त्वप्रदीपिकायां चाविद्यालक्षणे भावत्वंवि
शेषणं संगच्छते एवं चतुर्विधानामभावानां योग्याप्रतीत्यानुपलब्ध्या प्रतीतिः तत्रानुपलब्धिमानांतरं एवमुक्तानां
प्रमाणानां प्रामाण्यं स्वत एवोत्पद्यते ज्ञायते च तथाहि स्मृत्यनुभवसाधारणं संवादिप्रवृत्त्यनुकूल्यं तद्वति तत्प्रकारक
त्वं ज्ञानस्य प्रामाण्यं तच्च ज्ञानसामान्यसामग्रीप्रयोज्यं न त्वधिकं गुणमपेक्षते प्रमामात्रेऽनुगतगुणाभावात् नापि प्रत्य
क्षमायां भूयोऽवयवेंद्रियसंनिकर्षः रूपादिप्रत्यक्षे आत्मप्रत्यक्षे च तदभावात् सत्यपि तस्मिन् पीतः शंख इति प्र।

साध्यस्य भ्रमत्वाच्च अतएव न सल्लिंगपरामर्शादिकमप्यनुमित्यादिप्रमायां गुणः असल्लिंगपरामर्शादिस्थलेपि विषया
बाधेनानुमित्यादेः प्रमात्वात् न चैवमप्रमापि प्रमा स्यात् ज्ञानसामान्यसामग्र्या अविशेषादिति निवाच्यं दोषाभावस्यापि
हेतुत्वांगीकारात् न चैवं परतस्त्वं आगंतुकभावकारणापेक्षायामेव परतस्त्वात् ज्ञायते च प्रामाण्यं स्वतः स्वतो ग्राह्यत्वं
च दोषाभावे सति यावत् स्वाश्रयग्राहकसामग्रीग्राह्यत्वं स्वाश्रयो वृत्तिज्ञानं तद्ग्राहकं तु साक्षिज्ञानं तेन वृत्तिज्ञाने गृ॰
ह्यमाणे तद्गतं प्रामाण्यमपि गृह्यते न चैवं प्रामाण्यसंशयानुपपत्तिः तत्र संशयानुरोधेन दोषस्यापि सत्त्वेन दोषाभा
वघटितस्वाश्रयग्राहकाभावेन तत्र प्रामाण्यस्यैवाग्रहात् यद्वा यावत्स्वाश्रयग्राहकग्राह्यत्वयोग्यत्वं स्वतस्त्वं संशय॰
स्थले प्रामाण्यस्योक्तयोग्यतासत्त्वेपि दोषवशेनाग्रहान्न संशयानुपपत्तिः अप्रामाण्यं तु न ज्ञानसामान्यसामग्रीप्रयो॰

ज्यंमायामप्यप्रामाण्यापत्तेः किंतुदोषप्रयोज्यंनाप्यप्रामाण्यं यावत्स्वाश्रयग्राहकग्राह्यंअप्रामाण्यंघटकंतदभाववत्त्वादेव
वृत्तिज्ञानानुपनीतत्वेसाक्षिणागृहीतुमशक्यत्वात् किंतुविसंवादिप्रवृत्त्यादिजनकंलिंगकानुमित्यादिविषयइतिपरतएव
प्रामाण्यमुत्पद्यतेज्ञायतेज्ञायते इत्यनुपलब्धिप्रामाण्यनिरूपणीयःपरिछेदः६॥ ॥एवंनिरूपितानांप्रमाणानांप्रामाण्यं
द्विविधंव्यावहारिकत्वादेकत्वंपारमार्थिकत्वावेदकत्वंचेतितत्रब्रह्मस्वरूपावगाहिप्रमाणव्यतिरिक्तसर्वप्रमाणनाम
द्यंप्रामाण्यंतद्विषयाणांव्यवहारदशायांबाधाभावात् द्वितीयंतुजीवब्रह्मैक्यपराणांसदेवसोम्येदमग्रआसीदित्यादी
नांतत्त्वमसीत्यंतानांतद्विषयस्यजीवपरैक्यस्यकालत्रयाबाध्यत्वात् तच्चैक्यंतत्त्वंपदार्थज्ञानाधीनज्ञानमितिप्रथमंतत्त्वंप
दार्थौलक्षणप्रमाणाभ्यांनिरूप्यते तत्रलक्षणंद्विविधं स्वरूपलक्षणंतटस्थलक्षणंचेति तत्रस्वरूपमेवलक्षणंस्वरूपल

क्षणं यथा सत्यं ज्ञानमनंतं ब्रह्मेत्यत्र सत्यादिकं स्वरूपलक्षणं ननु स्वस्य स्ववृत्तित्वाभावे कथं लक्षणमिति चेन्न स्वस्यैव स्वापेक्ष
याधर्मिधर्मभावकल्पनया लक्षणत्वसंभवात् तदुक्तं आनंदो विषयानुभवो नित्यत्वं चेति संति धर्माः अपृथक्त्वेपि चैतन्या
त्पृथगिवावभासंत इति तटस्थलक्षणं नाम यावल्लक्ष्यकालमनवस्थितत्वे सति यद्व्यावर्तकं तदेव यथा गंधवत्त्वं पृ
थिवीलक्षणं महाप्रलये परमाणुषु उत्पत्तिकाले घटादिषु गंधाभावात् प्रकृते च जगज्जन्मादिकारणत्वं अत्र जगत्प
देन कार्यजातं विवक्षितं कारणं च कर्तृत्वमतोऽविद्यादौ नातिव्याप्तिः कर्तृत्वं च तत्तदुपादानगोचरापरोक्षज्ञाना
चिकीर्षाकृतिमत्त्वं ईश्वरस्य तावदुपादानगोचरापरोक्षज्ञानसद्भावे च यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः त
स्मादेतद्ब्रह्म नामरूपमन्नं च जायत इत्यादिश्रुतिर्[illegible]नं तादृशचिकीर्षासद्भावे च सोकामयत बहु स्यां प्रजायेयेत्यादि

श्रुतिर्मानं तादृशः कर्तान्वतन्मानो कुरुतेत्यादिवाक्यं ज्ञानेच्छाद्यःन्यत्वमगर्भलक्षणत्रितयं विवक्षितं अन्यथा व्यर्थवि
शेषणत्वापत्तेः अतएव जन्मस्थितिध्वंसानामन्यतमस्यैव लक्षणे प्रवेशः एवं च लक्षणानि नव संपद्यन्ते ब्रह्मणो जगज्ज
न्मादिकारणत्वे च यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्तीत्यादिमानं यद्वा निखिलजग
दुपादानत्वं ब्रह्मणो लक्षणं उपादानत्वं च जगदध्यासाधिष्ठानत्वं जगदाकारेण परिणममानमायाधिष्ठानत्वं वा एतादृ
शमेवोपादानत्वमभिप्रेत्य इदं सर्वं यदयमात्मा सच्च त्यच्चाभवत् बहु स्यां प्रजायेयेत्यादिश्रुतिषु ब्रह्मप्रपंचयोस्तादा
त्म्यव्यपदेशः घटः सन् घटो भाति घट इष्ट इत्यादिलौकिकव्यपदेशोऽपि सच्चिदानंदरूपब्रह्मण्येकाध्यासात् नन्वानंदांश
स्य क्वचिदध्यासात् घटादेरिष्टत्वव्यवहारे दुःखस्यापि तत्राध्यासात् तत्रापीष्टत्वादिव्यवहारापत्तिरिति चेन्न आरो

पेसतिनिमित्तानुसरणं नतुनिमित्तमस्तीत्यारोपइत्यभ्युपगमेनदुःखादौसच्चिदंशाध्यासेप्यानंदांशाध्यासाभावात् ज
गतिनामरूपांशद्वयव्यवहारस्तु अविद्यापरिणामात्मकनामरूपसंबंधात् तदुक्तं अस्तिभातिप्रियंरूपंनामचेत्यंच
पंचकं आद्यंत्रयंब्रह्मरूपंजगद्रूपंततोद्वयमिति अथसृष्टिनिरूपणं तत्रसर्गकालेपरमेश्वरः सृज्यमानप्रपंचवै।
चित्र्यहेतुप्राणिकृतोपरिमितानिरूपाणिशक्तिविशेषविशिष्टमायासहितः सन्नामरूपात्मकनिखिलप्रपंचप्रथमं
बुद्धावाकलय्येदंकरिष्यामीतिसंकल्पयति तदैक्षतबहुस्यांप्रजायेयेतिसोकामयतबहुस्यांप्रजायेयेत्यादिश्रुतेः त
त्राकाशादीनिपंचभूतान्यंचीकृतानितन्मात्रपदप्रतिपाद्यान्युत्पद्यंतेतत्राकाशस्यशब्दोगुणः वायोस्तुशब्दस्पर्शौते
जसस्तुशब्दस्पर्शरूपाणिअपांतुशब्दस्पर्शरूपरसाः पृथिव्यास्तुरूपरसगंधस्पर्शाः तत्तुशब्दस्याकाशमात्रगुणत्वं।

बाधादावपितदुपलंभात् नचासौभ्रमः बाधकाभावात् इमानिभूतानित्रिगुणमायाकार्याणित्रिगुणानिएतैश्चस
त्वगुणोपेतैःश्रोत्रत्वक्चक्षूरसनघ्राणानि पंचेंद्रियाणिमनोबुद्धिचित्ताहंकाराणिचजायंते श्रोत्रादीनांक्रमेणदि
ग्वातार्कवरुणाश्विनोरधिष्ठातृदेवताः मनआदीनांचतुर्णांक्रमेणचंद्रचतुर्मुखाच्युतशंकराःअधिष्ठातृदेवताः
एतैरेवरजोगुणोपेतैःपंचभूतैर्यथाक्रमंवाक्पाणिपादपायूपस्थानिकर्मेंद्रियाणिजायंते तेषांचक्रमेणवाह्नींद्रो
पेंद्रमृत्युप्रजापतयोऽधिष्ठातृदेवताः रजोगुणोपेतैःपंचभूतैरेवपंचवायवः प्राणापानव्यानवायुरुदानः कंठस्थान
वर्तीअशितपीतान्नादिसमीकरणकरः समानः नाभिस्थानवर्तीतैरेवतमोगुणोपेतैरपंचीकृतभूतानिजायंतेते
षांत्रिवृत्तमेकैकंकरवाणीतित्रिवृत्करणसाम्य॰पंचीकरणोपलक्षणार्थत्वात् पंचीकरणप्रकारश्चेत्थंआका

शामादौ द्विधा विभज्य तयोरेकं भागं पुनश्चतुर्द्धा विभज्य तेषां चतुर्णां मंशानां वाय्वादिषु योजनमेवं वाय्वादिकमप्याका
शादिषु योजनं एवं तेजआदीनामपि तदेवमेकैकस्यार्द्धं स्वांशात्मकं सार्द्धांतरं चतुर्भूतमयमिति पृथिव्यादेः स्वांशा
धिक्यात् पृथिव्यादिव्यवहारः तदुक्तं वैशेष्यात्तु तद्वादस्तद्वाद इति पूर्वोक्तैः। अपंचीकृतभूतैर्लिंगशरीरं परलोक
यात्रानिर्वाहकं मोक्षपर्यंतस्थायि मनोबुद्धिभ्यामुपेतं ज्ञानेंद्रियपंचकं कर्मेंद्रियपंचकं प्राणादिपंचयुक्तं जायते
तदुक्तं पंचप्राणमनोबुद्धिदशेंद्रियसमन्वितं अपंचीकृतभूतोत्थं सूक्ष्मांगं भोगसाधनमिति तच्च द्विविधं परम
परं च परं [illegible] हिरण्यगर्भलिंगशरीरं अपरमस्मदादिलिंगशरीरं तत्र हिरण्यगर्भलिंगशरीरं महत्तत्त्वं अस्मदादि
लिंगशरीरं चाहंकार इत्याख्यायते एवं तमोगुणयुक्तेभ्यः पंचकृतभूतेभ्यो भूम्यंतरिक्षस्वर्गमहर्जनस्तपःसत्यात्म

कस्योर्द्ध्वलोकसप्तकस्य अतलवितलसुतलरसातलतलातलमाहातलपातालाख्याअधोलोकसप्तकस्य ब्रह्मांडस्यजरायु
जांडजस्वेदजोद्भिजाख्यचतुर्विधस्थूलशरीराणांचोत्पत्तिः तत्रजरायुभ्योजातानिमनुष्यपश्वादीनीशरीराणिवृक्षादी
नांपापफलभोगायतनत्वंतत्रपरमेश्वरस्यपंचतन्मात्राद्युत्पत्तौसप्तदशावयवोपेतलिंगशरीरोत्पत्तौचसाक्षात्कर्तृत्व
द्वतरनिरविच्छप्रपंचात्ततोहिरण्यगर्भोप्रथमोजीवः तत्वाराहंताहमिमास्तितोदेवताअनेनजीवेनात्मनानुप्रविश्य
नामरूपेव्याकरवाणीतिश्रुतेः हिरण्यगर्भनाममूर्तित्रयादन्यः प्रथमोजीवः सवैशरीरीप्रथमः सवैपुरुषउच्यतेआ
दिकर्तासभूतानांब्रह्माग्रेसमवर्त्तते हिरण्यगर्भः समवर्त्तताग्रः इत्यादिश्रुतेः॥ ॥एवंभूतभौतिकसृष्टिर्निरूप
पिताइदानींप्रलयोनिरूप्यते प्रलयोनामत्रैलोक्यविनाशः सचतुर्विधः नित्यः नैमित्तिकः प्राकृतः आत्यंतिकश्चेति

तत्रनित्यप्रलयः सुषुप्तिः तस्याः सकलकार्यप्रलयरूपत्वात् धर्माधर्मपूर्वसंस्काराणांच तदाकारणात्मनावस्थानं तेन सु
षुप्त्याउत्थितस्यन सुखदुःखानुपपत्तिः नच सुषुप्तावंतःकरणस्याविनाशे नदधीनप्राणादिक्रियानुपपत्तिः वस्तुनः वस्तु
 तःश्वासाद्यभावेपिवृत्कपल्ध्येः पुरांतरीयभ्रांतिमात्रत्वान् सुप्तशरीरोपलभकवत् नचैवं सुप्तस्यपरेताविशेषः सुप्त
स्यहि लिंगशरीरं संस्कारात्मना त्रैववर्तते न परेतस्यतुलोकांतरइति वैलक्षण्यात् यद्वांतः करणस्य द्वेशक्तिः ज्ञानशक्तिः
क्रियाशक्तिश्चेति तत्रज्ञान विशिष्टांतःकरणस्यनाशः नक्रियाविशिष्टस्येति प्राणाद्यवस्थानमविरुद्धं यदासुप्तः स्व
प्नंनकंचनपश्यति अथास्मिन्प्राणएकधाभवति अथैनं वाक्सर्वैर्नामभिः सहाप्येतिसतासोम्यतदासंपन्नोभवति
 स्वमपीतोभवतीत्यादिरुक्तसुषुप्तौ[illegible]नंप्राकृतप्रलयस्तु हिरण्यगर्भकार्यब्रह्मविनाशनिमित्तकः सकलकार्यविना

ना: यदा तु प्रागेवोत्पन्नब्रह्मसाक्षात्कारस्य कार्यब्रह्मणो ब्रह्मांडाधिकारप्रारब्धकर्मसमाप्तौ विदेहकैवल्यात्मिका परामु
क्तिस्तदा तल्लोकवासिनामप्युत्पन्नब्रह्मसाक्षात्काराणां ब्रह्मणा सह विदेहकैवल्यं ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंच
रे परस्यांते कृतात्मनः प्रविशंति परं पदमिति श्रुतेः एवं स्वर्गलोकवासिभिः सह कार्यब्रह्मणि मुच्यमाने तदधिष्ठितब्रह्मां
डतदंतर्वर्तिनिखिललोकांतर्गतस्थावरादीनां भौतिकादीनां भूतानां च प्रकृतौ मायायां प्रलयः न तु ब्रह्मणि बाधरू
पविनाशस्येव ब्रह्मनिष्ठत्वात् प्राकृत इत्युच्यते कार्यब्रह्मणो दिवसावसाननिमित्तकस्त्रैलोक्यविनाशमात्रप्रलयो नै।
मित्तिकः प्रलयः ब्रह्मदिवसश्चतुर्युगसहस्रपरिमितिकालः चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यत इ[ति]त्यादिवच।
नात् प्रलयकालो दिवसकालपरिमितः रात्रिकालस्य दिवसकालतुल्यत्वात् प्राकृतिकप्रलये नैमित्तिकप्रलये च

पुराणवचनानि प्रमाणानि द्विपरार्द्धे त्वतिक्रांते ब्रह्मणः परमेष्ठिनः तदा प्रकृतयः सप्त कल्पंते प्रलयायहि एष प्राकृतिको रा
जन्प्रलयो यत्र लीयते इति वचनं प्राकृतिकप्रलये मानं एष नैमित्तिकः प्रोक्तो प्रलयो यत्र विश्वसृक् शेतेऽनंतासने नित्यम
त्मसात्कृत्य चात्मभूरिति वचनं नैमित्तिकप्रलये मानं तुरीयप्रलयस्तु ब्रह्मसाक्षात्कारनिमित्तः सर्वमोक्षः स चैकजीव
वादे युगपदेव नानाजीववादे क्रमेण सर्वमेकीभवतीत्यादिश्रुतेः तत्राद्यास्त्रयोपि प्रलयाः कर्मोपरमनिमित्तः तुरीय
स्तु ज्ञानोदयनिमित्तो लयोऽज्ञानेन सहैवेति विशेषः चतुर्विधः प्रलयो निरूपितः तस्येदानीं क्रमो निरूप्यते भूतानां भौ
तिकानां च न कारणलयक्रमेण लयः कारणलयसमये कार्याणामाश्रयमंतरेणावस्थानानुपपत्तेः किंतु सृष्टिक्रमविप
रीतक्रमेण तत्तत्कार्यनाशे तत्तज्जनकादृष्टनाशस्यैव प्रयोजकत्वेनोपादाननाशस्याप्रयोजकत्वात् अन्यथा न्यायमतेपि म

माहाप्रलये पृथिवीपरमाणुगतरूपरसादेरविनाशपत्तेः तथाच पृथिव्या अप्सु अपां तेजसी तेजसो वायौ वायोराकाशे आ
काशस्य जीवाहंकारे तस्य च हिरण्यगर्भाहंकारे तस्य चाविद्यायामित्येवं रूप एव प्रलयः तदुक्तं विष्णुपुराणे जगत्प्र
तिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते तेजस्यापः प्रलीयन्ते तेजो वायौ प्रलीयते॥१॥ वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीय
ते अव्यक्तं पुरुषे ब्रह्मन्निष्कले संप्रलीयते २ पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः इत्येवंविधप्रलयकारणं
तत्पदार्थस्य ब्रह्मणस्तटस्थलक्षणं न तु वेदान्तैर्ब्रह्मणि जगत्कारणत्वेन प्रतिपाद्यमाने सति सप्रपंचब्रह्म स्यात् अन्य
था सृष्टिवाक्यानामप्रामाण्यापत्तिरितिचेन्न नहि सृष्टिवाक्यानां सृष्टौ तात्पर्यं किं त्वद्वितीये ब्रह्मण्येव तत्प्रतिपत्तौ क
थं सृष्टेरुपयोगः इत्थं सृष्टिमनुपन्यस्य निषेधो ब्रह्मणि प्रतिपाद्येत तदा ब्रह्मणि प्रतिषिद्धस्य प्रपंचस्य वायौ प्र

निश्चिद्रूपस्यैव ब्रह्मणोऽन्यत्रावस्थानशंकायां निर्विचिकित्समद्वितीयत्वं नाप्रतिपादितं स्यात् ततः सृष्टिवाक्यात्
ब्रह्मणोपादानत्वज्ञाने सति उपादानं विना कार्यस्यान्यत्र सद्भावशंकायां निरस्तायां नेत्यादिना ब्रह्मण्यपि तस्यासत्त्वोप
पादने प्रपंचस्य तुच्छावगमे निरस्ताखिलद्वैतविभ्रममखंडसच्चिदानंदैकरसं ब्रह्म सिद्ध्यतीति परंपरया सृष्टिवाक्या
नामप्यद्वितीये ब्रह्मण्येव तात्पर्यं उपासनाप्रकरणपठितसगुणब्रह्मप्रतिपादकानामुपासनाविध्यपेक्षितगुणदोष
मात्रपरत्वं न गुणपरत्वं निर्गुणप्रकरणपठितानां सगुणवाक्यानां तु निषेधवाक्यापेक्षितनिषेध्यसमर्पकत्वेन न वि
नियोग इति न किंचिदपि वाक्यमद्वितीयब्रह्मप्रतिपादनेन विरुध्यते तदेवं स्वरूपतटस्थलक्षणलक्षिततत्पदवाच्य
मीश्वरचैतन्यं मायाप्रतिबिंबरूपमिति केचित् तेषामयमाशयः जीवपरमेश्वरसाधारणं चैतन्यमात्र बिंबं तस्यैव बिं

बस्याविद्यात्मकायामायायांप्रतिबिंबमीश्वरश्चैतन्यंअंतःकरणेषुप्रतिबिंबितंजीवश्चैतन्यंकार्योपाधिरयंजीवःकारणो
पाधिरीश्वरइतिश्रुतेः एतन्मतेजलाशयगतशरावगतसूर्यप्रतिबिंबयोरभेदअविद्यात्मकोपाधेर्व्यापकतयात्तदुपा
धिरीश्वरस्यापिव्यापकत्वंअंतःकरणस्यपरिछिन्नतयात्तदुपाधिजीवस्यापिपरिछिन्नत्वं एतन्मतेऽविद्याकृताजी
वदोषाजीवइवपरमेश्वरेपिस्युःउपाधेःप्रतिबिंबपक्षपातीत्वादीश्वरस्वरसाद्बिंबात्मकईश्वरश्चैतन्यमित्यपरेतेषा
मयमाशयःएकमेवचैतन्यंबिंबत्वाक्रांतमीश्वरश्चैतन्यंप्रतिबिंबत्वाक्रांतंजीवश्चैतन्यंबिंबप्रतिबिंबकल्पनोपा
धिश्चएकजीववादेअविद्याअनेकजीववादेत्वंतःकरणान्यैंअविद्यांतःकरणरूपोपाधिप्रयुक्तोजीवपरभेदः। व
उपाधिकृतदोषश्चप्रतिबिंबेजीवएववर्ततेनतुबिंबेपरमेश्वरेउपाधेःप्रतिबिंबपक्षपातित्वात् एतन्मतेचगग

नसूर्यस्यजलादौभासमानप्रतिबिंबसूर्यस्येवपरयोरभेदः ननुग्रीवास्थमुखस्यदर्पणप्रदेशइवबिंबचैतन्यप
रमेश्वरस्यजीवप्रदेशेऽभावान्नतस्यसर्वान्तर्यामित्वंनस्यादितिचेन्न साभ्रनक्षत्रस्याकाशस्यजलादौप्रतिबिंबित
त्वेबिंबभूतमहाकाशस्यापिजलादिप्रदेशदर्शनेनापरिछिन्नबिंबस्यप्रतिबिंबसंबंधित्वेऽपरिछिन्नब्रह्मबिंब
स्यप्रतिबिंबदेशसंबंधाविरोधात् नचरूपहीनस्यब्रह्मणोनप्रतिबिंबसंभवः रूपवतएवतथादर्शनादितिवाच्यं निरू
पस्यापिरूपस्यप्रतिबिंबदर्शनात् नचनिरूपस्यद्रव्यस्यप्रतिबिंबाभावनियमः आत्मनोद्रव्यत्वाभावस्योक्तत्वात्
एकधाबहुधाचैवदृश्यतेजलचंद्रवत् यथाह्ययंज्योतिरात्माविवस्वानपोभिन्नाबहुधैकोगच्छन्नित्यादिवाक्येन
ब्रह्मप्रतिबिभावानुमानस्यबाधितत्वाच्च तदेवंतत्पदवाच्यार्थोनिरूपितः इदानींपदवाच्यार्थोनिरूप्यते एक

जीववादे अविद्याप्रतिबिंबो जीवः अनेकजीववादे अंतःकरणप्रतिबिंबः सच जाग्रत्स्वप्नसुषुप्तिरूपावस्थात्रयवान् त
त्र जाग्रद्दशानामेंद्रियजन्यज्ञानावस्था अवस्थांतरे इंद्रियाभावान्नातिव्याप्तिः इंद्रियजन्यज्ञानं चांतःकरणवृत्तिः रूप
ज्ञानस्यानादित्वात् साचांतःकरणवृत्तिरावरणाभिभवार्था इत्येकं मतं तथाहि अविद्योपहितचैतन्यजीवत्वपक्षे घटा
धिष्ठानचैतन्यस्य जीवरूपतया जीवस्य सर्वदा घटादिभानप्रसक्तौ घटावच्छिन्नचैतन्यावरकमज्ञानं मूलाविद्यापरतंत्र
मवस्थापरवाच्यमभ्युपगंतव्यं एवं सति न घटादेर्भानप्रसंगः अनावृतचैतन्यसंबंधस्यैव भानप्रयोजकत्वात् तस्याव
रणस्य सदातनत्वे कदाचिदपि घटभानं न स्यादिति तद्भंगे वक्तव्ये तद्भंजकं न चैतन्यमात्रं तद्भासकस्य तदनिवर्तकत्वान्ना
पि वृत्त्युपहितं चैतन्यं परोक्षस्थलेपि तन्निवृत्त्यापत्तेरिति परोक्षव्यावृत्तिविशेषस्य तदुपहितवा आवरणभंगजनकत्वमि

स्व

त्यावरणाभिभवार्थावृत्तिरुच्यते संबंधार्थावृत्तिरित्यपरंमतं तत्राविद्योपाधिकोऽपरिछिन्नोजीवः सचघटादिप्र
देशेविद्यमानोपिघटाद्याकारापरोक्षवृत्तिविरहदशायांनघटादिकमवभासयतिघटादिनासंबंधाभावात् तत्तदा
कारवृत्तिदशायांतुभासयतितदासंबंधसत्वात् नन्वविद्योपाधिकस्यापरिछिन्नस्यजीवस्यस्वतएवसमस्त
वस्तुसंबंधस्याविरहवृत्तिदशायांसंबंधाभावाभिधानमसंगतंअसंगनदृष्ट्याचसंबंधाभावाभिधानेचवृत्यनं
तरमपिसंबंधोनस्यादितिचेत् उच्यतेनहिवृत्तिविरहदशायांजीवस्यघटादिभाससहसंबंधसामान्यंनिषेधा
मः किंतर्हिघटादिभानप्रयोजकसंबंधविशेषः सचसंबंधविशेषोविषयजीवचैतन्यस्यचव्यंग्यव्यंजकतालक्ष
णः कारांचित्कसदाकारवृत्तिनिबंधनः तथाहितैजसमंतःकरणंस्वछद्रव्यत्वात्स्वतएवजीवचैतन्याभिव्यंजकंस

मर्थं घटादिकं तु न तथा अस्वच्छद्रव्यत्वात् साकारवृत्तिदशायां तु वृत्त्यभिभूतजाड्यधर्मकतया स्वच्छत्वादितच्चैतन्याभिव्यं
जनयोग्यतां आश्रयतया च वृत्त्युदयानंतरं चैतन्यमभिव्यनक्ति तदुक्तं विवरणे अंतःकरणं हि स्वस्मिन्निव स्वसंस
र्गिण्यपि घटादौ चैतन्याभिव्यक्तियोग्यतामापादयतीति दृष्टं चास्वच्छद्रव्यस्यापि स्वच्छद्रव्यसंबंधिदशायां प्रतिबिंबग्रा
हित्वं चैतन्याभिव्यक्तित्वं च तत्र प्रतिबिंबितत्वं एवंविधाभिव्यंजकसिध्यर्थमेव वृत्तेरपरोक्षस्थले बहिर्निर्गमनांगीका
रः परोक्षस्थले तु वन्ह्यादौ वृत्तिसंसर्गाभावान्न चैतन्याभिव्यंजकतया नापरोक्षत्वं चैतन्याभिव्यंजकत्वमिति दृष्टव्यं ए
वं जीवस्यापरिछिन्नत्वेपि वृत्तेः संबंधार्थं निरूपितं इदानीं परिछिन्नत्वपक्षे संबंधार्थत्वं प्रतिपाद्यते तथाहि अंतःक
रणोपाधिको जीवः तस्य च घटाद्यनुपादानतया घटादिदेशासंबंधात् किंतु ब्रह्मैव घटाद्युपादानं तस्य मायोपहित

स्यघटान्वयित्वात् अतएवब्रह्मणः सर्वज्ञता तथाचजीवघटाद्यधिष्ठानब्रह्मचैतन्याभेदमंतरेण घटाद्यवभासासं
भवेप्राप्ते तदवभासाय घटाद्यधिष्ठानब्रह्मचैतन्याभेदसिध्यर्थं घटाद्याकारावृत्तिरिष्यते ननु वृत्याकथं प्रमातृ
चैतन्यविषयचैतन्ययोरभेदः संपाद्यते घटांतःकरणोपाधिभेदेन तदवच्छिन्नचैतन्ययोरभेदासंभवादितिचेन्न वृत्ते
र्विषयदेशनिर्गमनांगीकारे वृत्यंतःकरणविषयाणामेकदेशस्थत्वेनोपधेयभेदाभावस्योक्तत्वात् एवमपरोक्ष
स्थले वृत्तेर्मतभेदे विनियोग उपपादितः इंद्रियाजन्यविषयगोचरापरोक्षांतःकरणवृत्त्यवस्था स्वप्नावस्था जाग्र
दवस्था व्यावृत्त्यर्थं इंद्रियाजन्येति अविद्यावृत्तिमत्यां सुषुप्तावतिव्याप्तिवारणायांतःकरणेति सुषुप्तिर्नामाविद्या
गोचराविद्यावस्था जाग्रत्स्वप्नयोरविद्याकारवृत्तेरंतःकरणवृत्तेरंतःकरणवृत्तित्वान्नातिव्याप्तिः अत्र केचिन्म

रणमुछ्योरवस्थांतरत्वमाहुः अत्र नयोरवस्थांतर्यांतर्भावबहिर्भावयोस्त्वंपदार्थनिरूपणेउपयोगाभावान्न
तंत्रप्रयत्यते तस्य च मायोपाध्यपेक्षया एकत्वं अंतःकरणोपाध्यपेक्षया नानात्वं व्यवह्रीयते एतेन जीवस्याणुत्वंप्र
त्युक्तं बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रो ह्यपरोपि दृष्ट इत्यादौ जीवस्य बुद्धिशब्दवाच्यांतःकरणपरिणामोपा
धिकपरिमाणश्रवणात् स च जीवः स्वयंप्रकाशः स्वप्नावस्थामधिकृत्यात्रायं पुरुषः स्वयंज्योतिरिति श्रुतेः अनु
भवरूपश्च प्रज्ञानघन इति श्रुतेः अनुभवामीति व्यवहारस्तु वृत्तिप्रतिबिंबितं चैतन्यमादायोपपद्यते एवं त्वंप
दार्थो निरूपितः अधुना तत्त्वंपदार्थयोरैक्यं महावाक्यप्रतिपाद्यमभिधीयते ननु नाहमीश्वर इत्यादिप्रत्यक्षेण
किंचिज्ज्ञत्वेन सर्वज्ञत्वविरुद्धधर्माश्रयत्वादिलिंगेन द्वासुपर्णा सयुजेत्यादिश्रुत्या द्वाविमौ पुरुषौ लोके क्षरश्चा

क्षरएवचक्षरः सर्वाणिभूतानिकूटस्थोक्षरउच्यते इत्यादिस्मृत्याचजीवपरभेदस्यावगतत्वेन नत्वमस्यादिवाक्य
मादित्योयूपः यजमानः प्रस्तर इत्यादिवाक्यवदुपचरितार्थमेवेतिचेन्न भेदप्रत्यक्षस्यसंभावितकरणदोषस्या
संभावितदोषवेदजन्यज्ञानेनबाध्यमानत्वात् अन्यथाचंद्रगताधिकपरिमाणग्राहिज्योतिःशास्त्रस्यचंद्रप्रादेशग्रा
हिप्रत्यक्षेणबाध्यापत्तेः पापरक्तेघटोरक्तोनस्यामइतिवत्सविशेषणेहीतिन्यायेनजीवपरभेदग्राहिप्रत्यक्षस्यवि
शेषणीभूतधर्मभेदविषयत्वाच्च अतएवनानुमानमपिप्रमाणं आगमबाधात् मेरुपाषाणमयत्वानुमानवत्
नाप्यागमांतरविरोधः तत्पराततत्परवाक्ययोस्तत्परवाक्यस्यबलत्वेन लोकसिद्धभेदानुवादकद्वासुपर्णादिवाक्या
पक्षयोपक्रमोपसंहाराद्यवगताद्वैततात्पर्यविशिष्टस्यतत्वमस्यादिवाक्यस्यप्रबलत्वात् ननुजीवपरैक्यविरुद्धध

र्माश्रयत्वानुपपत्तिः शीतस्यैव जलस्योपाधिकोष्णाश्रयत्ववत्स्वभावतो निर्गुणस्यैव जीवस्यांतःकरणाद्युपाधिककर्तृत्वाद्या
श्रयत्वप्रतिभासोपपत्तेः पारिजठ्राद्वेष्मारोपितनराप्रकृतेपि तुल्यं नच सिद्धांते कर्तृत्वमस्य कस्यचिदप्यभावादा
रोप्यप्रमाहितसंस्काराभावे कथमारोप इति वाच्यं लाघवेनारोप्यविषयसंस्कारत्वेनैव तस्य हेतुत्वात् नच
प्राथमिकारोपे का गतिः कर्तृत्वाद्यध्यासप्रवाहस्यानादित्वात् तत्त्वंपदवाच्ययोरैक्यायोगेपि लक्ष्यस्वरूपयो
रैक्यमुपपादितमेव अत एव तत्प्रतिपादकतत्त्वमस्यादिवाक्यानामखंडार्थत्वं सोयमित्यादिवाक्यवत् नच कार्य
परिणामेव प्रामाण्यं पुत्रस्ते जात इत्यादौ सिद्धेपि संगतिग्रहात् एवं सर्वप्रमाणाविरुद्धश्रुतिस्मृतीतिहासपुराण
प्रतिपाद्यं जीवपरैक्यं वेदांतशास्त्रस्य विषय इति सिद्धं ॥ इति श्री वेदांतपरिभाषायां विषयपरिच्छेदः ॥ ७ ॥

दूदानींप्रयोजननिरूप्यते यदवगतंतत्ववृत्तिनयेष्यते तत्प्रयोजनंतच्चद्विविधंमुख्यंगौणंचेतितत्रदुःखाभावोमु
ख्यप्रयोजनेतदन्यतरसाधनंगौणप्रयोजनंसुखंचद्विविधंसातिशयंनिरतिशयंचेतिसातिशयंसुखंविषयानु
षंगजनितोंतःकरणजनितंवृत्तितारतम्यकृतानंदभावविशेषः एतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजीवंतीति
श्रुतेःनिरतिशयसुखंचब्रह्मैवआनंदोब्रह्मेतिविज्ञानात्विज्ञानमानंदंब्रह्मेत्यादिश्रुतेःआनंदात्मकब्रह्मप्राप्ति
श्चमोक्षःशोकनिवृत्तिश्चब्रह्मविद्ब्रह्मैवभवतितरतिशोकमात्मविदित्यादिश्रुतेः नतुलोकांतरावाप्तिस्वजन्म
वैषयिकानंदोवामोक्षःतस्यकृतकत्वेनानित्यत्वेमुक्तस्यपुनरावृत्त्यापत्तेःननुत्वन्मतेप्यानंदावाप्तेरनर्थनिवृत्ते
श्चसादित्वेतुल्येदोषःअनादित्वेतुमोक्षमुद्दिश्यश्रवणादौप्रवृत्त्यनुपपत्तिरितिचेन्नसिद्धस्यैवब्रह्मरूपस्यमोक्षस्य

सादित्वं ब्रह्मणि तत्साधने प्रवृत्युपपत्तेः अनर्थनिवृत्तिरपि अधिष्ठानभूतब्रह्मस्वरूपतया सिद्धैव लोकेपि प्राप्तप्राप्ति
हृतपरिहारयोः प्रयोजनत्वं दृष्टमेव यथा हस्तगतविस्मृतासुवर्णहीन वहस्ते सुवर्णमिस्त्याप्तोपदेशादप्राप्तमिव
प्राप्नोति यथा वा यथा सर्पगतिस्तद्वत् वक्रयितवक्रायां सर्पाकारवरणायां स्त्रजि सर्पत्वभ्रमवत् नायं सर्प इत्या
प्तवाक्यात् सरिहृतस्यैव सर्पस्य परिहारः एवं प्राप्तस्याप्यानंदस्य प्राप्तिः परिहृतस्याप्यनर्थस्य निवृत्तिर्मोक्षः स ए
व च प्रयोजनं स च ज्ञानैकसाध्यः तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति श्रुतेः अज्ञाननिवृत्ते
र्ज्ञानैकसाध्यत्वनियमाच्च तच्च ज्ञानं ब्रह्मात्मैक्यगोचरं अभयं वै जनक प्राप्तोसीति ब्रह्म वा इदमग्र आसीत्तदा
त्मानमेवावेदाहं ब्रह्मास्मीति इत्यादिश्रुतेः स एषोणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसीत्यादिवाक्ये

थं ज्ञानंमोक्षस्य साधनमितिनारदीयवचनाच्चतच्चज्ञानमपरोक्षरूपंपरोक्षत्वेऽपरोक्षभ्रमानिवर्तकत्वानुपपत्तेः त
च्चापरोक्षज्ञानंतत्वमस्यादिवाक्यादितिकेचित्मनननिदिध्यासनसंस्कृतांतःकरणादित्यपरे तत्रएवंचार्याणाम
यमाशयः संविदापरोक्षं नकरणविशेषोत्पत्तिनिबंधनंकिंतुप्रमेयविशेषनिबंधनमित्युपपादितं तथाचब्र
ह्मणः प्रमातृजीवाभिन्नतयातत्गोचरंशब्दजन्यज्ञानमपिअपरोक्षंअतएवप्रतर्दनाधिकरणेप्रतर्दनंप्रतिप्राणो
स्मि प्रज्ञानात्मानमामायुरमृतमुपास्वेतींद्रप्रोक्तवाक्येप्राणशब्दस्य ब्रह्मपरत्वेनिश्चितेसतिमामुपास्वेत्यस्मदोनु
पपत्तिमाशंक्यतदुत्तरत्वेनप्रवृत्तेः शास्त्रदृष्ट्यात्पदेशोवामदेववदितिसूत्रेशास्त्रेयादृष्टिः शास्त्रदृष्टिरितितत्व
मस्यादिवाक्यजन्यमहंब्रह्मेतिज्ञानंशब्देनोक्तमितिअन्येषांत्वेवमाशयः करणविशेषनिबंधनमेवज्ञानानांप्र

स्पष्टत्वं न विषयविशेषनिबंधनं एकस्मिन्नेव वस्तुनि पटुकरणयोः प्रत्यक्षाप्रत्यक्षव्यवहारदर्शनात् तथा च संवि
त्साक्षात्वे इंद्रियजन्यत्वस्यैव प्रयोजकतया न शाब्दजन्यज्ञानस्यापरोक्षत्वं ब्रह्मसाक्षात्कारमपि मननिदिध्या
सनसंस्कृतं मन एव कारणं मनसैवानुद्रष्टव्यमित्यादिश्रुतेः मनोऽगम्यत्वश्रुतिश्चासंस्कृतमनोविषया न चैवं
ब्रह्मण औपनिषदत्वानुपपत्तिः अस्मदुक्तमननस्य वेदजन्यज्ञानानंतरमेव प्रवृत्ततया वेदोपजीवित्वात्
वेदानुपजीविमानांतरगम्यत्वस्यैव वेदजन्यत्वविरोधित्वात् शास्त्रदृष्टिसूत्रमपि ब्रह्मविषयमानसप्रत्यक्षस्य
शास्त्रप्रयोजत्वादुपपद्यते तदुक्तं अपिराधेनसूत्राच्छास्त्रार्थध्यानजा प्रमा शास्त्रदृष्टिर्मता नां तु वेत्ति वाचस्प
तिः परइतितत्त्वज्ञानं पापक्षयात् सर्वकर्मानुष्ठानादिति परंपरया कर्मणां विनियोगः अत एव तन्मेतं वेदानुव

वनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसाऽनाशकेनेत्यादिश्रुतेः कषायेकर्मभिः पक्वे ततो ज्ञानं प्रवर्तत इत्यादि
स्मृतिश्च संगच्छते एवं श्रवणमनननिदिध्यासनानां विधानात् श्रवणं नाम वेदांतानां ब्रह्मणि तात्पर्यावधारणानुकू
लामानसी क्रिया मननं नाम शब्दावधारितेर्थे मानांतरविरोधशंकायां तन्निवारणानुकूलतर्कात्मकज्ञानजनको मा
नसो व्यापारः निदिध्यासनं नाम अनादिदुर्वासनया विषयेष्वाकृष्यमाणस्य चित्तस्य विषयेभ्य उत्कृष्य आत्मविषय
स्थैर्यानुकूलो मानसो व्यापारः तत्र निदिध्यासनं ब्रह्मसाक्षात्कारे साक्षात्कारणं ते ध्यानयोगानुगता अपश्यन्
देवात्मशक्तिं स्वगुणैर्निगूढामित्यादिश्रुतेः निदिध्यासने च मननं हेतुः अकृतमननस्यार्थदार्ढ्याभावेन तद्विषय
निदिध्यासनायोगात् मनने च श्रवणं हेतुः श्रवणाभावे तात्पर्यानिश्चयेन शाब्दज्ञानायोगेन श्रुतार्थविषयकयुक्

क्तत्वनिश्चयानुकूलमननायोगात् एतानित्रीण्यपिज्ञानोत्पत्तौकारणानीत्येतावन्मात्रंकेचिदाचार्याऊचिरे अपरेतुश्र
वणंप्रधानंमनननिदिध्यासयोस्तुश्रवणात्पराचीनयोरपिश्रवणफलब्रह्मदर्शननिवर्तिकतयाआराद्उपकारकत
यांगत्वमित्याहुःतदयुक्तंगत्वंनतार्तीयश्रोषत्वरूपंश्रुत्याद्यन्यतमप्रमाणगम्यस्यप्रकृतेःश्रुत्याद्यभावेऽसंभवात्त
थाहित्रीहीभिर्यजेदधिदध्नाजुहोतीत्यादाविवमनननिदिध्यासनयोरंगत्वेनकाचिन्नतृतीयाश्रुतिरस्तिनापिबर्हिर्देव
सदनंदामीत्यादिमंत्राणांबर्हिःखंडनप्रकाशनसामर्थ्यवत्किंचिल्लिंगमस्तिनापिप्रदेशान्तरपठितप्रवर्ग्यस्याग्नि
ष्टोमेप्रवणक्तिइतिवाक्यवच्छ्रवणानुवादेनमनननिदिध्यासनवियोजकंकिंचिद्वाक्यमस्तिनापिदर्शपूर्णमासा
भ्यांस्वर्गकामोयजेतेवाक्यावगतफलसाधनताकदर्शनपौर्णमासप्रकरणेप्रयाजादिनामिवफलसाधनत्वेनवग

तस्यश्रवणस्यप्रकरणेमनननिदिध्यासनयोराम्नातंनतुद्रष्टव्यइतिदर्शनानुवादेनश्रवणेविहितेसतिफलवत्तयाश्रवणं
प्रकरणेनतत्संनिधावाम्नातयोर्मनननिदिध्यासनयोःप्रयाजन्यायेनप्रकरणादेवागतेतिचेन्नतेध्यानयोगानुगताअ
पश्यंन्नित्यादिश्रुत्यंतरेनिदिध्यासनस्यदर्शनसाधनत्वेनावगतस्यांगाकांक्षायांप्रयाजन्यायेनश्रवणमननयोरेवां
गतापत्तेःक्रमसमाख्येचदूरनिरस्तेकिंचप्रजादावंगत्वविचारसप्रयोजनःपूर्वपक्षेविकृतीष्वनप्रयाजानुष्टानंसिद्धां
तेतुतत्रापितदनुष्टानमितिप्रकृतेश्रवणंनकस्यचित्स्वकृतिःयेनमनेननिदिध्यासनयोस्तत्राप्यनुष्टानमंगत्वफलं
भवेत्तस्मान्नतार्तीयिकोवत्वंमनननिदिध्यासनयोःकिंतुयथाघटादिकार्येमृत्पिंडादीनांप्रधानकारणताचक्रादी
नांसहकारिकारणतेतिप्राधान्याप्राधान्याव्यपदेशःतथाश्रवणमननिदिध्यासनानामपीतिमंतव्यंसूचितंचैनहि

वरणाचार्यैः शक्तितात्पर्यविशिष्टशब्दावधारणं प्रमेयावगमं प्रति अव्यवधानेन कारणं भवति प्रमाणस्य प्रमेयावगमं
प्रत्यव्यवधानात् मननिदि । ध्यासने तु चित्तस्य प्रत्यगात्मप्रवणतासंस्कारपरिनिष्पन्न तदेकाग्रवृत्तिकार्यद्वारेण ब्रह्मानु
भवहेतुताप्रतिपद्यते इति फलं प्रति अव्यवहितकरणविशिष्टशब्दावधारणस व्यवहिते मननिदिध्यासने तदंगे अंगे
अंगीक्रियत इति श्रवणादिषु मुमुक्षूणामधिकारः काम्ये कर्मणि फलकामस्याधिकारित्वात् मुमुक्षायां नित्यानित्य
वस्तुविवेकस्य । इहामुत्रार्थफलभोगविरागस्य शमदमातितिक्षाउपरमश्रद्धानांच विनियोगः अंतरिंद्रियनिग्रहः शमः
बहिरिंद्रियनिग्रहो दमः शीतोष्णादिद्वंद्वसहनं तितिक्षा विक्षेपाभाव उपरतिः चित्तैकाग्र्यं समाधानं गुरुवेदवाक्ये विश्वा
सः श्रद्धा अत्रोपरमशब्देन संन्यासोऽभिधीयते तथाच संन्यासिनामेव श्रवणाधिकार इति केचित् अपरे तु उपरमश

ब्देन संन्यासवाचकत्वाभावाद्विक्षेपाभावमात्रस्य गृहस्थेष्वपि संभवाज्जनकादेरपि ब्रह्मविचारस्य श्रूयमाणत्वात्सर्वा
श्रमधारणादि विधानमित्याहुः सगुणोपासनमपि चित्तैकाग्र्यद्वारा निर्विशेषब्रह्मसाक्षात्कारहेतुः तदुक्तं निर्विशेषं
परं ब्रह्म साक्षात्कर्तुमनीश्वराः येमंदास्तेनुकंप्यंते सविशेषनिरूपणैः १ वशीकृते मनस्येषां सगुणब्रह्मशीलनात् तदे
वाविर्भवेत्साक्षात् अपेतोपाधिकल्पनमिति २ सगुणोपासकानां चार्चिरादिमार्गेण ब्रह्मलोकं गतानां तत्रैव श्रवणा
दिनाउत्पन्नसाक्षात्कारं ब्रह्मणा सह मोक्षः कर्मिणां धूम्रादिमार्गेण पितृलोकं गतानां उपभोगेन कर्मक्षये सति पू
र्वकृतसुकृतदुःकृतानुसारेण ब्रह्मादिस्थावरांतेषु पुनरुत्पत्तिः तथा च श्रुतिः रमणीयचरणा रमणीयां योनिमा
पद्यंते कपूयचरणाः कपूयां योनिमापद्यंत इति प्रतिषिद्धानुष्ठाने तु रौरवादिनरकविशेषेषु तत्तन्मायोपचितं तो

त्रहुःखमनुभूयगूकरादितीयग्योनिषुस्छा।वरादिषोत्पोत्पत्तिरित्यलमतिप्रसंगेन निर्गुणब्रह्मसाक्षात्कारवस्तुनल्लो
कांतरेगमनेनतस्यप्राणाउत्क्रामंतीतिश्रुतेः किंतुयावत्प्रारब्धक्षयंसुखदुःखेअनुभूयपश्चाद्पवृज्यते नतुक्षीयं
तेचास्यकर्माणितस्मिन्दृष्टेपरेपरावरे इत्यादिश्रुत्या ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेर्जुनेतिस्मृत्याच ज्ञानस्य
सकलकर्मक्षयहेतुत्वेनिश्चयेसतिप्रारब्धकर्मावस्थानमनुपपन्नमितिचेन्नतस्यतावदेवचिरंयावन्नविमोक्षेऽथसं
पत्स्यतइत्यादिश्रुत्यानाभुक्तंक्षीयतेकर्मेत्यादिस्मृत्याचोत्पादिकर्मव्यतिरिक्तानांसंचितकर्मणामेवज्ञानविनाश्यत्वा
वगमात् संचितंद्विविधंसुकृतदुःकृतंचेतितथाचश्रुतिः तस्यपुत्रादायमुपयंतिसुहृदःसाधुकृत्यांद्विषंतःपापकृ
त्यामितिनतुब्रह्मज्ञानान्मूलाज्ञाननिवृत्तौतत्कार्यप्रारब्धकर्मणोपिनिवृत्तेः कथंज्ञानिनोदेहधारणमुपपद्यतइति

चेन्नअप्रतिबद्धज्ञानस्यैवाज्ञाननिवर्तकतयाप्रारब्धकर्मरूपप्रतिबंधकदशायावत्ज्ञाननिवृत्तेरनंगीकारात्नन्वेव
मपितत्वज्ञानादेकस्यमुक्तौसर्वमुक्तिःस्यात्अविद्यायाएकत्वेनतन्निवृत्तौक्वचिदपिसंसारायोगादितिचेन्नइष्टापत्ते
रित्येकेअपरेतुतद्दोषपरिहारायचैंद्रोमायाभिरितिबहुवचनश्रुत्यनुगृहीतमविद्यानात्वमंगीकर्तव्यमित्याहुःअ
न्येतुएकैवाविद्यातस्याएवाविद्यायाःजीवभेदेनब्रह्मस्वरूपावरणशक्तयोनानातथाचयस्यब्रह्मज्ञानंतस्यब्रह्म
स्वरूपावरणशक्तिविशिष्टाविद्यानाशःनत्वन्यंप्रतिब्रह्मस्वरूपावरणशक्तिविशिष्टाविद्यानाशइत्यभ्युपगमा
न्नैकमुक्तौसर्वमुक्तिःअतएवयावदधिकारमवस्थितिराधिकारिणामित्यस्मिन्नधिकरणेअधिकारिपुरुषाणा
मुत्पन्नत्वज्ञानानांदेहधारणानुपपत्तिमाशंक्याधिकारापादकप्रारब्धकर्मसमाप्त्यनंतरंविदेहकैवल्यमितिसि

द्धांतिनं नद्धक्तमाचार्यवाचस्पतिमिश्रैः उपासनादिसंसिद्धितोषितेश्वरचोदितं अधिकारं समाप्यैते प्रविशंतिप
रंपदमिति एतच्चैकमुक्तौ सर्वमुक्तिरितिपक्षे नोपपद्यते तस्मादेकाविद्यापक्षेपिप्रविदेहकैवल्यमितिसिद्धांते जीव
मावरणभेदोपगमेन व्यवस्थोपपादनीया तदेवं ब्रह्मज्ञानान्मोक्षश्चानर्थनिवृत्तिरतिशयानंदावाप्तिश्चेति प्रसिद्धं
प्रयोजनं॥ ॥इतिश्रीधर्मराजदीक्षितविरचितायां वेदांतपरिभाषायामष्टमःपरिच्छेदः ८ ॥श्रीपरब्रह्मार्प
णमस्तु॥ संमत् १९०७ प्रवर्तमाने अश्विनशुद्ध १ प्रतिपद्यां लिखितं॥